Sáma Veda Bháshya
by Mádhava Áchárya
Parts I & II

1/1973
38238
143041

3
1973

Sama Veda Bhashya

Part I

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः॥ॐनमःसामवेदाय॥रजोजुषेजन्मनिसत्ववृत्तयेस्थितौप्रजानांप्रलयेतमःस्पृशे॥अजायसर्गस्थितिनाशहेतवेत्रयीमयाय
१ त्रिगुणात्मनेनमः॥षड्विंशत्प्रकारमंत्राः॥प्रेषाःकरणाःक्रियमाणानुवादिनःस्तोत्रशस्त्रसुगताजपानुवचनेगताश्च॥एतेपंचप्रकाराऋग्व्याख्या
यांभवंति॥अन्येसामव्याख्यायामुच्यंते॥प्रस्तावश्चोद्गीथःप्रतिहारोपद्रवस्तथा॥निधनंपंचमंचाहुर्हिंकारंप्रणवमेवच॥आशीस्तिस्तुतिसं
ख्यानंप्रलापःपरिदेवनं॥प्रैषमन्वेषणंचैवसृष्टिराख्यानमेवच॥सप्तधागेयमेकेषामन्येषउधाविदुः॥पंचविधंतुसर्वेषामध्वरार्थंप्रचक्षते॥अयं
पिस्तोत्रप्रकाराःअयंवावलोकोहाउकारोवायुर्हाइकारश्चंद्रमाअथकारः॥आत्मेहाकारःअग्निरीकारःआदित्यऊकारःनिहवएकारःविश्वेदेवाऔहो
ईकारःप्रजापतिर्हिंकारःप्राणःस्वरोन्नंयावाग्विराट्अनिरुक्तस्त्रयोदशःस्तोभःसंचरोहुंकारः॥एतेषट्त्रिंशत्प्रकाराःसामव्याख्यायांभवंति
॥साम्नांचप्राधान्यमस्मिन्सामवेदे॥यतस्तोत्राणितानि॥तान्येवमंत्राःछंदोगानांतानिचऋग्गव्यूढानि॥स्तोभसामानिआदिमध्यांतनिध
नानिपदविभाग्यानि॥स्तोभविभाग्यानिपदस्तोभविभाग्यानितेषांचदेवताअग्निरिंद्रःप्रजापतिःसोमोवरुणस्त्वष्टाअंगिरसःपूषासरस्वती
इंद्राग्नीइडानिधनानियदनिधनानीकारनिधनानीत्याग्नेयानिसर्वाणिनिधनवंत्यैंद्राण्यन्यान्यादिष्टेभ्यःसर्वाणिस्वाराणिप्राजापत्यानिय

वामदेव्यमित्येवमादीनिनिरुक्तसिद्धादेवताप्रकाराःअन्येपिब्राह्मणसिद्धाःसर्वदेवत्यंवैवामदेव्यंयत्कवतीषुतेनप्राजापत्यंकोहिप्रजापतिर्यदनि
रुक्तासुतेनप्राजापत्यमनिरुक्तोहिप्रजापतिर्यद्गायत्रीषुतेनाग्नेयंगायत्रंछंदोह्यग्नियत्त्रिष्टुप्स्वन्यदधुस्तेनैंद्रंसर्वाणिहित्रिष्टुप्स्थानीन्द्रस्यनिष्केवल्या
नियन्मैत्रावरुणोनुशंसतितेनमैत्रावरुणंयद्धृकुदेवत्यउत्तमंपदंतेनवैश्वदेवमितितेनब्राह्मणसिद्धादेवताप्रहंतेसर्वत्र॥अन्येपिदेवताप्रका
राःसाम्नां॥यद्देवत्यासुस्तुवतेसास्तोत्रदेवतेति॥अनेनापिप्रकारेणदेवताज्ञातव्या॥अन्येपिप्रकाराविद्यतेस्तोत्राणां॥त्रयःपावमानाःसौम्याः
प्रथममाज्यमग्नेयंद्वितीयंमैत्रावरुणंतृतीयमैंद्रंचतुर्थमैंद्राग्नं॥पृष्ठान्यैंद्राणिआग्नेयमग्निष्टोमसामन्वित्येनकश्चिद्वृहदग्निष्टोमसामवार
वंतीयमग्निष्टोमसामश्रुत्यमग्निष्टोमसामेत्येवमेभिःऋतुविशेषैस्तानिभवंति॥प्रथममुक्तमाग्नेयंद्वितीयतृतीयचतुर्थेचऐंद्रावरुणमैंद्राबार्ह
स्पत्यमैंद्रावैष्णवमैंद्रःषोडशीविष्णोःशिपिविष्टवतीषुबृहद्राजपयसामाऐंद्राणिरात्रिस्तोत्राणिद्वादशोवतुन्निदेवत्यःसंधिरग्निरुषाश्विना
वितियथासंख्यमप्तोर्यामिणप्रथममाग्नेयमतिरिक्तस्तोत्रंद्वितीयमैंद्रंतृतीयंवैश्वदेवंचतुर्थंवैष्णवमेवंसर्वेषुऋतुषुसमासाद्देवताविचारउक्तः॥
एकाहाहीनसत्रांतेषुआर्षप्रकारश्चसाम्नामार्षेयसिद्धःसर्वसाम्नांग्रहीतव्यः॥ऋषेश्चोगुणभूतास्तासामार्षेयंपाक्षकमेवमार्षप्रकारउक्तः॥इ

5/1973

दानींछंदसःप्रकारउच्यते॥गायत्रंप्रातःसवनंगायत्रीबृहतीत्रिष्टुबितिमाध्यंदिनंसवनं॥प्रथमंपृष्ठंबृहत्यःककुबुत्तराद्वितीयंवामदेव्यंगायत्री
२ षुतृतीयंपृष्ठंबार्हतंचतुर्थंच॥आर्भवेककुबुष्णिहावनुष्टुब्जगतीचक्वचिद्द्विपदाअपिभवंत्यार्भवेक्वचिदक्षरपंक्तयः॥बृहत्यःककुबुत्तराअ
ग्निष्टोमसाम्निप्रथममुक्थ्यंगायत्रीषुब्रह्मवर्चसकामेयाश्यानिप्रणयेषुरित्युक्थ्यप्रणयनेनप्रकारविशेषाःविछंदसऋचोभवंतिइतिककु
प्प्रथमायोष्णिगथपुरउष्णिगनुष्टुब्वानुष्टुभीरात्रिःबृहत्यःककुबुत्तराः॥संधिरथोर्याम्ण्यतिरिक्तस्तोत्राणिजराबोधीयप्रभृतीनिगायत्रं
दस्कान्येवमेकाहाहीनसत्रेषुछंदोदेवतार्षप्रयोगान्याख्यउक्तःइदानींप्रैषादयोमंत्राउच्यंते॥प्रैषास्तावद्दैव्याःशमितारआरभध्वमित्यादयः॥
करणाइदमहंआवसोःसदनेसीदामीत्यादयः॥क्रियमाणानुवादिनःयुवासुवासाःपरिवीतआगादित्यादयःस्तोत्रशस्त्रगताःअग्नआ
नंआत्वारथंयथोतयइत्यादयःजपानुवचनगतास्तदथवाचप्रथमंभक्षीयआप्योरेवतीरित्यादयः॥एतेसर्वेप्रयोगकालेस्वार्थंप्रतिपादयंतः
कर्मणोंगत्वंप्रतिपद्यंते॥नउच्चारणमात्रेणकृतएततएतावत्प्रैषाःकरणाःक्रियमाणानुवादिनश्चतेषांयोर्थःसकर्मणोंगत्वंप्रतिपद्यते॥अंगं
चानुष्ठातव्यं॥नचास्मृतमनुष्ठातुंशक्यते॥अतःकर्मणोंगस्मरणमपेक्षितं॥तच्चप्रैषादिभिःशक्यतेकर्तुमतःप्रैषादयस्तावत्प्रयोगकालेस्वा २

र्थंप्रतिपादयंतःकर्मणोंगत्वंप्रतिपद्यंतइतियेपिस्तोत्रशस्त्रगतास्तेषामर्थोयद्यपिकर्मणोंगत्वंनप्रतिपद्यते॥तथापितमेवार्थंप्रत्याययंतः
कर्मणोंगत्वंप्रतिपद्यंते॥कथंस्तुतिर्हिस्तोत्रशब्देनाभिधीयते॥स्तुतिश्चकागुणिनःप्रस्तावात्प्रयोगकालेस्वार्थंप्रतिपादयंतःगुणैःसंबं
धप्रतिपादनो॥नगुणपदानामुच्चारणमात्रंकृतएतत्॥योहिलोकेअभ्यासार्थंगुणपदानामुच्चारणंकरोतिनतस्यस्तोतीतिव्यपदेशाभावात्
तःस्तोत्रशस्त्रगताअपिमंत्रास्वार्थमेवप्रतिपादयंतःकर्मणोंगत्वंप्रतिपद्यंतइति॥येपिजपानुवचनगतास्तेषांयद्यपिजपतिनाविधिना
वाधातुनावाउच्चारणमात्रंचोदितं॥तथापिसतिअर्थप्रत्यायपंतःकर्मणोंगत्वंप्रतिपद्यंते॥कथंयोहवाअविदितार्षेयछंदोदैवतस्यमंत्र
स्यकर्मणिविनियोगःप्रतिषिध्यते॥नचअविज्ञातार्थस्यऋषिदैवतंशक्यंविज्ञातुंपरिज्ञानेचगुणःश्रूयते॥अथयोमंत्रोमंत्रेवेदसर्वमायु
रेतिश्रेयान्भवत्ययातयाम्न्यस्यछंदांसिभवंतितस्मादेतानिमंत्रेविद्यादृषीणांसंस्थानोभवतित्यस्यानोभवतिब्रह्मणस्वर्गेलोकेमहीयते
स्मरलानायतेपुनर्यएवंवेदइत्येवमादिभिर्वाक्यैःपरिज्ञानंप्रशस्यते॥तस्मात्तेपिस्वार्थंप्रत्याययंतैनैवकर्मणोंगत्वंप्रतिपद्यंतइत्युपपन्नं॥सर्व
मंत्राणांकर्मणोंगत्वप्रतिपादनार्थंबोद्धव्योर्थोयस्मात्तस्माद्बाध्यंप्रसूयते॥यच्चसाम्नांस्तोभःप्रकारविशेषाआशास्तिस्तुतिसंख्यानादयः॥

7/1973

तेपिस्वार्थंप्रतिपादयंतः कर्मणोंगत्वंप्रतिपद्यंतेतथापितेषांस्तोभानामुद्देशतः स्वरूपमुच्यते॥ अगन्मज्योतिरमृताअभूम॥ अंतरिक्षंपृथिव्या
३ अध्यारुहामदिवमंतरिक्षाद्ध्यारुहाम॥ अविदामदेवान्समुदैवरगन्महीत्येतदाशास्महे एषा आशास्तिस्तुतिश्चनमोत्रायनमोत्रपतयइति
संख्यानंयेदेवादिविषदः॥ अंतरिक्षसदः पृथिवीषदः अप्सुषदः असंख्यातासहस्राणियेरुद्राः एतत्संख्यानरिशासइडुमुडितिप्रलयः॥
यदीद्राहंयथात्वमित्येवंपरिदेविंतउन्नयामीतिप्रैषः परिदेवनंवाततोविराडजायतेतिएवंगुणानामन्वेषणं॥ स्पष्टश्चैतदेवोदाहरणंअ
ख्यातंचयेन्येत्रयोदशस्तोताः अयंवावलोकोहाऊकारइत्येवमादयः॥ तत्रहाऊकारेभूर्लोकस्यदैवतत्वंवायोर्हाईकारेचंद्रमसोथका
रेएवंसर्वस्तोभानांद्रष्टव्यं॥ योनिरुक्तस्त्रयोदशस्तोभः डुमडुमकिटूकिट्सः॥ स्वादमिगारोएकारमकारयकारस्वासः स्वदेहकारमका
रनासिक्यावानिगारे॥ यथावसिष्ठस्यप्राणापानयोः एतेसर्वेनिरुक्ताः॥ यथाकुपकुपविविविविविवीफालफलफलफल॥ हाउहाउहाउ
हाउवाग्वहहहहएवंविधिनिरुक्ताः प्राजापत्याः॥ संचारोडुक्कारोगत्यर्थः॥ एवंसर्वस्तोभानांबोध्यव्योर्थोयस्मात्तस्मात्साम्नांकेषांचिद्व्याख्यास्त ३
यते॥ तत्रार्षछंदोदैवतब्राह्मणविनियोगप्रकारउक्ताः समासतः सामान्याः॥ इदानींविशेषतः केषांचित्साम्नांउन्नयप्रभृतीनांप्रव्या

व्याख्याक्रियते॥ तत्रार्षमुच्यते॥ आदित्यस्यात्वयंतदादित्यमित्याचक्षते॥ विनियोगस्तुयेषांज्योतिष्टोमादिषुक्रतुषुसाक्षान्नस्तूयते॥ तेषांवाच 9/1973
स्तोमेषुविनियोगोबृहत्वात्स्तोमानां॥ एकयाप्रथमस्यबहिष्पवमानंदशभिर्द्वितीयस्यशतेनतृतीयस्यसहस्रेणचतुर्थस्य अतः ऊर्ध्वंदशगुण
क्रमाद्दशभिः सहस्रैर्होतुराज्यस्यशतेनसहस्राणांमैत्रावरुणस्येत्येवं॥ अपरिमितानिसामानिअर्बुदन्यर्बुदतिखर्वखर्वमेवबहुत्वात्सर्वसाम्नांवि
नियोगः तत्रोन्नयंसामउन्नयामिहोईऊर्ध्वमुन्नयाम्युन्नयामिनपंचविंशकंपुरुषंशरीरावस्थितमादित्यमेकत्वंनयामिपरेणादित्यास्मनाहोईति
विश्वेदेवाहोइकारोविश्वेभ्योदेवेभ्योयज्ञेनऋणंवापुरुषोभवति॥ प्रजयापितृभ्यः स्वाध्यायेनऋषिभ्यएवंऋणत्रयमनिवर्त्यएवादित्यलोकंयि
यासुरहंततोविश्वेदेवान्प्रार्थयाम्यहं॥ वाक्मनः प्राणोपानोव्यानइत्येवमादयस्तोभाआशास्तिस्वरूपाएतत्सर्वममभवत्वित्याशास्महे॥ आदित्यः
पित्र्यआयुः पित्र्यंपितृस्वरूपत्वमादित्यस्यज्ञापयतिआषः प्राप्तिर्यजमानस्यआशास्महे॥ हाउहाउहाउभ्राजाह्॥ सिरायुश्वसवितुरन्वायंतेउदुत्यं
जातवेदसमितिउक्तार्थहाऊहाऊभ्राजाओवा॥ अर्चिः शोचिस्तपोहरः एतेदीप्तिपर्यायाः भाशाब्दश्च॥ इतिनिधनंशांबरंसामसर्वाण्येतान्यादित्यदे
वत्यानिस्तोभश्च॥ एवंसर्वसाम्नांयेत्रयोदशविधास्तोभाअयंवावलोकोहाऊकारइत्यादयस्तेसमासतोव्याख्याताः छंदसिकोत्तररहस्याः पंच

ग्निनामाधेयेनश्रीनारायणसूनुनासवितुः परांभक्तिमालंब्यतत्प्रसादाल्लब्ध्यंकृतंयदत्रन्यूनंयदतिरिक्तंव्याहतंपुनरुक्तंभिन्नसंस्थानंयुक्तिहीनं
४ चतत्सर्वंभूमिदेवैःसज्जनैर्भूत्वाक्षंतव्यमिति॥एषएवसंबंधोव्याख्यानेपि॥अग्न॥भरद्वाजस्यार्षं।हे।अग्ने।आयाहि।आगच्छ।मिमर्थंपुनरागच्छ
मि।उच्यतेवीतये।भक्षणायेत्यर्थः॥कस्यसामर्थ्यात्।ध्यविषांएसचगृणानः स्तूयमानः॥हव्यदातयेहविर्दानार्थमित्यर्थःतिहोतानीत्यर्थमुपसर्गः
सत्सीत्याख्यानेनसंबधयितव्यः होताआह्वाता॥केषां॥देवानामित्यध्याहारः निषत्सिनिषीदेत्यर्थः॥क्वपुनर्निषीदामिउच्यते॥बर्हिषीपदेतदास्तीर्णब
र्हिस्तोत्रेत्यर्थः॥ १॥त्वमग्नेभारद्वाजस्यार्षं।अग्नेत्वंयज्ञानांहोता।आह्वाता॥विश्वेषांसर्वेषांहितनिहितस्थापितइत्यर्थः॥कैःउच्यतेदेवेभिर्देवैरित्यर्थः
॥क्वपुनर्निहितःउच्यतेमानुषेजनेमनुष्यलोकेइत्यर्थः॥२॥अग्निंमेधातिथेरार्षंपरस्ययःसंदेशंकथयतिसदूतइत्युच्यते॥अग्निंदूतंसंदेशहरंवृणी
महेप्रार्थयामःहोतारंविश्ववेदसइतिधननामविश्वंवेदोयस्यविश्ववेदाःसर्वधनमित्यर्थः॥अथवाविदज्ञानेइत्यस्यैतद्रूपंविश्वंवेत्तीतिविश्ववे
दाः॥तंविश्ववेदसंसर्वज्ञमित्यर्थः॥अस्ययज्ञस्ययज्ञस्ययस्यषष्ठीनिर्देशात्परिसमाप्त्यर्थमितिवाक्यशेषः॥सुक्रतुंसुक्रतुरितिकर्मनाम॥प्रज्ञा
नामवा॥सुशब्दःशोभनवचनः॥सुकर्माणांसुयज्ञंवा॥३॥अग्निः॥भरद्वाजस्यार्षं।अग्निर्वृत्राणिशत्रुकुलानिस्तोतुःयष्टुश्चजंघनत्जघानअत्यर्थंहं ४

तिपुनःपुनर्हंतीत्यर्थः॥कस्यसामर्थ्यात्स्तोतुरितिशेषःद्रविणस्युःद्रविणंधनंस्युप्रत्ययोस्त्वादर्थेमनुवदर्थेद्रविणवानित्यर्थःअथवाहविर्लक्षणं 11/1973
द्रविणंधनंतदिच्छुर्द्रविणस्युःहविरिच्छुःस्कामाइत्यर्थःविपन्यपापनिरितिस्तुत्यर्थःविशब्देवैविध्यर्थःविविधयास्तुत्यतत्तीयानिर्देशात्स्त्वनः
संनितिवाक्यशेषःसमिधःसम्यग्दीप्तःशुक्रःशुक्लवर्णःआहुतःमयादत्याहुतःसन्नित्यर्थः॥४॥प्रेष्ठंवो॥उशनस्यार्षंप्रेष्ठंअतिशयेनप्रियंवः॥
बहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं।त्वांअतिथिंअतिथिस्थानीयंअथवाअतिर्गत्यर्थः॥तस्मादयंइथिन्प्रत्ययःअतिथिंगंतारंअतिथिं
सर्वयजमानगृहान्प्रतिगंतारमित्यर्थःस्तुषेनेदंलडात्मनेपदमध्यमपुरुषैकवचनंकिंतर्हिपंचमस्यलकारस्यात्मनेपदेउत्तमपुरुषैकवचनंस्तौ
मीत्यर्थःकथंपुनस्तौमिउच्यतेमित्रमिवप्रियमिवयथाकश्चितप्रियंमित्रंस्तौतितद्वदित्यर्थःअग्नेइत्यत्रसंबुध्येकवचनमिदंद्वितीयैकवच
नस्यस्थानेद्रष्टव्यं॥अग्निं।रथं।न।रथो।रंहतेर्गतिकर्मणःनशब्दस्तुउपरिष्टादुपाचाराद्रुपमानार्थःरथमिवगंतारमिवयथाकश्चिदश्वमनं
चरीध्रंगंतारंस्तौतितद्वदित्यर्थःकीदृशमग्निंउच्यतेवेघंवेदनार्हंज्ञानार्हमित्यर्थः॥५॥त्वंनो॥पुरुमीढस्यवाआर्षंअग्नेसुदीप्तत्वंनःअस्मान्पा
हिअग्ने।महोभिर्महद्भिरित्यर्थःकैरतःसामर्थ्यात्पालनैःपाहिरक्षेत्यर्थः॥विश्वस्याःसर्वस्याःअरातेःअरातिःशत्रुःस्त्रीलिंगनिर्देशोजात्यपेक्षः

५

सर्वस्यात्राशुजातेः सकाशात् रक्षेत्यर्थः।उतापिच।द्विषः द्वेष्टुः मर्त्यस्य मनुष्यस्य सकाशाद्रक्षेत्यर्थः॥६॥७।एह्यूषुब्र।भरद्वाजस्यार्षं।एहिआय
हि आभिमुख्येनागच्छेत्यर्थः। उ सु इति पादपूरणे।ब्रवाणि उच्चारयामि।तेतव अग्ने इत्थासत्या इत्यर्थः।इतरा असत्याः अन्याः असत्याः सत्याश्च
असत्याश्चेत्यर्थः।गिरः स्तुतिलक्षणावाचः स्तुतिरित्यर्थः एभिः एतैरित्यर्थः।वर्धसेवर्धस्व।इंदुभिः सोमैरित्यर्थः।७॥७॥आतेवत्सोम
नोवत्सस्यार्षं।आ इत्ययमुपसर्गः यमदित्याख्यातेन संबंधयितव्यः।यमिश्चबंधनार्थः।आभिमुख्येन बद्धवान्।वत्सोनामाहमृषिः।ते
तवमनः केनपुनर्बद्धवान्।सामर्थ्यात्स्तुत्याहविःप्रदानेनच॥कथंपुनर्बद्धवान् उच्यते परमात्रिषधस्थात्।परमं उत्कृष्टं तस्मात्।चिच्च
द्दः पादपूरणः सहतिष्ठंतियत्र देवताः सस धस्थः स्वर्ग उच्यते तस्मात्स्वर्गात् पंचमीनिर्देशाच्च॥आगमयेतिवाक्यशेषः॥केनपुनराग
मय।उच्यते।त्वांकामयेगिरा।स्तुतिलक्षणयावाचेत्यर्थः॥७॥८॥त्वामग्नेपुष्क०।भरद्वाजस्यार्षं॥अत्रेतिहासमाचक्षते।सर्वमिदमंधत
मआसीत्।अथमातरिश्वावायुः आकाशेसूक्ष्ममग्निमपश्यत्सतममथ्नात्।अथर्वाचऋषिः।तदेतदुच्यते।हेअग्नेत्वां।पुष्करं।पुष्करमि
त्यंतरिक्षनाम।अंतरिक्षात्।अधिशब्दश्च अधिपरी अनर्थकावितिकर्मप्रवचनीयः पादपूरणः।निरमंथत।नितरांमथितवान्।की दृशा ५

ता।अंतिरिक्षात् उच्यते।मूर्ध्नः।प्रधानभूतात्।कस्यउच्यते।विश्वस्यसर्वस्यवाघतः रित्विग्नामैतत्।अंतर्णीतमत्वर्थंचात्रद्रष्टव्यं॥ऋत्वि
जोयजमानस्यच।षष्ठीनिर्देशात्।अर्थायेतिवाक्यशेषः॥९॥अग्नेविवस्व०।वामदेवस्यार्षं हे अग्ने विवस्वत्।विवासनवत्तमसांविवास
नकरं।किंतत्सामर्थ्यात्।ज्योतिः आभर आहर आनप्रदीप्तोभवेत्यर्थः।अस्मभ्यंऊतयेमही।अस्माकंपालनस्यमहते अर्थायेत्यर्थः
कस्मात्पुनर्दीप्तोभवामि उच्यते देवोह्यसीतिहिशब्दोयस्मादर्थे यस्मात्त्वंदेवः असिभवसि।तस्माद्दीप्तोभव।नचास्माकंपालनायैव
केवलंदीप्तोभव।किंतर्हि।नोदृशे।अस्माकंदर्शनायेत्यर्थः॥प्रथमस्यप्रथमादशत्या।नमस्ते।आयुंक्ष्वाहेरार्षं।विरूपस्यवा॥नमस्तेइत्ये
तिवाक्यशेषः।नमस्कृत्य।ते।षष्ठ्येकवचनमिदंद्वितीयैकवचनस्यस्थानेद्रष्टव्यं।हेअग्ने।त्वां।ओजसे।ओजइतिबलनाम।तस्मा
दित्ययंतानदर्थेचतुर्थी।बलार्थमित्यर्थः।गृणंति।स्तुवंति।देवः।कृष्टयः।मनुष्याः।त्वमपिस्तूयमानः।अमैः रोगैः अनी[illegible]ः।अमैः
रोगैर्भयैर्वा।अमित्रंशत्रुं।अर्दय।नाशयविनाशयेत्यर्थः॥१॥इतंवोवि।वामदेवस्यार्षं।इतं।संदेशाहरं।वः बहुवचनमिदंएकवचनस्य
स्थानेद्रष्टव्यं।त्वांविश्ववेदसं।विश्वइतिसर्वनाम।वेदसइत्यपिधननामविवज्ञानइत्यस्यवा।वेदज्ञानंविश्वंवेदे[illegible]स्यसविश्ववेदाः॥तं

13
1923

६८ विश्ववेदसं।सर्वज्ञंसर्वधनंवेत्यर्थः।हव्यवाहं।हविषांवोढारं॥अमर्त्यं।अमरणधर्माणं।यजिष्ठं।अतिशयेनयष्टारं।ऋंजसे।ऋंजतिःप्रसाधनकर्मा
मध्यमपुरुषैकवचनमिदंउत्तमपुरुषैकवचनस्यस्थानेद्रष्टव्यं॥ऋंजामिप्रसाधयामीत्यर्थः॥गिरा।स्तुतिलक्षणयावाचा॥२॥उपत्वाजाम०॥
प्रयोगस्यार्षं।उपेत्ययमुपसर्गःगिरइत्यनेनसंबंधयितव्यः।त्वांइत्यतद्द्वितीयैकवचनं॥षष्ठ्येकवचनस्यस्थानेद्रष्टव्यं।तव।जामयोभगिन्यः।
कास्तुनरग्नेर्भगिन्यः।ज्वालाः।कीदृश्योभगिन्यउच्यतेगिरःउपगम्ययाः।गिरंतिभक्षयंति।हवींषिताःगिरः।भक्षयित्र्यइत्यर्थः।देदिशती।अत्य
र्थं।ददत्यइत्यर्थः।किंददत्यःसामर्थ्यात्धनंहविःकृतःहविषायाःक्रियंतेताःहविष्कृतः।कथंपुनर्हविषाताःक्रियंते।आज्येहिप्रक्षिप्यमाणेब
हुलाभवंति॥प्रत्यक्षमेतत्।वायोःवायुर्गतासर्वयजमानगृहान्प्रतिगंतुस्तद्अनीके।अनीकशब्दोमुखवचनः।खड्गनीकंखड्गस्यमुखमुच्यते॥
तस्मादियंसप्तमी॥अनीकेमुखइत्यर्थः।अस्थिरंतिष्ठतीत्यर्थः॥३॥उपत्वाग्ने।मधुछंदसः।आर्षंउपेत्ययमुपसर्गः।एमसीत्याख्यातेनसंबं
धयितव्यः।त्वात्वांहे।अग्नेदिवेदिवे।अहन्यहनीत्यर्थः।दोषावस्तः।दोषेतिरात्रेर्नाम।वस्ता।आच्छादयिता।रात्रौयःस्वेनज्योतिषातमांस्याच्छा
दयति।सदोषावस्ता।तस्यसंबोधनंहेदोषावस्तःरात्रौस्वेनज्योतिषातमआच्छादयितरित्यर्थः॥धिया।स्वयाप्रज्ञया।नमः।नमस्कारं ६८

स्तुतिवचनः।स्तुतिं।हरंतः।भरंतः।प्रापयंतःइत्यर्थः।उपएमसि।उपगच्छामोवयं॥४॥जराबोध०।शुनःशेपस्यार्षं।अत्रेतिहासमाचक्षते॥अग्निः 15/1973
शुनःशेपमुवाच।रुद्रंस्तुहि।रौद्रोहिपशुर्वः।सतंप्रत्युवाच।नाहंजानामिरुद्रंस्तोतुंत्वमेवचैनंस्तुहीतितदेतदनयाऋचाउच्यते॥जरास्तुतिस्तां
यःस्वयंबुध्यतिबोधयतिवादेवान्सजराबोधस्तस्यसंबोधनं॥हेजराबोध।यन्मामवोचः।तत्त्वमेवविविविड्ढि।वेत्थजानासि।नाहं।अथवाविवि
ड्ढीति।विष्णुव्याप्ताविस्येतस्येदंरूपं।अयंचधातुःवेषइतिकर्मनामसुपाठात्।नाम्नांचाख्यातवत्वात्।कर्मणिचकारोत्यर्थस्यसंभवात्॥करोत्यर्थो
पिव्याप्त्यर्थएवेतिगम्यते॥तत्कुर्वित्यर्थः।किंतत्उच्यते।विशेविशे।मनुष्यस्यार्थाययज्ञियाय।यज्ञसंपादिनोर्थाय।स्तोमंस्तोत्रं।रुद्राय।दृशीकं।दर्श
नीयं।अथवारोदनक्रियायोगात्।अग्निरेवात्ररुद्रउच्यते।जराबोधइत्यपिअंतरात्मनःसंबोधनं।प्रेष्टश्चहेमदीयअंतरात्मन्।कुरुकिंतत्।सर्व
मनुष्याणांयज्ञसंपादिनः।अग्नेरर्थाय।स्तोमंदर्शयति॥५॥प्रतित्यंचा०।मेधातिथेरार्षं।प्रतीत्येषलक्षणे।कर्मप्रवचनीयः।यच्छब्दःतच्छब्दपर्या
यः।तच्छब्दश्रुतेश्चयोग्यार्थसंबंधोयच्छब्दोध्याहर्तव्यः।योयंसमाभिःप्रकल्पितोयज्ञःतंप्रतिचारुंशोभनं।गोपीथाय।गोशब्देनात्रसोमउच्य
ते॥तस्यपानार्थंप्रहूयसे।प्रकर्षेणाहूयसे।मयाएतत्ज्ञात्वामरुद्भिःसहहेअग्ने।आगहि।आगच्छ॥६॥अश्वंनत्वा॥शुनःशेपःस्यार्षं।अश्वंन।नन्नाद

उपरिष्टादुपाचारत्वादुपमार्थीयः॥ अश्वमिव॥ वा॥ वारवंतं॥ वंदध्यैतुमर्थप्रत्ययः॥ वंदितुंइछामइतिवाक्यशेषः॥ अग्निंनमोभिः॥ स्तुतिभिः॥ सम्राजं॥ स
७ म्यग्दीप्तारं॥ अध्वराणांयज्ञानां॥ ७॥ और्वभृगुवत्॥ प्रयोगस्यार्षं॥ और्वभृगुवत्यथा॥ और्वः ऋषिः यथाचभृगुऋषिः यथाचआह्वान्॥ आह्वयति
तद्वदहमपि॥ शुचिंआह्वयामीत्यर्थः॥ अग्निंकीदृशं॥ समुद्रवाससं॥ समुद्रइत्यंतरिक्षनाम॥ तत्रनिवासोयस्यसससमुद्रवासाः॥ तंसमुद्रवाससं॥
अंतरिक्षनिवासमित्यर्थः॥ वैद्युतात्माह्यसौ॥ तत्रनिवसति॥ अथवा॥ समुद्रशब्देनपार्थिवः समुद्रउच्यते॥ तत्रह्यसौवडवात्मानिवसति॥ ८॥ अ
ग्निमिंधा॥ प्रयोगस्यार्षं॥ अग्निंइंधानः॥ संदीपयन्॥ मनसा॥ मनसापि॥ धिया॥ धीरितिकर्मनाम॥ यागं सचेतसंभजेत॥ कुर्यादित्यर्थः॥ अथवाधी
रितिप्रज्ञानाम॥ तंसचेतसंभजेत॥ लभेतइत्यर्थः॥ मर्त्यः॥ मनुष्यः॥ किंपुनर्यः अग्निंइंधेउत्तमपुरुषस्यैकवचनमिदंप्रथमपुरुषस्यैकवचनस्यानेद्रष्ट
व्यंसंदीपयति॥ अनुष्ठानेनविवस्वभिः तमसांविवासयत्भिः॥ हविर्भिः॥ ९॥ आदिद्भत्ल॥ वत्सस्यार्षं॥ आत्इतद्वावपिपादपूरणे॥ प्रत्नस्यपुराणस्य॥ रे
तसः॥ उदकस्य॥ संबंधीज्योतिः सूर्यादि॥ केनपुनः संबंधेनउच्यते॥ पतनलक्षणेनसंबंधेनउदकंहिपात्यते॥ ज्योतिः पातयति॥ अतउच्यते॥ प्रत्नस्य ७
रेतसः॥ संबंधोज्योतिः पातयितृइत्यर्थः॥ पुराणग्रहणंचप्रदर्शनार्थं॥ वनस्यापिपातयितृसर्वस्योदकस्यवर्षितृइत्यर्थः॥ कतमंपुनर्ज्योतिः वर्षितृउ

17/1973

च्यते॥ पश्यंतिवासरं॥ परोयदिध्यतइति॥ परस्तात्यछब्दः श्रूयते॥ सपूर्वत्रसर्वत्रानुप्रयुज्यते॥ यत्पश्यंतिसामर्थ्यात्सर्वप्राणिनः॥ वासरं॥ वाशब्दः सैवे
विध्येवर्ततेसरइति अपिसर्तेर्गत्यर्थस्यरूपं॥ वा॥ विविधंयद्गच्छतितद्वासरं॥ किंपुनस्तत्॥ तद्देवसूर्याख्यंज्योतिः॥ नहिदिवाउष्णेनगच्छति॥ रात्रौशीते
नअतोयद्वासरमित्युच्यते॥ यच्च॥ परः॥ व्यत्ययेनेदंपुल्लिंगं॥ नपुंसकलिंगंकर्तव्यं॥ परंइध्यतेदीप्यते॥ दिवि द्युलोके॥ परस्तात्यछब्दः श्रूयतेपु
रस्तात्तछब्दः॥ मध्याहृत्यएकवाक्यतायोजयितव्या॥ येपश्यंतिजनाः॥ यच्चवासरंयच्चपरंइध्यतेदिवि॥ तत्पुराणस्योदकस्यसंबंधीत्येवमेकवा
क्यत्वं॥ अथवा॥ वासरंगमनंतत्करोतीतिणिच्॥ वासरयति॥ वासरयते॥ अथवासरंगमयत्इत्यर्थः॥ वैद्युतंहिज्योतिः मेघात्यतत्पृथिवींप्रतिउद
कंगमयतिनयति॥ अतउच्यते॥ प्रत्नस्यरेतसोज्योतिः पश्यंति॥ वासरंगमयितृइत्यर्थः॥ १०॥ प्रथमस्यद्वितीयादशत्या॥ अग्निंवोवृ०॥ प्रयोगस्या
न र्षं॥ अग्निं॥ वः द्वितीयाबहुवचनंएकवचनस्यस्थानेद्रष्टव्यं॥ वृधंतंवर्धंतं॥ अध्वराणांयज्ञानांपुरूतमं॥ बहुतमं॥ अछ॥ अभेरर्थेश्अभीत्ययंउपस
र्गः॥ उपसर्गाश्चपुनरेवमात्मकाः॥ यत्रक्रियावाचीशब्दः प्रयुज्यतेतत्रक्रियाविशेषणमाहुः॥ यत्रक्रियावाचीशब्दोनप्रयुज्यतेतत्रससाधनानां
क्रियामाहुः इहचक्रियावाचीशब्दोनप्रयुज्यते॥ अतउपसर्गश्रवणसामर्थ्यात्क्रियापदमध्याहृयते॥ अभिष्टौमि अथवाअछब्दः आप्नुमित्य श्री

स्यार्थेवर्तते॥इच्छामीतिच्चवाक्यशेषः॥केनपुनः॥अग्निंआप्तुमिच्छामि।सामर्थ्यात्स्वविभिस्तुतिभिश्च॥किमर्थंपुनरभिष्टौमि॥आप्तुंवाइच्छामि।उच्यते।
८ नमेसहस्वते।नप्त्रइत्यपत्यनाम।सहइत्यपिबलनाम॥तद्यस्यास्तीतितं।हेतादर्थ्यचतुर्थ्यौ अपत्यस्यबलस्यार्थायेत्यर्थः॥१॥अग्निस्तिग्मेन०
भरद्वाजस्यार्षं।अग्निस्तिग्मेनतीक्ष्णेनशोचिषादीप्त्या।यंसत्।यमिबंधनार्थः।नीत्ययंछंदसिपरेपिव्यवहिताश्चेति॥व्यवहितःपरस्तात्प्रयुक्तः।
सपूर्वःअनंतरश्चद्रष्टव्यः।नियंसत्।नियच्छतिनिबध्नातिनिरुणद्धीत्यर्थः॥विश्वंसर्वं।अत्रिणं।अत्तारं।भक्षयितारं।विनाशयितारं।रक्षःपिशाचा
दिकं।अग्निरेधमानः।अस्मभ्यंवंसते।वंसतिरत्रदानार्थः।वंसतेयथावांछतितथाददातीत्यर्थः॥रयिंधनं॥२॥अग्नेमृड०॥वामदेवस्यार्षं।हेअ
ग्नेमृडसुखय।कस्माडुच्यते।महान्असिभवसि।महतांचपरोपकारार्थमेवप्रवृत्तिः॥अतःउच्यते।मृडय।अपिचअयःगतवानसिआ।आकारःपाद
पूरणार्थः॥देवयुं।देवान्पष्टुमिच्छंतंजनंप्रति।अहमपिदेवान्पष्टुमिच्छामि॥अतोब्रवीमि।इयेथ।आगच्छ।किमर्थंपुनरागच्छामि॥उच्यते।बर्हिः॥द्विती
येकवचनमिदंसप्तम्येकवचनस्यस्थानेद्रष्टव्यं॥बर्हिषि।आसदं।इदमपिचद्वितीयैकवचनंचतुर्थ्येकवचनस्यस्थानेद्रष्टव्यं॥आसदे।आसदनार्थं
मित्यर्थः॥३॥अग्नेरक्षा०।वसिष्ठस्यार्षं।हेअग्नेरक्ष।नःअस्मान्।अंहसःपायात्।प्रतित्यंअपीत्येवस्यार्थे।स्मइतिपादपूरणः।अपिच।हेदेव।रिषत ८

19/1973

श्चहिंसितुश्चसकाशात्॥तपिष्ठैः।तापयितृतमैःकैः।सामर्थ्यात्।ज्वालासमूहैः।अजरः।जरास्तुतिःसायेषांकर्तव्यत्वेननविद्यतेतेअजरः।स्तुतिवर्जिताइ
त्यर्थः।तांश्चदह।विनाशयेत्यर्थः॥४॥अग्नेयुंक्ष्वा०।भरद्वाजस्यार्षं।हेअग्नेयुंक्ष्व।युक्ष्वोप्ययंयुजिःनिपूर्वार्थेद्रष्टव्यः।नियुंक्ष्व।स्वरथेअस्मदीयायज्ञाग
मनार्थं।हीतिपादपूरणः।येतवाश्वइतियच्छब्दश्रवणसामर्थ्यात्तदित्येतदध्याहृयते।नियुंक्ष्व।येतव।अश्वासः।अश्वाः।देव।देवनादिगुणयुक्त।साध
वः।शोभनाः।अरंअलंपर्याप्तंवहंति।यावदिच्छसि।तावदेववहंतीत्यर्थः।आशवः।व्यापयितारः।कस्यसामर्थ्यादध्वनःशीघ्रतपागत्याइत्यर्थः॥५॥
नित्वा॥वसिष्ठस्यार्षं।नीत्ययमुपसर्गःनक्ष्येत्यनेनसंबंधयितव्यः।नक्षतिश्च।इतिनक्षनइतिव्याप्तिकर्मसुपाठात्व्याप्तिकर्मणिनिनक्ष्यनियमेनव्या
प्य॥केनसामर्थ्यात्स्तुतिभ्यां॥गृहीत्वेत्यर्थः।त्वात्वांदेव।विक्ष्यते।विशोमनुष्याःतेषांपतिःस्वामीविश्पतिः।तस्यसंबोधनंहेविश्पते।मनुष्याणाम
धिपते।कीदृशंत्वां।उच्यते।द्युमंतं।दीप्तिमंतं।ज्वालमंतमित्यर्थः।धामहे।स्थापयामामः।वेद्याख्येप्रदेशे।वयंकीदृशांत्वां।उच्यते।सुवीरं।शो
भनाःवीराःपुरुषाःऋत्विगाख्याःपरिचारकत्वेनसंबंधिनोयस्यससुवीरस्तंसुवीरं।शोभनैर्वीरैःसंबंधमित्यर्थः॥हेअग्ने।आ।कुतआभिमुख्येन
कुतः॥६॥अग्निर्मूर्धा०॥विरूपस्यार्षं।अग्निमूर्धात्लुप्तोपममिदंद्रष्टव्यं॥मूर्धानमिवयाद्दृशंमनुष्यस्यशिरःप्रधानंसर्वांगानांप्रधानंतादृशः

प्रधानः स्वामीत्यर्थः। कस्य उच्यते। दिवः द्युलोकस्य स्वर्गलोकस्येत्यर्थः ककुप्। एतदपि लुप्तोपमं। ककुदमिव यथा बलीवर्दस्य ककुदं प्रधानं तादृशः प्रधा
नः पतिः स्वामी। तस्याः पृथिव्याः पृथिवीलोकस्य। अयं। अपां रेतांसि अप इत्यंतरिक्षनाम रेत इत्युदकनाम। अंतरिक्षस्य सारभूता। अथवा। अपां वी
र्याणि रेतांसि तानीत्यर्थः॥ अथवा अपां वीर्याणि जिन्वति प्रीणयति आप्याययतीत्यर्थः॥ कुत एतत्। अग्निर्वा इतो वृष्टिं समीरयतीति श्रुतेः॥७॥ इम
मू षु॥ शुनःशेपस्यार्षं। उ सु इति द्वावपि पादपूरणे। इमं त्वं। अस्माकं स्वभूतं। सनिं सम्यग्दाने। सनिं पुरोडाशादिकं दानं गायत्रं स्तोत्रं च नव्यांसं नवत
रं अन्यैरक्षतं पूर्वमित्यर्थः॥ हे अग्ने देवेषु प्रवोचः देवेष्विति सप्तमी बहुवचनं चतुर्थी बहुवचनस्य स्थाने द्रष्टव्यं॥ देवेभ्यः प्रकर्षेण कथय॥८॥ तं त्वा गो
प॥ गोपवनस्यार्षं॥ तच्छब्दश्रुतेर्योग्यार्थसंबंधो यच्छब्दोध्याहर्तव्यः॥ यः उक्तगुणोग्निः॥ तं त्वा गोपवनः आत्मना परोक्षरूपेण प्रतिनिर्दिशति॥ गो
पवनो नामायमृषिः॥ गिरा स्तुतिलक्षणया वाचा॥ जनिष्ट तज्जनितवानित्यर्थः॥ हे अग्ने अंगिरः॥ अंगानि शरीरावयवस्तद्वत्॥ अंगि शरीरं तस्या स्थिति
हेतुरसितपीतरसः॥ तत्करोतीति णिच्॥ अंगिरसयति। अंगिरसायते पक्षे अंगिरा जाठरो ह्यग्निः अग्निं रसी करोति। तस्य संबोधनं हे अंगिरः। शरीर
स्थितिहेतो असितपीत्तरसस्य कर्तः इत्यर्थः॥ पतः एवं स्तुतवान्। अतो ब्रवीमि। स त्वं हे पावक शोधयितः। श्रृणु श्रुधि। हवं। आह्वानं। श्रुत्वा च ऐहि अस्मद्य ९

त्तमित्यर्थः॥९॥ परि वाज। वामदेवस्यार्षं। परीत्येष। अक्रमीदित्याख्यातेन संबंधयितव्यः॥ वाजपतिः। वाजं अन्नं तस्य पतिः। स्वामी॥ कविः मेधावी॥ अग्निर्हव्या
दीनि हवींषि। हविः अक्रमीत्। क्रमिर्गत्यर्थः॥ श्रुत्योपि च ण्यर्थे द्रष्टव्यः॥ पर्यक्रमितवान्। परिगमितवान्नीतवानित्यर्थः॥ कं प्रति सामर्थ्यात्॥ देवान्। किं
पुनः कुर्वन्। हवींषि नीतवान्। उच्यते दधत्। ददन्नित्यर्थः॥ रत्नानि धनानि दाशुषे यजमानाय। विश्वाय विश्वाय विश्वस्येति षष्ठीस्थाने चतुर्थी॥१०॥
उदु त्यं। कण्वस्यार्षं। उ छब्दः। वहंतीत्याख्यातेन संबंधयितव्यः॥ व्यवहिताश्चेति पाणिनीयस्मरणात्॥ उ इति पादपूरणः॥ त्य छब्दस्त छब्दपर्यायः॥ त
च्छब्दश्रुतेश्च योग्यर्थसंबंधो यच्छब्दोध्याहृयते॥ यं सर्वप्राणिनो नित्यं नमस्यंति तं जातवेदसं जातप्रज्ञं जातधनं वा देवं दानादिगुणयुक्तं॥ उद्वहंति
के अर्थात् रश्मयः कीदृशाः। रश्मयः। केतवः। प्रज्ञानवंत इत्यर्थः किमर्थमुद्वहंति दृशे दर्शनाय॥ विश्वाय षष्ठ्यर्थे एषा चतुर्थी॥ सर्वस्य जगतः। कं उद्व
हंति। सूर्यं आदित्यं। उदिते ह्यादित्ये सर्वं। जगत्पश्यति। नानुदित एकमेवेदं ज्योतिः॥ त्रिधा विभक्तमित्येव नाग्नेयत्वमविप्रतिषिद्धं॥११॥ कविमग्निं।
मेधातिथेरार्षं अंतरात्मनश्चायं प्रैषः॥ हे मदीय अंतरात्मन्। कविं मेधाविनं। अग्निं उपस्तुहि। सत्यधर्माणं। सत्यकर्माणं। अध्वरे यज्ञे। देवं दानादिगुणयु
क्तं। अमीवचातनं। अमीवो रोगः। तस्य च तपितरं॥ नाशयितारमित्यर्थः॥१२॥ शं नो देवी॥ सिंधुद्वीपस्य अंबरिषस्य वा आर्षं। त्वतस्य वा॥ आप्तस्य वा॥ श

21/1973.

मितिसुखनाम।त्वांसुखं।नः अस्माकं।देवीदानादिगुणयुक्ता॥भवंतु।काः।आपः।किंपुनः सुखाभवंतु।उच्यते।अभिष्टयेअभिगमाय।अपांहिकीमभिगमनं
१० स्नानादिभिस्तत्सेवनं।तदर्थंसुखाभवंत्वित्यर्थः॥किमभिष्टयेएवकेवलं।उच्यते।पीतयेपानायचास्माकंसुखाभवंत्वित्यर्थः॥शमनंसंयावनंपुःअ
नपनमित्यर्थः॥हेअच्येते।प्रथमैकवचनेचतुर्थ्येकवचनस्यस्थानेद्रष्टव्ये॥गमनाय।कस्यसामर्थ्याद्रोगाणांयावनायचकस्यसामर्थ्याद्भयानांअभि
श्रवंत्वस्माकं॥अग्निप्रसादेनेत्येवमाग्नेयत्वं॥१३॥कस्यनूनं॥उशनसःआर्षं॥कमितिसुखनाम।तस्यकस्यसुखस्येत्यर्थः॥नूनंनिश्चयेन।परीणसि।
सप्तम्येकवचनमिदंद्वितीयाबहुवचनस्यस्थानेद्रष्टव्यं॥परीणसः॥बहून्इत्यर्थः॥धियःप्रज्ञाः॥जिन्वसिप्रीणयसि।पूरयसि।प्रज्ञासुखाभ्यांपूरयन्॥
सुखिनंकरोतीत्यर्थः॥सप्ततेसतांपालयितः।कस्यपुनःप्रज्ञासुखेनपूरयसि।उच्यते।गोषाता।यस्यतेगिरः॥गोशब्देनात्रसोमउच्यते।साताइत्यपिसनो
तिःसंभजनार्थस्यरूपं॥सोमानांपाःसंभजंतेताःगोषाताः॥सोमानांसंभक्त्यःसोमैःसहयाः॥क्रियंतेइत्यर्थः॥यस्ययजमानस्य।तेतव।संबंधिन्योगिरः
स्तुतयःसोमेनसहताभिस्स्तुतिभिःयस्त्वांस्तौतीत्यर्थः॥प्रथमस्यतृतीयास्त्वात्या॥यज्ञायज्ञा।भरद्वाजस्यार्षं॥यज्ञायज्ञेतिसप्तम्यास्थानेअयमाकारःवी
प्सायांचद्विर्वचनं॥यज्ञेयज्ञेअन्यत्रचान्यत्रचेत्यर्थः॥वःद्वितीयाबहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं॥त्वंअग्नये।चतुर्थ्येकवचनमिदंद्वितीयैकव १०

23/1973

चनस्यस्थानेद्रष्टव्यं॥अग्निं।गिरागिरा।अन्ययाचान्ययास्तुत्याइत्यर्थः॥चशब्दःसमुच्चयादेरर्थस्यासंभवात्॥पादपूरणः।दक्षसे।दक्षतेर्धा
तोरुत्साहार्थस्यैतद्रूपं॥बलनामच।अंतर्णीतमत्वर्थंद्रष्टव्यं॥चतुर्थीचद्वितीयार्थेउत्साहितंबलवंतंचेत्यर्थः।प्रप्रेतिशब्दःपादपूरणः॥इति
पादपूरणार्थंद्विवचनं॥प्रेत्ययंशंसिषमित्यनेननसंबंधयितव्यः॥वयमित्येतत्प्रथमाबहुवचनं॥एकवचनस्यस्थानेद्रष्टव्यं।अहंअमृतंअमर
णधर्माणंजातवेदइतिधननाम॥ज्ञानंवा।जातंधनंज्ञानंवायस्यसजातवेदाः॥तंजातवेदसं।उत्पन्नज्ञानंउत्पन्नधनंवेत्यर्थः॥प्रियंमित्रंन।नशब्द
उपरिष्टादुपचारत्वादुपमार्थीयःप्रियंमित्रमिव।शंसिषं।त्वांसस्तुतौयथाकश्चित्प्रियंमित्रंस्तौति॥तद्वत्।स्तयेमाहमित्येतदात्रास्महे॥१॥पाहिनो
अग्ने।भर्गस्यार्षं।पाहि।रक्षनःअस्मान्।हेअग्नेएकयाएकयापरस्ताहीरितिगिरांनिर्देशात्।गिराएकया।ऋग्रूलक्षणयातृतीयानिर्देशात्॥
स्तुतःसंनितिवाक्यशेषः॥पाह्युतअपिचरक्षद्वितीययागिरायजुर्लक्षणया।अपिचरक्ष।तिसृभिर्गीर्भिः।ऋग्यजुःसामलक्षणाभिःहेऊर्जांपतेः
जुर्जः।अन्नानितेषांपतिःस्वामीजर्ज्जांपतिस्तस्यसंबोधनंहेजर्जांपतेअंनामधिपतिभूत।पाहिचतसृभिः।ऋग्यजुःसामनिगदलक्षणाभिः।व
सोलुप्तमचतुर्थंचैतद्द्रष्टव्यं॥वसोहेधनवन्॥२॥बृहद्भिरग्ने।तृणपाणेरार्षं।बृहद्भिःमहद्भिःहेअग्नेअर्चिभिः।किंतुउपरिष्टाद्दृश्यतिदीदिहि॥दी

प्यस्व।हेअग्नेकिंचान्यत्।शुक्रेणदेववो।चिषाप्रभासेनेत्यर्थः॥भरद्वाजेसमिधानः॥छील्योयंवानसोप्रत्यक्षकृतत्वाच्चमंत्रस्यअत्यति
११ रिक्तप्रातिपदिकार्थप्रथमांतं॥अतोयत्तच्छब्दावध्याहृत्यैकवाक्यतांनेयं॥यस्त्वांभरद्वाजेऋषीणामपि।यजतिसंम्यक्दीपनशीलःसत्वं।हेय
विष्ठअतिशयेनयुवतम।रेवत्।धनवत्पावकशोधयितःदीदिहि।दीप्यस्व।हेअग्नेकिंचधनसंयुक्तंवद्दीदिहिधनंददद्दीप्यस्वेत्यर्थः॥३॥त्वेअ
ग्नेस्वा॥वसिष्ठस्यार्षं।युष्मदःपरस्यषष्ठ्येकवचनस्यशेभावेनयुष्मदस्त्वत्वादेशेनइदंरूपं।ते।तव।हेअग्नेस्वाहुत।जुहोतेर्दानार्थस्येदंरूपं॥शो
भनदान।प्रियासः।प्रियाः।संतु।भवंतु।सूरयः।मेधाविनः।स्तोतारः।कीदृशाः।उच्यंते।यंतारःस्तुतिभिर्हविर्भिश्च।अवबोध्यारः।येमघवानः॥
हविर्लक्षणेनधनेनधनवंतःजनानामूर्वंदयंतगोनां॥यजमानमनुष्याणांस्वभूतानांगोनांगवांऊर्वंदयंते।उर्वशब्दस्यबहुवचननाम्नःद्वितीयैक
वचनेछांदसमादिदीर्घत्वं॥लुगमिपूर्वत्वंचछांदसत्वादेवनभवतियणादेशः।ऊर्वंबद्धित्यर्थः।दयंत।विभजंति।गोनांद्वादशशातसंख्याप
रिमाणादिगवांविभजतइत्यर्थः॥४॥अग्नेजरि॥भरद्वाजस्यार्षं।हेअग्नेजरितः।स्तोतः।विश्पतिः।विशोमनुष्यास्तेषांपतिः।तपनःसंता
पयन्।देव।दानादिगुणयुक्त।रक्षसः।राक्षसान्।अप्रोषितवान्।अप्रोषितःसर्वदासंनिहितइत्यर्थःगृहपते।गृहस्यस्वामिन्।दिवस्पायुः।द्युलोक ११

25/1973

स्यपालयिता।दुरोणयुः।दुरोणइतिगृहनाम।तद्यइच्छतिसदुरोणयुः।एषपदार्थः।वाक्यार्थस्तु।अग्ने।जरितः।देव।गृहपते।चत्वार्येतान्यामंत्रितानि।
आमंत्रणयोगाच्चप्रत्यक्षकृतोमंत्रः।विश्पतिःतपानःअप्रोषितवान्।दिवस्पायुःदुरोणयुरित्येतानिअव्यतिरिक्त।प्रातिपदिकार्थप्रथमांतानि।अ
तोनयत्तच्छब्दावध्याहृत्यक्रियापदंएकवाक्यतांनायाति॥यश्चविश्पतिःतपानःरक्षसानमहान्असियश्चअप्रोषिवान्यश्चदिवस्पायुःयश्चदु
रोणयुः॥तंत्वाहेअग्नेजरितः।देवगृहपतेस्तोमीतिवाक्यशेषः॥५॥अग्नेविवस्वत्।प्रस्कण्वस्यार्षं।हेअग्नेविवस्वत्।विवासनकर।तमसां।उ
षसः।स्वभूतं।किंतत्।सामर्थ्याज्ज्योतिश्चित्रंविचित्रं।पूज्यंवा।राध।लुप्तोपममेतत्।उज्वलत्वात्प्रीतिकरत्वसामान्याद्वा॥राधःसदृशं।हेअम
र्त्यः।मरणवर्जितः।आइत्ययमुपसर्गः।वहेत्याख्यातेनसंबंधयितव्यः।दाशुषे।दाश्वान्।यजमानस्तस्यार्थाय।हेजातवेद।उत्पंनश्चनउत्पंनज्ञान
वान्।आवह।त्वं।अद्यास्मिंनहनि।ज्योतिःद्वारेणचेदंउषसएव।आह्वानमुच्यते।उषसमावहइत्यर्थः॥नकेवलंउषसमेवकिंतर्हिअन्यानपिदेवा
न्।कीदृशान्।उच्यं।उषर्बुधः।उषसि।उदयकालेयज्ञागमनार्थंयेबुध्यंते।तेउषर्बुधस्तांश्चेत्यर्थः॥६॥त्वंनश्चित्र॥तृणपाणेरार्षं।वसोइतिसं
बोधनश्रुतेःविद।चोदयइतिचित्र।मध्यमपुरुषश्रुतेः।प्रत्यक्षकृतोमंत्रः।नचचित्रइत्येतदामंत्रणं।अतोयत्तच्छब्दावध्याहृत्यएकवाक्यतांनेयं।

यस्त्वं। चित्रः। विचित्रः। पूज्योवासनः। कर्मप्रवचनीयः। प्रतिशब्दोध्याहर्तव्यः। अस्मान्प्रति। ऊत्या। सहयोगलक्षणैषात्तृतीया॥ पालनेनसह। हेवसो।
प्रशास्त्वंधनवत्। त्वंराधांसि। धनानि। चोदय। प्रेरय। पालय। अस्मान्। धनानिच। देहीत्यर्थः। किंकारणंउच्यते। अस्यरायः। रायः धनंयदिदंपृथिव्यां
धनंअस्यसर्वस्य। हेअग्नेरथीः। रथीशब्दःसारथिवाचिनःसइहप्रेरकत्वसामान्यात्। अग्नौप्रयुक्तः। प्रेरयितासि। दातासीत्यर्थः। किंच। विदा। वेत्थजा
नीहिज्ञानेनात्रदानंलक्ष्यते। देहीत्यर्थः। किंगाधं। गाधशब्दोयंअगाधमुदकमित्येवमादिषुप्रयोगेषुउदकमध्येयाभूमिःपादपोराश्रयत्वंप्रति
पद्यते। तस्यावाचकइहतुस्थानसामान्यादाश्रयस्थानेप्रयुक्तः। आश्रयस्थानंकस्मै। उच्यते। तुचे। तुगित्यपत्यनाम। तस्मादियंसंप्रदानेचतुर्थी
अपत्याय। तुइतिपादपूरणे। नः। अस्माकं॥ ७॥ त्वमित्सप्र॥ भर्गस्यार्षं। त्वं। इदितिपादपूरणः। सप्रथा। असि। सर्वतःपृथुर्भवसि। हेअग्ने। त्रातः।
सर्वस्यजगतःपालयितः। ऋतःसत्यः। अविसंवादी। कविः। मेधावी। त्वां। विःप्रासः। विप्राः। ब्राह्मणाः। हेसमिधान। सम्यग्दीप्यमान। हेदीदिवः।
दानवन्। आविवासंति। वेधसः। मेधाविनः। ऋत्विजः। असीतिमध्यमपुरुषं। अग्नेत्रातइतिसंबोधनश्रुतेप्रत्यक्षकृतोमंत्रः। नचसप्रथा। इत्येवमादी
निआमंत्रितानिअतोयत्तच्छब्दावध्याहृत्यैकवाक्यतांनेयानि॥ यस्त्वंसप्रथाः। असि। यश्चऋतः। यश्चकविः। तंत्वां। हेअग्ने। त्रातःसमिधानःदीदि १२

27/1973

वः। विप्राः। आविवासंतिवेधसः॥ ८॥ आनोअग्ने। भर्गस्यार्षं। आइत्ययमुपसर्गः। आस्त्वित्यारख्यातेनसंबंधयितव्यः। नःअस्मभ्यं। हेआने। वयोवृधं। वयः।
अन्नं। तद्यद्वर्धयति। तद्वयोवृधं। अन्नस्यवर्धयित्रित्यर्थः। किंतत्उच्यते। रयिधनं। हेपावक। शोधयितः। शंसं। शंसनीयं। श्लघ्यमित्यर्थः। आरास्व।
आशास्वआभिमुख्येनदेहीत्यर्थः। चेतिपादपादपूरणः। नःअस्माकंउपमाते। उपमाता। निर्माता। तस्यसंबोधनंहेउपमातेस्त्रष्टइत्यर्थः॥ एतदुक्तंभव
ति। त्वमेवास्माकंस्त्रष्टा। त्वमेवास्मभ्यंशरीरस्थित्यर्थंधनंदेहीत्यर्थः। कीदृशंपुनर्धनंददामि। उच्यते। पुरुस्पृहं। बहूनांस्पृहणीयं। सुनीती॥ नीतिश
ब्दोमार्गवचनः। तस्मादियंतृतीया। नित्यामार्गेणप्रतियहादिनेत्यर्थः॥ सुयशस्तरं। यशःकीर्तिः। शोभनंयशः। यस्यतत्। सुयशः॥ अतिशयेनसु
यशाःसुयशस्तरंअतिशयेनकीर्तिमदित्यर्थः॥ ९॥ योविश्वाद॥ सोभरेरार्षं॥ यःविश्वाविश्वानिसर्वाणि। दयते। ददाति। वसुएकवचनमिदंबहुवचन
स्यस्थानेद्रष्टव्यं॥ वसूनिधनानि। होता। आह्वाता। देवानां। मंद्रः। स्तुत्यः। जनानांमनुष्याणां। ऋत्विग्यजमानानां। मघोनीनशब्दउपरिष्टादुपाचार
त्वादुपमार्थीयः। मधुनइवपात्रापात्राणि। प्रथमानि। उत्कृष्टानि। अस्मैइदमप्येतद्रूपं। व्यत्ययेनच। इदंशब्दस्तच्छब्दस्यस्थानेद्रष्टव्यः। अस्मैप्रेत्यय
मुपसर्गः। यंत्वित्यारख्यातेनसंबंधयितव्यः। मस्तोस्तोत्राणि। प्रयंतु। प्रकर्षेणगच्छंतु। वाक्यानांगमनंनसंभवति। अतोगमनेनात्रकारणंप्रतिपाद्यते।

क्रियंते। एतदुक्तं भवति। यथा मधुनः स्वादुयुक्तसोमपात्राणि क्रियंते तद्वत् स्तोमा अपि क्रियंत इत्यर्थः॥ कस्मै। उच्यते। अग्नये। अग्नेरर्थायेत्यर्थः॥
प्रथमस्य चतुर्थी द्रष्टव्या॥ एना वो अ॥ वसिष्ठस्यार्षं। एना। अनया वः। बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यं॥ त्वां अग्निं नमसा। नमस्तुतिस्त
या। अथवा। नमः। अन्नं। हविर्लक्षणं। च तेन हेतुना। तस्य लक्षणार्थमित्यर्थः। ऊर्जो नपातं। ऊर्जो। अन्नं। तस्य नपातं। पौत्रं। कथं पुनरसावन्नस्य पौ
त्रः। अन्नाद्धि बलं जायते॥ बलान्मथ्यमान एष जायते॥ एवमग्नेरन्नस्य पौत्रत्वं॥ आहुवे। आह्वयामि। प्रियं। चेतिष्ठं। अतिशयेन चेतितारं ज्ञात
रमित्यर्थः॥ अरतिं। अलमतिं। अथवा यजमानं। देवांश्च प्रतिगंतारं। स्वध्वरं। शोभनानां यज्ञानां कर्त्तारं॥ विश्वस्य दूतं। सर्वस्य यजमानस्य संदेशाहरं॥
अमृतं मरणवर्जितं॥ १॥ शेषे वने॥ भार्गस्यार्षं। शेष इत्यपत्यनाम। तस्मादियं निमित्तसप्तमी॥ चर्मणि सोमं हंतीति यथा॥ अपत्ये निमित्तभूते। अपत्या
र्थमित्यर्थः। वनेषु। वन इत्युदकनाम। तस्मादियं निमित्तसप्तमी॥ उदकेषु निमित्तभूतेषु॥ उदकार्थं चेत्यर्थः। कीदृशेषु उदकेषु निमित्तभूतेषु। उच्यते।
मातृषु सर्वस्य जगतः निर्माणभूतेषु॥ समित्ययमुपसर्गः। इंधत इत्याख्यातेन संबंधयितव्यः॥ सं। त्वा। मर्त्तासः। यजमानमनुष्याः समिंधते। सम्यक्
दीपयंतीत्यर्थः। कीदृशं त्वां समिंधते। उच्यते। पस्त्वं। अतंद्रः। तंद्रा। आलस्यं। अविद्यमाना तंद्रा यस्य सो ऽतंद्रः। अनलस इत्यर्थः॥ हव्यं हवींषि। वहसि देवा १२

न् प्रति नयसीत्यर्थः॥ न केवलं हविरेव नयसि किं तर्हि हविष्कृतः॥ ह। हविषा सह या क्रियंते ता हविष्कृतः स्तुतयः ताश्च नयसीत्यर्थः॥ आ त् इत् ह आव पि पाद
पूरणौ। यश्च त्वं देवेषु देवानां मध्ये राजसि दीप्यते॥ २॥ अदर्शि गा॥ सौभरेरार्षं। अदर्शि एतस्यादावेव वाक्यता प्रसिध्यर्थं यच्छब्दो ध्याहर्तव्यः॥ यः अग्निः
। अदर्शि दृश्यते। अवगम्यते। ज्ञायत इत्यर्थः॥ गातुवित्तमः। के गैरे शब्दे इत्येतस्य रूपं। गातुः शब्दयिता स्तुतीनां उच्चारयिता। तं पो वेत्ति स गातुवित्।
अतिशयेन गातुवित् गातुवित्तमः। स्तुतीनामुच्चारयितुरतिशयेन वेतीत्यर्थः॥ अस्मिंश्च अग्नौ व्रतानि कर्माणि हविर्नयनादीनि॥ आदधुः आहितवं
तः॥ त्वदायत्तानि कृतवंत इत्यर्थः॥ केसामर्थ्याद्देवाः॥ उ षु उ सु त्रयोपि पादपूरणाः॥ यच्छब्दश्रुतेः तच्छब्दो ध्याहर्तव्यः॥ तं जातं। जातमात्रं। आर्यस्य य
जमानस्य। वर्धनं। वर्धयितारं। अग्निं नक्षंतु। लोडयं लङर्थे द्रष्टव्यः॥ नक्षतिर्व्याप्तिकर्मा। नक्षंतु। तं व्याप्नुवंत्वित्यर्थः। नो गिरः। वाचः। अस्माकं स्व
भूताः स्तुतयः॥ ३॥ अग्निरुक्थे॥ मनोरार्षं। अग्निः। प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यं॥ उक्थे। यज्ञे। पुरोहितं। पूर्वस्यां दिशि आ
हवनीयात्मानमाहितं। निहितं स्थापितमित्यर्थः॥ ग्रावाणः। इदमपि प्रथमा बहुवचनं द्वितीया बहुवचनस्य स्थाने द्रष्टव्यं॥ अभिषवग्रावणश्च॥
क। यद्वर्हिः। उच्यते। अध्वरे यज्ञे। ऋचा। अर्च्यते। अनया इति ऋक् स्तुतिस्तया। ऋचा स्तुतो त्यर्थः॥ यामि। ईमहे। यामीत्यर्थ कर्मसु पाठात्॥ यामि। अ

29/1923

अन्नयज्ञे। कर्मयाचे। प्रार्थयामीत्यर्थः॥ नकेवलंअग्न्यादीनेवप्रार्थयामि। किंतर्हि। मरुतश्च। ब्रह्मणस्पते। इदमपिप्रथमाबहुवचनंद्वितीयाबहुवचन
स्यस्थानेद्रष्टव्यं॥ देवांश्च। अन्यानपि। किंपुनः प्रार्थयामि। उच्यते। अवः पालनंतर्पणंवा॥ वरेण्यं। वरणीयं॥ ४॥ अग्निमी[illegible]डिष्वसुदीतः॥ पुरुमीढस्या
र्षं। अग्निंईडिष्व। अंतरात्मनः प्रेषः हेमदीयअंतरात्मन्। अग्निंईडिष्व। स्तुहीत्यर्थः॥ किमर्थमुच्यते। अवसे। पालनाय। तर्पणायवेत्यर्थः॥ केनपुनस्तो
मि। उच्यते। गाथाभिः वृत्तविशेषैः स्तुतिलक्षणाभिर्वाग्भिः॥ कीदृशं। पुनस्तंस्तौमि। उच्यते। शीरशोचिषं। शीरं व्यापिशोचिर्दीप्तिः व्यापिनी दीप्ति
र्यस्यासौशीरशोचिः॥ तंशीरशोचिषं। व्याप्तिदीप्तिमित्यर्थः॥ अथवाजठरात्म ना अश्रयणीयादीप्तिर्यस्य। यद्वा। आसिनीभूतनाम। अग्निंअवसेअव
नार्थं। ईडिष्वेत्येतदनुषज्यते। हेपुरुमीढ। मदीयअंतरात्मन्। कीदृशमग्निमुच्यते। श्रुतंविख्यातं। नरः प्रथमैकवचनमिदंद्वितीयैकवचनस्यस्था
नेद्रष्टव्यं॥ नरं। नराकारं। अग्निः। प्रथमैकवचनमिदंद्वितीयैकवचनस्यस्थानेद्रष्टव्यं॥ अग्निमेवईडिष्व। सुदीतये। शोभनस्यदानस्यार्थायछर्दिः
प्रथमैकवचनमिदंचतुर्थ्यैकवचनंस्यस्थानेद्रष्टव्यं॥ छर्दिषे। गृहस्यचार्थायेत्यर्थः॥ ५॥ श्रुधिश्रुत्कर्ण। प्रस्कण्वस्यार्षं। श्रुधि। शृणु। हेश्रुत्कर्ण। श्रु
णुतः। कर्णौयस्य। सश्रुत्कर्णः। तस्यसंबोधनंहेश्रुत्कर्ण। वन्हिभिः। वोढुभिः। देवैरन्यैरग्निभिः। हेअग्नेसयावभिः। त्वयासहयेयांतितेसयावानः॥ १४

वैः सयावभिः॥ सहगामिभिरित्यर्थः॥ किंपुनः शृणोमित्वयाहूतः सन्। आसीदंतुबर्हिषि। मित्रः। अर्यमाच। प्रातर्यावभिः। प्रातर्यागे। येयांतिते। प्रातर्या 31/1973
वाणः तैः प्रातर्यावभिः अन्यैरपिदेवैः सहअध्वरेअस्मदीयेयज्ञे॥ ६॥ प्रदेवो। सौभरेरार्षं। प्रेत्ययमुपसर्गः। तस्याविख्यातेनसंबंधयितव्यः दे
वोदासः देवोदासः ऋषिः। तेनसमिंधितः सदेवोदासः। अग्निः। देवः। इंद्रोन। नशब्दउपरिष्टादुपाचारत्वादुपमार्थीयः। अस्त्युपमार्थस्यसंप्रत्यये
प्रयोगइति। पादपूरणः। इंद्रइव। मज्मना। स्वेनबलेन। अन्वितिपादपूरणः। मातरं। सर्वस्यआश्रयत्वप्रतिपत्यामातृभूतां। पृथिवीं। विवावृधेते।
परिवर्तयतिसस्यसंपतिद्वारेणअन्यरूपांकरोति॥ वैद्युतोह्यग्निः। स्वेनबलेनमेघान्घ्नन्पृथिवींवर्तयति। प्रतस्थौच। प्रतिष्ठते। स्वेनैवबलेन॥
गच्छतीत्यर्थः। क्वपुनर्गच्छति। उच्यते। नाकस्यशर्मणि। द्युलोकस्यसंबंधिनिगृहेद्युलोकेयज्ञगृहेतस्मिन्गच्छतीत्यर्थः॥ ७॥ अधज्मो। मेधातिथेरार्षं॥
अध। अधज्मेति। ज्मेति। पृथिवीनाम। तस्मादियंपंचमीपंचमीनिर्देशाच्च। आगत्येतिवाक्यशेषः। अथवा। पृथिवीतः आगत्य। अधवादिवः। द्युलो
कात्। कीदृशात्। द्युलोकात्। उच्यते। बृहतः महतः रोचनातदीप्तात्। आगत्य। अधीतिपादपूरणः। अया। अनया। वर्धस्व। तन्वा। शरीरेण। गिरा
स्तुतिलक्षणयावाचा। ममस्वभूतयास्तूयमानइतिवाक्यशेषः॥ वृधस्वत्वमेव। जाता। जातानिसमापयत्यानीत्यर्थः। हेसुक्रतो। सुप्रज्ञ। सुकर्मवा। पृण।

वर्धस्व म

श्रीणयेत्यर्थः॥८॥कायमानो॥विश्वामित्रस्यार्षं।कायमानः।चायृपूजानिशामनयोरित्यस्य चकारस्य ककारापत्यारूपं॥पत्यंयोनिलेन।वना।वनशब्दे
१५ नात्रवनावयवकाष्ठान्युच्यंते।तानिलं।यत्।अजगत्।आगच्छसि।यच्च।मात्रः सर्वस्य जगतः निर्माणभूताः अपः।गच्छसि।तेनैवमुच्यतेवनालं।य
यच्च मात्रः।अजगत्तपः।नतत्ते अग्नेनिसयंप्रमृष्यतइत्यनेनसंबंधयितव्यः॥न।ते।तव।हे।अग्ने।नप्रमृष्यते।निवर्तनंगमनं।तत्रच।आसं
तिकंगमनं।मरणलक्षणमिति।कस्मादुच्यते।यस्माद्दूरेवसन्।योहिदूरेभवतिसनदृश्यते।अतः।दूरभवने।नात्रादर्शनं।लक्ष्यते।अस्मात्।अ
दृश्यस्सन्।इह।अभुवः।भवसिदृश्यसइत्यर्थः॥९॥निलामिति॥प्रस्कण्वस्यार्षं।मनुः पूर्वप्रजापतिस्त्वांदेवंसंतंनिदधेनीचैर्भूमौधारितवान्।ज
नायच्यजमानायतेजोरूपंदृष्ट्वादृष्टकार्यार्थः॥सतथाभूतः कण्वेनमनुनान्वा।दीव्यथा॥ऋतजातो॥यज्ञार्थजातः।उक्षितोमहानुपन्वितः।यंकृष्टयोम
मनुष्यानमस्कुर्वंति॥१०॥प्रथमेपंचमीदशात्या॥देवोवो॥वसिष्ठस्यार्षं।हेऋत्विजः।वनस्यदेवोग्निर्वोयुष्माकंसंबंधिनीमाज्यस्यपूर्णांस्रुचं
विवष्टु।कामयतोतांचपूपसिंचध्वंपूरयते।पश्चादुपटणध्वंअग्नैविक्षिपतवाशब्दःसमुच्चये।अथसएवाग्निः।युष्मानोहतेवृधयति॥१॥प्रैतु
ब्रह्म॥कण्वस्यार्षं।प्राएतु।ब्रह्मणस्पतिः।ब्रह्मअन्नंतस्यपतिः।स्वामी॥प्रैतु।देवी।सूनृतवाक्।अच्छ।आप्तुं।वीरंवीराः पुत्राः पौत्राश्च।तान्यःकं १५

प

रोतिउत्पादयति।सवीरयति।वीरयते।अच्छआप्तुं।वीरं।वीराणां॥फलभूतानांकर्तारमित्यर्थः॥नर्यीन्द्रम्योहितं।पंक्तिराधसं।धानाकरंभः परीवापः
पुरोडाशः पयः स्याएषाहविः पंक्तिः द्विनाराशंसंप्रातः सवनंद्विनाराशंसंमाध्यंदिनंसवनं।सकृन्नाराशंसंतृतीयसवनं।एषानाराशंसपं
क्तिः पशुरूपवसथ्यः।त्रीणिसवनानिपशुरनुबंध्यइति।एषासवनपंक्तिः।एताभिः पंक्तिभिः यः साध्यते।एतान्वासाधयति।सपंक्तिराधाः
तंपंक्तिराधसं।देवाः।अन्येपियज्ञंनयंतुआत्मानंगमयंत्वित्यर्थः॥नः अस्माकंस्वभूतंयज्ञंप्राप्तुंसंभावयितुमित्यर्थः॥२॥ऊर्ध्वऊषु॥कण्वस्य
स्यार्षं।ऊर्ध्वइत्येतत्रिष्ठेत्यनेनसंबध्यते॥ऊर्ध्वः प्रस्करोतीतियः सऊर्ध्वः तिष्ठव्यापयस्वेत्यर्थः।असुइतिद्वावपिपादपूरणौ॥नः।ऊतयेअस्मा
कंपालनार्थमित्यर्थः।कथंपुनर्व्यापयस्व।उच्यते।देवोन।नशब्दउपरिष्टादुपाचारत्वादुपमार्थीयः।देवइवसविता।ऊर्ध्वस्तिष्ठेत्येतदनुष
ज्यते।ऊर्ध्वस्तिष्ठव्यापय।वाजस्य।अन्नस्य।सनिता।सनितिर्लाभस्तस्मादियंतादर्थ्येचतुर्थ्या आदेशः।सनितयेलाभायेत्यर्थः।कस्मात्पुनर्व्या
प्यते।यत्।अंस्मान्।अंजिभिस्त्वगुणप्रकाशकैर्दोभिः वाघद्भिः।ऋत्विग्भिः।त्वां।विह्वयामहे।ह्वयतिस्त्रअंतणश्तणमथोद्दिष्टव्यः।
आह्वयामइत्यर्थः॥३॥प्रयोराये।सोभरेरार्षं।प्रेत्ययमुपसर्गः।निनीषतीत्याख्यातेनसंबंधयितव्यः।यः यजमानः।रायेहविर्लक्षस्य

33 / 1973

श्री

धनस्यार्थाय।तदुपभोक्तुमित्यर्थः।प्रनिनीषति।प्रकर्षेणपूर्वस्यांदिशि।आहवनीयआत्मानंनेतुमिच्छति।मर्ताः।यजमानमनुष्याः।यश्चनीतस्सतेत
१५ यद्वेवसो।प्रशस्तधनवत्।त्वां।दश।दश।ददाति।सः यजमानः।वीरंपुत्रंधत्ते धारयतिलभतेतस्यपुत्रंददासीत्यर्थः॥हे अग्नेकीदृशंपुत्रंददासि।उच्य
ते।उक्थशंसिनंउक्थानिस्तोत्राणितेषांशंसितारं॥त्मना।आत्मना।सहस्रपोषिणं।बहूनांपोषितारं॥४॥प्रवोयह्वं।कण्वस्यार्षं।प्रेत्ययमुपसर्ग
वृणीमहेइत्याख्यातेनसंबंधयितव्यः।वः यद्बहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं।त्वां।यह्वं।महांतं।पुरूणां।वह्नीनां।विशां।मनुष्यजातीनां।दे
वयतीनां।देवान्यष्टुमतीनां।मध्येवयं।अग्निं।सूक्तेभिः।वचोभिः।शोभमानाभिः स्तुतिलक्षणाभिर्वाग्भिः।प्रवृणीमहे।याचामहे।किंपुनर्याचा
महे।सामर्थ्यात्धनं।कीदृशंपुनरग्निंयाचामहे।यं।सं।मित्ययंइंधतइत्याख्यातेनसंबंधयितव्यः।इदितिपादपूरणः।येअन्येपियजमानाः समिंध
ते।संदीपयंति॥५॥अयमग्निं।श्रुतकक्षस्यार्षं।अयमग्निः।सुवीर्यस्यशोभन।वीर्यस्य।ईशे।ईष्टे।ही।तेपादपूरणः।सौभगस्य।सौभाग्यस्यचेत्य
र्थः।रायः।धनस्य। ईशे।स्वपसस्य।शोभनस्यचापत्यस्य।गोमतः।गोभिः सहितस्य।ईशे।वृत्रहत्यानां।वृत्रः शत्रुः।तस्यहतानि।प्रहाराः।तेषाम
प्ययमेवईष्टे।यएवंगुणयुक्तस्तंवयंस्तुमइतिवाक्यशेषः॥६॥त्वमग्नेगृ॥वसिष्ठस्यार्षं।त्वंहेअग्ने।गृहपति।गृहस्यस्वामी।त्वमेवहोता।होतृक १५

35/1973

र्मकारी।आव्हातावा।देवानां।नोअध्वरे।अस्माकंस्वभूतेयज्ञे।त्वमेवपोतापोतृकर्मकारी।शोधयितावा।विश्ववार।सर्वस्यवरणीय।प्रचेताः।संप्रकृ
ष्टज्ञानः।अतोब्रवीमि।यक्षिदेवान्।यक्षि।यासिन्व।ईमहे।यामीति।याच्ञाकर्मसुपठितत्वात्।यातिरत्रया च्ञाकर्मणि।मर्तासः।मनुष्याः।लेट्लोडर्थे
।याहियाचस्व।प्रार्थयेत्यर्थः।किंपुनः प्रार्थयसामर्थ्यात्।धनंकीदृशंउच्यते।वार्यं।वरणीयं॥७॥सखायस्त्वावदृमहे।विश्वामित्रस्यार्षं।सखाय
संतः।त्वात्वांववृमहे।प्रार्थयाम।कीदृशंत्वां।उच्यते।देवंदानादिगुणयुक्तं।ऊतये।चतुर्थ्येकवचनमिदं।द्वितीयैकवचनस्यस्थानेद्रष्टव्यं।ऊतिं।
तर्पणंपालनंचेत्यर्थः॥कीदृशंपुनस्त्वांप्रार्थयामहे।उच्यते।अपांनपातं।अपांपौत्रं।कथंपुनरग्नेरपांपौत्रत्वं।अद्भ्यओषधयोवृक्षाश्च।जायंते
वृक्षेभ्यः सकाशात्।निर्मथ्यते।एवमग्नेरपांपौत्रत्वं।सुभगं।शोभनधनं।सुदंससं।सुकर्माणं।सुप्रतूर्तिं।तूर्वतिर्हिंसार्थः।सुष्टुप्रकर्षेणहिंसितारं।
शत्रूणां।अनेहसमक्रोधं।अपापमित्यर्थः॥प्रथमस्यषष्ठ्यादशस्या।आजुहोता॥वामदेवस्यार्षं॥हेऋत्विजः।मत्पुत्रादयोवा।अभिमुख्येन
जुहोताकेन।हविषा।दुवस्यता।मार्जयध्वं।शोधयध्वं।संमार्गतृणैः कुरुध्वं।नीत्ययमुपसर्गोदधिध्वमित्याख्यातेनसंबंधयितव्यः॥होतारं।
आव्हयितारं।देवानां।गृहपिं।यजमानगृहस्यस्वामिनं।निदधिध्वं।नियमेनस्थापयध्वं।क्वपुनः स्थापयामः।इडउस्पदेइडित्यन्ननाम॥तेनचा

चहविर्लक्षणमन्नंपरिग्टह्यते॥तस्ययद्देवेद्याख्यस्थानइत्यर्थः॥केनस्थापयामः।उच्यते।नमसास्तुत्येत्यर्थः।कीदृशमग्निमुच्यतेरातहव्यं॥रातं
१७ दत्तंहव्यंयस्यसरातहव्यस्तंरातहव्यं॥दत्तहविष्कमित्यर्थः।स्थापयित्वाच।सपर्यत।परिचरत।यजतं।यष्टव्यमग्निं।पस्त्यानां।पस्त्यानि।गृहाणि।
तेषुयेनिवसंतितेपस्त्याः।तेषांयष्टव्यं॥१॥चित्रइच्छि।उपस्तुतस्यवार्षं॥हव्यस्यार्षं।चित्रःपूज्यः।इतइतिपादपूरणः।शिशोः।शंसनीयस्येनः स्या
तरुणस्य।च्रुप्लवनतरणयोरित्यस्यैतद्रूपं।प्लवनसमर्थस्य।अथवातरुणस्य।युवानस्य।वक्षण्यः।वहनंगमनमित्यर्थः॥कीदृशस्यपुनरग्नेः
।पूज्यंगमनमुच्यते।नवयोमातरावन्वेतिधातवे।नेत्ययंअन्वेतीत्यनेनसंबंधयितव्यः।यःअग्निःमातरौअरणीप्रतिनअन्वेति॥नगच्छती
त्यर्थः।धातवे।धेट्पाने।इत्यस्यैतद्रूपं।स्तनपानार्थमित्यर्थः।अनूधाः।ऊधोवर्जिताअरणि।पंचम्याअत्रलुक।यत।अजीजनत।जनित
वती।अनऊधेत्ययंयदाशब्दस्यश्रुतत्वात॥तदाशब्दस्यार्थेवर्तते।विच्छब्दः हवींषि।सद्यः।यस्मिन्नेवाहनिजायतेतस्मिन्नेवेत्यर्थः॥महि
र महत।दूत्यंदूतकर्मा।चरन।चरतिर्यद्यप्यन्यत्रगत्यर्थस्तथापीहसामर्थ्यात्करोतीत्यर्थेवर्तते।कुर्वन्नित्यर्थः॥२॥इदंतेएकं॥कुत्सस्यार्षं॥
इदंतेतव।एकं।ज्योतिः।वैद्युताख्यंपरः एवशब्दस्यार्थे।तदेवजातमात्रएवेत्यर्थः॥आवक्षत॥आभिमुख्येनवहतिकिंसामर्थ्या × शोध २ १७

37 / 1973

परं।उत्कृष्टमित्यर्थः।उइतिपादपूरणः।तेतवएकंआदित्याख्यंतृतीयेनज्योतिषा।पार्थिवेनअग्न्याख्येनसंविशस्व।क्वपुनःसंविशामि।उच्यते।
संवेशनःतन्वेसंविश्यते।अस्मिन्नितिसंवेशनं॥वेद्याख्यंस्थानं।तस्मिन्नित्यर्थः।तन्वःशरीरस्यसंविश्यचारुःएधिशोभनोभव।प्रियःतेतवक
थंआदित्याख्यंतृतीयेनज्योतिषापार्थिवेन।अग्न्याख्येनसंविशस्व।क्वपुनःदेवानां।क्वपुनःप्रियउच्यते।परमेउत्कृष्टे।जनित्रे।जन्यतेऽस्मि
न्नितिजनित्रंकर्मयागाख्यंतस्मिंनित्यर्थः॥अथवाजन्मैवजनित्रं।परमेजन्मनि।वृक्षादौयज्जन्मतस्मिंनित्यर्थः॥३॥इमंस्तोमं॥कुत्सस्या
र्षं।इमंस्तोत्रं।अर्हतेपूज्याय।जातवेदसे।जातविद्याय।जातधनायवा॥द्रूप्यतेतादर्थ्येचतुर्थी॥अर्हतेजातविद्यस्यार्थायेत्यर्थः।रथमिव
संमहेमसमहतिरत्रगमनार्थः।अतणीतिण्यर्थस्यद्रष्टव्यः॥यथाकश्चिद्रथंगमयति॥तद्वद्गमयेम।उच्चारयामीत्येतदाशास्महेइत्यर्थः॥
मनीषयास्वप्रज्ञया।भद्राहिहिशब्दोयस्मादर्थेयस्माद्भद्राकल्याणीनःअस्माकं।उपरीतिवाक्यशेषः॥प्रमतिःप्रकृष्टमतिः।अनुग्राहिका
बुधिरित्यर्थः॥अस्यअग्नेःसंसदियजमानसभायामित्यर्थः॥अतोब्रवीमि।हेअग्नेसख्येस्तुत्यस्तोतृलक्षणेवर्तमानाइतिवाक्यशेषः॥मा
रिषाम।रूषरिषहिंसायामित्यस्यैतद्रूपं।माहिंसिष्मः।केनचित।वयंतव॥४॥मूर्धानंदिवइति॥भरद्वाजस्यार्षं।मूर्धानं।प्रधानभूतमित्य

र्थः॥दिवः द्युलोकस्य।अरतिं।गंतारं।अलमतिवा।पृथिव्याः।पृथिवीतः।हवींषिगृहीत्वाद्युलोकस्यगंतारमित्यर्थः॥वैश्वानरं।अग्निं।ऋते।यज्ञेआजा
१८ तं।आइत्येषउपेत्येतस्यस्थानेउपजातं।प्रवृद्धमित्यर्थः।अग्निं।कविं।मेधाविनं।संम्यगीशानं।संम्यग्दीप्तंवा।अतिथिं।अतिथिस्थानीयं।जना
नांयजमानमनुष्याणां।आसन्।आस्यशब्दस्यपदंनोमासहृन्निशसन्निति।आसंनादेशः।सप्तमीयंद्वितीयार्थेद्रष्टव्या।आस्यंआस्यभूतं।
देवानांतथाहिअग्निमुखावैदेवाः इतिश्रुतिवचनं।नः अस्माकंसंबंधिनंस्वामिनमित्यर्थः।पात्रंभाजनमाहुतीनांजनयंतजनितवंतः देवाः
इंद्रादयः॥५॥वित्वदापो०॥भरद्वाजस्यार्षं।वीत्ययमुपसर्गः।जनयंतइत्याख्यातेनसंबंधयितव्यः॥त्वत्।पंचम्याअत्रलुक्।त्वत्तः।तंत्वागिरइति
परस्तात्तच्छब्दस्यश्रुतेः।एतस्यसामानाधिकरण्यायच्छब्दोध्याहर्तव्यः॥यतः।त्वत्तः।उक्थेभिः स्तोत्रैः।हेअग्नेवि।अजनयंतविविधंजनितवंतः उ
त्पादितवंतः।लब्धवंतइत्यर्थः।किंतल्लब्धवंतः।सामर्थ्याद्धनं।केपुनर्लब्धवंतः।उच्यते।देवाः।हविषांदातृत्वात्।देवशब्देनात्रऋत्विग्यजमा
नाउच्यंते।कथंपुनर्लब्धवंतः।उच्यते।आपोन।आपइतिप्रथमाबहुवचनं।द्वितीयाबहुवचनस्यस्थानेद्रष्टव्यं॥नशब्दउपरिष्टादुपचारत्वा
दुपमार्थीयः।आपइवपर्वतस्यमेघस्यापृष्टात्।एतदुक्तंभवति।यथाकेचिन्मरुतादयः।मेघमस्तकादुदकंलब्धवंतः।तद्वत्।यत्तोधनंलब्ध १८

39/1975

वंतः।तंत्वागिरः।सुष्टुतयः।इत्येतेप्रथमाबहुवचनेतृतीयाबहुवचनस्यस्थानेद्रष्टव्यं॥गीर्भिः सामलक्षणाभिर्वाग्भिः स्तुतिभिः॥ऋग्लक्षणाभि
श्ववाजयंति।पूजयंति।वयंजिग्युः।श्रुतोपिउपपूर्वोद्रष्टव्यः।उपजिग्युः।उपगच्छामइत्यर्थः॥हेगिर्ववाह।गिरस्तुतयः स्ताउह्यंतेयंप्रतिसगिर्व
वाहः तस्यसंबोधनंहेगिर्ववाहः॥कथंपुनरुपगच्छामः उच्यतेआजिनअश्वाः आजिः संग्रामभूमिः॥नशब्दउपमार्थीयः॥संग्रामभूमिमिव।
अश्वाः।यथासंग्रामभूमिंअश्वाः शीघ्रमवगच्छंति।तद्वदुपगच्छामइत्यर्थः॥६॥आवोराजा॥वामदेवस्यार्षं।आइत्ययमुपसर्गः।कृणुध्वमित्या
ख्यातेनसंबंधयितव्यः॥वः।बहुवचनमिदं॥एकवचनस्यस्थानेद्रष्टव्यं॥त्वांराजानंईश्वरंअध्वरस्ययज्ञस्य।रुद्रं।रोदनस्वभावकरं।पार्थि
वोग्निः प्रदीप्तः।धुगुधुगाशब्दंकरोति॥वैद्युतोपिगर्जितलक्षणंसौर्यस्य।अतोसौरोदनक्रियायोगात्रुद्रउच्यते॥होतारंदेवानांआह्वाता
रंसत्ययज्ञं।अविसंवादिनं।यष्टारं।रोदस्योः।द्यावापृथिव्योः।द्यावापृथिवीग्रहणंचात्रप्रदर्शनार्थं॥सर्वदेवानांयष्टारं।अग्निंपुरातनयित्नोः॥प्रा
प्राक्धुगुधुगाशब्दात्॥प्राक्गर्जितलक्षणाच्छब्दात्।कीदृशात्।अचित्तात्।चेतनावर्जितात्।यावद्गर्जितलक्षणशब्दंनैवकरोति।जातमात्रस्त्वा
वदेवेत्यर्थः॥कीदृशमग्निं।उच्यते।हिरण्यरूपं।अवसे।आत्मनः पालनार्थंतर्पणार्थंवेत्यर्थः।कृणुध्वं।आभिमुख्येनकुरुध्वं।केनस्तुतिभिर्देविर्भि

१९ श्व॥७॥इंधेराजा॥वसिष्ठस्यार्षं।समित्ययमुपसर्गः।पुरस्तादिंधेद्रष्टव्यः।समिंधे।सम्यक्दीप्यतइत्यर्थः॥राजादीप्तः।दीप्तोपिसुतरांदीप्यतइत्यर्थः॥
अर्यः।ईश्वरः।केनदीप्यते।उच्यते।नमोभिः।स्तुतिभिः।स्तूयमानइतिवाक्यशेषः॥यः।कीदृशोग्निः।उच्यते॥यस्यप्रतीकंनाममुखंवा॥आहुतं।आभिमु
ख्येनहुतंघृतेनयंचनरः।मनुष्याः।हव्येभिः।हविर्भिः।यजंतइतिवाक्यशेषः॥ईडते।स्तुवंति।कीदृशामनुष्याः।सबाधः।ऋत्विजः।यस्यप्रतीकमि
ति।पुरस्ताद्यच्छब्दस्यश्रुतेः॥तच्छब्दइहाध्याहर्तव्यः।सआ।अग्निः।आइत्ययमुपसर्गः॥अश्रोचीत्याख्यातेनसंबंधयितव्यः॥आ।अग्निः।अयं।
प्रथमतरं।उषसां।आभिमुख्येनदीप्यतइत्यर्थः॥८॥प्रकेतुना॥त्वाष्टुस्त्रिशिरसआर्षं॥प्रेत्ययमुपसर्गोयातीत्याख्यातेनसंबंधयितव्यः॥प्रकेतु
ना॥त्वाष्टुस्त्रिशिरआर्षं।प्रेत्ययमुपसर्गोयातीत्याख्यातेनसंबंधयितव्यः।केतुनास्वेनप्रज्ञानेनकर्मणवा।बृहता।महता।प्रयातिगच्छतीत्यर्थः॥
अग्निः।आकारः।रोरवीत्यनेनसंबंधयितव्यः।कंपुनः।प्रति।याति।उच्यते।रोदसी।द्यावापृथिव्योः।प्रति।कीदृशोग्निः।उच्यते।वृषभः।वर्षिता।
आरोरवीतिअत्यर्थंशब्दंकरोति।गर्जितलक्षणं।किंच।दिवः।द्युलोकस्य।चिच्छब्दः।पादपूरणः।अंतात्।पंचम्येकवचनमिदं।द्वितीयाबहुव
चनस्यस्थानेद्रष्टव्यं॥उपमान्।संनिकृष्टानित्यर्थः॥उत।आनट्।ऊर्ध्वंव्याप्नोतीत्यर्थः।किंच।अपामुपस्थे।आपं।उपगम्यपत्रातिष्ठंति।त १९

41/1923

द्यामुपस्थं।अंतरिक्षंतस्मिंनित्यर्थः।महिषः।महान्।ववर्धतेवीर्येण॥९॥अग्निंनरो।वसिष्ठस्यार्षं॥अग्निंनरः।नरइतिजनयंतेतिमध्यमपुरु
षयोगात्।आमंत्रितांतंहेनर।ऋत्विजोमत्पुत्रादयोवा।दीधितिभिः।अंगुलिभिः।अरण्योःसकाशात्।हस्तच्युतं।हस्ताभ्यांगृहीत्वाच्याव्यते॥
उत्तरवेद्याख्यस्थानेनीयतेतयःसः।हस्तच्युत्।तंहस्तच्युतं।अथवाहस्ताभ्यांच्यवनं।हस्तच्युत्तस्मादियंतृतीयार्थेद्वितीया।हस्तच्युताद्ध
स्तप्रच्यावनेनेत्यर्थः।अजनयतउत्पादयत।कीदृशंउच्यते।प्रशस्तं।दूरेदृशं।दूरेव्यवहितोयोदृश्यतेसदूरेदृक्।तंदूरेदृशं।गृहपतिं।यजमानगृहस्यस्वा
मिनं।अथवायजमानगृहान्।देवांश्चातिगंतारं।१०॥प्रथमस्यसप्तम्यादशात्या॥अबोध्यग्निः॥बुधगविष्ठियोरार्षं।बुध्यते।अग्निः।किंबुध्यते।प
घ्रतबोस्व्यं।अथवा।भक्तृतां।अभक्तृतांच।केनपुनर्बध्यते।उच्यते।समिधा।समिंधनेन।जनानां।यजमानमनुष्याणां।प्रतीत्ययंउषासमित्यने
नसंबंधयितव्यः॥कथंपुनर्बुध्यतेउच्यते।धेनुमिव।आयतीं।आगच्छंतीं।कदापुनर्बुध्यते।प्रतिउषासं।उषसंप्रति।उदयकालइत्यर्थः।प्रव्हा
स्यन्च।यव्हाइव।महांतइव।पक्षिणः।वयंद्वितीयैकवचनमिदंपंचम्येकवचनस्यस्थानेद्रष्टव्यं॥प्रवयायाः।ज्ञाताख्यातइत्यर्थः।उज्जिहानाः॥
ओहाङ्गतावित्यस्येदंरूपं॥ऊर्ध्वंगच्छंतः।उत्पततइत्यर्थः॥द्युलोकंव्याप्नुवंति।तद्वद्भानवः।दीप्तयः।सस्रते।सृगतावित्यस्येदंगच्छंतीत्यर्थः॥

नाकंद्युलोकं॥ अच्छ आप्तुमित्यर्थः॥ १॥ प्रभूर्जयंतं॥ वत्सप्रिय आर्षं॥ प्रेत्ययं जयंतमित्यनेन संबंधयितव्यः॥ भूः प्रथमैकवचनमिदं द्वितीयैकवचनस्य
२० स्थाने द्रष्टव्यं॥ मूराः। मूढाः। अमूरं। अमूढं। अग्निं। पुरं। शत्रुपुरं। दर्माणं। विदारयितारं। नयंतं स्तुतिभिर्हविर्भिश्च। प्रापितवंतः। कीदृशा। मग्निं। व
ज्ञा ना। वननीयया। धिया। प्रैषाः॥ एकवचनमिदं प्रथमा बहुवचनस्य स्थाने द्रष्टव्यं॥ धारितवंतः। लब्धवंत इत्यर्थः॥ कीदृशं पुनरग्निं ये स्तुतिभिः
हविर्भिश्च। प्रापितवंतः। तेन वननीयं धियं लब्धवंतः। उच्यते। हरिश्मश्रुं। हरितज्वालाख्या श्मश्रुं। न शब्द उपरिष्टादुपचारित्वादुपमार्थीयः। अ
स्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः॥ किं शुक्षामेव प्रज्ञां लब्धवंत॥ न्येरुते। वर्मणा वर्मेति गृहनाम॥ तस्मादियं सह योगलक्षणे षा ततो
याग्गृहेण सहितां प्रज्ञां लब्धवंतः॥ कीदृशं पुनरग्निं स्तुतिभिर्हविर्भिश्च प्रापितवंतः॥ ते गृहसहितां प्रज्ञां लब्धवंतः॥ उच्यते। धनर्चिं। धनेन अ
र्चितारं। धनपूजितारं। यजमानाः॥ २॥ शुक्रंते अन्य। भरद्वाजस्यार्षं॥ आदित्यात्मना व्यवस्थितस्य अग्नेरेवेयं स्तुतिः॥ शुक्रशब्दः शुक्लशब्दप
र्यायः। शुक्रं। ते तव। अन्यत्। किं तत्सामर्थ्याद्रूपं। यजतं। ते अन्यत् शुक्लप्रतियोगित्वेनोपादानात् यजत शब्दो लोहितवचनः॥ लोहितं ते तव॥
अन्यत्। किं तत्। सामर्थ्याद्रूपमेव आदित्यस्य हि मध्यंदिने शुक्लं रूपं भवति॥ उदयास्तमनयोश्च लोहितं। ते द्वे रूपे। अभिसमक्षैतदुक्तं॥ शुक्रंते २०

43
1473

अन्यद्यजतं ते अन्यदिति॥ किंच। विरूपे॥ अहनी ये अपि चैते विषुरूपे भिन्नरूपे॥ अहनी अहोरात्रे। एते अपि त्वमसि॥ त्वत्कर्तृत्वादेते अपि त्वमेव
भवसि॥ द्यौरिव च असि। यथा द्यौः सर्वव्यापिनी तद्वत्त्वं सर्वव्यापी भवसीत्यर्थः॥ किंच विश्वा हि हि शब्दश्च शब्दस्यार्थे॥ विश्वाश्च मायाः॥ प्रज्ञाः। अवसि
प्रज्ञाहेतुभूतं। प्रकाशं पालयसि। स्वधावन्। स्वधेत्यन्ननाम उदकनाम वा॥ हविर्लक्षणेन अन्नेन रश्म्याहतेन वा उदकेन तद्वान् स्वधावान्॥ त
स्य संबोधनं हे स्वधावन्। अन्नवन् उदकवन् वा भद्रा कल्याणी ते तुभ्यं॥ हे पूषन्। इह यज्ञे। रातिं हविर्दानं। अस्तु। अथवा ते इति कर्तृलक्षणा ष
ष्ठी वत्कर्तृका रातिः॥ इह भद्रास्तु इह यज्ञे शोभनं दानमस्मभ्यं देहीत्यर्थः॥ ३॥ इडामग्ने॥ विश्वामित्रस्यार्षं॥ इडां। हे अग्ने कीदृशां अन्नं पुरुदंसं। पु
र्विति बहुनाम। दंसं इत्यपि कर्मनाम॥ बहूनि कर्माणि यागहोमदानादीनि कर्तव्यत्वेन संबंधीनि यस्य तत्पुरुदंसं। बहूनां कर्मणां संपादयितृ बहू
नि कर्माणि यागादीनि येन क्रियंत इत्यर्थः। अथवा दंस इति। दसि दंसदर्शनयोरित्यस्यैतद्रूपं॥ बहूनां दर्शनीयां। सनिः। षण दानेत्यस्यैव कला ल्लाभ
उपलक्ष्यते॥ ननिं च लाभं च। गोः गोः कीदृशं लाभं। उच्यते। शश्वत्तमं। अतिशयेन बहुबहूनां गवां लाभ इत्यर्थः॥ हवमानाय मनसा धिया एतदुक्तं
भवति अन्नं गावश्च अस्मभ्यं देहीत्यर्थः॥ किंच। स्यान्नः सूनुः सा ते सुमतिरिति॥ परस्तात् छब्दश्रुतेर्यछब्दस्याध्याहारः। यया स्यात् भवेत्। नः अ

स्माकं।सूनुःपुत्रःतनयःपौत्रश्चकीदृशःपौत्रउच्यते॥विजावाविविधंजनयिता॥पुत्राणामनेनप्रकारेणवंशस्याविछेदआशास्यते।अग्नेसातेत
२१ वसुमतिःशोभनामतिः।अनुग्रहात्मिका।भूतभवतु।अस्मे।अस्मासु।अस्माकमुपरीत्यर्थः॥४॥प्रहेताजात॥वत्सप्रियआर्षं॥वत्सप्रीःपुत्रपौत्रस्यक
थयति।प्रहोताप्रकर्षेणआह्वाता।देवानांजातः।जातमात्रएवमहान्।नभोवित्।नभःआदित्यःद्युलोकोवातस्यवेत्तान्तःषद्मानरोमनुष्याःतान्
प्रतियजमानमनुष्यान्प्रतिस्थितोयःसन्तःषद्मा॥सीदत्त।सीदतिगच्छति।क्वपुनःसीदति।उच्यते।अपांचिवर्त्ते।अपांयत्रविविधंवर्ततेसोपांवि
वर्तः॥अंतरिक्षलोकः।तस्मिन्नित्यर्थः।तत्रहिवैद्युतात्मा।निवसति।किंच।दधत्।ददत्किंसामर्थ्यात्स्यनं॥यःधायीधारयिताकस्यहविर्वह
नादेःकर्मणःएतदुक्तंभवति॥दधघोहविर्वहनादिकर्मकरोतीत्यर्थः॥कद।उच्यते।सुते।अभिषुते।सोमेवयांसिअन्नानियंता।निरोद्धा।सामर्थ्या
त्तमसां।हविर्लक्षणान्यन्नानिविधत्तेपरिचरति।कीदृशोग्निरुच्यते।तनूपाः।शरीरस्यपाता।कथंपुनरग्निः।शरीरस्यपाताउच्यते।विद्यमा
नोपितस्मिंस्तंनदहति॥५॥प्रसम्राजं॥वसिष्ठस्यार्षं।प्रेत्ययमुपसर्गः।वददित्याख्यातेनसंबंधयितव्यः॥संम्राजं।द्वितीयैकवचनमिदंषष्ठ्येक
वचनस्यस्थानेद्रष्टव्यं॥सम्राजस्यसम्यग्दीप्तस्य।ईश्वरस्यवा।अग्ने।जरा।असुरस्यआत्मकर्मणःसयस्याऽस्तिसोऽसुरः।अथवाराशने।प्राण २१.

स्यतस्यअसुरस्यप्राणवतश्चेत्यर्थः॥प्रशास्तं।इदमपिद्वितीयैकवचनं॥षष्ठ्येकवचनस्यस्थानेद्रष्टव्यं॥प्रशास्तस्यपुंसःपुरुमनसः।कृष्टीणांम
नुष्याणां।अनुमाद्यस्य।अनुमोदनीयस्य।इंद्रस्येव।प्रतवसः।प्रकृष्टस्यमहतः।इंद्रस्येवयथाइंद्रस्यकृतानिवृत्रवधादीनिकर्माणिकश्चिद्वदति॥
तद्वदग्नेरपिकृतानिकर्माणिहविर्नयनादीनिप्रवदन्॥प्रकर्षेणस्तौति।मदीयोंतरात्मानंच।मदीयअंतरात्मानं।वाराद्वितीयैकवचनस्यस्थाने॥
आकारः।वारं।वरणीयं।वंदमाना॥अत्रापिद्वितीयैकवचनस्यस्थानेआकारः।वंदमानं।स्तुवंतमित्यर्थः।विवष्टुविविधंकामयइति।अग्निः॥६
अरण्योर्नि॥विश्वामित्रस्यार्षं॥अरण्योःनिहितःस्थापितइत्यर्थः।जातवेदाउत्पन्नधनोवा॥कथंपुनर्निहितउच्यते।गर्भइव।इवशब्दःपादपूर
णः।कीदृशोगर्भः।उच्यते।सुभृतःसुपुष्टःगर्भिणीभिः।तृतीयाबहुवचनमिदंसप्तमीबहुवचनस्यस्थानेद्रष्टव्यं।गर्भिणीषु।एतदुक्तंभवति॥
यथागर्भःसुपुष्टगर्भिणीषुस्त्रीषुनिहितः।तद्वदरण्योर्निहितोजातवेदाः॥दिवेदिवेअहन्यअहन्यहनिईड्यःजागृवद्भिः।जागरणमात्रप्रयत्न
वंतोलक्ष्यंते।प्रयत्नवद्भिरित्यर्थः।हविष्मद्भिःपुरोडाशादीनिहवींषि।येषांविद्यंतेतेहविष्मंतःतैर्हविष्मद्भिर्मनुष्येभिर्मनुष्यैःऋत्विग्यजमानैः
इत्यर्थः।अग्निःपूर्वोत्तरयोरर्थयोर्यत्तच्छब्दावध्याहृत्यएकवाक्यतायोजयितव्यायः।अरण्योर्निहितोजातवेदागर्भइवसुभृतोगर्भिणीभिःस

45/1973

दिवेदिवेईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥ ७॥सनादग्ने॥ छ्योरार्षं॥विश्वप्रभृति।त्वंहेअग्नेमृणसि।मारयसि।यातुधानान्राक्षसानने
२२ त्ययंप्रतिषेधः।जिग्युरित्येतेनसंबंधयितव्यः।नत्वांरक्षांसि।पृतनासुसंग्रामेषु।नजिग्युःनजयंतीत्यर्थः।सर्वदापराजेता॥एवमतोब्रवीमि।अ
नुदह।आत्मनोज्योतिरूपेण।दहसहमूरान्।सहमूतान्।मूढान्।मूर्खानित्यर्थः।क्रयादः।क्रव्यशब्दस्यरेफवकारयोश्छंदसि॥वर्णलोपेनक
पइत्येतद्भवति॥तया।येअदंति।तेक्रयादः।क्रव्यादास्तान्।मांसस्यभक्षत्तॄनित्यर्थः॥किंच।माते।हेत्याः।हतिर्वधस्तस्यमासभक्षत।अ
मुच्यतइत्यर्थः।दैव्यायाः।देवानांस्वभूतायां।सर्वदादेवैर्हन्यंतामित्यर्थः॥८॥प्रथमस्याष्टम्यादशाया॥अग्नि ओजि॥गयस्यार्षं।हेअग्ने।ओ
जिष्ठंअतिशयेनबलवत्।आभर।आनय।देहीत्यर्थः।किंपुनस्तदुच्यते।द्युम्नं।यशः।अन्नंवा।कस्मैपुनर्ददामिउच्यते।अस्मभ्यं।हेअध्रिगो।अध्र
गुः।अनिरुद्धः।हविर्गृहीत्वादेवान्।प्रतिगच्छतोनकेनचिद्गमनंनिरोद्धुंशक्यंयस्यसअध्रगुः।तस्यसंबोधनंहेध्रिगो।अध्रुतगमनइत्यर्थः॥
प्रत्ययमुपसर्गः।रास्वीत्याख्यातेनसंबंधयितव्यः।नइत्येतदपिवाजायेत्यनेनसंबंधयितव्यः॥राये।पनीयसे।द्वेअप्येतेचतुर्थ्यौतृतीयैक
वचनस्यस्थानेद्रष्टव्ये॥रापा।धनेनहविर्लक्षणेनकीदृशेनउच्यते।पनीयसा।अतिशयेनबहुना।तृतीयानिर्देशात्।उपचरितइतिवाक्य २२

यं
शेषः॥नः।अस्मभ्यं।वाजाय।अन्नाय।पत्सि।लङ्लोडर्थेद्रष्टव्यः।रास्व।प्रकर्षेणदेहीत्यर्थः।किंपुनर्ददामि।उच्यते।पंथां।पंथानं।येनपथा।अस्म
भ्यं।अन्नानि।आगच्छंति।तंपंथानंदेहीत्यर्थः॥१॥यदिवीरो॥वामदेवस्यार्षं॥पदीत्ययंअग्निमिंधीतेत्यनेनसंबंधयितव्यः॥यदिअग्निंइं
धीत।सम्यग्दीपयेत्।मर्त्यः।मनुष्यः।किंकुर्वन्।उच्यते।आजुह्वन्।आभिमुख्येनददत्।हव्यंहवींषीत्यर्थः।आनुषक्।आनुपूर्व्येणयथोक्ते
नक्रमेणेत्यर्थः॥नतः।किंस्यादुच्यते।वीरः।विक्रांतः।वीर्यवानित्यर्थः।अनुस्यात्।अन्विति पादपूरणः।स्यात्भवेत्।नकेवलंविक्रांतोभवे
त्।किंतर्हि।अग्नेः।समिद्धस्यप्रसादेनशर्मसकरवं।गृहंवा।भक्षीत।भजेत।लभेतेत्यर्थः।कीदृशंपुनःशर्मलभेतउच्यते।दैव्यं।दैव्यंवानां
स्वभूतं॥२॥त्वेषस्तेधूमः॥भरद्वाजस्यार्षं।त्वेषः।दीप्तः।महत्वंवेतिलक्षणयादीप्तात्तेतव।धूमः।ऋण्वति।गच्छति।व्यापीभवतीत्यर्थः॥दिवि
सत्।द्युलोकंप्राप्तइत्यर्थः।शुक्रः।शुक्लवर्णः।आततः।विस्तीर्णः।सूरोन।नशब्दउपरिष्टादुपचारत्वादुपमार्थीयः।यः।सूर्यइव।हीतिपादपूरणः
द्युता।स्वयादीप्त्या।त्वंकिया।अर्चतिकर्मसुपाठात्कृपिस्तुत्यर्थः।तयाकृपास्तुत्यास्त्वस्यमानाइतिवाक्यशेषः।हेपावकशोधयितः।रोचसेदी
प्यसेइत्यर्थः॥३॥त्वंहिक्षैतवत्॥भरद्वाजस्यार्षं।त्वंहितिपादपूरणः।क्षैतवत्।क्षितिःपृथिवीतस्यांभवंक्षैतंअथवाक्षिनिवासगत्योरित्येतस्य

47/1933

दंरूपं॥क्षितिर्निवासः।तस्यसंबंधिक्षेतं।किंपुनस्तत्गृहं।तद्यस्यास्तिसक्षेतवान्।किंपुनस्तत्।उच्यते।यशाः।कीर्तिः।गृहंचकीर्तिंचेत्यर्थः
२२ हेअग्नेमित्रोन।नशब्दउपमार्थीयः।मित्रइवदेवताविशेषः।पत्यसे।द्पत्यतिर्यद्यप्यन्यत्रऐश्वर्यकर्मा।तथापीहदानार्थोद्रष्टव्यः।
ददासिकस्मैस्तोतृभ्यः।षष्ठ्यर्थेचतुर्थी।अथवा।पत्यसइत्यैश्वर्यकर्मैवक्षेतस्यत्राइत्यपिद्वितीया।अधीगर्थदयेशांकर्मणीतिषष्ठ्यास्थानेद्र
ष्टव्या॥क्षैतवयशः।स्तोतॄणांत्वमेवदइत्यर्थः।त्वमेवविचर्षणेविश्वस्यद्रष्टः।श्रवःअंनंवसोप्रशस्य।धनवन्।त्वंपुष्टिंन।नशब्दउपमा
र्थीयः।पुष्टिमिव।यथैवस्तोतॄणां।यष्टॄणांचपुष्टिं।तद्वत्।अन्नमपि।पुष्यसि।पुषिरंतर्णीतण्यर्थोद्रष्टव्यः।पोषयसि।वर्धयसीत्यर्थः
॥४॥प्रातरग्निः।सूक्तवाहद्वितस्यार्षं।विश्वेयस्मिन्इतिपरस्ताद्यच्छब्दश्रवणात्पूर्वस्मिन्नर्धर्चेतच्छब्दोध्याहर्तव्यः।पाठक्रमादर्थक्र
मस्यबलीयस्त्वात्।पूर्वंद्वितीयोर्धर्चोव्याख्यातव्यः।विश्वेसर्वेयस्मिन्।अमर्त्येमरणवर्जिते।हव्यंहविः।मर्तासः।मनुष्याः।इंधते।इंधति
होमार्थः।जुह्वति।सप्रातरेवाग्निः।पुरुप्रियः।बह्वूनांयजमानानांप्रियः॥विशाः।प्रथमाबहुवचनमिदं॥तृतीयाबहुवचनस्यस्थानेद्रष्ट
व्यं॥विड्भिर्यजमानमनुष्यैःस्तवेत।लिडर्थेलड्यंद्रष्टव्यः।कर्मणिचविड्भिःस्तूयते।अतिथिः।अतिथिस्थानीयोयजमानानां।विश्वेसर्वे।यज्ञ २३

मानाः।यस्मिन्।अग्नौअमर्त्येमरणवर्जिते।हव्यंमर्तासःमनुष्याःइंधते।इंधीदीप्तौ।दीपयंतिहविर्भिः॥५॥यद्वाहिष्ठं।वसूयवऋषयस्तेषा 49/1923
मार्षं॥ऋत्विजांप्रेषणंस्तुतिरूपं।वाहिष्ठं।अतिशयेनवोढारंअग्नेर्गुणानांअतिशयेनप्रापकमित्यर्थः॥नत्।तृतीयाया।अत्रलुक्।तेनस्तुति
रूपेणअग्नये।चतुर्थ्येकवचनमिदं।द्वितीयैकवचनस्यस्थानेद्रष्टव्यं॥अग्निं।कीदृशेनरूपेणउच्यते।बृहत्।तृतीयाया।अत्रलुक्।बृहता
महता।अर्चपूजय।स्तुहीत्यर्थः।विभावसो।वसुःधनंतत्।विविधंभातिदीप्यतेतस्यसविभावसुःतस्यसंबोधनं।हेविभावसोविविधादी
प्तधनकस्मात्पुनःस्तौमिउच्यतेयस्मात्त्वद्रयिः।त्वदित्यत्रतृतीयायालुक्।सहयोगलक्षणात्तृतीया।त्वयासहधनं।त्वद्वाजा।त्वयासहवा
जानिअन्नानिउदीरते।उदीत्येषसमेत्यतस्यस्थाने॥ईरयतिगत्यर्थः।समीरतेसंगच्छंति।एतदुक्तंभवति।यस्मादग्निनादत्तंधनंअन्नंचस्व
पासंगच्छंतेयस्मात्अग्निनादत्तेनधनेनअंनेनवत्वमीश्वरोसीत्यर्थः॥कथंपुनर्धनंमन्नानिचत्वयासंगच्छंते।उच्यंते।मह्रिषीव।यथारा
जभार्यातेनैवराज्ञासहसंगच्छंतेतद्वत्संगच्छतइत्यर्थः॥६॥विशोविशो॥गोपवनस्यार्षं।विशइतिमनुष्यनाम।तस्मादियंषष्ठीवीप्सायांच
द्विर्वचनं।मनुष्यस्यमनुष्यस्यसर्वमनुष्याणामित्यर्थः॥वः।बहुवचनमिदं।एकवचनस्यस्थानेद्रष्टव्यं।त्वांअतिथिंअतिथिस्थानीयंवाजयं

यंतः।बहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं॥वाजयन्।पूजयन्नित्यर्थः।कीदृशंत्वां।पुरुप्रियंबह्वनांयजमानानां।इष्टं।अग्निं।त्वांइत्यं।यद्वा
२४ गृहद्वारिभवं।स्तुषे।स्तौमि।केनपुनस्तौमिउच्यते।वचः वचसा॥तथाशूषस्य।वलस्य।मन्मभिः स्तुतिभिः।बलसंबधीनिभिस्तुतिभिरित्यर्थः
॥७॥बृहद्वयो।पुरोरार्षं।बृहत्।महत्।वयः।अन्नं।हीतिपादपूरणः।अर्चपूजय।संस्कुर्वित्यर्थः।हेऋत्विक्।भानवे।देवाय।अग्नये।त्री
ण्येतानि।तादर्थ्येचतुर्थ्यंतानि।दीप्तिमतः।देवस्यअग्नेरर्थायेत्यर्थः॥ईदृशस्यअग्नेरर्थाय।महद्धनंसंस्करोमिउच्यते।यंअग्निंमित्रंमभि
त्रमिव।प्रशस्तिभिः।स्तुतिभिः।प्रशस्तये।चतुर्थ्येकवचनमिदंतृतीयाबहुवचनस्यस्थानेद्रष्टव्यं॥स्तुवतइतिवाक्यशेषः।मर्तासः।मनु
ष्याः।दधिरे।धारयंति।स्थापयंतीत्यर्थः।क्वपुनस्थापयंति।उच्यते।पुरः।पूर्वस्यांदिशि।आहवनीयात्मना॥८॥अगन्म॥गोपवलस्यार्षं।
गमिरयंशुत्योपिउपपूर्वार्थोद्रष्टव्यः॥उपगच्छामः।आश्रयामइत्यर्थः।कंअग्निं।कीदृशमग्निं।वृत्रहंतमं।शत्रूणांहंतारं।ज्येष्टं।अतिश
येनप्रशस्यं।अतिशयेनवावृत्स्थं।आनवं।अनुर्मनुष्यः।तस्यापत्यंमनुष्येणहिमंथनेनअग्निर्जन्यते।तेनासौआनवः।अतस्तंआनवं।म
नुष्यस्यापत्यंकिंच।यःस्म।इत्यत्रद्वितीयालुक्।स्मेतिपादपूरणः।यंअग्निं।श्रुतर्वन्।आमंत्रितैकवचनमिदं।प्रथमैकवचनस्यस्था २४

नेद्रष्टव्यं॥श्रुतर्वानामऋषिः।आर्क्ष्यो।अर्क्षोस्यपुत्रः।तस्मिन्नार्क्षेबृहत्महत्।शत्रोरनीकः।अग्र्यःप्रधानतमइत्यर्थः॥इंधतेकर्तर्यंयंव्यत्यये
नद्रष्टव्यः॥इंधतेसंदीपयतीत्यर्थः।वृत्रहंतमं।ज्येष्ठं।अग्निं।आनवं।यंच।श्रुतर्वाऋषिः।इंधते।तंवयंआश्रयामइत्यर्थः॥समस्तार्थः॥
९॥जातःपरेण॥वामदेवस्यार्षं॥जातःउत्पन्नःपरेणउत्कृष्टेन धर्मणाकर्मणायागाख्येननिमित्तभूतेन।कीदृशःपुनरग्निरुत्पन्नः॥उत्कृ
ष्टेनकर्मणानिमित्तभूतेन।उच्यते।यत्।नपुंसकमिदं।व्यत्ययेनपुल्लिंगस्यस्थानेद्रष्टव्यं।यःअग्निःसवृद्भिःसहयेवर्तंते।गच्छंति।तेवृतः।
तेःसवृद्भिःसहयोगलक्षणेषात्तृतीयासहगामिभिः।सहआभुवः।येनैवकर्मणानिमित्तभूतेनउत्पन्नस्तस्मिन्नेवकर्मणिसहगमनैर्दे
वैःसहआभिमुख्येनभवतीत्यर्थः॥यःकीदृशःअग्निः।उच्यते।पिता।पालयिता।यत्।यः।कस्ययस्यऋषेःअग्निःश्रद्धासत्यस्यधार
यिता।माता।वृष्टिप्रदानद्वारेणसर्वस्यजगतःनिर्माता।मनुःज्ञाता।अधिकारस्यभक्ततया।अभक्ततयावा।कविर्मेधावी।एवंलक्षणोग्निना
समभ्यं।धनप्रदःसर्वकामप्रदःपुत्रपौत्रप्रदश्च॥प्रथमस्यनवम्यादशत्याः॥सोमं राजानं॥वामदेवस्यार्षं॥सोमं।कीदृशं।सोमंउच्यते।राजा
नं।वरुणं।अग्निंच।अन्वारभामहे।आश्रयामइत्यर्थः।नकेवलं।एतानेव।देवताविशेषात्।आश्रयामः।किंतर्हि।आदित्यं।विष्णुंच।सूर्यंच।

51
1975

ब्रह्माणंच।बृहस्पतिं॥१॥इतएत।वामदेवस्यार्षं।इतःपृथिवीलोकात्।एतेउत।आरुहन्।ऊर्ध्वं।आरोहंति।क्वपुनः।आरोहंति।उच्यते।दिवः
२५ पृष्ठानि।द्युलोकस्यसंबंधीनि।यानिविशिष्टस्थानानि।तानिआरुहन्।कीदृशानिपुनर्द्युलोकस्यसंबंधीनि।विशिष्टस्थानानि।आरोहंति।
उच्यते।प्रभर्जयः।भूःपृथिवी।तस्यपशुकर्मादिभिःकर्मभिः।महावीराख्येनच।कर्मणा।प्रकर्षेणजितवंतः।तेप्रभर्जयंतः।कथंपुनर्दिवःपृ
ष्ठानिआरोहंति।उच्यते।यथायथा।योयंतेषांपंथा।तेनतेनयथाकर्मणोयथाबलमित्यर्थः।एवमुक्तेनमार्गेण।उत।उदित्येष।ययुरित्यने
नसंबंधयितव्यः।द्यां।द्युलोकं।अंगिरसः।ऋषयः।उद्ययुः।ऊर्ध्वंगतवंतः॥१॥रायेअग्ने॥वामदेवस्यार्षं।वापिमहे।हेअप्येतेषष्ठ्यंतेद्रष्टव्ये॥
रायःमहतः।धनस्येत्यर्थः।दानाय।दानार्थं।त्वांहेअग्नेसमिधीमहि।संदीपयामइत्यर्थः।किंच।ईडिष।स्तुहीत्यर्थः।हीतिपादपूरणः।महेहोत्रा
य।हूयतेतदितिहोत्रंहोमद्रव्यं।हेअपिचैतेतादर्थ्येचतुर्थ्यौ।महतोहोमद्रव्यस्यार्थायेत्यर्थः।होमग्रहणंचात्रप्रदर्शनार्थंसर्वासांदानादि
क्रियाणांसंबंधिनोद्रव्यस्यार्थायेत्यर्थः।हेवृषन्।वर्षितः।कथंपुनःस्तोमि।महतोहोमद्रव्यस्यार्थाय।उच्यते।द्यावापृथिवी।द्यावापृथिव्याविव
र्थः।एतदुक्तंभवति।होमादिक्रियार्थं।द्रष्टव्यं।द्यावापृथिव्यावपिस्तामित्यर्थः॥२॥दधन्वेवा।गृत्समदस्यार्षं।दधन्वेधारयति।अश्रुतस्य २५

धारणंनभवति।अतःधारणेनात्रश्रवणंलक्ष्यते॥शृणोतीत्यर्थः॥कःअग्निः।वेतिपादपूरणः।किंपुनःशृणोत्यग्निः।उच्यते।यत्ईम्।अनु।
ह्वावपिपादपूरणौ॥मदीयोंतरात्मा।अवोचत्॥उक्तवान्।एतदुक्तंभवति।यदस्मैदीयोंतरात्मास्तुतिरूपमुच्चारयति।तत्तदयमग्निःशृणो
तीत्यर्थः।किंच।अस्य।हविर्लक्षणान्यन्नानि।वेः।मध्यमपुरुषैकवचनमिदंप्रथमपुरुषैकवचनस्यस्थानेद्रष्टव्यं॥वेत्तिजानातीत्यर्थः॥उतत्
अपिचपरि।परीत्ययं।अभुवदित्यनेनसंबंधयितव्यः।परिपूर्वश्चभवति।परिग्रहे।वर्तते।किंपुनःपरिगृण्हाति।उच्यते।विश्वानिसर्वा
णि।काव्या।काव्यानि।स्तुतिवचांसिहव्यानिवा।कमिवगृण्हाति।उच्यते।नेमिः।चक्रमिव।रथचक्रस्य।अंत्याफलहकपाटिकानेमिरुच्य
ते।सायथारथचक्रंपरिगृण्हाति।तद्वत्परिगृण्हातीत्यर्थः॥३॥प्रत्यग्नेह।पापोरार्षं।प्रत्येयंशृणाहीत्याख्यातेनसंबंधयितव्यः।हेअग्नेह
रसा।स्वेनज्योतिषा।योअस्मान्हिनस्ति।तस्यपत्।हरः।ज्योतिः।तत्।प्रशृणाहि।प्रहिंसेत्यर्थः।विश्वतःसर्वतः।परीतिपादपूरणः।किंच।
यातुधानस्ययातुधाननाम्नः।राक्षसः।स्वभृतं।वलं।सेनालक्षणं।न्युब्ज।आत्मीयेनबलेनऋजुंकुरु।नकेवलं।बलं।किंतर्हि।वीर्यंत्रारी
रंचयद्बलंमंत्रौषधिलक्षणंवातदपिऋजुंकुर्वित्यर्थः॥४॥त्वमग्नेव।प्रस्कण्वस्यार्षं।हेअग्ने।वसून्देवताविशेषान्।इहममयज्ञेरुद्रान्।आ

53/1923

दित्यान्।उत।अपियज।नकेवलं।एतानेवदेवताविशेषान्यज।किंतर्हि।स्वध्वरं।शोभनयज्ञं।जनं।देवजनं।कीदृशंजनंउच्यते।मनुजातं।म
२८ नुःप्रजापतिः।तस्यसकाशाद्योजातःसमनुष्यजातस्तं।मनुजातंप्रजापतेःसकाशाउज्जातमित्यर्थः॥घृतप्रुषं।घृतमुदकं।तत्यःप्रुषति
।सिंचतिरक्षतिसघृतप्रुट्।तंघृतप्रुषंउदकस्यवर्षितारमित्यर्थः॥अथवाआज्यंघृतं।तेनयःप्रुष्यतेसिच्यते।ईज्यते।सघृतप्रुषः।तं
घृतप्रुषं॥घृतेनयष्टव्यमित्यर्थः॥ ॥इतिमाधवाचार्यकृतेछंदसिकाभाष्येप्रथमःप्रपाठकः॥ ॥पुरुत्वादा॥दीर्घतमसआर्षं।पु
रु।बहु।हविः।त्वद्देवत्यं।अन्यद्देवत्यानांचासिसितान्।तुभ्यंददत्।त्वांवोचे।ब्रवीमि।सामर्थ्याद्दागच्छेतेति।आह्वयामीत्यर्थः।कस्मात्पुनः।आ
ह्वयामिउच्यते।यस्मात्त्वंअरिःईश्वरःसर्वहविषां।त्वद्देवत्यानां।अन्यद्देवत्यानांच।त्वय्येवहूयमानत्वात्।अहमपिचदीर्घतमानामऋ
षिः।हेअग्नेतवस्वित्।आइत्येतौनिपातौ।एवशब्दस्यार्थेद्रष्टव्यौ।तवैवस्वभृतःकथंउच्यते॥तोदस्येव।तोदशब्देनात्रगृहस्थउच्यते॥
गृहस्थस्येव।महस्यमहतः।स्वभृते।शरणेगृहेयावत्।किंचित्सर्वस्वंभवति।तद्वदहमपितवस्वभृतः॥१॥प्रहोत्रेपू॥विश्वामित्रस्या
र्षं॥प्रेत्ययमुपसर्गोभरतइत्याख्यातेनसंबंधयितव्यः॥होतृशब्दःआह्वातृवचनः॥तस्मादियंतादर्थ्येचतुर्थी॥अग्नयइत्येतदपि २६

55/1923
तादर्थ्येचतुर्थ्यंतं॥होत्रइत्येतेनसमानाधिकरणं॥तेनायमर्थः॥देवानामाह्वातुरग्नेरर्थायपूर्व्यंपूर्वं।चिरंतनं॥अत्नकमित्यर्थः॥वचःस्तुति
लक्षणंवचनं॥मदीयाऋत्विजः।पुत्रादयोवा।प्रभरत।प्रहरत।प्रापयत।प्रोच्चारयतेत्यर्थः।कीदृशंपुनर्वचनंप्रोच्चारयामः।उच्यतेबृहत्।दीर्घ
इत्यर्थः।विपां।व्याप्तॄणांकस्यसामर्थ्यात्तमसां।ज्योतींषि।द्वितीयाबहुवचनमिदंषष्ठीबहुवचनस्यस्थानेद्रष्टव्यं।ज्योतिषां।बिभ्रते।धारयि
त्रे।इयमपितादर्थ्येचतुर्थी॥तपसांप्यस्तॄणां।ज्योतिषांधारयितुरर्थायज्योतिष्मतः।अग्नेरर्थायेत्यर्थः।नवेधसे।इयमपितादर्थ्येचतुर्थी॥
नकारःपादपूरणः।मेधाविनः।अग्नेरर्थायेत्यर्थः॥२॥अग्नेवाज॥गौतमस्यार्षं॥हेअग्ने।वाजस्य।अन्नस्यकीदृशान्नस्यउच्यतेगोतमः॥
गोभिःसहितस्य।त्वं।ईशानईश्वरइत्यर्थः॥हेसहसः।सहोबलस्यपुत्रः।यतएवमतोब्रवीमि।अस्मेअस्मभ्यंदेहिधेहि।जातवेदः।जातप्र
ज्ञान।उत्पंनधनवा।किंपुनर्ददामि।उच्यते।महि।महत्।श्रवः।अन्नंकीर्तिंवा॥३॥अग्नेयजि।विश्वामित्रस्यार्षं।हेअग्ने।यजिष्ठः।इत्येतद्योत।
मंत्रः।जनानामित्यनेनसंबंधयितव्यः॥अध्वरेयज्ञेदेवानइंद्रादीन्देवपते।देवानयष्टुमिच्छतियःसदेवयतिस्तस्मैदेवयते।तादर्थ्याद्ल
क्षणायेषाचतुर्थी।देवान्यष्टुमिच्छतः।ममार्थाययज।एवमयमर्धर्चेआमंत्रणयोगान्मध्यमपुरुषयोगाच्च।प्रत्यक्षकृतोमंत्रः।यश्चयविष्ठः

होतामंद्रइत्येवमादीनि आमंत्रितानि॥ अतोयत्तच्छब्दव्याहत्यैकवाक्यतांनयानि॥ यस्त्वंयविष्ठः। अतिशयेनयष्टायश्चहोता। आ ह्वाता। यश्च।
२७ त्वंमंद्रः स्तुत्यः। यश्चत्वं। विराजसि। विविधंदीप्यसे। कथंपुनः। राजसिउच्यते। अतिस्रिधः। अतीत्यशोषयित्वंनरक्षः पिशाचादीन्। सदेवान्यष्टुमि
तोममार्थायदेवान्यज॥४॥ जज्ञानः सः॥ तत्तस्यार्षं। जज्ञानः। प्रथमैकवचनमिदं षष्ठ्येकवचनस्यस्थानेद्रष्टव्यं॥ जज्ञानस्य। यजमानस्येत्यर्थः॥
सप्तमातृभिः। तृतीयाबहुवचनमिदं प्रथमाबहुवचनस्यस्थानेद्रष्टव्यं। सप्तसंख्याकाः ताइंद्रआदित्याद्याः अथवासप्तमारः। सप्तछंदांसि त
अथर्वसप्तहोत्राः। अथवासप्तसोमसंस्थाः। ताभिः सप्तमातृभिः मेधांप्रज्ञां। आशासतः। प्रार्थितवंतः। इत्यर्थः किमर्थंउच्यते। श्रियेतस्यैवाग्नेः।
श्रियेतस्यैवाग्नेः। श्रियोर्थंनकेवलं। मेधांप्रार्थितवंतः किंतर्हि। अयमग्निर्ध्रुवः। शाश्वतः नित्यइत्यर्थः॥ रयीणांवनानांवदाताभवत्वितिवाक्यशे
षः॥ किमेवाशास्तेवदाताभवतु। उच्यते। आचिकेतत्। आभिमुख्येनचिकेतत्। जानात्वित्यर्थः। यस्ययावद्दातव्यं। अथवानिद्रव्याणिजानातिते
षांसर्वेषांदाताभवत्वित्येतदाशासतेत्यर्थः॥ ५॥ उतस्यानो। ईरिमतिर्नामऋषिः। स्तस्येदमार्षं। उतअपिअग्नेः प्रसादेनस्यासा। नः। अस्माकं। षष्ठी
निर्देशाज्जज्ञइतिवाक्यशेषः। दिवाअहन्यहनि। मतिर्ज्ञात्री। अदितिर्देवमाता। कीदृशीदेवमाताउच्यतेधात्रीपालयित्री॥ आगमत् आगच्छत्। ए २७

स्वा। सात्रांताता। शंसुखंतत्तयाकरोतीति॥ शिवंशमरिष्टस्यकरइत्येवंतानिप्रत्ययः॥ शंताताशस्यस्यकर्तेइत्यर्थः॥ मयस्करत्। सुखंकरोतु। कथंपुनः
सुखंकरोतु। उच्यते। अपस्रिधः। अपत्यशोषयित्वन्। रक्षः पिशाचादीन्। घ्नंतीतिवाक्यशेषः॥ ६॥ ईडिष्वाहि। विश्वमनसः आर्षं॥ हेमदीयअंतरात्म
ना। अग्निंईडिष्व स्तुहीत्यर्थः॥ हीतिपादपूरणाः। कीदृशमग्निमुच्यते। प्रतीच्यं महाभूतत्वात्सर्वगतं॥ नकेवलं। स्तुह्येव। किंतर्हि। यजस्वायजच।
कीदृशमग्निमुच्यते। जातवेदसमुत्पन्नज्ञानं उत्पन्नधनंवा। चरिष्णुधूमं। चरणशीलः। चरिष्णुर्धूमोयस्यसचरिष्णुधूमः। तंचरिष्णुधूमं।
अगृहीतशोचिषं। हृग्रहोर्भश्छंदसि। हस्येतिभकारस्यहकारः। अगृहीता अनिरुद्धा। अप्रतिरुद्धादीप्तिर्यस्यसोगृहीतशोचिस्तंअगृहीतशोचि
षं॥ अनिरुद्धपीप्तिमित्यर्थः॥ ७॥ नतस्य॥ विश्वमनसआर्षं। न। तस्ययजमानस्य। मायया प्रज्ञयाचनशब्दः पादपूरणः॥ रिपुः शत्रुः ईशित।
लड्थे लिट्प्रत्ययः। ईशीतईशोमर्त्यः। मनुष्यः। यः किंकरोतियजमानः उच्यतेयः अग्नयेददाशद्ददाति। किंसामर्थ्याद्धवींषि। कथंपुनर्ददातिउच्य
ते। हव्यदातये। चतुर्थ्येकवचनमिदं तृतीयाबहुवचनस्यस्थानेद्रष्टव्यं॥ हव्यदातृभिः हविर्दानैः। एतदुक्तंभवति। हविषांयानिदानानियाज्यानु
वाक्यवंतितैर्यद्ददाति। यः अग्नेयागंकरोतिइत्यर्थः॥ ८॥ अपत्यंह। ऋजिश्वनआर्षं। अपेत्युपसर्गश्रवणात् त्यमितिचकर्मश्रुतेः क्रियापदमध्या

57
1973

ह्यते।अपनपत्यंत्यत्रशब्दस्तच्छब्दपर्यायः॥तच्छब्दश्रुतेश्च।योग्यार्थसंबंधोयच्छब्दो ध्याहर्तव्यः।यदस्मासु।व्यवस्थितं।अपनय।तंवृजिनं।प
२८ परिपुं।शत्रुंच।स्तेनंचोरंवदुराध्यं।कुत्सितं।आभिमुख्येनदुराध्यंयस्यसदुराध्यस्तंदुराध्यं॥कुत्सितध्यानं।पापसंकल्पमित्यर्थः॥किंच।दविष्ठ
अतिशयेनदूरवंतं॥अत्यंतंदूरस्थमित्यर्थः।अस्यचरिपोस्तेनस्यचसत्पते॥सतांपालयितः।कृधिकुरु।किंपुनर्दूरस्थंकरोमि।उच्यते।सुगंसुग
शब्दः।सुखशब्दपर्यायः।अथवासुगमितिसुगमितिरुच्यतेसुगतिं॥स्वर्गप्राप्तिंयथासुखंस्वर्गंवा॥नप्राप्नोतितथाकुर्वित्यर्थः॥९॥श्रुष्टग्ने॥
विश्वमनसः आर्षं।श्रुष्टीतिक्षिप्रं।हेअग्ने।नवस्य।अचिरकृतस्य।मेमम।स्वभूतस्य।स्तोमस्यवलेनेतिवाक्यशेषः।वीरविक्रांतविश्पते।विशोमनु
ष्यास्तेषामधिपते।निनीत्ययंदहत्यनेनसंबंधयितव्यः॥मायिनः।मायावंतः।तपसा।रक्षसः।रक्षसांनिदहनियमेनदहविनाशये॥१०॥प्रथम
दशात्या॥प्रमंहिष्ठा।सौरभेरार्षं॥प्रेत्ययमुपसर्गोगायतइत्याख्यातेनसंबंधयितव्यः॥मंहिष्ठाय।अतिशयेनदातुरर्थाय।प्रगायत।प्रकर्षेण
गायतउच्चारयतस्तुतीः।ऋतान्ते।ऋतोयज्ञः।उदकंवा॥तद्यस्यास्तिसऋतावान्।उदकवान्।यज्ञवान्।वातस्मै।ऋताक्ते।उदकवते।यज्ञवतेवा॥
अर्थायबृहतेमहतेप्रवृद्धायेत्यर्थः॥किंचशुक्रशोचिषे।शोचिर्दीप्तिः।शुक्रशोचिर्यस्यसशुक्रशोचिस्तस्मैशुक्रशोचिषे॥सुदीप्तेरर्थायेत्य २८

57/1973

र्थः।उपस्तुतासः।उपगम्ययेस्तुवंतितेउपस्तुतासःस्तोतारःतेषांसंबोधनं।हेउपस्तुतासः।कस्य।पुनरर्थायउच्यते।अग्नये।अग्नेरर्थायेत्यर्थः॥१॥
प्रसो अग्ने॥सौभरेरार्षं।प्रेत्ययमुपसर्गः।तरतीत्याख्यातेनसंबंधयितव्यः।सयजमानः।हेअग्ने।तवस्वभूताभिः।ऊतिभिःपालनैः।तृतीयानि
र्देशात्पाल्यमानइतिवाक्यशेषः॥कीदृशाभिरूतिभिः।पाल्यमानःउच्यतेसुवीराभिःशोभनैर्वीरैःपुत्रैःपौत्रैश्च।उपेताभिः।प्रतरति।तरतिर्वृ
द्ध्यर्थः प्रकर्षेणवर्धतइत्यर्थः।वाजकर्मभिः।वाज।अन्नं।तस्यकरणं।उत्पत्तिः।अन्नस्योत्पादयितृभिरित्यर्थः।यःकीदृशोयजमानःसउच्यते।य
स्यत्वंसख्यं।स्तुत्यस्तोतृलक्षणं।आविथ।पालयसीत्यर्थः।एतदुक्तंभवति।यस्त्वांस्तौति।सपालनैःपात्रैः।अन्नोत्पादैश्च।वर्धते॥२॥तंगूर्ध
य॥सौभरेरार्षं।हेमदीयअंतरात्मन्।तंअग्निंगूर्धय।गूर्धयतीत्यर्चति।कर्मसुपठितत्वात्स्तुत्यर्थः।स्तुहीत्यर्थः।कमिवस्तोमिउच्यतेस्वःसुशो
भममिदं।द्रष्टव्यं।स्वरिवआदित्यमिवेत्यर्थः।नेरे।नराकारं।तमितितच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः।यंदेवासःदेवाःदेवंदानादिगुणयुक्तं॥
अरतिं।अलमतिं।पर्याप्तमतिं।सर्वज्ञमित्यर्थः।अथवादेवान्।यजमानांश्च।प्रतिगंतारं।दधन्विरे।धारितवंतः।स्थापितवंतइत्यर्थः।क्वसमर्त्यास्पृ
थिवीलोके।यश्चदेवमनुष्यपुरुषपुरुमर्त्येभ्यइत्येवमयंद्वितीयांताश्राप्रत्ययःदेवान्प्रतिहव्यं।जहिषे।वहप्रापणइत्येतस्यैतद्रूपंभवति।मध्यमपु

रुषैकवचनंच॥प्रथमपुरुषैकवचनस्यस्थानेद्रष्टव्यं॥वहति।ऊढवान्वा॥३॥मानोहृणी॥सौभरेरार्षं।माइत्ययंप्रतिषेधः।हृणीथाइत्येतेनसंबंध
२९ यितव्यः।हेअग्ने।नअस्माकं।माहृणीथाः।हृणिःक्रुधकर्मसुपाठितः।क्रोधार्थः।माक्रोत्सीः।मध्यमपुरुषयोगात्प्रत्यक्षकृतोमंत्रः।नचअतिथ्या
दीनिआमंत्रितानि।अतोयत्तच्छब्दावध्याहृत्यैकवाक्यतांनेयानि।यस्त्वंअतिथिस्थानीयः।यश्चवसुःप्रशस्तःधनवान्वा।अग्निः।यश्चपुरुप्रशस्तः
बहुभिःस्तोतृभिःस्तुतइत्यर्थः।यश्चएषःएणगतावित्यस्यैतद्रूपं।गंतायश्चसुहोता॥शोभनःआह्वातायश्चस्वध्वरःशोभनयज्ञः।सःअस्माकं।
माक्रोत्सीः॥४॥भद्रोनो॥असौभरेरार्षं॥भद्रःकल्याणः।नअस्माकं।अग्निःआहुतःआभिमुख्येनस्थित्वाहूतःमर्यादयावाहूतः।भवत्वितिवा
क्यशेषः।भद्रारातिः।यद्दयपेतत।हविर्दानं।एतदपिभद्रंभवतु।हेसुभगशोभनधन।अग्नेभद्रोअध्वरः।योऽप्ययंप्रक्रांतोयज्ञः।अयमपिभद्रो
भवतुउतअपिच।भद्राःप्रशस्तयःस्तुतयोभवंतु॥५॥यजिष्ठंत्वा।सौभरेरार्षं।हेअग्ने।यजिष्ठं।अतिशयेनयष्टारंदेवानां।त्वात्वांववृमहे।प्रार्थया
मः।देवंदेवत्रा।देवेषुदेवानांमध्यइत्यर्थः।कीदृशंत्वांप्रार्थयामहेउच्यते।होतारं।आह्वातारं।देवानां।अमर्त्यंमरणवर्जितं।अस्यप्रक्रांतस्यय
ज्ञस्य।परिसमाप्तिमितिवाक्यशेषः॥कीदृशंत्वांपरिसमाप्तिं।प्रार्थयामहे।उच्यते।सुक्रतुं।सुकर्माणंसुप्रज्ञंवा॥६॥तदग्नेद्युम्नं॥सौभरेरार्षं।यत्। २९

हेअग्नेद्युम्नं।यशः।अन्नंवा।आभरआनयदेहीत्यर्थः।कीदृशंपुनःअन्नंआभरामिउच्यते॥यत्।सासाह।सहमर्षणइत्यस्याभिभवनार्थस्यैतद्रू
पं।अभिभवति।सद्मे।यज्ञगृहे॥कंचित्।अत्रिणंअत्तारंविनाशयितारं॥रक्षःपिशाचादिकं।नकेवलंरक्षःपिशाचादीन्॥यदभिभवति।किंतर्हि।
मन्युंक्रोधंच॥जनस्य।कीदृशस्यजनस्यउच्यते।दूढ्यं।द्वितीयैकवचनमिदंषष्ठ्येकवचनस्यस्थानेद्रष्टव्यं॥दूढ्यस्य।दुर्धियः।पापबुद्धे
रित्यर्थः॥७॥यद्वाउवि॥विश्वमनसआर्षं।यत्।सप्तम्याअर्थेलुकद्रष्टव्यः॥यदावद्वावपिपादपूरणौ॥विशोमनुष्याः।तेषामधिपतिः।स्वामीवि
श्पतिःशितःशोतनूकरणे।इत्यस्यैतद्रूपं।श्यतिश्चसंस्कारार्थः।शितःसंस्कृतइत्यर्थः।केनसामर्थ्यात्स्तुतिभिर्हविर्भिश्च।सुप्रीतः।सुष्टुपरितृ
प्तइत्यर्थः॥मनुषः।मनुष्यस्यममविश्वमनसः॥यदेतिवचनात्तदेत्यध्याहर्तव्यं।यदाविशोविशोति।मनुष्यनामतस्मादियंतादर्थ्येचतुर्थीममस्व
भूतस्यमनुष्यस्यपुत्रायार्थाय॥ममपुत्रादीन्पालयितुमित्यर्थः।विश्वविश्वानि।इदितिपादपूरणः।अग्निःप्रतिशब्दःपादपूरणः।रक्षांसि।सेध
यति।नाशयतीत्यर्थः॥८॥द्वितीयेद्वितीयास्त्रशाला॥आग्नेयपर्वसमाप्तं॥इदानीमैंद्रंउच्यते॥ ॥तद्वोगाय।भरद्वाजस्यार्षं॥तत्।वः।द्वितीया
बहुवचनमिदंप्रथमैकवचनस्यस्थानेद्रष्टव्यं॥संगायागायंतीत्यर्चति।कर्मसुपाठात्स्तुत्यर्थः।स्तुत्याचात्र।उच्चारणंलक्ष्यते।अंतरालनएव

51/1973

चायंप्रैषः।हेमदीयअंतरालन्।तंत्वंस्तुतिरूपं।उच्चारय।सुते।अभिषुतेसोमे।सचा।सह।अन्यैःऋत्विग्भिः।कस्मैउच्यते।पुरुहूताय।बहुभिर्यज
२० मानैः।आहूतस्येंद्रस्यार्थाय।कीदृशास्येंद्रस्यार्थाय।सत्वने।षणदानेइत्यस्यैतद्रूपं।दात्रे।स्तोतृभ्यः।शं।यत्।शमितिसुखनाम।यदुच्चार्यमाणं।इं
द्रस्यसुखंकरोतितत्।उच्चारयेत्यर्थः।कस्मैइव।उच्यते।गवेन।नशब्दः।उपमार्थीयः।गवेइव।गोशब्देनात्रवृषभउच्यते।वृषभाय।इव।कीदृ
शाय।उच्यते।शाकिने।शाकनं।शाकःशक्तिरित्यर्थः।तद्वान्।शाकी।तस्मै।शाकिने।शक्तिमतेत्यर्थः।यथाकश्चित्कृषीवलः।शक्तिमतोवृषभस्य
सुखकराःस्तुतीरुच्चारयति।तद्वत्सुखकरमिंद्रस्यस्तुतिरूपमुच्चारयेत्यर्थः।।१।।यस्तेनूनं।।श्रुतकक्षस्यार्षं।।यः।तेनूनंनिश्चितंशतक्रतोशतमि
तिबहुनामक्रतुमितिकर्मनामशतंक्रतूनांयस्यसशतक्रतुःतस्यसंबोधनं।।हेशतक्रतोबहुकर्मन्।इंद्रद्युम्नितमः।द्योततेतेनदीप्त्यर्थस्यअ
तिशयेनदीप्तितमः।।तेनमदः।मत्तःसन्स्तोतृभ्यः।यस्तुतस्यधनंददासितेनमदेननूनंनिश्चयेन।।मदे।सप्तम्येकवचनमिदंतृतीयैकवचनस्य
स्थानेद्रष्टव्यं।।मदेनमदेः।माद्यस्वेत्यर्थः।।२।।गावउपवद।।हर्यतस्यार्षं।गोशब्देनात्रवाचःउच्यंते।हेगावः।मदीयावाचः।उपवचःउपवचःउप
वदएकवचनमिदंबहुवचनस्यस्थानेद्रष्टव्यं।।उपगम्यवदत।किंपुनर्वदामःउच्यतेअवटेसप्तम्येकवचनमिदंद्वितीयैकवचनस्यस्थानेद्रष्टव्यं।अव २०

टं।अवटइति।अपठितमपिमेघनामद्रष्टव्यं।।मेघं।किंपुनर्वदामः।उच्यते।ममार्थायैोदकंपीतमीत्येवमादिनकेवलंमेघं।।महीमद्रत्यौच।द्यावापृथिव्यौ
कीदृशे।उच्यतेयज्ञस्परस्पृदा।रश्मिवितिरूपनाम।येदन्तः।तेरस्पृदे।यज्ञस्परस्पृदेइत्यर्थः।।कीदृशंपुनर्येउपवदामः।उच्यते।उभौकर्णौहिरण्मयौ।।
उभौकर्णौहिरण्मयौयस्य।अस्तिपुनःक्वचिदन्यत्रापिहिरण्यकर्णत्वं।।मेघस्य।अस्तीतिब्रूमः।हिरण्यकर्णमणिग्रीवकर्णइत्यत्र।।३।।अरमश्वा।श्रुत
कक्षस्यार्षं।अरं।अलं।पर्याप्तमित्यर्थः।अश्वाय।अश्वस्यार्थाय।गायत।गायतीत्यर्चति।कर्मसुपाठात्स्तुत्यर्थः।हेश्रुतकक्ष।श्रुतकक्षस्यममपुत्राः।
अरंअलंपर्याप्तमित्यर्थः।गायतेत्येतदनुषज्यते।गवे।गोरर्थाय।अरंइंद्रस्यधाम्ने।धामशब्दस्थानवचनः।तस्मादियंतादर्थ्येचतुर्थी।।इंद्रस्ययत्स्था
नं।स्वर्गाख्यंतस्यचार्थायेत्यर्थः।।४।।तमिंद्रंवा।।श्रुतकक्षस्यार्षं।यउक्तगुणः।तमिंद्रंवाजयामसि।वाजयतीत्यर्चति।कर्मसुपठितमंत्रस्तुत्यर्थः।
वाजयामः।भूजयामःस्तुमइत्यर्थः।किमर्थंपुनःस्तुमः।उच्यते।महेवृत्रायहंतवे।महतोवृत्रस्यहननार्थमित्यर्थः।सइंद्रःस्तुतःसन्।वृषावर्षिताभु
वत्।भवेत्।कइवउच्यतेवृषभःलुप्तोपममिदं।वृषभइव।यथावृषभःरेतसःवर्षिता।तद्वद्वर्षिता।उदकस्यभवत्वित्यर्थः।।५।।त्वमिंद्र।देवजामय
आर्षं।त्वंहेइंद्र।बलाज्जातः।बलस्यत्वयिदृश्यमानत्वात्कारणानुविधायित्वस्यकार्याणामिष्यमाणत्वात्कीदृशाद्बलायदभिभवित्वत्तस्मादित्य

63/1973

र्थः।किमभिभवितुरेवकेवलं।उच्यते।ओजसः।परकीयस्यबलस्यउच्यते।सहसा।सहमर्षणे।अभिभवेत्तछंदसीत्यस्येतद्रूपं॥परकीयस्यबलस्य।
३१ ऋजुकरणस्वभावात्।किंच।त्वं।संन।प्रशस्त।हेवृषन्।वर्षितः।वृषावर्षिता।इदितिपादपूरणः।असिभवसि॥६॥यज्ञइंद्रं।गोषूक्ताश्वसूक्तयोरा
र्षं॥यत्तः।मदीयोयागः।इंद्रंअवर्धयत्।वर्धितवान्।वायः।कीदृशः।इंद्रःउच्यते।यत्।नपुंसकलिंगस्यस्थानेद्रष्टव्यं॥यः।भूमिंपृथिवीं।व्यवर्तयत्।
विवर्तयतिविवर्तते।तवान्वाससंपत्तिद्वारेण।अन्यरूपांकरोत्यर्थः।किंपुनःकुर्वन्।अन्यरूपांपृथिवींकरोति॥उच्यते।चक्राणः।कुर्वन्।उपसं
गर्जितलक्षणंशब्दंक्वउच्यते।दिविद्युलोके॥७॥यदिंद्राहं।गोषूक्ताश्वसूक्तयोरार्षं।यदि।हेइंद्र।यथात्वं।ईशिषे।एवमहं।ईशीय।कस्यउच्यते।वसः
वसुनःधनस्येत्यर्थः।एकः।इच्छब्दः।एवकारार्थः।एकएवततः।किंस्यात्।उच्यते।स्तोतामेममगोसखागावःसखिभूतायस्यसगोसखामित्रलक्ष
णंचात्रसखत्वं॥परिगृह्यते।बहुधागावोयस्यस्वभूताः।एतदुक्तंभवतियोपिअत्यंतेश्वरः॥सोपिमेस्तोताभवेत्।अथवातसैमेस्तोत्रेगावोददातो
त्यर्थः।किंतुअल्पपुण्यत्वान्नममैतत्संजातं॥८॥पन्यंपन्यं।मेधातिथेरार्षं।पन्यंपन्यं।पणतिःस्तुत्यर्थः।तस्यायमभ्यासः।अभ्यासेचभूपं।समर्थं
मन्यंते।पन्यंपन्यं।अतिशयेनस्तुत्यर्थः।इदितिपादपूरणः।सोतारः।मदीयाऋत्विजः।सोमस्यअभिषोतारः।आधावत।सर्तेर्गत्यर्थस्य।अंत ३१

णिजतण्यर्थस्यचेदंरूपं॥सारयत।आभिमुख्येनगमयत्।नयतइत्यर्थः।किंपुनर्नयत।उच्यते।सोमंवीरायवीरविक्रांताय।शूरायेत्यर्थः॥९॥इदंवसो॥मेधा
तिथेरार्षं।इदंहेवसो।प्रशस्तधनवन्।सुतंअभिषुतं।अधःसोमलक्षणमन्नंएतत्स्थितंपिबकियत्पुनःपिबामिउच्यते।यावत्पूर्णं।उदरंयावदाध्मा
तइत्यर्थः।अनाभयिन्।आभिमुख्येनभयंयस्यनास्तिसअनाभयीतस्यसंबोधनंहेअनाभयिन्।भयवर्जितेत्यर्थः।स्यादेतत्।अदत्तंकथंपिबामी
ति।अतउच्यते।ररिम।रमिचादानइतिअस्यैतद्रूपं॥दद्मोवपंतेतुभ्यं॥१०॥द्वितीयेतृतीयादशत्या॥उद्वेदभि॥श्रुतकक्षस्यार्षं।उदित्ययमुपसर्गए
षीत्यनेनसंबंधयितव्यः।घइदितिद्वावपिपादपूरणौ।श्रुतामघं।श्रुतंविख्यातंप्रभूतमित्यर्थः।मघंधनां।श्रुतंमघंयस्यसश्रुतमघः।तंश्रुतामघं।छां
दसंदीर्घत्वं।विख्यातधनमित्यर्थः।वृषभं।वर्षितारं।नर्यापसं।नृभ्योहितं।नर्यं।अपइतिकर्मनाम।नर्यअपोयस्यसनर्यापसः।तंनर्यापसं।नृभ्यो
हितकारिणमित्यर्थः।अस्तारं।क्षेप्तारं।शत्रूणामीदृशमिंद्रंप्रतीत्यउदेषि।हेसूर्य॥१॥यदद्यक॥श्रुतकक्षस्यार्षं॥यत्।अद्य।अस्मिन्नहनि।अद्यग्रह
णंपात्रप्रदर्शनार्थं॥सर्वकालमित्यर्थः।यच्चकिंचित्।हेवृत्रहन्।उत्।अगाः।मध्यमपुरुषैकवचनं।प्रथमपुरुषैकवचनस्यस्थानेद्रष्टव्यं॥अगात्।उद्ग
तिजायंतइत्यर्थः॥अभिपादपूरणः।सूर्यं।स्वद्युउदयितभवत्यर्थः।केषांसामर्थ्याच्छत्रूणांसर्वतत्प्राणिजातं।हेइंद्रतेतववशेवर्ततइतिवाक्यशेषः।एत

65/1973

उक्तंभवति॥यावत्किंचित्प्राणिजातंसर्वस्यत्वं॥ईशिषइत्यर्थः॥२॥यआनयत्।भरद्वाजस्यार्षं।यः इंद्रः।आअनयत्।आभिमुख्येनआनीतवान्आत्मनः
३२ सकाशेकृतवानित्यर्थः।परावतः दूरात्।कथंपुनः आनीतवान्।उच्यतेसुनीतीसुपांसुलुगित्यनेनपूर्वसवर्णइत्येवंसुनीति।एतदुक्तंभवति।शोभनया
नीत्यानयेनआनीयमानोनकेनचित्प्रतिविध्यतइत्यर्थः।कंपुनः।आनीतवान्उच्यते।तुर्वशंनाम।राजपुत्रंयदुंचकिमर्थं।पालनार्थं।कुतएतत्।त्वमेविष
।नर्यं।तुर्वशंयदुं।उतत्यातुर्वशायदूइदमादिषु।अनयोःपालनसंबंधस्यदर्शनात्।दूरादात्मनःसकाशमानीयपालितवानित्यर्थः।इंद्रः।सःनःअस्माकं
युवातरुणः सखवासखिभूतः।देवमनुष्ययोश्चस्तुत्यस्तोतृलक्षणं।सख्यंस्तुत्यइत्यर्थः॥३॥मानइंद्र।श्रुतकक्षस्यार्षं।मानः माइत्ययंप्रतिषेधः।आप
मदित्याख्यातेनसंबंधयितव्यः।नःअस्माकं।हेइंद्र।अभ्यादिशः।आभिमुख्येनयुध्यार्थंयेआदिशंतितेअभ्यादिशः।आज्ञाकाराइत्यर्थः॥सूरः।प्रथ
मैकवचनमिदंषष्ठ्येकवचनस्यस्थानेद्रष्टव्यं।सूरस्यसुष्टुईरयितुःशत्रोःस्वभूताःअक्तुषुरात्रिषु।रात्रिग्रहणंचात्रप्रदर्शनार्थं॥सर्वकालमित्यर्थः।
माआपमत्।माभिमुख्येननिर्यातुसर्वदायुध्येनत्रंपतामित्यर्थः।किंच।त्वात्वयायुजायुज्यतइतियुक्।सहायः।त्वयासहायेनेत्यर्थः।वनेमवनतिर्यद्यप्य
न्यत्रसंभजनार्थस्तथापीहहिंसार्थोद्रष्टव्यः।हिंस्यामतत्नपुंसकमिदंपुल्लिंगस्यस्थानेद्रष्टव्यं॥एकवचनंबहुवचनस्यस्थानेद्रष्टव्यं॥तान्॥४॥ऐंद्रसा ३२

साम।मधुछंदसआर्षं।आइत्ययमुपसर्गोभरेत्याख्यातेनसंबंधयितव्यः॥हेइंद्रसानसिं।वनषणसंभक्तौइत्यस्येदंरूपं।संभजनीयं।रयिंधनं।सजि 67/1973
त्वानं।सहभूतानां।शत्रूणांजेतृसदासर्वदाचसह अभिभवितृवर्षिष्ठं।अतिशयेनप्रवृद्धं।ऊतये।तर्पणाय।आभरदेहीत्यर्थः॥५॥इंद्रंवयं॥मधुछंद
सआर्षं।इंद्रंवयं।महाधने।महतिसंग्रामे।इंद्रमेव।अर्भे।अल्पेसंग्रामेहवामहे।युजं।युज्यतइतियुक्।सहायस्तंसहायमित्यर्थः।वृत्रेषु।संग्रामव्य
तिरेकेणान्येषु।शत्रुषुहंतव्येषु।आव्हयामइत्यनुषज्यते॥कीदृशमिंद्रं।आव्हयामः।उच्यते।वज्रिणं।वज्रवंतइत्यर्थः॥६॥अपिबत्।त्रिशोकस्या
र्षं।अपिबत्पीतवानिंद्रः।किंपीतवान्उच्यते।कद्रुवः।सुतं।कद्रुनाम।कश्यपस्यभार्यातस्याःस्वभूतंसुतं।अभिषुतंसोमं।क्वपुनःपीतवानुच्यते॥
सहस्रबाह्वे।सहस्रमितिबाहुनाम।बाहुशब्देनापिअवयवेन।समुदायस्यसंबंधात्कर्ताउच्यते।सहस्रबाहवःकर्तारोयत्रतत्सहस्रबाहुसत्रंत
स्मिन्निपीतवानित्यर्थः।किंचतत्रसत्रेआदर्दिष्टअत्यर्थंदृश्यते।वर्ण्यतइत्यर्थः॥केनसामर्थ्येनमंत्रैःकस्येंद्रस्यपौंस्यंबलंच॥७॥वयमिंद्र।वसिष्ठ
स्यार्षं।वयंहेइंद्रत्वायवः।त्वत्कामाः।त्वांयष्टुमिच्छवइत्यर्थः।अभिप्रणोनुमः।अभिप्रेतिद्वावपिपादपूरणौ॥अत्यर्थंस्तुमः।हेवृषन्।वर्षितः।यतएव
मतोब्रवीमि।विद्धिविजानीहि।ज्ञात्वाचयागसंपादयेत्यर्थः।तुइतिपादपूरणः।कस्यपुनर्जानामि।अस्यसुतस्यनःअस्माकं।स्वभूतस्यहेवसोप्रशस्त

धनवत॥८॥आघायै॥अत्रिश्लोकस्यार्षं।आइत्येषमर्यादायां।घइतिपादपूरणः।मर्यादया।येअग्निं।इंधतेसंदीपयंति।येचस्तृणंतिबर्हिः।आनुषक्।
३३ आनुपूर्व्येणयेषांचइंद्रः।युवासर्वदातरुणः।सखास्तुत्यस्तोतृलक्षणेनसंबंधेनसखिभूतः।स्तुतस्तुत्यइत्यर्थः।यच्छब्दश्रुतेश्च।तच्छब्दोयोग्यार्थ
संबंधोध्याहर्तव्यः।तेपुण्यवंतइतिवाक्यशेषः॥९॥भिंधिविश्वा।सश्लोकस्यार्षं।भिंधिविदारय।मारयेत्यर्थः।विश्वाःसर्वाः।अयमुपसर्गश्रुतेः।
क्रियापदमध्याह्रियते।अपेत्यअस्मत्तः।अपनीयेत्यर्थः।द्वेष्टीतिद्विट्तान्द्विषः।शत्रुजातीरित्यर्थः।परिबाधः।परीतिसर्वतोभावेबाधापीडास
र्वतोयोबाधांकरोतिसःबाधयतिबाधते।क्विप्बाधातान्।सर्वतःपीडाकरानित्यर्थः।भिंधीत्येतदनुषज्यते।जहिमृधः।मारय।मृधःसंग्रामनाम।
तंकरोतिमृधयति।मृधयते।क्विप्।मृधतान्मृधःसंग्रामकारिणइत्यर्थः॥हत्वाचतदाभरेतिपरस्तात्तच्छब्दश्रुतेः।योग्यार्थसंबंधोयच्छब्दोध्याहर्त
व्यः॥यत्तद्यंवसुधनंस्पार्हं।स्पृहणीयंसारवदित्यर्थः।ततअस्मभ्यंआभरआहरदेहीत्यर्थः॥१०॥द्वितीयेचतुर्थ्यादशात्या॥इहेवशृण्व॥कण्व
स्यार्षं।इहपृथिव्यां।इवशब्दएवस्यार्थइहैवपृथिव्यां।स्थितैःशृण्वेश्रूयते।शब्दएषांमरुतांकशाःहस्तेषु।व्यवस्थिता।अश्वानांसारथयःयत्
सप्तम्याअत्रलुक्।यदावदानवदंतिशब्दंकुर्वंति।यद्यदानितिपरस्तात्यच्छब्दश्रुतेःपूर्वत्रतच्छब्दमध्याहृत्यैकवाक्यतायोज्या।एषांकशाहस्ते ३३

69/1973

षुव्यवस्थिताअदाशब्दंकुर्वंति।तदाइहैवश्रूयतेशब्दः।नकेवलं।तदेवकिंतर्हियदाचनियामइत्ययमुपसर्गः।ऋंजतेइत्याख्यातेनसंबंधयितव्यः॥
पांतियेनसयामोरथः।तंयामंरथं।कीदृशंचित्रंविचित्रंपूज्यंवा।निऋंजतेनियमेनगमयंति।तदाचइहैवशब्दःश्रूयतइति॥१॥इमउत्वा।त्रिशोकस्या
र्षं।इमेमदीयाऋत्विजः।उइतिपादपूरणः।त्वांत्वांविचक्षते।विविधंपश्यंति।सखायःस्तुत्यस्तोतृलक्षणेनसख्येनसखिभूताःस्तुवंतइत्यर्थः।हे
इंद्रसोमिनः।सोमवंतः।कथंपुनःपश्यंति।उच्यते।पुष्टावंतोयथापशुंपोषणंपुष्टंतद्वंतःपुष्टावंतःपोषणवंतइत्यर्थः॥एतदुक्तंभवति।यथाघास
हारिणोघासेनगृहीतेनयशोस्तर्पणायपरमयाप्रीत्यायुक्तास्तमेवपशुंपश्यंति॥तद्वन्मदीयाऋत्विजः।सोमवंतस्तेनैवसोमेनगृहीतेनतर्पणा
र्थंत्वांपश्यतीत्यर्थः॥२॥समस्यम॥वत्सस्यार्षं।समित्ययमुपसर्गः।नमंतइत्याख्यातेनसंबंधयितव्यः॥अस्यइंद्रस्यस्वाभूताय।मन्यवेक्रोधायवि
शः।यद्यपिविशइतिमनुष्यनामतथापिकृष्टयइत्यनेनपौनरुक्त्यप्रसंगात्क्रियानिमित्तंद्रष्टव्यं॥विष्कृत्याप्रावित्यस्येदंरूपं।स्तुतिभिर्हविर्भिश्च
व्याप्तारःविश्वाःसर्वाःसंतःसंनमंत।प्रह्वीभवंतिस्तुवंतीत्यर्थः॥केपुनःप्रह्वीभवंति।उच्यते।कृष्टयःयजमानमनुष्याइत्यर्थः।कथंपुनःसंनमंतउच्य
ते॥समुद्रायेवसिंधवः।यथासमुद्रायसिंधवःनद्यःप्रह्वीभवंतितद्वदित्यर्थः॥३॥देवानामि॥कुसीदिनआर्षं।देवानांस्वभूतं।इदितिपादपूरणःतद्

३४ वृणीमहइतिपरस्तात्तच्छब्दश्रुतेः॥यच्छब्दोध्याहर्तव्यः यत्।अवः पालनं।तर्पणंवामहत्तरत्रस्तत्।तत्आवृणीमहे।आभिमुख्येनप्रार्थयामः।वयंकीदृ
शानांदेवानांउच्यतेवृष्ण्यां।वर्षितॄणांकिमर्थंपुनःप्रार्थयामः उच्यतेनः अस्मभ्यंऊतयेपालनार्थमित्यर्थः॥४॥सोमानंस्व॥मेधातिथेरार्षं।सामानं।
अभिषोतारमितिवाक्यशेषः।स्वरणं।स्वशब्दोपतापयोरित्येतस्यैतद्रूपं।शब्दयितारंस्तुतीनांउच्चारयितारंस्तोतारं।यष्टारंचेत्यर्थः॥मांकृणुहि।
कुरुहेब्रह्मणस्पतेकमिवउच्यतेकक्षीवंतं।लुप्तोपमदिदंद्रष्टव्यं।कक्षीवंतमिव।यः कतमः कक्षीवान्उच्यतेयसिजः यउशिजः पुत्रस्तमिव॥५॥
बोधन्मनाः।कक्षस्यार्षं।बोधन्मनाः।बुध्यतिमनोयस्यसबोधन्मनाः।इदितिपादपूरणः॥अस्तुभवतु।नअस्माकं।वृत्रहावृत्रस्यहंता।इंद्रः।
भूर्यासुतिः।भूरितिबहुनामधेयंअत्रसुतिशब्दोरसवचनः॥तासम्राजाघृतासुतीइति।यथाभूरिआसुतिर्यस्य।सभूर्यासुतिः।बहुरसइत्य
र्थः॥शृणोतुशक्रआशिषं।प्रार्थनांएतदुक्तंभवति।यद्यदहंप्रार्थयामि।तच्छृणोतुशक्रः श्रुत्वाच।बुध्यतु।बुध्वाचसंपादयतु॥६॥अद्यानोदेव॥श्या
श्व वाश्वस्यार्षं॥अद्यनः अस्मभ्यंहेदेवसवितः सविताआदित्यस्तस्यसंबोधनंहेसवितः।प्रजावत्प्रजासहितं॥सावीःअभ्यनुजानीहि देहीत्यर्थः॥सौभगंभग
मितिधननामतत्रोभनंभगंसुभगंसुभगमेवसौभगं॥स्वार्थिकस्तद्धितः॥शोभनंधनमित्यर्थः किंच।परादुःष्वप्न्यंसुव।पराइत्ययमुपसर्गः।सुवेत्याख्या ३४

ग

तेनसंबंधयितव्यः॥सुवेतिषूप्रेरणेइत्यस्येदंरूपंदुःष्वप्न्यं॥अनिष्टस्यकस्यचित्सूचकः।स्वप्नः दुःस्वप्नः तस्मिन्भवंदुःष्वप्न्यंमाद्यंमरणादितत्परासुव।
प्रेरयअपनयेत्यर्थः॥७॥क्वास्यवृषः॥प्रगाथस्यार्षं।क्वास्यसः तच्छब्दश्रुतेर्यच्छब्दोयोग्यार्थसंबंधोध्याहियते॥यउक्तगुणइंद्रः।कः सः वृषभः व
र्षिता।अपांसुवातरूणः।तुविग्रीवः पुरुग्रीवः बहुग्रीवइत्यर्थः।कथमिंद्रोबहुग्रीवउच्यते।परमात्मस्वरूपत्वात्॥सर्वतः पाणिपादांतः सर्वतोक्षिशिरो
मुखः सर्वतः श्रुतिमाल्लोकेसर्वमावृत्यतिष्ठतीति॥एवंतुविग्रीवः।अनानतः।शत्रुंप्रति।अप्रह्वीभूतइत्यर्थः।किमर्थंपुनःपृच्छ्यते।उच्यतेब्रह्माकः
प्रजापतिः भूतानांनिर्मिता।अध्वर्युरपियज्ञस्यनिर्मिता।अतोनिर्मातृत्वसामान्यात्कः शब्देनात्राध्वर्युरुच्यते॥ब्रह्माचअध्वर्युश्चतंसपर्यति॥परिचर
तीत्यर्थः।पूजयतिवायतः एवमतः पृच्छते॥अथवाएतस्मात्कारणात्अनानतः यतः ब्रह्माप्रजापतिः।तंपरिचरतिकस्सइति॥८॥उपह्वरे॥वत्सस्यार्षं।उप
ह्वरेगह्वरेप्रदेशेगिरीणांमेघानांसंबंधिनि॥व्रुक्षमेघप्रदेशइत्यर्थः॥संगमेचसंगमेचनदीनांशब्दकारिणीनामपां॥व्रूरुदकेप्रदेशइत्यर्थः।धियाप्रज्ञ
याविप्रः मेधावी॥अजायतजायतेएतदुक्तंभवति॥यत्रप्रदेशेवह्वोमेघापत्रचवरूदकंतत्रतेषांहवनार्थंतस्यचोदकस्यपानार्थं।इंद्रइति॥९॥प्रसम्राजं।
इरिमिरिर्नामऋषिः॥तस्येदमार्षं।प्रेत्ययमुपसर्गः स्तोतेत्याख्यातेनसंबंधयितव्यः॥सम्राजं।सम्यग्शिरानंचर्षणीनांमनुष्याणां॥इंद्रंस्तोत्रप्रकर्षेणस्तु

71/1923

३५

वत्तहेमदीयाऋत्विजः कीदृशंपुनः इंद्रंस्तुमउच्यते। नव्यं। नवतरं। तरुणमित्यर्थः। अथवानुस्तुनावित्यस्येदंरूपं। यदिप्रत्ययेकर्मणिकारकेरूपं॥ एतदुक्तं
भवति॥ स्तोतव्यमिंद्रंप्रकर्षेणस्तुत। केनपुनस्तुमउच्यते गीर्भिस्तुतिलक्षणाभिर्वाग्भिरित्यर्थः॥ कीदृशंपुनरिंद्रंस्तुम। उच्यते नरंनरा कारंनृषाहंनरो
मनुष्यास्तान्यःसहते अभिभवतिसनृषाट्। तंनृषाहं शत्रून्मनुष्याणामभिभवितारमित्यर्थः। मंहिष्ठं अतिशयेनस्तोतृभ्यःधनस्यदातृतमं॥१॥
द्वितीयेपंचम्यादशात्या॥ अपादुशिप्र्यं॥ श्रुतकक्षस्यार्षं॥ अपात्पीतवान्उपादपूरणः। इंद्रः कीदृशउच्यते। शिप्रीशिप्रेहनुनासिकेवा। तद्वान्शिप्री।
कस्यपुनः पीतवान्। उच्यते। अंधसः। अन्नस्यषष्ठीनिर्देशात्सोपलक्षणमेकदेशं। कीदृशस्यअंधसःउच्यते सुदक्षस्य। सुष्टुउत्साहितस्येत्यर्थः। प्रहो
षिणः। जुहोतेर्दानार्थस्येदंरूपं। सष्टुमयादत्तस्येत्यर्थः। किंलक्षणस्यपुनरंधसःपीतवान्। उच्यते इंदोः सोमस्य। यवाशिरः यवशब्देनात्रयवविकारसः।
क्तवःउच्यंते तेमिश्रणंयस्य। सयवाशिरः प्रथमाचषष्ठ्यर्थेद्रष्टव्या। यवमिश्रितस्येत्यर्थः। मंथीचनामग्रहः। ससक्तुभिर्दृश्यते। मंथिनंसक्तुभिरिति
वचनं। तमेवक्षिप्त्वेतदुच्यते। यवआशिरइति॥१॥ इमाउत्वा॥ मेधातिथेरार्षं॥ इमाः। उइतिपादपूरणः॥ त्वात्वां। पुरूवसोपुर्वितिबहुनाम। वसुइत्य
पिधननाम। पुरुवसुर्यस्यसपुरुवसुः तस्यसंबोधनंहेपुरुवसोवारुपधायादीर्घः। इतिपुरूवसोबहुधन। अभिप्रनोनवः। आभिमुख्येनस्थिता ३५

अत्यर्थं। पुनःपुनर्वासुतवत्यःगिर। अस्मदीयावाचः। कथंपुनःस्तुतवत्यःउच्यते गावोवत्सं न। नशब्दउपरिष्टादुपचारत्वादुपमार्थीयः। वत्समिव। यथा
गावःवत्सं अभिनंदंति। तद्वदित्यर्थः। कीदृश्योगावः। उच्यते धेनवः। अचिरप्रसूताइत्यर्थः॥२॥ अत्राहगोः॥ गोतमस्यार्षं। अत्रेत्यनेनचंद्रमसः। गृहं
प्रतिनिर्दिश्यते। चंद्रमसोमंडलंगृहं। अत्रचंद्रमसोगृहे। गोशब्देनापिसुषुम्नानामआदित्यरश्मिः। चंद्रमसंप्रतिगतः। अल्पत्वाच्चंद्रमंडल
स्यरश्मिःप्रतिगतः। ततःपरावृत्यपृथिव्यांज्योत्स्नारूपेणदीप्यते। सोत्रगोशब्देनोच्यते। तस्यचंद्रमसंप्रतिअतोरश्मयः। अमन्वत। अनुमन्यंते।
नामनमनं। प्रव्हीभावं। त्वष्टुः। आदित्यस्य। अपाच्यं। अपगं। अपचितं। अपिहितं। अंतर्हितंवा॥ अनुमन्यंते। इच्छा अमुत्र। चंद्रमसोगृहेमंडले॥२
यदिंद्रोआ। भरद्वाजस्यार्षं॥ यतमेघस्थानं। इंद्रोरितःगतः। प्राप्तःसंनित्यर्थः। अनयत्नयति। पृथिव्यांपातयतीत्यर्थः॥ महीरपः। महांति। वृष्णिलक्ष
णान्युदकानि। कीदृशइंद्रउच्यते। वृषंतमः। अतिशयेनवर्षिता। तत्रतत्स्थानेपूषा। आभुवन्भवति। सचासह। पूस्मासहितोवर्षति। नकेवलंवर्ष
तीत्यर्थः॥४॥ गोर्धयति॥ विंदोर्वा। यूतदक्षणआर्षं। गोःशब्देनात्रमाध्यमिकावाक्। गउच्यते साधयति। पानार्थमुदकं। क्षरतिवर्षतीत्यर्थः। मरुतां
माताश्रवस्युः। श्रवःशब्देनकीर्तिरुच्यते। तामिच्छति। श्रवस्यति। श्रवस्यतेः। उप्रत्ययः। श्रवस्युः। कीर्तिकामइत्यर्थः। कीदृशानांपुनर्मरुतांमाताउच्यते॥

73 — 1973

मघोनां॥मघं धनं।तद्येषामस्तितेमघवानः।तेषांमघोनां॥धनवतामित्यर्थः॥किंकेवलैव।गोवर्षति।नेत्युच्यतेत्युक्त्वा।तैरेवपुत्रैः।मरुद्भिःसहितेत्यर्थः॥
३८ वन्हिः।मातृत्वात्तेषामेवमरुतां।वोद्धीकीदृशानां।पुनर्मरुतां।वोद्धी।उच्यतेरथानां।रथस्वभावकानामित्यर्थः॥५॥उपनोह॥सुकक्षस्यार्षं।उप
त्ययमुपसर्गः।आइत्येतस्यस्थानेद्रष्टव्यं।याहीत्याख्यातेनसंबध्यते॥आयाहीति।केनपुनरागच्छामीति।उच्यते।हरिभिः।अश्वैरित्यर्थः॥किं
पुनः।प्रतिआगच्छामि।उच्यते।नः।सुतं।अस्माकं।स्वभूतमभिषुतं।सोमंप्रति।मदानांपते।मदाः।गर्वाः।तेषामधिपतिः।अथवामादयंतीतिमदाः॥
सोमास्तेषामधिपतिभूताः।उपनोहरिभिःसुतंइत्यभ्यासः।अभ्यासेनचभूयानर्थःप्रतीयते।अस्माकंस्वभूतमभिषुतंसोमंप्रतिशीघ्रमागच्छेत्य
र्थः॥६॥इष्टाहोत्रा॥सुकक्षस्यार्षं।ऋषिआत्मीयान्।ऋत्विजः।आह।इष्टाप्रियाहोत्राह्वयंतइतिहोत्राः।आकृतयइत्यर्थः।ताअसृक्षत।विसृजत।
दत्तइत्यर्थः।कथंपुनर्विसृजामउच्यते।इंद्रंवृधंतः।वर्धयंतः।अध्वरेयज्ञेकेनसामर्थ्यात्स्तुतिभिःस्तुवंतइत्यर्थः।क्वपुनर्विसृजामः।उच्यते।अच्छ
अवभृथ।आभुमवभृथमित्यर्थः॥प्रधानाहुतिषुकृतासुअवभृथसंज्ञकंकर्मकरिष्यतएवमवभृथमित्यर्थः।ओजसास्वेनकर्मणासामर्थ्येन
॥७॥अहमिद्धि॥वत्सस्यार्षं।अहं।इत्।हि।द्वावपिपादपूरणौ।पितुःकण्वस्यसकाशात्तां।परीत्ययं।जग्रहइत्याख्यातेनसंबंधयितव्यः।मेधांप्रज्ञां। ३८

कीदृशात्पितुःसकाशात्।उच्यते।ऋतस्यसत्यस्य।परिजग्रहे।परिगृहीतवान्।तयाचगृहीतया।अहंसूर्यइव।अजनि।यथासूर्यःसर्वार्थानां 73A
द्रष्टा।तद्वदहमपिसर्वार्थानां।संद्रष्टासंजातइत्यर्थः॥८॥रेवतीर्नः॥शुनःशेपस्यार्षं।रयिरितिधननाम।घासांविद्यते।तारेवतीः।द्वितीयाबहुव 1973
चनमिदं।प्रथमाबहुवचनस्यस्थानेद्रष्टव्यं॥संत्वित्याख्यातेनसंबंध्यते।धनवत्योभवंत्वित्यर्थः।काः।सामर्थ्यात्स्तुतयः।कस्यसंबंधिन्यः।उच्य
तेसदमादे।इंद्रे।इत्येतेसप्तम्येकवचनेषष्ठ्येकवचनस्यस्थानेद्रष्टव्यं॥अस्माकं।सहभूतानां।मदनीयस्य।स्तुत्यस्य।इंद्रस्यसंबंधिन्यः।न
केवलंधनवत्योभवंत्विति।किंतर्हितुविवाजाः।तुविइतिबहुनाम।वाजइतिअन्ननाम।तुविचबहुवाजायासांतातुविवाजाः।प्रभूतान्नाः।एतदु
क्तंभवति।धनस्यसाधकाभवंत्वित्यर्थः।क्षुमंतः।क्षुशब्दइत्यस्येदंरूपं।शब्दवंतः।कीर्तिवंतः।याभिर्मदेन।मोदेमेत्येतस्यैतदाशास्महे॥९॥
सोमःपूषाचचेततुः॥वामदेवस्यार्षं।जानीतः।विश्वासांसुक्षितीनां।एतेद्वितीयार्थेषष्ठ्यौ।सुक्षितीःसर्वाःसुनिवासान्।क्व।देवत्रा।देवमनुष्य
पुरुषमर्त्येभ्योद्वितीयासप्तम्योर्बहुलमित्येवमत्रसप्तम्याःत्राः।तेनदेवेषुचेततुः।रथ्योः।रथशब्देनात्रयज्ञउच्यते।रंहतेर्गतिकर्मणःरथ्योः
रथस्ययज्ञस्ययौवोढारौ।तौपत्नीयजमानावत्ररथ्यावुच्यते।तयोर्यज्ञस्यदेवान्।प्रतिप्रापयित्रोः।पत्नीयजमानयोः।द्विताद्विवचनस्यायमाकारः

हिते॥१०॥द्वितीयस्यषष्ठादशात्या॥ ॥पांतमावो॥ऋतकक्षस्यार्षं॥पांतंपिबंतं॥आकारःपादपूरणः।वः।द्वितीयाबहुवचनमिदंप्रथमाबहुवचन
२७ स्यस्थानेद्रष्टव्यं॥यूयं।हेऋत्विजः।किंपुनःपिबंतं।उच्यतेअंधसः।अधःअन्नं।सोमलक्षणंतस्मादियंषष्ठीनिर्देशाच्च।एकदेशमितिवाक्यशेषः
सोमलक्षणस्यान्नस्य।एकदेशंपांतं।इंद्रंअभिप्रगायतगायतीत्यर्चतिकर्म॥प्रशब्दःप्रकर्षे।अभिआभिमुख्येनस्थित्वाप्रकर्षेणस्तुतेत्यर्थः
कीदृशंपुनरिंद्रंस्तुमः।उच्यतेविश्वासाहं।सर्वेषांशत्रूणांअभिभवितारंविश्वसहंवा॥शतक्रतुं।शतमितिबहुनाम।क्रतुरित्यपिकर्मना
म।प्रज्ञानामवा।बहूनिकर्माणिप्रज्ञावायस्यसशतक्रतुः॥बहुकर्माणंबहुप्रज्ञंवेत्यर्थः।मंहिष्ठंमंहतिर्दानकर्मा।तस्मात्कर्तरितृच्।तजंता
दिदंअतिशयेनदातारमित्यर्थः।कस्मैपुनर्दातारं।उच्यतेचर्षणीनां।चर्षणयोमनुष्याःषष्ठीबहुवचनंचतुर्थीबहुवचनस्यस्थानेद्रष्टव्यं।यजमा
नमनुष्येभ्यइत्यर्थः॥१॥प्रवइंद्रा॥वसिष्ठस्यार्षं।प्रेत्ययमुपसर्गः।गायतेत्याख्यातेनसंबंधयितव्यः।प्रगायताप्रकर्षेणस्तुतेत्यर्थः।वः।द्विती
याबहुवचनमिदं।प्रथमाबहुवचनस्यस्थानेद्रष्टव्यं॥यूयं।हेऋत्विजः।कंपुनःस्तुमः।इंद्रायचतुर्थ्येकवचनमिदंषष्ठ्येकवचनस्यस्थाने
द्रष्टव्यं॥इंद्रस्यमानदं।सोममित्यर्थः।कीदृशस्येंद्रस्यउच्यते।हर्यश्वाय।इदमपिचतुर्थ्येकवचनंषष्ठ्येकवचनस्यस्थानेद्रष्टव्यं॥हरितवर्णा २७

वश्वोयस्यसहर्यश्वः।तस्यहर्यश्वस्य।सखायः।ऋत्विजःसोमयान्ने।इयमपिचतुर्थीषष्ठ्यर्थेसोमपातुरिंद्रस्य।मदकरं।सोमंस्तुतेत्यर्थः॥२॥वयमु 75/1973
त्वा।मेधातिथेरार्षं।वयं।ऊं इतिपादपूरणः।त्वात्वां।कीदृशा।वयंउच्यते।तदिदर्थाः।इ छब्दःपादपूरणः।यस्तवार्थोयागादिःसअर्थोयेषांतेतदर्थाः॥याग
पराइत्यर्थः।हेइंद्र।त्वायंतः।त्वांयष्टुमिच्छंतः।सखायः।सखिभूताः।तवकण्वाः।कण्वस्यपुत्राः।मेधातिथिप्रभृतयः।उक्थेभिःस्तोत्रैः।जरंतेस्तुवंतीत्य
र्थः॥३॥इंद्रायम॥ऋतकक्षस्यार्षं।इंद्रायतादर्थ्येचतुर्थी।इंद्रार्थं।कीदृशाय।इंद्राय।उच्यते।मद्वने।इयमपितादर्थ्येचतुर्थी।मदवतइंद्रस्यार्थायसु
तं।अभिषुतं।सोमं।परिष्टोभंतुसर्वतःस्तुवंतु।नः।अस्माकंस्वभूताःगिरः।स्तुतिलक्षणावाचः।अर्कंदेवंसोमं।अर्चंतुपूजयंतु।इत्यर्थः।मदीया
कारवःस्तोतारः।ऋत्विजइत्यर्थः॥४॥अयंतइंद्र।इरिमिरिनामऋषिस्तस्येदमार्षं॥अयंसोमः।तेइति।त्वादर्थ्येएषाचतुर्थीत्वदर्थमित्यर्थः।हेइं
द्रनिपूतःनियमेनदशापवित्रगालितइत्यर्थः।क्वपुनर्निपूतःउच्यतेअधिबर्हिषि।बर्हिषउपरिस्थततज्ज्ञात्वा॥आभिमुख्येनइहि।द्रवेति।द्वावपि
गत्यर्थौअभ्यासेचभूयांसमर्थंप्रतीयते।शीघ्रंएहीत्यर्थः।इमितिपादपूरणः।एत्यच।अस्यसोमस्यषष्ठीनिर्देशात्त्वांगंपिव॥५॥सुरूपकृत्नुं।मधु
छंदसआर्षं।सुरूपकृत्नुं।शोभनस्यरूपस्यवधादेःकर्मणःकर्त्तारमिंद्रं।ऊतयेआत्मनःपालनार्थं।तस्यैवतर्पणार्थं।सुदुघामिव।सुदोहनामिव।गो

दुहे।तस्याएवगोदोहनार्थं।एतदुक्तंभवति।यथाकश्चिद्गोदोहनार्थं।एतदुक्तंभवति।यथाकश्चिद्गोदोहकर्म।तस्याएवगोदोहनार्थं॥आह्वयति।तद्वज्जु
३८ हूमसि।आह्वयामः।द्यविद्यवि अहन्यहनीत्यर्थः॥६॥अभित्वा।शौनकस्यार्षं।अभीत्ययमुपसर्गः।सृजामीत्याख्यातेनसंबंधयितव्यः॥अभिसृ
जामि।आभिमुख्येनददामीत्यर्थः।किंतत्पुरोडाशादिलक्षणंहविः।त्वाप्रथमैकवचनमिदं।चतुर्थ्येकवचनस्थानेद्रष्टव्यं।हेइंद्रवृषभः।वर्षि
तः कस्मिन्कालेहविर्विसृजामि।सुतेअभिषुतेसोमेनकेवलंसुते।सोमेहविरेवददामिकिंतर्हिसुतंसृजामि।अभिषुतंचसोमं।तेददामीत्यर्थः
पीतयेपानार्थं।दत्तंचसतत्त्वंपभक्षय।त्वंपतर्पय।आत्मानंवा।यद्भक्षितव्यं।तद्भक्षययत्पातव्यं।तत्पिब।पीत्वाच।व्यस्तुहिप्राप्नुहि।मदं॥७॥
यइंद्र।कुसीदिनआर्षं।हेचंद्रचमसेषा।सोमः।आकारःपादपूरणः।चमसेषुव्यवस्थितः।सोमइत्यर्थः।चमूषुअभिषवणफलकयोःसलदर्थं
सुतः।अभिषुतःसोमः।पिबचइतिपादपूरणः।अथवाचमुभक्षणेभक्षणीयेषुग्रहचमसादिषु॥अथवाबहुवचनंबहुयज्ञापेक्षंबहुषुयज्ञे
ष्वधिषवणफलकेषु।अस्यसोमस्यषष्ठीनिर्देशात्॥एकदेशमितिवाक्यशेषः।कस्मात्पुनरपमहंब्रवीमि।उच्यते।यस्मात्त्वंईशिषे।सर्वस्यईश्व
रः॥८॥योगेयोगे।शुनःशेपस्यार्षं।योगःनियोगःव्यापारःकर्मशत्रुवधादितस्मिन्।सर्वस्मिन्नत्तवइतिबलनाम।तवस्तरं।अतिशयेनबलवत्त ३८
गे

77/1923

रं।वाजेवाजे।अन्नेअन्नेहविर्लक्षणेउपकल्पिते।हवामहे।आह्वयामइत्यर्थः।हेसखायऋत्विजः।इंद्रंऊतयेतर्पणाय।अथवायोगःअलब्धस्यार्थ
स्यलाभः।अस्मिन्सर्वस्मिन्लाभार्थमित्यर्थः।अतिशयेनबलवंतं।वाजेवाजेसर्वस्मिन्संग्रामेहवामहे।हेसखायः इंद्रंऊतयेतर्पणायआत्मनः।
पालनार्थं॥९॥आत्वेतानिषीदत।मधुछंदसआर्षं।आतुइतिपादपूरणौ।आइतद्धिप्रमागच्छत।एत्यच।निषीदतिनिषद्यच।इंद्रंअभिप्रगायत।
आभिमुख्येनस्तुत्येत्यर्थः।हेसखायः।ऋत्विजः।स्तोमवाहसः।स्तोमानांप्रापयितारः।स्तोतारइत्यर्थः॥१०॥द्वितीयेसप्तम्यादशात्या॥इदंवसो॰
।विश्वामित्रस्यार्षं।इदमपिनपुंसकलिंगव्यत्ययेनपुल्लिंगंद्रष्टव्यं।इमंहिअनु।द्वावपिपादपूरणौ।ओजसाबलेनसुतंअभिषुतंसोमंशात्वाहे
राधानांपतेधनानामधिपते॥सुतःपिबातुइतिपादपूरणाः।अस्यषष्ठीनिर्देशात्॥एकदेशमितिवाक्यशेषः।हेगिर्वणगिरःस्तुतयः।ताभि
र्योवन्यतेसंभज्यतेसगिर्वणस्तस्यसंबोधनंहेगिर्वणस्तुतिभिःसंभजनीय॥१॥महानइंद्रः॥मधुछंदसआर्षं॥इंद्रःपुरश्चपरश्चेत्यर्थः॥
सर्वस्मात्।नोइतिपादपूरणः।महित्वंमाहात्म्यंच।अस्तुभवतु।वज्रिणे।चतुर्थ्येकवचनमिदं।षष्ठ्येकवचनस्यस्थानेद्रष्टव्यं।वज्रिणः।वज्र
वतः।इंद्रस्येत्यर्थः।अतिभक्ततयाएतदाशास्महेकिंच॥द्यौर्न।नशब्दउपरिष्टादुपचारत्वादुपमार्थीयः।द्यौरिव।प्रथिनापृथुत्वेन।शब्दवलंसे

नालक्षणं॥अस्त्विस्येतदनुषज्यते॥२॥आतूनइंद्र॥कुसीदिनस्यार्षं॥आतूइतिद्वावपिपादपूरणौ॥नःअस्माकं।स्वभृतंसोमं।हेइंद्रक्षुमंतं।क्षुत्
३९ ब्दइत्येतस्येदंरूपं॥कीर्तिमंतं।चित्रंविचित्रंपूज्यंवा।ग्राभंग्राह्यंग्रहणयोग्यं।अभिसंस्कारैःसंस्कृतमित्यर्थः।संगृभायसम्यक्गृहाण।गृहीत्वाच।
पिवेत्यभिप्रायः।केनपुनःगृह्णामि।महाहस्ती।महांश्चासौहस्तश्चमहाहस्तः।तस्मादिदंतृतीयैकवचनं॥तस्यचइत्यादियाजीकारणमित्युप
संख्यानादीकारादेशः।महताहस्तेनेत्यर्थः॥कतमेनउच्यते।दक्षिणेन॥३॥अभिप्रगो॥प्रियमेधस्यआर्षं॥अभीत्ययमुपसर्गः।अर्चेत्याख्यातेन
संबंधयितव्यः।प्रेतिपादपूरणः।गोपतिं।गोशब्देनात्रसोमउच्यते।तस्यपतिःस्वामी।तंगोपतिं।सोमस्यस्वामिनमित्यर्थः।गिरास्तुतिलक्षणया
वाचाइंद्रंअभ्यर्च्य।मध्यमपुरुषैकवचनमिदं॥उत्तमपुरुषैकवचनस्यस्थानेद्रष्टव्यं।लोट्लडर्थेद्रष्टव्यः।अभ्यर्चामि।आभिमुख्येनस्तौमीत्य
र्थः।कथंपुनःस्तौमिउच्यते।यथाविदे।जानामीत्यर्थः।कीदृशंपुनरिंद्रंस्तौमि।उच्यते।सूनुंसत्यस्यसत्यस्य।पुत्रमित्यर्थः।कथंपुनःसत्यस्य
पुत्रउच्यते।त्रैविद्यलक्षणं।ब्रह्मसत्यं।तेनयानिहवींषि।हूयंते।तैर्जन्यते।यस्मात्तस्मात्सत्यस्यसूनुः।अथवासत्यमन्नंउच्यते।हविर्लक्षणं।
तेनसंजायतेआप्यायतेवातस्मात्सत्यस्यसूनुः।सत्पतिं।संतायजमानानांपतिं।पालयितारं॥४॥कयानश्चित्र॥वामदेवस्यार्षं।कयानः।अस्मा ३९

कं।चित्रोविचित्रःपूज्योवा॥इंद्रः।आभुवत्।आभिमुख्येनभवति।ऊती॥तृतीयैकवचनस्यायं।सुपां।सुलुगितिपूर्वसवर्णः।जात्यातर्पणेन।प्रीण
नेनवा।कीदृशस्यमम।उच्यते।सदावृधः।सदायःस्तुतिभिर्हविर्भिश्च।देवान्वर्धयति।ससदावृधस्तस्यसदावृधः।सर्वदावर्धयितुर्ममेत्यर्थः।
अथवासदावृधःनित्यवर्धितः।इंद्रःकथाजत्यापालनेनसखाभवति।कयाशचिष्ठया।शचीतिकर्मनाम।अतिशायेनशची॥शचिष्ठातया॥श
चिष्ठया॥अतिशयवत्या।यागक्रिययेत्यर्थः।वृता।वर्तते।सावितिवृत्।तयावृता।वर्तमानयेत्यर्थः॥५॥त्यमुवःसः।श्रुतकक्षस्यार्षं॥श्रुतकक्षः
पुत्रपौत्रमाह।त्यच्छब्दः।तच्छब्दपर्यायः।तच्छब्दश्चैतेश्च।योग्यार्थसंबंधोयच्छब्दोऽध्याहर्तव्यः।यउक्तगुणइंद्रः।तंउइतिपादपूरणः।वःष
ष्ठीबहुवचनं।तमेतत्।ऊतयइत्येतेनसंबंधयितव्यः।सत्रासाहं।सत्राशब्दःसत्यवचनः।सदाशब्दपर्यायोवासहिअभिभवेमर्षणेच।अ
तःसहिअभिभवार्थः।सत्येनसर्वदावा।शत्रूणामभिभवितारं।विश्वासुगीर्षु।सप्तमीबहुवचनमिदं।तृतीयाबहुवचनस्यस्थानेद्रष्टव्यं।
विश्वाभिर्गीर्भिः।सर्वाभिः।ऋग्यजुःसामलक्षणाभिर्वाग्भिरित्यर्थः॥आयतंनिबद्धं।स्तुतमित्यर्थः।आच्यावयसिच्यवतिर्गत्यर्थः॥मध्यमपु
रुषैकवचनमिदंउत्तमपुरुषस्यस्थानेद्रष्टव्यं॥आभिमुख्येवयसि।गमयामीत्यर्थः।ऊतये।वःयुष्माकं।पालनार्थमित्यर्थः॥६॥सदसस्प॥

79/1973

मेधातिथेरार्षं॥सदसः।यज्ञगृहं।तस्यपतिंस्वामिनं।अद्भुतंमहांतं।प्रियंइंद्रस्य।षष्ठ्येकवचनमिदंद्वितीयैकवचनस्यस्थानेद्रष्टव्यं॥इंद्रंकीदृशं।का
४० म्यंकमनीयं।यष्ट्रीणांसन्निधानं।कस्यसामर्थ्यात्।धनस्यमेधांप्रज्ञांच।आयासिषंयाचे।इंद्रं॥७॥येतेपंथाअधो॥वामदेवस्यआर्षं।येतेतवस्व
भूताःपंथाः।एकवचनमिदंबहुवचनार्थेभवति।पंथानः।क्व।अधोदिवः।द्युलोकस्य।अधस्तात्।अंतरिक्षलोकेइत्यर्थः।येभिःयैःपथिभिः॥अ
श्वंवेगिताश्वंशीघ्रमित्यर्थः।ऐरयः।पूर्वकालमपिआगतवानसियेत्तेपंथाइतिपूर्वस्मिन्नर्धर्चेयच्छब्दस्यश्रुतत्वात्परस्मिन्नर्धर्चेतच्छब्दोयोग्यार्थ
संबंधोध्याहर्तव्यः।तैरेत्यउत।अपिश्रोषंतु।बहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं॥श्रोषंतु।शृणोतु।भवान्।किंसामर्थ्यात्स्तुतीः।नःअस्माकं
संबंधिनीः।अस्मत्कर्तृकाइत्यर्थः॥कःपुनःशृणोतुस्तुतिः।उच्यते।भुवः।भूशब्दःपृथिवीनाम्नांमध्येपठ्यते॥तस्मादियं।अवयवलक्षणाषष्ठी
।पृथिव्याःअवयाभूते।वेधास्थेप्रदेशाइत्यर्थः॥८॥भद्रंभद्रं।सुकक्षस्यार्षं॥भद्रंशब्दःशोभनवचनः।तस्यायमभ्यासः।भद्रंभद्रमिति।अ
भ्यासेनचभूयांसमर्थंमन्यंते।यथाअहोदर्शनीयाः।अहोदर्शनीयाइति।अतिशयेनदर्शनीयाइतिगम्यते।एवमिहापिभद्रंभद्रंअतिशयेनशो
भनमित्यर्थः।नःचतुर्थ्याबहुवचनमिदंअस्मभ्यं॥आभरहरेरिदंरूपं।हकारस्यभकारापत्त्या॥आभर।आहर।आनयदेहीत्यर्थः।किंपुनर ४०

हरामि।उच्यतेइषंऊर्जंद्वेअप्येतेअन्ननामनी॥अतःपौनरुक्त्यप्रसंगात्॥ऊर्जशब्दोत्ररसवचनोद्रष्टव्यः॥अन्नंचरसंचेत्यर्थः॥हेशतक्रतो।
शतमितिबहुनाम॥क्रतुरित्यपिकर्मनामप्रज्ञानामवा॥बहूनिकर्माणियस्यबह्व्योवाप्रज्ञा॥यस्यसशतक्रतुः।तस्यसंबोधनंहेशतक्रतो।ब
हुकर्मबहुप्रज्ञवाकीदृशंचपुनःअन्नंचरसंचभरामिउच्यते॥यत्तृतीयायाःअत्रलुक्॥येनअंनेनरसेनचमृडयसि॥सर्वदासुखय
सिजीवयसीत्यर्थः॥नःअस्मान्परस्ताद्यच्छब्दश्रुतेः॥पूर्वार्धर्चेतच्छब्दमध्याहृत्यएकवाक्यतानेया॥अन्नेनरसेनचहेइंद्रमृडयसिनःतद्भ
द्रं॥भद्रंनआभरेति॥९॥अस्तितिसोमोविंदोः॥पूतकक्षसुकक्षस्यवाइदमार्षं॥अस्तिविघतइत्यर्थः।सोमःअयंसुतः।अभिषुतइत्यर्थः।पिबं
ति।लडयंलोडर्थेद्रष्टव्यं॥पिबंतु।अस्यषष्ठीनिर्देशात्॥एकदेशमितिवाक्यशेषः॥अथवाषष्ठ्येकवचनंद्वितीयैकवचनस्यस्थानेद्रष्टव्यं॥
पिबंतु।एतं।मरुतः।नकेवलंमरुतएवकिंतर्हि॥उत।अपिचेत्यर्थः।स्वराजं॥१०॥ ॥द्वितीयेष्टम्यादशात्या॥ ॥ईषयंतीषयंती।देवजानाम
आर्षं॥ईषयंतीः।द्वितीयाबहुवचनमिदंप्रथमाबहुवचनेद्रष्टव्यं॥ईषयंत्यः।गच्छंत्यः।अपस्युवः।स्तुतयः।कंप्रतिगच्छंत्यः।प्रकृतित्वादिंद्रंप्रति
गच्छंत्यः।इंद्रंजातंजातमेवउपासते॥उपगम्येंद्रंतस्यैवसमीपेव्यवतिष्ठंतइत्यर्थः॥वन्वानासः।वनुयाचनेइत्यस्येदंरूपं॥याचमानाउच्यंते॥किं

81/1923

याचमानाउच्यते॥तस्यैवेंद्रस्यन्नोभनंवीर्यं॥१॥नकिंदेवा॥गोधायार्षं॥नकिंदेवाइनीमसि।नेतिप्रतिषेधेकीतिनिपातोनर्थकः।इनीमसिमिनाते
४१ हिंसार्थस्यमकारलोपः।तेनैतदुक्तंभवति॥हेदेवाः।नइनीमसि।प्राणिबंधनकर्मपश्वादियागंनकुर्मइत्यर्थः॥नक्यायोपयामसि॥यूपनामस
इहनिखननार्थेद्रष्टव्यः॥यूपनिखननमपिनकुर्मः॥वृक्षौषध्यादिहिंसामपिनकुर्मः॥किंतर्हिमंत्रश्रुत्यं।मंत्रश्रवणीयं।जपाख्यं।चरामसि।
जपंकुर्वतश्चरामप्राणिवधंनकुर्मोजयमेवकुर्मइत्यर्थः॥उक्तंच।जपेनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः।कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्य
ते॥इति॥२॥दोषा।आगात्॥वामदेवस्यार्षं।दोषारात्रिः।उइतिपादपूरणः॥आगात्।मर्यादया।आगच्छामिप्रभाते॥यागकालोवर्ततइत्यर्थः॥अतो
ब्रवीमि।बृहत्।गायउच्चारयेत्यर्थः।किंपुनःउच्चारयामि।सामर्थ्यात्स्तुतिरूपं।कीदृशंस्तुतिरूपं।उच्यते।द्युमत्।स्वरसौष्टवयुक्तमित्यर्थः॥गा
मन।गामान्।गाता।उच्चारयिता।स्तोतातस्यसंबोधनंहेगामन्।स्तोतरित्यर्थः।आथर्वण।थर्वतिर्गत्यर्थः॥थर्वागंतानथर्वाअथर्वाअगंतेत्य
र्थः॥अथर्वायजमानःप्राक्प्रयोगपरिसमाप्तेः॥वेदिदेशान्नान्यत्रगच्छति॥अतोसौअथर्वेत्युच्यते॥तस्यायंस्वभूतः।स्तोतातेनसआथर्वणः
तस्यसंबोधनंहेआथर्वणममवामदेवस्यस्वभूतइत्यर्थः॥स्तुहिदेवंसवितारंसर्वस्यप्रसवितारं॥बृहतासाम्नासवितृदेवस्यंचबृहत्॥३॥एषो ४२

उषा।प्रस्कण्वस्यार्षं॥एषा।उकारःपादपूरणः॥उषा।अपूर्व्या।यतःपूर्वंनास्ति।साअपूर्वा।अपूर्वाएवअपूर्व्यास्वार्थिकस्तद्धितःप्रथमेत्यर्थः॥
व्युच्छति।उछविवासे।विवासयति।किंसामर्थ्यात्तमांसि।नचानुदितातमांसिशक्नोतिविवासयितुं॥अतोविवासयितुं।अतोविवासनेनात्रउदि 83/1923
तत्वंलक्ष्यतेउदितेत्यर्थः॥प्रियादिवः।साहचर्यात्प्रियत्वव्यपदेशः।प्रभातसमयोवर्ततेयतएवमतोब्रवीमि॥स्तुषे।स्तौम्यहं।युवांहेअश्वि
नौ।कथंपुनस्तौमि।उच्यते।बृहत्महत्।अस्त्वित्यर्थः॥४॥इंद्रोदधी।गोतमस्यार्षं।अत्रेतिहासमाचक्षते।कालखंजानामअसुरास्तैरसु
रैर्बाध्यमानादेवाःब्रह्माणमुपगम्योक्तवंतः।भगवन्कालखंजैरसुरैर्बाध्यामहे॥तेषांमारणोपायंविधत्स्वेति॥तच्छ्रुत्वासतानुवाच।दधीचिर्नो
मऋषिस्तमुपगम्यब्रूत।समारणोपायंविधास्यति।तेतच्छ्रुत्वातथेत्यंगीकृत्यतंदधीचमुपगम्यउक्तवंतः।भगवन्नस्मदीयान्यस्त्राणिशुक्र
स्तेषांपुरोधाअपहरतितानिरक्षस्वततः।सऋषिस्तानुवाच।ममसुखेप्रक्षिपध्वं।ततइंद्रादिभिर्देवैःसमरुद्गणैःस्तस्यमुखेप्रक्षिप्तानि।पुनःका
लेनदेवासुरसंग्रामेपर्युपस्थितेएत्यदेवाऊचुः।भगवन्नस्त्राण्यस्त्राणिप्रयच्छस्वास्माकं॥ततस्तेनोक्तं।तानिमेजीर्णानिनतानिपुनःप्राप्तुंशक्या
नि।ततःप्रजापतिमुखाद्देवाऊचुः।भगवन्प्राणत्यागंकुरुध्वेतिश्रुत्वापुनःकृतश्चतेनप्राणत्यागःतस्यदधीचः।स्वभूतैरस्थिभिरिंद्रोवृत्राणि

जघानवृत्राणीति॥नपुंसकलिंगमिदं।व्यत्ययेनपुल्लिंगस्यस्थानेद्रष्टव्यं।वृत्रान्शत्रूनित्यर्थः॥अप्रतिष्कुतः।अप्रतिस्खलितः।तैरस्मरानजघ
 नहतवान्कियंतः।पुनरस्मरान्।जघानउच्यते॥नवतिर्नवदशोत्तराणिअष्टौशतानीत्यर्थः॥ १०९९॥॥५॥इंद्रेहिम॥मधुछंदसआर्षं॥हेइंद्र
आइहिआगच्छेत्यर्थः॥एत्यच।मत्सित्पृष्यस्व।अंधसः।षष्ठ्येकवचनमिदंतृतीयैकवचनस्यस्थानेद्रष्टव्यं॥अंधसा।अन्नेन।पुरोडाशादि
लक्षणेनविश्वेभिः।सर्वैः।सोमपर्वभिः।पर्वाणिअवयवाः।सोमस्यपर्वाणिसोमपर्वाणितैःसोमपर्वभिः।तदर्थमभिषुतैःसोमावयवैस्तृप्येत्यर्थः
॥६॥आतूनइंद्र॥वामदेवस्यार्षं॥आतु।इतिद्वावपिपादपूरणौ।नः।अस्माकं।हेइंद्रवृत्रहन्।वृत्रशत्रुः।वृत्रस्यहंतातस्यसंबोधनं।हेवृत्र
हन्।अस्माकं।शत्रोर्हंतरित्यर्थः।अस्माकं।स्वभूतं।अर्धंवेधाख्यं।स्थानं।आगच्छ।कस्मात्पुनरेवमुच्यते।यस्मात्त्वंमहान्।तस्मादित्यर्थः॥
कथंपुनरागच्छामि।महीभिरूतिभिर्महद्भिःपालनैस्तर्पणैर्वा॥सहअस्मान्।यैःपालनैस्तर्पणैर्वापास्यति॥तर्पयिष्यसिवातैःसहेत्यर्थः॥७॥
ओजस्तद॥वत्सस्यार्षं॥ओजः।बलंतत्अस्येंद्रस्यस्वभूतं॥तितिविषेतिविषुदीप्तावित्यस्येदंरूपंदीप्यतइत्यर्थः॥कतमत्।उच्यते।अपियत्।
तृतीयायाअत्रलुक्।येनबलेनसमवर्तयत्।संवेष्टयति।इंद्रःकथंपुनःसंवेष्टयति।उच्यते।चर्मेवयथाकश्चित्चर्मवेष्टयति॥तद्वदित्यर्थः।किंपु

नःसंवेष्टयति।उच्यते।रोदसीद्यावापृथिव्यावित्यर्थः॥८॥अयमुते॥शुनःशेपस्यार्षं।अयं।उइतिपादपूरणः।तेतवस्वभूतः।अभिषुतः।सोमःकी
दृशःयंप्रतिसमेषितसिसम्यक्सततंवागच्छसि।कथंपुनर्गच्छसि।उच्यते।कपोतइवगर्भधिं।गर्भोधीयतेयस्यांसागर्भधिः।कपोतिकायथाका
मार्त्तःकपोतःहृष्टमनाः।कपोतिकांगच्छति।तद्वत्त्वमपितंसमतसीत्यर्थः॥एततन्नात्वारचःततउरत्रतच्छब्दश्रवणात्॥पूर्वत्रयोग्यार्थसंबंधो
यच्छब्दोध्याहर्तव्यः॥यत्तद्रूपेनियुक्तंस्ववचनं।तत्।विदितिपादपूरणः।नः।बहुवचनमिदंएकवचनस्यस्थानेद्रष्टव्यं॥तन्ममस्वभूतं
वचःउच्यते।ऊहसेवहेरिदंरूपंवहस्व।आत्मानंप्रति।प्रापयशृण्वित्यर्थः॥ममायमभिप्रायः।सोमएवायेस्तुमुंचामीति॥९॥वातआवातु॥
उल्लोवातायनस्यार्षं॥वातः।आवातु।कीदृशंउच्यतेभेषजंपथ्यमित्यर्थः॥शंभुसुखस्यभावयितृइदानींसुखकरमित्यर्थः॥मयोभुस्तुका
लांतरेचसुखस्यभावयितृइत्यर्थः॥अथवामयोबलेतस्यभावयितनोहृदे।अस्माकंहृदयस्य।प्रेत्ययमुपसर्गः॥तारिषदित्याख्यातेनसं
बंधयितव्यः॥प्रतारिषत्।वप्रवर्धयितित्यर्थः।नअस्माकंआयूंषिजीवितानीत्यर्थः॥१०॥ ॥इतिद्वितीयेनवम्यादशाया॥ ॥यंरक्षंति
॥कण्वस्यार्षं॥यंरक्षंतिप्रचेतसःप्रकृष्टज्ञानाः॥वरुणः।मित्रः।अर्यमाइत्ययंप्रतिषेधेवर्ततेकीतिपादपूरणः॥दभ्यते।सः।इतिनिर्देशोदभ्नो

85/1973

तिर्वधकर्मा।नक्ष्यते।नसः।हिंस्यते।केनचित्।जनः।मनुष्यः॥१॥गव्योषुणो।वत्सस्यार्षं।गोषुइच्छा।गव्यातस्मात्।तृतीयैकवचनं।तस्यसुपांसुलु
४३ गितिपूर्वसवर्णः।गव्यागव्ययागवीच्छयेत्यर्थः॥उसुइतिद्वावपिपादपूरणौ॥नः।द्वितीयाबहुवचनमिदं॥प्रथमाबहुवचनस्यस्थानेद्रष्टव्यं॥वयंस्तु सां
मइतिवाक्यशेषः॥कथंपुनस्तुमउच्यते॥यथापुरायथापूर्वस्मिन्कालेस्तुवंतद्वत्इत्यर्थः॥अश्व्या।अश्वेच्छया॥स्तुमः।उत।अपिचरथयारथेच्छया
स्तुमः।वरिवस्यावरिवस्यतिः।परिचरणीयः।तस्मात्संबुध्येकवचनंतस्यस्थानेसुपांसुलुगितिआकारः॥वरिवस्यः।परिचरणीयइत्यर्थः॥क
स्यपुनःपरिचरणीयः।उच्यते।मघोनां।मघंधनंहविर्लक्षणंतद्येषामस्तितेमघवानः॥हविष्मंतोयजमानास्तेषामित्यर्थः॥२॥इमास्तइंद्र
वत्सस्यार्षं।इमाः।तेतवसंबंधिन्यः।हेइंद्रपृश्नयः।स्तुतयः।घृतं।दुह्रते।घृतंदुह्यंते।घृतंक्षरंतिघृतसहिताः।क्रियंतेत्यर्थः॥नकेवलंघृतंदुह्यं
ते।किंतर्हि।आसिरंच।सोममिश्रंयत्।दधितत्।आसिरं।ततदुह्यते।तेनचसहक्रियंतइत्यर्थः॥एनांद्वितीयैकवचनमिदंप्रथमाबहुवचनस्य
स्थानेद्रष्टव्यं॥एनाः।ऋतस्ययज्ञस्यपिप्युषीः।प्यायी॥ओप्यायीवृद्धावित्यस्येदंरूपं।द्वितीयाबहुवचनंचप्रथमाबहुवचनस्यस्थानेद्रष्टव्यं॥
पिप्युषः।वर्धयन्त्यः।इत्यर्थः॥३॥अयाधिया॥सुकक्षस्यार्षं॥अया।अनयाधियाधी।धीरितिप्रज्ञानाम।प्रज्ञयात्वांस्तुमइतिवाक्यशेषः॥अथवा ४३

धीरितिकर्मनाम॥अनेनयागाख्येनकर्मणा।त्वांयजामइतिवाक्यशेषः॥किमर्थंपुनःस्तुमउच्यते॥गव्ययागवीच्छयापुरुनामन्॥पुर्विंतिबहुनामनम
ति।प्रह्वीभावेबहवःशत्रवःयंप्रतिनमंतिसपुरुनामतसंबोधनंहेपुरुनामन्॥बहूनांशत्रूणांप्रह्वीकर्तरित्यर्थः॥अथवाबहवोयजमानाःप्रह्वीभू
ताः॥एवंवापुरुष्टुतः॥बहुभिस्तोतृभिस्तुतः॥वस्त्वान्पुनस्त्वांस्तुमःउच्यते।यत्पंचम्या।अत्रलुक्।यस्मात्त्वंसोमेसोमेसर्वसोमयोगेष्वित्यर्थः॥
आभुवः।आभिमुख्येनभवसि॥यस्मात्त्वंसर्वेसोमयागेषुइज्यसेतस्मादित्यर्थः॥४॥पावकानः॥मधुच्छंदसआर्षं॥पापस्यापनयनंपावनंकर्म
कुर्वंति॥अतीत्येतेषांपरिधीनांयाहि॥ ६॥मृज्यमानः॥सोध्यमानः॥विनियोगोऽस्यषष्ठेहनि॥सुहस्त्यसुहस्तशोभनहस्त॥समुद्रे।अ
अपिक्षेवाचंइत्वसि॥व्याप्नोषि।अथवासमुद्रेद्रोणकलशे॥रयिंधनांपिशंगंपिशंगवर्णंसुवर्णंबहुलं॥प्रभृतंपुरुस्पृहोबहुभिःस्पृहणीयं
पवमानः॥सोध्यमानः॥अभिअर्षसिक्षरसि॥ ७॥अभिसोमासः॥विनियोगोऽस्यतृतीयेऽहनि॥आयवः।मनुष्याः॥पवंतेमयंमद्रीयंम १०७

दंसमुद्रस्यअंतरिक्षस्य॥अथवाससमुद्रस्यद्रोणकलशस्य॥अधिउपरिष्ठयेस्थाने॥मनीषिणः।मत्सरासः।मदच्युतः।मदश्राविणः॥ ८ ॥पुना
नःसोमःजागृतिर्जागरणं॥कुरु।अच्याअथेः।वारैःपरिसर्वः।पृथ्युःपृथुतरः।भूतानांप्रियः।मेधावीअभवः।भवसिअंगिरसस्तवामधुना
रसेनः।यज्ञंअस्मदीयंमिमिक्षसिंचनः॥अथवामिश्रंशोधःकुरु॥ ९ ॥पवस्ववाजसातम॥अभिविश्वानिसर्वाणि॥वार्याः।तरणीयेनउ
दकेन॥त्वंसमुद्रः।समुद्रःसमुद्रःसमुद्रसंस्थानीयः॥प्रथमेअग्र्येऽविधर्मणि॥विविधकर्मणिकर्मवारणेदेवेसोमममकृत्सरमेदेस्तत्विकर्मणः
मदनीयः॥ १०॥पवमाना।असृक्षतःक्षरंतः॥पवित्रंअतीत्यधारया॥मरुत्वंतमरुद्भिः॥तद्वंतःसोमाः।मत्सराः।मदनीयाः।इंद्रियाः।इंद्र
स्यवत्।मेधांप्रज्ञांअभिमयांसि॥गच्छति।इत्तउत्तरंत्रिष्टुभः॥ ११॥ ॥षष्ठेतृतीयाद्व्याख्या॥ ॥प्रतुद्रव॥विनियोगोस्यज्योतिष्टोमे
रसेन॥परिसर्वतः॥कोशंद्रोणकलशंनिषीदनृभिः॥मनुष्यैः।पुनानः।पूयमानः।अभ्यर्षवाजंक्षरअन्नंतव॥अश्वमिवत्वां।वाजिनं।अंन
वंतं।मार्जयंतः।शोधयंतः।अछआसुंबर्हि॥प्रत्स्वंरशनाभिः।नयंति।प्रापयंति।यूपनियोजनीरशना॥ १ ॥प्रकाव्यं॥विनियोगोस्यसप्त
मेहनि॥उशनाइवाप्रब्रुवाणः।देवसोम।देवानांजनमानिजन्मनामानिकर्माणिवा॥बिभर्तिमहिव्रतः।महतः।कर्मणः।अंनस्यवाधारयिता॥

215/1973

शुचिबंधुः।शोभनबंधुः॥शुध्धबंधुवाग्।पावकः।शोभयितापदः।वराहः।सोमः।अभ्येतिरेभन्।स्तुवन्॥२॥ तिस्रः॥विनियोगोस्यत्तृतीयेह
१०८ नि॥ऋग्यजुःसामानि॥ईरयति।प्रेरयति।वन्हिः।वोढासामऋतस्यधीतिकर्मब्रह्मणोमनीषांमंत्राणिवेदोक्तानि॥प्रेरयंति॥गावस्पतिं।
गोपतिं।यजमानंदक्षिणासंबंधेनपृच्छमानाइववृषभंवा।सोमंयंतिमतयः।बुद्धयः।वावसानाः।कामयमानाः।यद्यपिपावमानीषुसोमंमुक्त्वाअ
न्यादेवतानसंभवति॥तथापिष्टादशोव्याख्यातेतिकृत्वातेनापिआत्मनानुस्मरणार्थमालिख्यते॥तिस्रोवाचः।ऋग्यजुःसामानि।अथवाति
स्रोवाचः।सत्वरजस्तमाः॥अथवाजाग्रतस्वप्नसुषुप्तवृत्तयः॥ईरयतिप्रेरयति।उदकरश्मींश्चवहतीतिवन्हिरादित्यः॥ऋतस्यआदित्यस्य
धीतिं॥अथवाऋतस्यसत्यब्रह्मणः॥अथवाऋतस्यान्नस्यधीतिंयज्ञस्यवाआदित्यस्यवा॥हृयाइवअग्नौप्रस्ताहुतिः॥सम्यगादित्यमुपतिष्ठते।
इति।ब्रह्मणोमनीषांगावः।रश्मयः।तेनविसृष्टा।अथवाउदकानि॥एतमेवगोपतिं।रश्मिस्वामिनंवा।पृच्छंतइवसोमयंति।पृथिवीविवस
नाआदित्यंयंति॥प्रविशंतिअध्यात्मेवावन्हि।रात्माभवति।वक्त्र्यादिगुणसंयोगात्॥सः तिस्रोवाचः।प्रेरयति।विद्याबुध्दिमनांसि॥विद्याम
हान्॥बुध्दिरहंकारमनइतिप्राधान्याद्भूतेंद्रियाणि॥ऋतस्यात्मनः।धीतिंमनसः।इष्टानिकर्माणिप्रेरयंतिब्रह्मणः॥आत्मनः।गोपयति।आ १०८
गोपाः।

त्मानंइंद्रियाणिस्वामिनंपृच्छमानाः॥आत्मानंतदभिप्रायेणत्वाद्याद्यनुगमनात्॥एतमेवमात्मानंसोमंकामयमानाइववयंतिनभूयः तदर्थप्रादुर्भवति
॥३॥अस्यप्रेष॥विनियोगोस्याभिप्लवे॥प्रेषाप्रकर्षेच्छया।हेमनास्फूपर्णेनपूयमानः देवः समष्टत्करसंदेवेभ्यः स्तुतः अभिषुतः।पवित्रंपूतं।एति
रेभन्।आविशितामितंसमउतानिपत्रयंति॥होताअस्यसोमस्य।प्रेषाप्रकर्षेण।इच्छया।हेम्नास्फूवर्णेन।पूयमानोगाल्यमानः।देवः।सोमः।देवेभ्योवस्वा
दिभ्यः।संपृच्यते।निःपादयति।रसांस्कृतः।अभिस्कृतः।दशापवित्रंपरिसमंतात्॥एतिरन्तंसोमं।मिताइवसद्म॥मिताकर्तासद्म॥आत्मीयानिगृहा
णि॥पशुमंतिहोता।देवानामाव्हाता॥४॥सोमःपवते॥विनियोगोअस्यचतुर्थेऽहनि॥अधियज्ञपक्षेपर्णसोमस्यपृथिव्यादीनां॥जनयितृ
त्वेनसंभवात्॥यज्ञद्वारेणस्थितिहेतुत्वाजनयतीतिजनिता॥मतीनांजनयितादिवः॥जनयिताग्नेर्जनयिता॥सूर्यस्यजनयिता॥इंद्रस्यजनयि
ता॥उतअपिविष्णोर्व्याप्तिमतइति॥जनयितापृथिव्यादिभ्यः॥रसेनवर्धयिता॥अधिदैवेनेंद्रः सोमयद्वात्मनितदायमर्थः॥सर्वमिदंभवति॥
आत्मासोमःपवतेसाधयति॥भोक्तृत्वात्।आत्मासत्कारणंवा।प्रधानभूतेंद्रियाणांजनयितापृथिव्यादीनांचद्ईयोर्ग्रहणेंतरिक्षस्यापिअग्न्या
दीनांचतुस्थानानांतिसृणांविष्णोश्चव्याप्तिमतः॥५॥अभित॥विनियोगोस्याभिप्लवे॥त्रयाणांपृष्ठानिसवनानिलोकदेवावेदावावृषणंसेक्तारं

217/1973

वयोधा।अन्नानांधातारंयच्छस्वांवा॥अंगोषिणंसतिसमूहं॥अवावसंतकामयंतवाणीः।वाचः।वावासानः।उदकादि।आछादयामानः।वरुणःसो
१०१ मः।नसिंधुः।समुद्रइवविरलधा॥वितिधानांरत्नानांधाता॥स्थापिताबादयतेवार्याणिवरणीयानिधनानि॥ ६॥ अक्रान्समुद्रः॥विनियोगोस्य
नवमेहनि॥क्रांवलात्।प्रथमेपरमेउत्कृष्टेविधर्मणि॥धारणे।जनयत्।प्रजाप्रजाप्रजायंतइति॥प्रजादेवाद्याः।भुवनस्यगोपाः।भूतानांरक्षिता।
वृषासेक्ता।पवित्रेबलमये।अधिउपरिसानो।समुस्थंतोअव्येअविमये।बृहत्सोमः।वावृधेवर्धतेस्वानः।अद्रिः।अहरणः।वज्रः।अक्रान्समुद्र
सामर्थ्यात्अत्यक्रमीत्।अतीतगच्छत्युदयादस्तंसदासमुद्रः॥आदित्यंप्रथमेप्रकृष्टेव्योमन्॥सामर्थ्यादंतरिक्षेप्रजाजनयन्वर्षकर्मणा।भुवन
स्यत्रैलोक्यस्यगोपारक्षितावृषावर्षणशीलः॥पवित्रेव्याभिमये॥अभिसानोअभिषिच्यमानः॥सोम्येः।वावृधेववर्धते।बृहदितिबृहद्द्विषण्णं
स्वानःस्कृतःअद्रिरादित्यः।अदरणः।अत्यक्रामात्।अधिष्ठितवान्।समुद्रः।आत्मा।अभिद्रवतो।तंभूतानिपरमेभ्यः।धनेभ्भूतेंद्रियमिश्रंश
रीरंजनयत्।ज्ञानकर्मणाबोधमुत्पादयन्॥प्रजावर्धयन्॥भुवनस्यगोप्ता।प्रकाशरूपत्वात्॥वृषापवित्रेसत्यमये॥आत्मावर्षिताभवति।
शरीररूपेणपवित्रेज्ञानमये॥अवतेर्गत्यर्थः॥स्यगत्यर्थाश्वबुध्यर्था।अधिसानो॥संबध्यमानशब्दादिषुमहत्त्ववृधे॥स्कष्टुवधितपवित्रे।अ १०१

द्रिः।अदरणः॥ ७॥ कनिक्रंतिहरि॥क्रदिशब्देएकवचनेशब्दंकरोति॥हरिःहरितवर्णः।सृज्यमानः।संस्तूयमानः॥आसीदत्।उदकस्यजठरे
उदरेद्रोणकलशस्य।पुनानः।पूयमानः।नृभिर्यतः।मनुष्यैः।संयमितः।कृणुतेकारयति।निर्णिजंरूपं।गागवां।रश्मीनां।उदकानांवा।अतः
।मतिंप्रज्ञांजनयतः।स्वधाभिरन्नैस्तर्पित्वा॥ ८॥ एषस्यः॥तवमधुमान्॥स्वादुमान्।इंद्रःसोमं।वृषासेक्तावृष्णः॥सेक्तुस्तवपरिसर्वतः॥प
वित्रेअक्षाः।क्षरितवान्।किंविशिष्टःसहस्रदाःशतदा॥अनेकदाभूरिदावा॥बकुददाति।प्रभूतंसश्वद्वत्तमनित्यंबर्हिः॥वाजीअन्नवान्॥आ
अस्थात्॥स्थितवान्॥ ९॥पवस्वसोमः॥मधुमान्।स्वादुमान्।रितवान्।सत्यवान्।अपःवसानः।आछादयमानः।समुच्छ्ते।अव्येअविमये।अव
द्रोणानिद्रोणकलशादीनि॥घृतवंति।उदकवंति।अवरोहमदितमः॥अतिशयेनमदीयः।मत्सरःसोमः।इंद्रपातः॥इंद्रेणपातव्यः॥ १०॥
षष्ठेचतुर्थ्यादशात्या॥ ॥प्रसेनानी॥सेनांनयतिइतिसेनानी॥शूरःविक्रांतः।अग्रेरथानां।येदेवरथाः।गव्यन्।इच्छन्।धनंपृथिव्यांभवंप्रैति
प्रयाति।हर्षति।अस्यसेना।भद्रान्।भंदनीयानि।कुर्वन्कृण्वं।इंद्रहवान्।इंद्रीनानि।सखिभ्यः।ऋत्विग्भ्यः।एवंगुणविशिष्टः।सोमःवस्त्रा
णि।रभसानि।पतंति।आदत्तेपरमसैन्येभ्यः।अथवासेनानीस्कंदः।शूरःविक्रांतः।अग्नेपुरुतःदेवरथानांगव्यं।पृथिव्यांभवं।धनं।रातिरू

219
1073

ण्हातिददातिसैन्येभ्यः॥सोमइवरश्मीन्वस्त्राणिसैन्येभ्योददाति॥ १ ॥ प्रतेधारामधुमतीः॥रसवतीः।असृग्रं।अव्यं वालंक्षरसि।पवमानः।पूय
११० मानः।पवसेक्षरसे।धामगोनां।गतवांरश्मीनांउदकानांवा।जनयन्।उत्पादयन्।कंसूर्यं।अपिन्वः।तर्पयः।अर्कैरन्नैर्मंत्रैर्वा॥ २॥ प्रगायत॥अभ्य
र्चाम।देवान्।स्तोत्रैरन्नेभ्यःसोमंहिनोत्।गमयत।महतेधनायस्वादुःस्वादुः॥मान्यवतां।अतीत्यवारं।अव्यं।अविमयं।आसीदत्।कलशं।
द्रोणकलशं।देवः।इंदुः।सोमः॥ ३॥ प्रहिन्वानः।प्रीणानः।गच्छत्वाजनितारोदस्योः॥ द्यावापृथिव्योः॥रथः।नरथः।इव।वाजं।अन्नं।स
निष्यं।संभजमानः।अयासीत्।गतवान्।इंद्रंगच्छन्।आयुधा।आयुधाने।संशिशानः।तीक्ष्णानिकरवाणः।विश्वाविश्वानिवसूनिधना
नि।हस्तयोः।आदधाददधानः॥ ४ ॥ तक्षत्॥करोति।यदिमनसः।चेतनः।वेनोवेनतेः।कांतिकर्मणः॥वाकुसखिलं।अतष्टेष्टस्य।प्रशास्त
स्यधर्मणः।कर्मणः।द्युक्ष्योः।अनीके।मुखे।अनुइआनय।वारंवरणीयं।वाचसानाः।कामयमानाः।जुष्टंपतिंपत्नीमिवद्रोणकलशंगावः
रश्मयः।उदकानिवा॥इंदुःसोम॥ ५॥राका।विनियोगोस्याभिप्लुते॥साकमक्षःसहवहितोदृितोमर्जयंतः॥स्वसारः।भगिन्यः।दशवीरस्य
धीतयः।धीमतः।अंगुलयः।धनुत्रीः।धनुत्रायंति।हरिः।हरितवर्णः।पर्यद्रवंतीरसभावे।जाः।अपत्यंसूर्यस्य।द्रोणंद्रोणकलशं।ननक्षेत्या ११०

प्नोति॥अश्वइववाजिनि।वेगवान्॥अश्वः।यथात्याप्नोतिग्रामंतद्वत्॥ ६॥अधियद।स्मिंवाजिनि।अन्नवति।यज्ञेशुभः।शोभनाधिपः।यज्ञकर्मणिवास्य
र्धते॥अन्योन्यातिशयेनविशः॥प्रजाइवस्पर्धंते॥मांप्रतिउदेति।अपः।वृणानः।आच्छादयमानः॥पवते।कवीयन्कवितरः।व्रजंमार्गंपशुवर्धना
य॥पशुवृध्यर्थंमन्मामंत्राआतनाय ॥ ७॥ इंदु।विनियोगोअस्यपंचमेहनि॥वाजीअन्नवान्॥पवते।गोन्योघाः।गवांन्योघाः।संघाः।इंद्रेसोमःस
हइत्वं।प्रीयतां।मदायमदार्थं।हंतिरक्षः।रक्षांसिहिंसति।परिबाधते।अरातिं।अनवकर्माणि।शत्रूंवरिवः।वरिवःधनानिकृण्वंवरिष्ठानि॥वृजन
स्य॥व्यत्ययेनसंग्रामेराजादीप्यंते।शोभंते॥ ८॥अया।विनियोगोऽस्यषष्ठेऽहनि॥अनेनपवनेनपवस्व॥एनावसूनि।एतावसूनिधनानि।मांश्र
त्विअश्वेआरूढः।सरसिउदके।प्रधन्व।प्रगच्छसि।मांश्चत्वेनवासरांसि॥प्रधन्वः।धारणशीलः।बभ्रु।श्लसविताबामहांवा॥अंतः।चित्।यस्यवात
स्येवचित्स्वभावस्यइवजूतिंगतिं॥पुरुमेधाबहुप्रज्ञः।चित्॥नवेरिषिस्तोतातस्मैचितकावेनरं॥अवत्यथाः।स्थापयति॥अपवा॥अनणपवा॥अ
नेनमार्गेणपवस्व॥वसूनिधनानि।मांश्चत्ते।हेइंदोसरसिउदकेमहिमानसंयुक्तेप्रबंधपवस्वश्लश्चितश्लसः॥सविता॥विदितिपदपूरणः॥
यस्यवातः॥नजूतिवातस्येवजूतिः॥वेगः।पुरुमेधारिषिः।चित्।इतिपदपूरणः।तमंतवेयोनरिनरं॥यजमानंअवतिरक्षति॥नरंधाः॥ ९ ॥

221
1973

महत्तमहद्देवेतत्॥आश्चर्यमेतत्कर्मसोमस्यमहिषः॥महनीयस्य।चकारकृतवान्॥ओजः बलंजनयन्जनितवान्॥सूर्येज्योतिप्रकाशंइंदुःसो
१११ मः॥अधिदेवपक्षेमहत्सोम्यं॥आदित्यमहिषः पूजनीयः॥महत्वात्।महत्।कर्मचकार।अपांयद्गर्भोदेवानामाधिपत्यं॥अवृणीत।आच्छादयद्दे
वांतेजसा॥किंचअदधादिंद्रेपवमानः॥सोमात्मना॥ओजः बलंपीतः सन्अनयत्सूर्येसरणमंडले॥ज्योतिरिंदुरादित्यः॥अध्यात्मंसोमः॥अ
होमहद्दसंभाव्यं॥तत्कर्ममहिषः प्रजनीयः॥अपांयत्।गर्भदर्शनमात्रंपंचानांभूतानांगर्भः॥अधिष्ठाताभूत्वावृणीतअधिष्ठितवान्॥देवानिंद्रि
याण्येववृणीतः॥शरीरमध्येतिष्ठतीतिकृत्वाअदधादिंद्रेआत्मनीश्वरेपूयमानः॥विषयप्रमाणेन॥ओजः बलमणिमादि।अजमानयच्चसूर्ये
ज्योतिः।तथाचोक्तः।येनसूर्यस्तपति।तेजः इंद्रः॥१०॥असर्जिसृष्टवान्॥वक्षाः वक्ता॥अश्वोनरथ्यः।रथेहितः वाजीवेगवान्॥धियाप्रज्ञया।कर्म
णावामनोता।ओतानिमनांसिदेवानामस्मिन्सोमेसः मनोताप्रथमामनीषा॥मनसः एषणः॥शीवयाद्दशस्वसारोभगिन्यः॥अधिष्ठपरिसानौ॥समुच्छ्रि
ते।अव्येअविमये।मृजंतिशोधयंति।अंगुलयः।वह्निंवोढारं।सदनेषुअच्छआसुं॥अपांइवत्वा।ऊर्मयः संघाताः।तर्तुराणतरमाणा॥प्रयुनीषा॥
ईरतेकंसोमं॥कामयमानं॥११॥ ॥षष्ठार्धः॥ ॥पुरोजिता॥इतउत्तरं।अनुष्टुभः।विनियोगोऽस्यज्योतिष्टोमे।पुरः।अग्रतः।जित्यैअंधसः १११

॥अन्नस्यसोमलक्षणस्य॥सोमाय।मोदायत्वेमे।मदनशीलायअपः श्लथिष्टनश्वानं।अपघ्नत।हेसखायः।किंविशिष्टंदीर्घजिह्वं॥अथवा श्लिथि
ष्टातसिथिलीकरोति॥इंद्रंहेसखायः।ऋत्विजः॥अथवाशिथिलीकरोति॥सोमंस्थानंकंचिउद्दवः कर्तारंअपघ्नत॥ १॥अयंपूषा॥विनियोगो
ऽस्यद्वितीयेऽहनि॥पूषापूष्णातेसोमः।रयिंधनंभगः।सएवसोमः शोभनः।अथवापूषा॥आदित्यः।पुनानः पूयमानः।अथवापुनानः रश्मि
भिः।अर्षतिक्षरतिआदित्यात्मगच्छति॥पतिः स्वामी।विश्वस्य।भूमाच।विश्वस्यसर्वस्यात्तमनः।बकुत्वस्याभौव्याख्यात्॥प्रकाशयति।रोदसी
द्यावापृथिव्यौ॥उभेउभौसोमापूषणौ॥ २॥ सुतासः।विनियोगोस्यतृतीयेहनि॥अभिषुतामधुमत्तमाः।अतिशयेनरसवत्तमाः।सोमाः इंद्रा
यमंदिनः।मदनवंतः।स्तुतांचतद्वंतः।पवित्रवंतः।दशापवित्राताद्देवान्॥वस्वादीन्गच्छंतुवः युष्माकं॥मदास्यपेयतमइंद्रस्यकाम्यंइंद्रोपि
कामयते।धसंनवेन्समिव।पूर्वआयुनि।आयुषिजातंरिहंति॥लेलिहंति।आस्वादयंतिमातरः रश्मयः उदकान्निवा॥ ३॥ आहर्यति॥
प्रेप्साकर्म॥प्रेप्सातव्याप्नोति।धृष्णवेधर्षणशीलाय॥धेनुश्चलंति॥विस्तारयंति॥किंचिच्छब्दंकुर्वंति॥व्याप्नायोत्स्यंसामर्थ्यायुक्तं॥शुक्रा
शुचिष्मंतः।वियंति।असश्चतसखायवसदानवते॥निर्णिजेनिर्णेजनार्थं॥विपांप्रज्ञानां॥अग्रेप्रथमंमहीयुवः॥महत्सोमंमिश्रयंति॥

223/1973

रश्मयः।उदकानिवा॥७॥परि।विनियोगोस्यनवमेहनिपरिसमंतात्यंतं॥हर्यतं।हरिर्हरितवर्णं॥वभ्रुंचस्फवर्णं।।पुनंतिपावयंति।बालेनकिंविशिष्टेन॥
११२ अविमयेन॥देवान्।विश्वान्त्सर्वान्।इत्सरिसर्वतः।मदेनसहगछति।परिदेवंलक्षयित्वा॥८॥प्रस्फत्वनाय॥विनियोगोअस्यप्रथमेहनि॥स्फत्वनाय
अभिष्टमानाय।अंधसः।सोमस्यमर्तः।मनुष्यः।नः।वष्टकामायतेतद्वचः।मत्यइवस्तुतिसंयुक्तं॥अपश्वानंश्वानमिवाराधसं॥अपघ्नन्।अधनं।ध
रहितं।अमरवंयज्ञबहिष्कृतं।भृगवः।भर्जनशीलाः।रश्मयइव।अपघ्नतेऋत्विजोवा॥९॥ ॥षष्ठेषष्ठ्यादशात्या॥ ॥अभिप्रियाणि॥
विनियोगोअस्यज्योतिष्टोमे॥जगत्यः।प्रियाणिइष्टानि॥पवतेयजमानायचनोहितः।।अत्रानिहितः॥नामानिसोमादीनियव्हः।महान्॥अधीयेषु
वर्धते॥आसूर्यस्यबृहतः॥महतः।महत्सोमअधिउपरिआदित्यमंडलात्॥चतुर्थमंडलंसर्थंर्मविष्टंवंनामावर्णअरुहत्॥आरुहन्॥छंदसि
व्यवहितार्थेविवक्षणः॥विविधंप्रकाशयइत्यर्थः॥ २॥अवोद्यसः॥चोदयति॥धन्वंतुइंद्रवः।सोमाः।नअस्मान्प्रतिस्वानासः।।स्फतां॥वृहत्।
देवेषुहरयः॥हरणशीलाः।विचित्।अस्माना।विनाशयंति।येअरातयःशत्रवःतान्॥विनाशयंतः।अर्यः।स्वामिनः।नः।अस्माकंसंतुसनिषं
तु।संभजत्।उः।धियः।प्रज्ञाकर्माणिवा॥३॥एषप्रकोशे॥शोणकलशेमधुमानरसमान्॥अचिक्रदत्।शब्दकृतवान्।इंद्रस्यसोमः।वज्रः।अनेनमीतेव ११२

नं।सेप्तुंसमर्थः।वपुषः।दीप्तेदीप्तितमः।अभिरुत्तमस्ययज्ञस्यस्फदुघाः।स्फदोहनीः।घृतश्चुतेउदकंवा।श्वातयंत्यः।वस्राः।कामयमानाः।क्षरंतिप
यसाचधेनवः॥धापानेपिबंत्यउदकं।आदित्यरश्मयः।कामयमानाः।क्षरंतिपयः।धेनवआदित्यरश्मयश्च॥३॥प्रोअयासीत्॥विनियो
गोस्यसप्तमेहनि॥इद्धःसोमः।इंद्रस्यनिष्कृतं॥समवायं।सखासख्युर्नप्रमिनातिविनाशयति॥संगिरं।स्तुतं।मयः।मनुष्यइव।युवतिभिः
संबंधे।अर्षतिक्षरतिएवंसोमंकलशेनशातयामना॥शतछिद्रेणयथापवित्रेणक्षरतिकलशंप्रति॥४॥धर्ता।विनियोगोस्याष्टमेहनि॥धा
रयितादिवः।पवतेकृत्लेकर्तव्यरसः।दक्षः।देवानांशीघ्रःअनुमाद्यः।अनुमनीयः।त्वभिर्मनुष्यैः।वृथापाजांसिकृणुषे।कुरुषे।पाजास्यत्रानि
करोषि।नदीषुरश्मिषुउदकेषुवा॥अधि॥५॥वृषा॥विनियोगोस्यतृतीयेहनि॥वृषाषेत्कामतीनांप्रज्ञानांविचक्षणः॥विविधंप्रकाशितासोमः।
अन्हांप्रतरीता।प्रकर्षेणतारयिता।उषसांदिवःरश्मीनांतु।द्युलोकस्यच॥प्राणापानादयः।तेषांकर्तासिंधूनां।अपांकलशादीनी॥पात्राणि
अचिक्रदत्।शब्दंकरितवान्॥इंद्रस्याहार्दिह्लादनः।आविशत्।प्रविशत्।मनीषिभिःमनसः।एषणशीलैःपाल्यते॥६॥त्रिरस्मै॥वि
नियोगोस्याभिप्लवेअस्मैसोमाय॥सप्तधेनवःसप्तछंदांसित्रिःप्रातःसवनमाध्यंदिनतृतीयसवनेषु॥दुदुहेअथवातस्तृभिःसवनैःसप्त

225
1973

धेनवः।सप्ताहोरात्रावषट्कारिण्यः॥होतामैत्रावरुणः॥ब्राह्मणाछंदांसि॥होतानेष्टाअछावाकआग्नीध्रएतेषांवाचः॥दुहंते।अथवाधेनवाडुहं
११३ तेसत्यामाशिरं॥आश्रीयणीयं।मिश्रणंवापरमेप्रकृष्टेव्योमनिस्थानेयज्ञवाचत्वारि॥अन्याग्निष्टोमउक्थ्यषोडशी।अतिरात्रश्चतुर्थअथवापृथिवी
अंतरिक्षंद्यौर्दिशाइति॥अथवाचत्वारोवेदाः॥अथवाचत्वारोमहर्त्विजः॥अथवाचत्वारःसमुद्राभुवनानिनिर्णीतिचतुर्दशभुवनानिसप्तभूरादयो
लोकाःसप्तपातालानितान्यपिचरूणिचक्रेकृतवान्केनप्रकारेणनयतःरितैःरत्नैःयज्ञैःसत्यैर्वाअवर्धत॥अथवातस्मैसप्तधेनवः।सप्तरत्नमयः
दुदुहिरे।अथवासप्ताश्वाअथवासप्तपावकजिह्वाःसप्तमातरोवासप्तभूरादयोलोकाः॥सप्तपातालानिसप्तसोमसंस्थाः॥सप्तसमुद्राःसप्त
द्वीपानिसप्तसराः॥एताडुदुह्रिरेसप्तामांशिरंउदकंपरमेव्योमनि॥चत्वारिअन्याःभुवनानिपृथिव्यादीनिचारुणिचक्रे॥यत्तुकृतैर्यज्ञैःअव
र्धतेत्यथावाग्निःअस्मैसप्तधेनवः॥सप्तप्राणाःशीर्षण्याइतितः॥उत्पत्तिस्थितिप्रलयेषुसप्ताअवितथा॥आशिरंज्ञानंचत्वारिभुवनानि
जाग्रत्स्वप्नसुषुप्त्यतुरीयाख्यअद्वैतावस्थातिचक्रेतेर्जनैः॥अवर्धतविज्ञानाय॥ ७॥इंद्रायसुषुतः।अभिषुतः।परिस्रवः।प्रवतः।अपअमी
वा॥व्याधयःरक्षसासह॥अपनुद्यतांमातेतव॥रसस्यकिंविशिष्टस्यमत्सतः॥द्वयाविनः॥रक्षांसिशानव॥द्रविणस्वंतः।धनवंतः।इहसंतुइं ११३

द्वःसोमाःरसवंतोभवंतुदेवानां॥नतुचान्तुराक्षसादीनां॥८॥असाविनियोगोस्यनवमेऽहनि॥सुतःसोमःअरुषः॥अहिंसितःवृषासेक्ताहरिः।ह
रिणशीलः॥वारंवालं।अत्येषि।अत्येति।व्यत्ययेन।अव्ययंअविमयंश्येनोनश्येनइव॥योनींस्थानं।घृतवंतं।उदकवंतः।आसदत्स्थितवान्।
॥९॥प्रदेवंअछमधुमंतःरसवंतः।व्याप्नुवंतिइंदवः।सोमाःअसिष्यदंतागावइवस्पंदंतोधेनवः॥बर्हिषदः।बर्हिषिसीदंति॥वचनावंतस्तु
तिवंतःऊध्वसिःपरिष्कृतंसर्वतःकृतं॥उत्सयागाचरत्नमयोनिर्णिजंधिरे।दधिरे।सोमस्य॥१०॥अंनते॥विनियोगोऽस्यन्हेव्येप्रवर्गेच॥
व्यंजते।विविधंसमंजते॥सम्यक्तुंकर्मणिमधुनाअभ्यंजते॥मधुनाअभ्यंजते॥सिंधोःसमुद्रस्य।उच्छ्वासे।वडवामुखस्यअग्नेःपतयंतंवर्ध
यंतं।समुद्रंउक्षणंमहांतं॥सेक्तारं।हिरण्यपावाहिरण्यस्यपातारक्षित्ता॥पशुंसोमं।अप्सुयत्कृतेगृह्णाति॥११॥पवित्रंते॥विनियोगोअस्यतृती
येऽहनि॥पवित्रंपुनातेयज्ञेविततंविस्तीर्णंब्रह्मणस्पते॥अन्नस्यते॥यज्ञस्यऋग्यजुःसामलक्षणस्य॥पाताप्रभुः॥ईश्वरःगात्राणिस्वकीयानि
परिसमंतात्॥एषिविश्वतःसर्वतःयज्ञं॥अतप्तशरीरः।सूक्ष्मैरपिछिद्रैर्दग्धापवित्रस्यगच्छत्॥ननत्॥अमरोगः।अश्नुते।व्याप्नोतिसृतासः।
निष्पन्नाःसोमाः।वहतःप्रापयंतःसंतः॥आतअसव्याप्तो॥व्याप्नुवंति॥द्रोणकलशं॥१२॥ ॥षष्ठेसप्तम्यादशात्या॥ ॥इंद्रं।जगत्य॥

227 / 1973

उष्णिहः। उच्यंते॥ विनियोगोस्यज्योतिष्टोमे॥ सूताइमेसोमाः। इंद्रंवृषणंसत्कारं। अभियंतुहरयः। हरितवर्णाः। श्रेष्ठेक्षिप्ताः श्रेष्ठेजाताः॥ इंदवः
११४ स्वर्विदः स्वर्गलोकंविंदति॥ १॥ प्रधन्वा॥ प्रगच्छसोमजागृविः जागरणशीलः इंद्राय॥ इंदोपरिस्रवसर्वतः॥ द्युमंतंशुष्ममंतंशुष्मं॥ आभ
रआहरस्वर्विदं॥ २॥ सखाय॥ विनियोगोस्यसप्तमेहनि॥ हेसखायः। आनिषीदत॥ पुनानायसोमाय॥ प्रगायतस्तोत्राणिशिशुंन॥ यथामा
तरः शिशुंअलंकारैः भूषयंति॥ एवंसोमंयज्ञैः॥ परिभूषतश्रियेस्त्वर्थ॥ ३॥ तंवः सखायः॥ विनियोगोस्यषष्ठेहनि॥ तंसोमं। वः मदा
यमदनार्थं॥ पुनानं। अभिगायत॥ हेसखायः शिशुमिवहव्यैः हवनीयैः स्वदयंतः आस्वादयंतः। गूर्तिभिः। उद्यमानैः। अध्वरत्वेदानैर्वा॥ ४
॥ प्राण॥ विनियोगोऽस्यपंचमेहनि॥ प्राणाशिशुर्महीनांप्राणभूतः शिशुभूतः शिशुः शंसनीयः॥ महीनांगोनां। हिन्वत्राभुवन्। ऋतस्ययज्ञस्य।
दीधितिंअन्यत्रांगुलयः॥ इहत। दीप्तिंप्रीणनंवा॥ विश्वासर्वाणिप्रियाणिपरिभुवत॥ सर्वत्रानुभवंति॥ अथवाअधद्वितीद्वेतवर्णः॥ सोम
देवताएव॥ विनियोगोअस्यन्यनवमेहनि॥ ५॥ पवस्वदेववीतयइंदवयानाय॥ इंदोधाराभिः॥ ओजसाबलेनआकलशंमधुमान॥ सोमः
नःसदःआसदः॥ ६॥ सोम॥ विनियोगोस्यचतुर्थेहनि॥ पुनानः॥ ऊर्मिणा। रसेन। अव्यंवारंविधावति। अग्रेवाचः। स्तुतीनांपूर्वंपवमानःक ११४

निक्रदत॥ शब्दंकृतवान॥ ७॥ प्रपुनानाय॥ वेधसे। मेधाविने। सोमाय। वचः स्तुतिसंयुक्तं। उच्यते। भृतिंन। भृतिमिवभरवेतनं। मतिभिः प्रज्ञा
भिः जुजोषते॥ सोमपानाय॥ गोमन। धनमन। नः अस्मभ्यंइंदोअश्ववत॥ अश्वैअसंयुक्तंसूतः सूदक्षः धनिवदानकर्मा॥ वृक्तागतिकर्मा॥
शुचिंविशुद्धं॥ वर्णअधि। गोषुधारय॥ ८॥ अस्मभ्यंत्वा॥ त्वांवसुविदंवसुनःवेत्तारं॥ अभ्यनूषत॥ वाणीवाकस्तुतिसंयुक्ता॥ गोभिः गव्यैः पयः
आदिभिर्वर्णरूपं॥ अभिवासयामसि॥ आभिमुख्येनवाच्छादयामः॥ ९॥ पवते॥ विनियोगोस्यप्रथमेहनि॥ पवतेपाव्यते। पूयते। प्रेष्णायुक्तः। हर्य
ताहरिभिर्यता॥ हरिः हरणशीलः॥ अतिज्वरांसि॥ अविअविमयानि॥ बालानि॥ रंह्यावेगेन अभिवर्षेआभिमुख्येनक्षरस्तोतृभ्यः॥ ऋत्विग्यजमा
नेभ्यः॥ वीरवद्यशः॥ पुत्रपौत्रसंयुक्तं॥ यशः अन्नंधनंवा॥ १०॥ परिसर्वतः कोशंमधुश्च्युतं॥ द्रोणकलशं॥ सोमःपुनानः। अर्षति। क्षरसि॥ अ
भिवाणीऋग्यजुःसामलक्षणाऋषीणां॥ स्तोत्राणां॥ सप्तअनूषत॥ सप्तछंदांसि॥ सप्तहोत्रावा॥ अनूयस्तुतिंकुर्वत॥ ११॥ पृष्ठेनवृम्यादशास्ता
॥ ॥ पवस्वमधु॥ ककुभः विनियोगोस्यज्योतिष्टोमेमधुमत्तमः॥ सखत्तमः। अतिशयेनइंद्रार्थसोम॥ क्रतुवित्तमः। अतिशयेनकर्मवित॥ मद
मदीयः हि॥ महांद्युक्षतमः घ्नतिक्षिपंति॥ दिवाक्षरति। वामदः॥ २॥ अभिद्यु॥ विनियोगोस्यपंचमेहनि॥ घर्म्यंयशः। अन्नंवास्तुहयशः॥ इष

229/1973

स्पते॥अन्नानांपते॥दिदिहिदेवयुंदेवान्कामयते॥निकोत्रांमध्यमंमध्यमेसवनेषु।स्कवमिश्रय॥ २॥असो।विनियोगोस्यत्ततीयेहनि॥असकृतः॥
११५ परिस्रवतःसिंचतअश्वंनअश्वमिव॥स्तोमंसोमलक्षणं॥अप्तुरं।तरतितंरजस्तुरंलोकेषुत्तुरितिगच्छति॥चावनप्रक्षंधनेक्षयतिक्षियति।
सोमंउदकप्लुतं॥पवते।नोद्रष्टव्यः॥ ३ ॥ एतंउत्यं॥मदच्युतंसहस्रधारंबकूधारं॥वृषभंवर्षितारं।वदिवोदुहं।दिवः।आत्हत्यइमंलोकंउद
केनपूर यति॥विश्वासर्वाणिवसूनिधनानि॥बिभ्रतंधारयंतं॥ ४ ॥सस्कन्वे॥विनियोगोस्यषष्ठेहनि॥यःवसूनांधनानां॥भनेतायोराय॥
किंविशिष्टानांधनानांइडानांअन्नानांसोमः॥स्कक्षितीनांमनुष्याणां॥आनेतायःसमुलेतंस्तुमः॥ ५॥त्वं।विनियोगोस्यचतुर्थेहनि॥अंग
त्रीघ्रंआमंत्रितंवा॥दैव्यंदेवानांहितःपवमानः॥जनिमानिजन्मानिद्युमत्तमः॥अमृतत्वायघोषयंस्तूयसे॥इत्यध्याहारः॥एषःकाकुभः॥
७॥एषस्यधा॥विनियोगोस्यसप्तमेहनिस्यसः॥धारयास्रुतः॥अभिषुतः।अप्या।अविमयेवारेवत्तपूयते॥मदिंतमः।आतिशयेनऊर्मिः
संघातःक्रीडन्रमन्अपांइवयः॥ ८ ॥उत्सया॥आदित्यरश्मयःअनडुहाहावा।अंतरश्मनिअश्मनोप्यंतःनिःगाःअकृंतत्नितरांग
वः॥अकृंतत्॥अकर्तयंअश्मानंभिंदय भित्तिवा॥७०जासास्येनबलेन॥अभिव्रजंगोष्टं॥तन्निशवितनुतेविस्तारयंति॥गव्यंगवांभवंत। ११५

अश्व्यंअश्वानांभवं॥वर्मिइववर्मिसं नहनं॥तद्यस्यास्तिसवर्मी॥सवितातस्यसंबोधनं॥हेधृष्णोधारयतः॥आरुजारुजभंगेभक्षाधनंगव्यंअ
श्वंच॥ममप्रयच्छेत्यारयार्थः॥ ॥इतिछंदसिकाविवरणंमाधवाचार्यकृतंपरिसमाप्तं॥ ॥षष्ठप्रपाठकानां॥ ॥इदंपुस्तकंस
माप्तं॥शाके१७५५विजयनामसंवत्सरेकार्तिककृष्णचतुर्दश्यांसमाप्तं॥गोविंदेनलिखितं॥ ३८००

231/1973

॥इतिछंदसिकाभाष्यप्रथमषष्ठप्रपाठकानांविवरणंसमाप्तः॥

श्रीगणेशायनमः॥ ॥ पूर्वेषांश्रीसायणाचार्येभ्योनमः॥ वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे॥ यंनत्वाकृतकृत्याःस्यु
स्तंनमामिगजाननं॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत॥निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ तत्कटाक्षेणतद्रूपंदधद्बु
क्कमहीपतिः॥ आदिशत्सायणाचार्यंवेदार्थस्यप्रकाशने॥ येपूर्वोत्तरमीमांसेतेव्याख्यायातिलः॥ कृपालुःसायणाचार्योवे
दार्थंवक्तुमुद्यतः॥ व्याख्याताऋग्यजुर्वेदौसामवेदोपिसंहिता॥ छंदोभिधाभूद्व्याख्याताव्याख्यास्यत्युत्तराभिधां॥ छंदस्येकै
कशोधीताऋचःसामोद्भवायहि॥ स्तोमनिष्पत्तयेसक्तान्युत्तरायामधीयते। स्तोमश्चाग्नेनज्योतिष्टोमादिषुसोमयोगेषुप्र
युज्यमानास्त्रिवृत्पंचदशादयोभिधीयंतेअतएवतित्तिरीयकः॥ प्रस्तोत्तराभ्यामिदमामनंति॥ तदाहुः। कतमानितानि
ज्योतींषियएतस्यस्तोमाइति॥ छंदोगाश्चत्रिवृदादिस्तोमानांस्वरूपंब्राह्मणद्वितीयतृतीययोरध्याययोर्बहुधासमामनंति।
तेचबहुभिरवांतरभेदैरुपेताःसमाम्नाताःस्तोमानवसंख्याकास्तेषुपूर्वोक्तास्त्रिवृदादयश्चत्वारः॥त्रिणवस्त्रयस्त्रिंश

233
1973

143041

स्त्रिनवसंख्योपेतस्तोमस्तरणवदित्युच्यते। छंदोमनामकास्तोमास्त्रयस्तिष्वचतुर्विंशाख्यस्तोमः प्रथमः। गायत्री छंदसा च चतु
र्विंशत्यक्षरोपेतमीनीयत इति छंदोमः। चतुश्चत्वारिंशाख्यो द्वितीयः स च त्रिष्टुप्छंदसा सामीयते॥ अष्टाचत्वारिंशाख्यस्तृतीयः
। सोऽपि जगतीछंदसा मीयते॥ नन्वध्याय इत्याम्नातप्रकरणोपेतेभ्यस्त्रिवृदादिभ्यो अष्टादशनवदशाहीनामकाव्यहवः स्तो
मा विद्यंते। तथा च तैत्तिरीयकाः। कस्यचिद्विस्तकोपमानमंत्रपुदवताग्नेतस्त्रयस्त्वाश्वच वृयातान् स्तोमानामनंति। आशुस्त्रि
वृद्रातः पंचदशान्योमससप्तदशः प्रतूर्ती रष्टादशस्तपानवदशाभिवर्तः सविंशा एकविंशो वर्चो द्वाविंशः संभरणः स्त्रयोविं
शान्योभिचतुर्विंशो गर्भाः पंचविंश ओजस्त्रिणवः क्रतुरेकत्रिंशो विष्टस्यांविष्टपश्चतुस्त्रिंशो नाकः षट्त्रिंशो विवर्ता ष्टा
चत्वारिंश इति॥ एवं तर्हि सत्यं बहूनि स्तोमांतराणि तेषां लक्षणानि ब्राह्मणांतरानुसारिण सूत्रकारैश्चुदसाहितानि तेन चास्तो १
मासर्वव्यापयष्टादिषु पक्लृप्ताः। पंचदशान्याउयानि सप्तदशानि पृष्ठानीत्यादिश्रुतिभ्यः स्तोमविषयात्तात्त्विषयास्तानि

प्यादसामविषयाश्च सर्वेपि विचारा अस्माभिः छंदोग्याख्यातावदनादलायामवज्जैमिनीयान्यार्थकरणान्युदाहृत्य प्रदर्शिताः।
किं बहुना एकं साम तृचे क्रियते स्तोत्रमित्यादिवचनात् स्तोत्राणि प्याढकस्य साम्नस्तच प्रगाथादिरूपाणि सूक्तान्याश्रयत्वेनोत्तरा
ख्यसंहितायां समाम्नातानि स च ग्रंथ एकविंशतिसंख्याके र० ध्याय रूपेन तत्र प्रथमाध्यायस्य प्रथमखंडे प्रथमसूक्तं नेय 235/1973
यमृक् प्रथमा सैव माम्नायते॥ ॥ उपास्मै गायता नरः पवमानायेंदवे॥ अभिदेवां इयक्षते॥ इति। हे नरो नेतारः यज्ञस्य दवानि
ज्ञार्दिनीतिरुयक्षते आभिमुख्येन यष्टुमिच्छादः। पवमानाय क्षरते। अस्माअभिषूयमाणायेंदवे ससोमायोपगात। पंगानं क्ष
रत॥ ॥ अथ द्वितीया॥ अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः॥ देवं देवाय देवयु॥ इति। हे सोम तेन वदेयं देवनशीलं। देवयुं।
ईश्वं देवकामं रसं देवाय देवानशीलायेंद्राय मधुना पयो गव्येन पयसाथर्वाण ऋषयोभ्याशिश्रयुः अभ्यश्रीणन् समस्कुर्व
नित्यर्थः। क॥ ॥ अथ तृतीया। स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः इति। हे राजन् दीप्यमान सोमास :

२ प्रसिद्धस्त्वं नोस्माकं गवे शं सुखं पवस्व क्षर। जनाय पुत्राय च शं पवस्व। अर्वते अश्वाय च शं पवस्व। ओषधीभ्यश्च शं पवस्व। ॥अ
थ द्वितीय तृचे प्रथमा॥ दविद्युतत्या रुचा परिष्टोभन्त्या कृपा॥ सोमाः शुक्रा गवाशिरः॥ इति। शुक्रा उज्ज्वला दविद्युतत्या द्योतमाना
या। रुचा दीप्त्या परिष्टोभन्त्या परितः शब्दायमानया पाधारया च युक्ताः सोमाः गवाशिरो भवंति। गव्येन पयसा मिश्रिता भवंती
त्यर्थः॥ ॥अथ द्वितीया॥ हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्॥ सीदंतो वनुषो यथा॥ वाजी बलवान् सोमो हेतृभिः प्रेरकैः
स्तोतृभिः हिन्वानः स्तोत्रैः प्रेर्यमाणो हि। ताभिः प्रकारैः सन् वाजं यागाख्यं युद्धमाक्रमीत् आक्रमति। तत्र दृष्टांतः। यथा वनुषो हं
तारो भटाः सीदंतो युद्धं प्रविशंतः आक्रामंति तद्वदित्यर्थः॥ ॥अथ तृतीया। ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे। पव
स्व सूर्यो दृशे इति। हे सोम कवे क्रांतदर्शिन्। सूर्यः सर्वार्थस्त्वं ऋधक् पृथक् भवत। तथा च यास्कः। ऋधगिति पृथग्भावस्यानुप्र २
वचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यत इति। संजग्मानः संगच्छमानः स्वस्तये दृशे दर्शनाय च दिवा दिवः विभक्तिव्यत्ययः। पवस्व
क्षर।

दिवा कवे दिवा कवीरिति पाठे। तृतीय ऋचे प्रथमा॥ पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वंतो न श्रवस्यवः॥ इति मार्जनप्रसंगा
दाह। हे कवे क्रांतप्रज्ञ हे वाजिन् अन्नवन् सोम पवमानस्य दशापवित्रेण पूयमानस्य ते तव सर्गाः सृज्यंत इति। सर्गाः धाराः कीदृश्यः
श्रवस्यवः छंदसि पारच्छायां क्यच्। यद्वा मनं कामयमानाः त्वदीया धारा असृक्षत विसृज्यंत इति निर्गच्छंतीत्यर्थः। तत्र दृष्टांतः
अर्वंतो न यथाश्वाः मंदुरातो निर्गच्छंति तद्वत् पवित्रान्निःसरंतीत्यर्थः। प्रयोगापेक्षं चात्र धाराबहुत्वं॥ ॥अथ द्वितीया। अच्छा
कोशं मधुश्चुतमसृग्रं वारे अव्यये॥ अवावशंत धीतय इति धारानिर्गमनप्रसंगादभिधीयते। मधुश्चुतं मधुरतमरसस्य स्राव
यितारं क्षारयितारं। कोशं द्रोणकलशमच्छाभिलक्ष्य अव्यये अविमये वारे वाले दशापवित्रे असृग्रं सोमाः ऋत्विग्भिरभिसृज्यं
ते। सृजेः कर्मणीति अंतिन्नो भवंतीति रुडागमः। किंच। धीतयः अंगुलिनामैतत् धयंति पिबंत्याभिरिति। अस्मदीया अंगुल
यः अवावशंत तान् सोमान् पुनः पुनर्मार्जनार्थं कामयंते॥ ॥तृतीया॥ अच्छा समुद्रमिंदवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनि
मा॥

237/1973

उदंचः क्षरंतः सोमाः समुद्रं सोमानामेकत्रैव संगमनस्थानं द्रोणकलशमच्छाभिगच्छंति। तत्र दृष्टांतः॥ धेनवः पयः प्रदानेन जनानां प्रीणः
३ यित्र्यो नवप्रसूतिका गावः अस्तं गृहं यथाभिगच्छंति तितद्वत॥ किंच। ते सोमाः ऋतस्य सत्यभूतस्य योनिस्थानमागमन॥ आभिमुख्ये
नगच्छंति। गमेर्लुङिः सिचोलुकि उपधालोपः ॥ ॥इति सामवेदार्थप्रकाशे उत्तराग्रंथस्य प्रथमस्याध्यायस्य प्रथमः खंडः॥१॥
॥अथ द्वितीयखंडे प्रथम तृतीये प्रथमा॥ अग्न आयाहि वीतये गृणानो हव्यदातये॥ नि होता सत्सि बर्हिषि॥ हे अग्ने अंगनादि
गुणविशिष्ट त्वं आयाहि अस्मद्यज्ञं प्रत्यागच्छ किमर्थं वीतये। हविषां चरुपुरोडाशादीनां भक्षणाय॥ कीदृशः सन् गृणानः॥
अस्माभिः स्तूयमानः व्यत्ययेन कर्मणि कर्तृप्रत्ययः। पुनश्च किमर्थं हव्यदातये। देवेभ्यो हविः प्रदानाय। आगत्य च कृत्वा देवा
नामाह्वाता सन् बर्हिषि आस्तीर्णे दर्भे निषण्णो निषीद। सादस्थांद सः रापालुक॥ ॥अथ द्वितीया॥ तं त्वा समिद्भिरंगिरो घृतेन व ३
र्धयामसि॥ बृहच्छोचायविष्ठ्य॥ हे अंगिरः अंगनादिगुणयुक्त अंगारस्य एवा अंगिरसः पुत्र वा यतं पूर्वोक्तगुणत्वात्त्वां समि

द्भिः समिंधनहेतुभिर्दारुभिः प्रीतेनाज्येन च वर्धयामसि वर्धयामः। अतो हे यविष्ठ्य युवतमाग्ने बृहत् महत् अत्यंतं शोचदीप्यस्व
॥ ॥अथ तृतीया॥ स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यमिति। हे देव द्योतमानाग्ने स पूर्वोक्तगुणस्त्वं पृथुविस्ती
र्णं श्रवाय्यं श्रवणीयं प्रशस्यं बृहन्महत सुवीर्यं शोभनवीर्योपेतं धनं नोस्मान् अच्छ विवाससि अभिगमय। अत्र वाजसनेयकम्
अच्छा देव विवाससीति तन्नो गमयत्याव तदाहेति॥ ॥अथ द्वितीयात्रे च प्रथम॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं॥ मध्वार
जांसि सुक्रतू इति। सुक्रतू। शोभनकर्माणो हे मित्रावरुणौ नोस्माकं गव्यूतिं गवां मार्गं गोनिवासस्थानं घृतैः क्षरणसाधनैः प
योभिः उदकैः। आ उक्षतं समंतात् सिंचतमस्मभ्यं दोग्ध्रीः गाः प्रयच्छतमित्यर्थः। किंच मधुमधुरेण स्वरसेन रजांसि पार
लौकिकान्यस्मदावासस्थानानि सिंचतं॥ ॥अथ द्वितीया। उरुशंसा नमोवृधा मन्हा दक्षस्य राजथः। द्राघिष्ठाभिः शुचिव्रतमिति।
शुचिव्रता परिशुद्धकर्माणो हे मित्रावरुणौ उरुशंसा उरुभिर्बहुभिः शंसनी। यो यद्वा उरु बहु छंदसः शंस्यपयोस्ते। नमोवृधा

239/1973

नमसा हविर्लक्षणेनान्नेन स्तोत्रेण वा वर्धमानौ । द्राघिष्ठाभिः । अत्यंतदीर्घस्तुतिलक्षणाभिर्वाग्भिर्युक्तौ युवां दक्षस्य दक्षते समर्थो भ
५ वत्यनेनेति दक्षं धनं बलं वा तस्य मन्हा महत्त्वेन राजथः ईशाथे ॥ ॥अथ तृतीया ॥ गृणाना जमदग्निना योनावृतस्य सीदतं ॥ पातं सो
ममृतावृधा ॥ इति । हे मित्रावरुणौ जमदग्निना एतन्नामकेन महर्षिणा यद्वा जमदग्निना प्रज्वलिताग्निना विश्वामित्रेण गृणानौ स्तूयमानौ
युवां ऋतस्य यज्ञस्य योनौ देवयजनाख्ये देशे सीदतं उपविशतं । ऋतावृधा ऋतस्य कर्मफलस्य वर्धयितारौ युवां सोमं पातमस्मा
भिरभिषुतं सोमं पिबतं ॥ ॥तृतीयतृचे प्रथमा ॥ आ याहि सुषुमा हि त इंद्र सोमं पिबा इमं ॥ एदं बर्हिः सदो मम ॥ इति । हे इंद्र त्वमायाहि
अस्मद्यज्ञं प्रत्यागच्छ । वयं ते त्वदर्थं सुषुमा हि सोममभिषुतवंतः खलु । तमिममभिषुतं सोमं त्वं पिब तदर्थं मम मदीयमिदं
बर्हिर्वेद्यामास्तीर्णं दर्भमासदः आसीद अभिनिषीद ॥ ॥अथ द्वितीया ॥ आ त्वा ब्रह्मयुजा हरी वहतामिंद्र केशिना ॥ उप ब्रह्मा ४
णि नः शृण्विति । हे इंद्र च ब्रह्मयुजा ब्रह्मणा मंत्रेण युज्यमानौ । केशिना केशिनौ केशवंतौ हरी हरणशीलौ वाश्वौ त्वा त्वामावहतां

भिप्रापयतां । त्वं चास्मद्यज्ञमुपेत्य नोस्माकं ब्रह्माणि स्तोत्राणि शृणु सम्यक् चित्ते धारय ॥ ॥अथ तृतीया ॥ ब्रह्माणस्त्वा युजा वयं सोम
पामिंद्र सोमिनः ॥ सुतावंतो हवामहे ॥ इति । हे इंद्र ब्रह्माणो ब्राह्मणा वयं त्वां त्वां युजा योग्येन स्तोत्रेण हवामहे आह्वयामहे । कथंभूतं
सोमपां सोमस्य पातारं । कीदृशा वयं सोमिनः सोमयुक्ताः सुतवंतः अभिषुतसोमैरुपेताः ॥ ब्रह्माणस्त्वा युजा वयं ब्रह्माणस्त्वायु
जेति च पाठः ॥ ॥चतुर्थतृचे प्रथमा ॥ इंद्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यं ॥ अस्य पातं धियेषिता ॥ इति । इंद्रश्चाग्निश्च इंद्राग्नी हे इं
द्राग्नी । देवौ सुतमभिषवादिभिः संस्कारैः संस्कृतं । अत एव वरेण्यं वरणीयं संभजनीयमिमं सोमं प्रति गीर्भिः अस्मदीयाभिर्वाग्भि
राहूतौ संतौ नभः नभसः स्वर्गाख्यात्स्थानादागतमागच्छतं । आगता च धिया अस्माभिः क्रियमाणेन कर्मणा इषिता इषितौ प्रे
रितौ युवामस्येमं सोमं पातं पिबतं । यद्वा धिया अस्मदीयया बुद्ध्या इषितौ प्राप्तौ अस्मद्भक्त्या प्रेरितौ युवामिमं सोमं पिबतं ॥ ॥
अथ द्वितीया । इंद्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ॥ अया पातमिमं सुतं ॥ इति । हे इंद्राग्नी जरितुः स्तोतुः सचा स्वर्गादि

241/1973

क्षणफलप्राप्तौ सहायभूतः यज्ञः द्योति सोमादियज्ञसाधनभूतश्चेतनः इंद्रियाणां चेतयिता आप्यायनकारी स सोमः जिगाति। युवा
मतिगच्छति। अथास्मदीययाग्निलक्षणक्रियानया चा आहूतौ सं तौ युवां सुतमभिषवादिसंस्कारोपेतमिमं सोमं पातं पिबतं॥
॥ ॥अथ तृतीया॥ इंद्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे॥ ता सोमस्येह तृंपतामिति। यज्ञस्य यज्ञसाधनभूतस्य सोमस्य जूत्या जूतिः
प्रेरणं सोमस्ताव यजमानं प्रेरयति। साधनमुपलभ्य तदुपाध्यक्षतो यजमानः प्रवर्तते इति हि तस्य प्रेरकत्वं। अनया प्रेरणरूप
या जूत्या प्रेरितोऽहं स्तोता कविच्छदा कवीनां स्तोतॄणामुचितफलप्रदानेन तौ छंदयतः॥ इंद्रमग्निं च युवां वृणे संभजे। तौ आगतौ च
तौ इंद्राग्नी इहास्मदीये यस्मिन्कर्मणि सोमस्य सोमेन सोमपानेन तृंपतां तृप्यतां॥ ॥ इति सामवेदार्थप्रकाशे उत्तराग्रंथस्य प्र
थमस्याध्यायस्य द्वितीयः खंडः॥ ॥तृतीयखंडस्य प्रथमतृच प्रथमा॥ उच्चा ते जातमंधसो दिवि सद्भूम्या ददे॥ उग्रं शर्म महि श्र
व इति॥ हे सोम ते तव संबंधिनो अंधसो रसस्य उच्चा उपरि जातं जन्म॥ अपि च दिवि द्युलोके सत तव सतः ते तव संबंधि उग्रं उद्गूर्णं श

र्मसुखं महि महत्। श्रवोन्नं च भूमि भूमिस्थैर्यजमानैरा ददे आदीयते दिवि सद्भूप मादीति पाठे॥ ॥अथ द्वितीया॥ स न इंद्राय य
ज्यवे वरुणाय मरुद्भ्यः॥ वरिवोवित्परि स्रवेति॥ हे सोम वरिवोवित् धनस्य लंभकः पवमानः नो अस्माकं यज्यवे यष्टव्याय इंद्राय वरुणा
य च मरुद्भ्यश्च परिस्रव धारयाक्षर॥ ॥अथ तृतीया॥ एना विश्वान्यर्य आ द्युम्नानि मानुषाणां॥ सिषासंतो वनामहे इति॥ मानु
षाणां मनुष्याणां लभ्यानि एना एनानि विश्वा विश्वानि सर्वाणि द्युम्नानि यज्ञसाधनानि हे सोम त्वत्प्रसादात्॥ आ अर्य आभिमुख्ये
न आर्य अभिगच्छंतो वयं सिषासंतः संभक्तुमिच्छंतः श्रवनामहे। त्वां संभजामहे॥ ॥द्वितीयासत्रतृचे प्रगाथे प्रथमा॥ पुनानः सो
मधारयापो वसानो अर्षति॥ आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः इति॥ हे सोम पुनानः पूयमानस्त्वं अपः उदका
नि वसतीर्वर्या स्थानि वसान आच्छादयन धारया अर्षसि। पवित्रं गच्छसि॥ ततः रत्नधा रत्नानां रमणीयानां धनानां दाता त्वं ऋतस्य
सत्यभूतस्य यज्ञस्य योनिं स्थानमित्यर्थः। उत्सो देवः उत्सो देवेति पाठे॥ ॥ अथ द्वितीया॥ दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमास
दत्॥

आप्रच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणइति॥ मधुमदं करं प्रियं प्रीणनकारि हृद्यं दिविभवं इंधः सोमं च कृत्वा लक्षणं दुहानः प
६ वमानः सोमो देवः प्रत्नं पुरातनं सधस्थं सहस्थितिं यस्मिन्निति सधस्थं स्थानमंतरिक्षमासदत॥ आसीदति। सदेर्लुङि रूपं। तदनंतरं आ
प्रच्छ्यं कर्मण्याप्रष्टव्यं धरुणं कर्मणो धारयितारं यजमानं वाजी अन्नवान्नस्सन् हे सोम त्वं अर्षसीत। त्वमन्नं दातुमभिगच्छसि। कीदृ
शः नृभिः कर्मनेतृभिर्ऋत्विग्भिर्धौतः अद्भ्य ग्रहे परिशोधितः। तदनंतरं चतुरा धृत्वा नातिपंचर्च सत्यर्चा वेत्यापस्तंबेन स
त्रितं विचक्षणः सर्वस्य विद्रष्टा नृभिर्धौतो नृभिर्धूत इति पाठो॥ ॥तृतीयर्चप्रथमा॥ प्रतु द्रव परि कोशं नि षीद नृभिः पुना
नो अभि वाजमर्ष। अश्वं न त्वा वाजिनं मर्जयंतोऽछा बर्ही रशनाभिर्नयंतीति॥ हे सोम त्वं क्षिप्रं प्र द्रव अस्मद्यज्ञं प्रकर्षेण गच्छ॥
गत्वा च कोशं द्रोणकलशं परि षीद परितो निषण्णो भव॥ नृभिर्नेतृभिः पुनानः पूयमानः सन् वाजमन्नं हविर्लक्षणं अभ्यर्ष अभिगच्छ॥ ६
वाजिनं बलवंतं अश्वं अश्वमिव त्वां यथा मार्जयंति तद्वत् वाजिनं त्वां मर्जयंतः शोधयंतः। अध्वर्युप्रमुखाः ऋत्विजः बर्हिरछास्मदी

यं यज्ञं प्रति रशनाभिः रशनावद्दीर्घाभिरंगुलीभिर्नयंति॥ १॥ अथ द्वितीया॥ स्वायुधः पवते देव इंदुरशस्तिहा वृजना रक्षमाणः॥ पि
ता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः पृथिव्या इति॥ स्वायुधः शोभनायुधः इंदुः सोमो देवः पवते स च देवः अशस्तिहा रक्षो
हा वृजना वृजनानि उपद्रवाणि परिहरेति शेषः। रक्षमाणः पिता पालकः देवानां तथा जनिता उत्पादकः सुदक्षः शोभनबलः दि
वो विष्टंभः विशेषेण स्तंभयिता। पृथिव्याश्च धरुणो धारकः। एवं महानुभावः पवते वृजना वृजनमिति पाठो॥ ॥अथ तृतीया॥
ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन॥ स चिद्विवेद निहितं यदासामपीच्यं गुह्यं नाम गोनामिति॥ ऋषिरतींद्रियम
र्थाविप्रो मेधावी पुरएता पुरतो गंता जनानां मनुष्याणां ऋभुः उरु भासमानः धीरो धीमान् उशना एतन्नामकऋषिः। यः स चित्तु स
एव काव्येन स्तोत्रेण विवेद लभते। किमिति उच्यते॥ आसां गोनां गवां संबंधि यत् अपीच्यं। अंतर्हितं नाम तत्। अंतर्हितं नाम॥
नामक मुदकं पयो लक्षणं। कीदृशं गुह्यं गोपनीयं॥ ॥इति प्रथमाध्यायस्य तृतीयः खंडः॥ ॥अथ चतुर्थखंडे प्रथमसूक्तेप
थमा॥ ॥

245/1973

अभित्वाशूरनोनुमोदुग्धाइवधेनवः॥ ईशानमस्यजगतः स्वर्दृशमीशानमिंद्रतस्थुषइति॥ हेशूर विक्रांतेंद्र त्वात्वामभिनोनुमः वयंभृ
शमभिष्टुमस्तत्र दृष्टांतः। अदुग्धाइवधेनवः। अदुग्धा दोहागावः आदोग्धारं प्रति हंभारवं कुर्वंति॥ तद्वत् वयंस्तुम इत्यर्थः।
किंभूतं अस्यजगतो जंगमस्य ईशानमधिपं। तस्थुषः स्थावरस्य ईशानं। स्वर्दृशं सर्वद्रष्टारं सर्वज्ञमित्यर्थः॥ ॥अथद्वितीया॥ नत्वावां अ
न्योदिव्योनपार्थिवोनजातोनजनिष्यते। अश्वायंतोमघवन्निंद्रवाजिनोगव्यंतस्त्वाहवामहइति॥ हेमघवन्निंद्र दिव्योदिविभवस्त्वावा
नत्वत्सदृशोन्योनजायते॥ पार्थिवः पृथिव्यांभवोपित्वावानन्योनजायते॥ दिव्यः पार्थिवोवात्वावानन्योनजातः। नचजनिष्यते॥
तेनोत्पत्स्यते लोकद्वयेपि त्रिष्वपि कालेष्वपि त्वत्सदृशः कश्चिन्नास्ति त्वमेव समर्थो भवसीत्यर्थः। अश्वायंतः अश्वानिच्छंतो वाजिनोवा
जमन्नमिच्छंतः। इच्छायामितिप्रत्ययः। हविष्मंतोवा गव्यं। गागाइच्छंतश्च वयं। हे इंद्र त्वात्वां हवामहे आह्वयामः॥ ॥द्वितीयतृ
चप्रथमा॥ कयानश्चित्रआभुवदूतीसदावृधः सखा॥ कयाशचिष्ठयावृतेति। सदावृधः सर्वदावर्धमानः चित्रश्चायनीयः

पूजनीयः। सखामित्रभूत इंद्रः कयाऊती ऊत्या तर्पणेन नोस्मानाभुवत्। आभिमुख्येनभवेत्। शचिष्ठया प्रज्ञावत्तमया ऊती ऊत्या तर्पणे
ननोस्मानाभुवत्॥ आभिमुख्येनभवेत्। शचिष्ठया प्रज्ञासहित मनुष्ठीयमानेन कयावृता केन वर्तमानेन कर्मणा चाभिमुखो भवेत्॥
अथद्वितीया॥ कस्त्वासत्योमदानां मंहिष्ठोमत्सदंधसः। दृळ्हाचिदारुजेवसु॥ मंहिष्ठः पूजनीयः सत्यः सत्यभूतः मदानां मादयितॄ
णांमध्ये कामदकरः अंधसः सोमलक्षणस्यान्नस्य रसः दृढाचित् दृढमपि वसु शत्रुसंबंधि गवादिकं धनं आरुजे आसमंतात् भ
ङ्क्तु। हे इंद्र त्वात्वामशनमादयेत्॥ ॥अथतृतीया॥ अभीषुणः सखीनामविताजरितॄणां॥ शतंभवास्यूतयइति। हे इंद्र सखीनां स
मानख्यातीनां जरितॄणां स्तोतॄणामविता रक्षिता त्वं नोस्माकं शतसंख्याकाभिरूतिभिः रक्षाभिः सु अभिभवासि अभिमुखोभव। शतं
भवास्यूतये। शतंभवास्यूतिभिरिति पाठो॥ ॥अथप्रगाथरूपे तृतीयसूक्ते प्रथमा॥ तंवोदस्ममृतीषहं वसोर्मंदानमंधसः। अभि
वत्संनस्वसरेषुधेनव इंद्रंगीर्भिर्नवामहेइति॥ धानानामकृपिरिंदस्तोति। हेऋत्विग्यजमानाः दस्मं दर्शनीयं ऋतीषहं कृतयोबाध

247
1923

काः । अत्र च । तेषामभिभवितारं पुनः कीदृशं च मो वा सतुर्दुःखस्य विचासयितुर्निवारयितुर्यद्वा वसोः पात्रे निवसनः स्थितस्य तादृशस्याध
सः सोमलक्षणस्यान्नस्य पानेन मंदानं मंदमानं मोदमानं वः युष्मद्व्यत्वेन युष्मत्संबंधिनं तं ना द्दर्शिं दृग्गीर्भिः स्तुतिलक्षणाभिर्वाग्भि
रभिनवामहे । नू स्तव । ननु शब्देनाभिष्टुमः । कृते षु तिष्ठ सरेषु ॥ अन्वयारकः । स्वसराण्यहानि स्वयं सारीणि अपिवा स्वराहितो
भवति । स एता निसारयतीति सूर्यो निम्नाकृ पुदिसेषु यव्व मभिष्टुमः । अभिलः शब्दयामः । तत्र दृष्टांतः । वत्सं न । यथा धेनवा नवप्र
सूतिका गावः स्वसरेषु सक्तु असयंत । प्रयंत मा वास्य तिस्वसराणि गोष्ठानि तेषु वत्समभिलक्ष्य शब्दयंति तद्वत् ॥ ॥ अथ द्वितीया ॥
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसं ॥ क्षुमंतं वाजं शतिनं सहस्रिणं मक्षू गोमंतमीमहे इति ॥ द्युक्षं दीप्तानां निवासस्था
नं अतिशयितदीप्तिमित्यर्थः । यद्वा द्युः स्वर्गः तेन द्युलोके क्षियंतं निवसंतं सुदानुं । शोभनदानं । तविषीभिः बलैरावृतमाच्छादितं
आवरणे दृष्टांतः । गिरिं न तविषीभिर्बलयुक्तैर्मेघैरावृतं पर्वतमिवस्थितं । पुनः कीदृशं पुरुभोजसं । सोमादिहविः प्रदानेन बहु

हुभिर्यजमानैर्भोजयितव्यं । यद्वा बहूनां पालयितारं इंद्रं क्षुमंतं टुक्षु शब्दे । शब्दवंतं । अनेन पुत्रादिकं लक्ष्यते । स्तोत्रादीनि कुर्वाणं
शतिनं सहस्रिणं शतसहस्रसंख्याकधनेन युक्तं गोमंतं गवादियुक्तं वाजमन्नं मक्षु शीघ्रं ईमहे याचामहे ॥ यद्वा पूर्वार्धो वाजविशेषण 249/1973
त्वेन योजनीयः प्रदीप्तं । शोभनदानयोग्यं बलादियुक्तं वसुभिः पुत्रमित्रादिभिर्भोक्तव्यं शब्दादियुक्तमन्नमिंद्रं याचामहे इति ॥ ७ ॥
चतुर्थप्रगाथे प्रथमा ॥ तरोभिर्वो विदद्वसुमिंद्रं सबाध ऊतये । बृहद्गायंतः सुतसोमे अध्वरे हुवे भरं न कारिणमिति ॥ हे ऋत्विजो वा
यूयं तरोभिर्वेगैरश्वैरयेतं । वेगैरेव वा ॥ विदद्वसुं वेदयद्वसुं धनानां वेदकमिंद्रं सबाधः बाधायुक्ताः सहिताः ऊतये रक्षणाय ॥ बृह
द्गायंतः बृहत्संज्ञकं साम गायंतः संतः परिचरतेति शेषः । कुत्रेति तदुच्यते । सुतसोमे अभिषुतसोमके अध्वरे यज्ञे सोमयायंतः
संतः परिचरितेति ग अहं च स्तोता युष्मदर्थं हुवे आह्वयामि कमिव भरंन भरं भर्तारं कुटुंबपोषकं कारिणं स्वहितकरणशीलं यथा
स्वहितकरणाय आह्वयंति । पुत्रादयस्तद्वत् ॥ तथाभूतमिंद्रं हुवे इति ॥ ॥ अथ द्वितीया ॥ न यं दुध्रा वरंते न स्थिरा मुरो मदे सुशिप्र

मं धसः । य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यमिति ॥ सुशिप्रं शोभन हनुं शोभन नासिकं वा सिप्रे हनू नासिके वेति यास्कः ॥
यमिंद्रं दुध्रा दुर्धराः असुरा आयांन वरः पतसंग्रामेन वारयंति। तथा स्थिराः स्थिरा अपि न वरंते किंचा मुरो मरणशीला मनुष्याः न वरंते।
यश्चं इंद्रं अंधसः सोमलक्षणान्नस्य मदे मदाय सोमपानजनिताय आदृत्य शशमानाय शंसमानाय सुन्वते अभिषवं कुर्वते
जरित्रे स्तोत्रे च दाता भवति। किंच उक्थ्यं स्तुत्यं धनं तं हुव इति पूर्वेण संबंधः। मदे सुशिप्रं मदे सुशिप्रमिति षकारसकारौ पाठौ
॥ ॥ प्रथमस्याध्यायस्य चतुर्थः खंडः ॥ पंचमखंडे प्रथमऋचः प्रथमा ॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे
सुतः इति। हे सोम इंद्राय पातवे पातुं सुतोऽभिषुतस्त्वं स्वादिष्ठया स्वादुतमया मदिष्ठया अतिशयेन मादयित्र्या धारया पवस्व क्षर ॥
अथ द्वितीया ॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहतं ॥ द्रुणा सधस्थमासददिति ॥ रक्षोहा रक्षसां हंता विश्वचर्षणिः विश्वस्य
द्रष्टा सोमः अयोहते अयोमये हिरण्मयेन हते। तथा च श्रूयते। हिरण्यपाणिरभिषुणोतीति द्रोणे द्रोणकलशेन अधिषव

णफलकाभ्यां वा सधस्थं सहस्थानं योनिं अभिषवस्थानं अभ्यासदत् आभिमुख्येनासीदति अयोहते अयोहतं द्रोणे द्रुणेति च पाठो ॥ २ ॥
अथ तृतीया ॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः ॥ पर्षि राधो मघोनामिति। हे सोम त्वं वरिवोधातमः अतिशयेन धनानां दाता
भुवो भव ॥ वरः वरिव इति धननाम कृपावान् मंहिष्ठो दातृतमस्य भव। सर्वदातृत्वमत्रोच्यते इत्यपुनरुक्तिः। वृत्रहंतमः अतिशये
न शत्रूणां हंता च भव। किंच मघोनां धनवतां शत्रूणां राधो धनं च पर्षि अस्मभ्यं प्रयच्छ ॥ भुवो भवेति पाठो ॥ ॥ प्रगाथरूपे तृतीय
सूक्ते प्रथमा ॥ पवस्व मधुमत्तम इंद्राय सोम क्रतुवित्तमो मदः ॥ महि द्युक्षतमो मद इति ॥ हे सोम मधुमत्तमः अतिशयेन माधुर्यो
पेतस्त्वं इंद्रायेंद्रार्थं मदो मदकरः सन् पवस्व क्षर। कीदृशः क्रतुवित्तमः अत्यंतप्रज्ञायाः कर्मणो वा लंभकः। महि महान् मंहनीयो वा
द्युक्षतमः अत्यंतं दीप्तयशः मंदो मदहेतुः ॥ ॥ अथ द्वितीया ॥ यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ॥ स सुप्रकेतो अभ्यक्रमी
दिषोऽच्छा वाजं नैतशः इति। वृषभः कामानां वर्षक इंद्रः हे सोम यस्य ते तव पीत्वा पानं कृत्वा वृषायते वृषभ इवाचरति। किंच स्वर्विदः सर्व

251/1973

ज्ञानतः॥ अस्य नवपीतापाने सति सुप्रकेतः शोभनप्रज्ञः स इंद्रः इषः अन्नाणामन्नानि अत्यक्रमीत्। अतिक्रामति। तत्र दृष्टांतः॥
१० नेतशः एतशःश्वस्यनाम यथाश्वो वाजं संग्राममभिगच्छति। तद्वत्॥ स्वर्विदः स्व दृष्टा इति पाठे॥ त्र्यचात्मके तृतीयसूक्ते प्रथमा॥ इंद्रम
च्छ सुता इमे वृषणं यंतु हरयः॥ श्रुष्टे जाता स इंदवः स्वर्विद इति। इति श्रुष्टे श्रुष्टीति क्षिप्रनाम क्षिप्रं जाता सोमा जाता इंदवः पात्रेषु क्षरंतः
स्वर्विदः सर्वज्ञाः हरयो हरितवर्णाः सुता अभिषुता इमे सोमा वृषणं कामानां सेक्तारमिंद्रं अच्छ यंतु अभिगच्छंतु॥ श्रुष्टे श्रुष्टीति पा
ठे॥ ॥अथ द्वितीया॥ अयं भराय सानसिरिंद्राय पवते सुतः॥ सोमो जैत्रस्य चेतति यथा विदे इति॥ अयं भराय संग्रामाय सा
नसिर्भजनीयः सोताभिषुतः सोम इंद्राय इंद्रार्थं पवते क्षरति। महादिवुक्षरति। नेतः सोमो जैत्रस्य क्रियाग्रहणं कर्तव्यमिति कर्मण
संप्रदानसंज्ञा॥ चतुर्थ्यर्थे बहुलमिति षष्ठी॥ जयशीलमिंद्रं चेतति जानाति यथा इंद्रो विदे वैरिकृतां यलं तथा जानाति॥ ॥अथ तृ १०
तीया॥ अस्येदिंद्रो मदेष्वा ग्राभं गृभ्णीत सानसिं॥ वज्रं च वृषणं भरत्समप्सुजिदिति॥ आ अनंतरमिंद्रः अस्येन अस्य सोमस्य

व मदेषु संजातेषु सानसिं संभजनीयं ग्राभं ग्रहीतव्यं धनुर्गृभ्णाति हेग्रहोर्भश्छंदसीति भत्वं। किंच। अप्सुजित् उदकार्थं
वृत्रस्य जेता यद्वा आपः उत्पंतरिक्षनाम॥ अंतरिक्षे अह्निनामकस्य जेता इंद्रः वृषणं वर्षितारं वज्रं च स्ववत्यमायुधं संभरत्संबिभ
र्तु बिभर्तेर्लेट्यडागमः गृभ्णाति गृभ्णीतेति पाठे॥ ॥अथ चतुर्थसूक्ते प्रथमा॥ पुरोजिती वो अंधसः सुताय मादयित्नवे। अप
श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यं इति॥ हे सखायः सखिभूताः समानख्यानावा। हे स्तोतारः वायुयं पुरोजिती घाः पूर्वस्य धर्देदीर्घः। पुर
स्थितजयस्य अंधसो अदनीयस्य सोमस्य स्वभूताय सुताया अभिषुताय मादयित्नवे अत्यंतं मदकराय रसाय दीर्घजिह्व्यं। दीर्घजिह्वायस्य सः
। दीर्घजिह्वी च छंदसीति ॐ षंतत्वेन निपातितः॥ तादृशं श्वानं अपश्नथिष्टन अपश्नथत अपबाधध्वं॥ यथा आ राक्षसा वाराकृतं सोमिनमं
नलिहंति तथा कुरतेत्यर्थः॥ ॥अथ द्वितीया॥ यो धारया पावकया परिप्रस्यंदते सुतः॥ इंदुरश्वो न कृत्व्य इति। सुतो भिषुतः कृत्व्यः॥
कर्तीति कर्मनाम॥ कर्मणि साधुर्य इंदुः सोमः पावकया पापानि शोधयित्र्या धारया परिप्रस्यंदते परितः क्षरति। कथमिव। अश्वो न॥

253/1983

११ अश्वो यथा वेगेन प्रयच्छति तद्वत्॥ ॥अथ तृतीया॥ तं दुरोषमभी नरः सोमं विश्वाच्या धिया॥ यज्ञाय संत्वद्रयः इति॥ नरः कर्मनेतार
ऋत्विजः दुरोषं दुरोषतारं सार्थस्य रेफलोपदीर्घाभावे तु षतदाहार्थस्य चा खलिरूपमिति संदेहानवग्रहः। तं दुर्वं धेदुर्दहं वा सोमं अ
भिलक्ष्य विश्वाच्या सर्वान् कामान् अंचित्या कामान् प्रापयित्र्या धिया बुध्या यज्ञाय यज्ञार्थं अद्रयः संतु आहरणयुक्ता भवंतु॥ यज्ञाय सं
त्वद्रयः यज्ञं हि त्वं त्यद्रिभिरिति पाठः॥ ॥अथ पंचमसूक्ते प्रथमा॥ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते॥ आ
सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः॥ इति। चनोहितः। चन इत्यन्ननाम चायनेरसुन्निच इत्याषणादिकसूत्रेण नि
पातितः। यद्वा हितान्नः सोमः प्रियाणि जगतः प्रीणयितॄणि नामानि नमनशीलानि तान्युदकानि अभिपवते अभिनः करोति येषु अं ३१
तरिक्षस्थितेषूदकेषु यह्वो महान् यं सोमाधि वर्धते अधिकं प्रवृद्धो भवति अयं मध्ये सोमा वसतिरवलु। ततो बृहन्महान् सोमाः बृह
तो महतः परिदृढस्य सूर्यस्य विष्वंचं विष्वग्गामनमधिरुह्यमुपरिस्थं विचक्षणः सर्वस्य विद्रष्टा सन् अरुहत्। आरोहति।

अग्नो प्रस्तो इति समग्यगादित्यमुपतिष्ठत इति॥ ॥अथ द्वितीया॥ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः॥ दधाति
पुत्रः पित्रोरपीच्यं नाम तृतीयमधि रोचने दिवः॥ इति॥ ऋतस्य सत्यभूतस्य यज्ञस्य जिह्वा मुख्येन जिह्वास्थानीयः। सोमः प्रियं प्रियकरं
मधु मदकरं संपवते क्षरति। कीदृशः वक्ता शब्दकृत् अस्य द्रोणस्तादभिःक्रियमाणस्तत्रयः साधीयस्य इति प्रतिश्रवणस्य कर्ता अस्याधि
यः। एतस्य कर्मणः पतिः पालयिता अदाभ्यो अरक्षोभिर्हिंसितुमशक्यः। पुत्रो यजमानः पित्रोर्मातापित्रोः अपीच्यं अंतर्हितं यं नाम।
तेन जानीते। नामकरणाय दृश्यं। तस्मात्तयोरपरिज्ञायमानं दिवो द्युलोकस्य रोचने दीप्यमानं तृतीयं नाम सोमे अभिषूयमाणे हिर
ण्मयेति अधिदधाति। अत्यंतं धारयति। नक्षत्रस्याव शारिकनाम्नी प्रमाप्य सोमयागीनिं तृतीयमस्य नामेति। भगवता बोधा
यनेनोक्तं। अधिरोचनं अधिरोचने इति पाठो॥ ॥अथ तृतीया॥ अव द्युतानः कलशां अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये
॥ अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो विराजति॥ इति॥ द्युतानः द्योतमानः दीप्यमानः नृभिः कर्मनेतृभिः ऋत्विग्भिर्हिरण्य

245/1975

३२ याहिरण्मये कोशे अधिषवणचर्मणि तस्य हिरण्मयत्वं हिरण्यपाणिरभिषुणोतीति हिरण्यसंबंधात् हृश्ये कोशे । यमानः छंदसि कर्मणि
लिट् कानच्रूपं । नियम्यमानः सोमः कलशान् द्रोणाभिधानान् प्रति अधावत् । अवकंदतीत्याह्वायते । ततः कृतस्य सत्यभूतस्य य
ज्ञस्य दोहना दोग्धा रक्षिता इमं । सोमम् अभ्यनूषत अभिष्टुवंति ग्रावाणो वा साक्षात् तत्ताद् हंतीति ते त्रिरी यव आस्ल णएषां दोगध्वत्
मभिहितं । त्रिपृष्ठः त्रीणि सवनानि तान्येव पृष्ठानि यस्य स तथोक्तः त्रिषु च सवनेषु सोमस्य विद्यमानत्वात् त्रिचक्रादित्वादुत्तरपदम् ।
तोदात्तत्वं । हे स तथोक्तः त्रिषु च सवनेषु सोमस्य विद्यमानत्वात् त्रिचक्रादित्वादुत्तरपदांतोदात्तत्वं ॥ हे सोम तादृशस्त्वं उषसो धिया
गाहनि विराजसि । अधिकर्तृ इष्टासामिति द्वितीया । तच्च हस्य विशेषणं दीप्यसे । यद्वा राजतेरं लस्मीति तदत्यर्थः । अहानि प्रका
शासियमाणः यजमान इति अभिक्रतस्य अभिमतस्येति विराजसि विराजतीति पाठः ॥ ॥ इति प्रथमाध्याये पंचमः खंडः ॥ ५ ॥ ३२
अथ षष्ठखंडे प्रथमसूक्ते प्रगाथे प्रथमा ॥ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ॥ प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शं

सिषमिति । हे स्तोतारो । वा यूयं यज्ञायज्ञा यज्ञे यज्ञे सर्वेषु यागेषु दक्षसे प्रवृद्धाय अग्नये गिरागिरा स्तुतिरूपया वाचा वाचा स्तोत्रं कुरुतेति
शेषः । वद्याभिर्नक्रमा वद्यस्मात्परा दृश्यः । यूयं च । स्तोत्रं कुरुत । वयमपि तमग्निं प्रप्रशंसिषं । प्रसमुपोदः पादपूरण इति प्रशब्द
स्य द्विरुक्तिः पादपूरणार्थो व्यत्ययेनैकवचनं छंदसि लुङ् । प्रशंसामः कीदृशम् अमृतममरणरहितं जातवेदसं जातानां वेदितारं जा
तप्रज्ञं जातधनं वा मित्रं न सखिभूतमिव प्रियमनुकूलं यद्वा व्यत्ययेन । त्वमित्यस्य वसादेशः । अग्नये इति । चकर्मणि चतुर्थी क्रिया
ग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ब्रह्मस्य अश्वचणीति निपातश्चेदर्थे वर्तते ॥ दक्षस इति च दक्षतेर्धिकर्मणोंतर्भावि
तण्यर्थात् क्विप् । पूर्ववच्चणाद्योगात् निपातैर्यद्यदिहंतेति निघातप्रतिषेधः तथा च यम् अर्थः । हे स्तोतः त्वं यज्ञेयज्ञे इममग्निं गिरागिरा स्तु
त्या स्तुत्या च दक्षसे चवर्धयसि । वेतवयमपि अमृतत्वादिगुणकं तं प्रशंसाम ॥ ॥ अथ द्वितीया ॥ ऊर्जो नपातं स हिनायमस्म
युर्दाशेम हव्यदातये ॥ भुवद्वाजेष्ववितां भुवद्वृध उत त्राता तनूनामिति ॥ ऊर्जो नस्य बलस्य वा नपातं पुत्रं प्रशंसिषमित्यनुषंगात् प्र

257/1973

र्गसेमेत्यर्थः॥ हविर्भिरिति पाल इयसमुदायोहीत्यस्यार्थे मत्वलोपमग्निः अस्म घुरस्मान कामयमानो भवति। यं यं च हव्यदातये हव्यानां
३३ हविषां दातये भ्यो दाता तस्मा अग्नये दाशेम हवींषि दद्याम। सचाग्निर्वाजेषु संग्रामेषु अविता अस्माकं रक्षिता भुवत् भवतु। उत वृधे वर्धक पश्चा
स्माकं भुवत् भवतु। उत अपि च तनूनां तनयानां अस्मत्पुत्राणां च त्राता रक्षिता भवतु॥ ॥अथ तृचात्मकं द्वितीयसूक्ते प्रथमा॥ एह्यू षु ब्रवा
णि तेग्न इत्थेतरा गिरः। एभिर्वर्धास इंदुभिरिति॥ हे अग्ने एहि आगच्छ। ते तुभ्यं च तरा इत्थं गिरः स्तुतीः इत्थं इत्थं इमानेन प्रकारेण सु
षु प्रब्रवाणीत्याशास्यते॥ ताः स्तुतीः शृण्वित्यर्थः। उ इत्थेतरा इति सूक्तं। इतराः अस्मदन्ये ना स्तुतीः शृण्विति शेषः। तथा च ब्राह्मणं
अग्निरिंद्रेतरा गिर इत्यस्य याहिवा इतरा गिर इति। अपि च आग तरस्वं एभिरेतैरिंदुभिः सोमैर्वर्धासे वर्धस्व॥ ॥अथ द्वितीया। यत्र ३३
क्वच कच्चिच्छश्वद्यजमाने वर्तते तत्र यो। गं तं कृण्वसे इति। हे अग्ने ते तव मनः अनुग्रहात्मकं मंतःकरणं यत्र यस्मिन् यादृशे क्वचन क
स्मिंश्चिद्यजमाने वर्तते तत्र तस्मिन्यजमाने उत्तरमा इत्युत्तरं श्रेष्ठं दक्षं बलकरमन्नं वा दध संधारयसि। तथा योनिं स्थानं च कृण

वसे तस्मिन्यजमाने कृणोषि तत्र यो नितं त्र्यासद इति पाठो॥ ॥अथ तृतीया॥ नहि ते पूर्तमक्षिपद्भुवन्नेमानांपते॥ अथा दुवो वनवस
इति। हे अग्ने ते तव दीर्घं पूर्तं पूरकं तेजः अक्षिपत् अक्ष्णः पातकं विनाशकं। नहि भुवन्न भवतु। सर्वदास्माकं दर्शनसामर्थ्यं करोतु॥
हे नेमानांपते। नेम शब्दोन्यवाची। मनुष्याणां मध्ये कतिपयानां यजमानानां पाते पालक॥ अथान्तःकारणादुवः दुवस्यतिः परि
चरणकर्मा। अस्माभिर्यजमानैः तत्तं परिचरणं वनसे संभजस्व॥ ॥अथ तृतीयसूक्ते प्रगाथे प्रथमा॥ वयमु त्वामपूर्व्य स्थूरं न कच्चि
द्भरंतो वस्यवः। वज्रिन् चित्रं हवामहे इति॥ हे अपूर्व्य त्रिषु सवनेषु प्रादुर्भूतत्वात् अभिनव हे वज्रिन् वज्रवन्निंद्र॥ भरंतः सोमलक्षणे
नान्नेन त्वां पोषयंतो वयं चित्रं चायनीयं विविधरूपं वा त्वा मु त्वामेव अवस्यवो रक्षणमात्मन इच्छंतः हवामहे आह्वयामः। तत्र दृ
ष्टांतः। स्थूरं न। यथा भरंतः श्री स्तोतृभिर्गृहं पूरयंतो जना स्थूरं स्थूलं गुणाधिकं कंचित् कंचित्पुरुषं यथाह्वयंति तद्वत्। वज्रिन् वाज
इति पाठो॥ ॥अथ द्वितीया॥ उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत्॥ त्वामिध्यवितारं ववृमहे सखाय इंद्र सानसिं इति।

259/1973

प्रथमपादः प्रत्यक्षकृतः। हे इंद्र कर्मन् अग्निष्टोमादिकर्मणि ईतये रक्षणाय त्वाम् उपगच्छामः॥ द्वितीयः पादः परोक्षकृतः॥ य इंद्रः
१४ धृषत् धृष्णोति शत्रून् अभिभवति ञिधृषा प्रागल्भ्ये। बहुलं छंदसीति उ प्रत्ययः॥ युवा तरुणः उग्रः उद्गूर्णः स इंद्रः नोस्मान्प्रति चक्राम
आगच्छतु। यद्वा चक्राम। अस्मानुत्साहयुक्तान् करोतु॥ क्रमतेः सर्वार्थे व्यत्ययेन परस्मैपदं परोर्धर्चः प्रत्यक्षकृतः॥ सखायः॥
समानख्यानाः बंधुभूता वा रयिं सानसिं वनषण संभक्तो संभजनीयं अवितारं सर्वस्य रक्षितारं त्वामिलामे ववृमहे वृणीमहे संभ
जामहे। ष्टिः प्रसिद्धौ॥ ह्वियागादेति धातुः॥ ॥अथ चतुर्थ्यृचः प्रथमा॥ अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे॥ उदेव
यंत उदभिरिति॥ हे गिर्वणो गीर्भिर्वननीयेंद्र आ धा हि। संप्रति हि त्वां कामं कामम् अभिलषितम् अर्थम् ईमहे॥ यद्वा कामे कामा १४
न कमनीयान् स्तोमान् उपससृग्महे उपसृजामः त्वां प्रापयाम इत्यर्थः॥ तत्र दृष्टांतमाह॥ उदेव यथा उदकानि यंतो गच्छंतः पुरु
षा उदभिरंजलिना शिक्यादिकैः समीपस्थानं पुरःपानक्त्याद्यर्थं संसृजंति तद्वदित्यर्थः॥ कामं ईमहे ससृग्महे कामान् ईमहे ससृग्म

हे इति च पाठः॥ उदेव ग्मंत उदेव यंत इति वा पाठः॥ ॥अथ द्वितीया॥ वार्णत्वा यव्याभिर्वर्धंति शूर ब्रह्माणि॥ वावृध्वांसं चिदद्रि
वो दिवे दिवे इति ह अद्रिवो वज्रिन् शूर इंद्र वार्ण यथा उदकम् उदकस्थानं यव्याभिर्नदीभिः॥ अवनयः यथा इति नदीनामसु पाठात्॥ व
र्धंति वर्धयंति। तथा ब्रह्माणि स्तोत्राणि वावृध्वांसं चित्। यथा निरुदकं देशं नदीभिः॥ तथा च। किं तु प्रवृद्धमेव त्वां दिवे दिवे अन्व
हं वर्धयंति स्तोतारो वर्धंतीति॥ ॥अथ तृतीया॥ युंजंति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा॥ इंद्रवाहा स्वर्विदा
ति॥ इषिरस्य गमनशीलस्य सोंद्रस्य उरौ युगे महायुगे उरौ महति रथे इंद्रवाहा इंद्रस्य वाहनभूतौ च। वचोयुजा वचनमात्रेण
च युज्यमानौ स्वर्विदा स्वर्गाख्यम् इंद्रस्य स्थानं जानंतौ हरी एतन्नामकावश्वौ गाथया स्तोत्रेण स्तोतारो युंजंति योजयंति। उरुयुगे
वा चोयुजा इंद्रवाहा स्वर्विदा इंद्रवाहावचोयुजेति च पाठः॥ ॥इति प्रथमस्य षष्ठः खंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवा
रयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ७॥ इति श्रीमद्राजाधिराज परमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभू

261/1973

पाल्साम्राज्यधुरंधरेणसायणाचार्यविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेप्रथमोध्यायः॥३॥ ॥१॥ यस्यनिश्वसितं
२५ वेदायोवेदेभ्योखिलंजगत॥ निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ॥अथद्वितीयाध्यायआरभ्यते॥ तत्रपांतमावइतिप्रथ
मस्वंदेन्द्रवात्मकप्रथमस्तृचप्रथमा॥ पांतमावोअंधसइंद्रमभिप्रगायत॥ विश्वासाहंशतक्रतुंमंहिष्ठंचर्षणीनामिति॥ हे
ऋत्विजः वोयुष्मदीयंअंधसः सोमलक्षणमन्नंअपांतंआभिमुख्येनपिबंतं। पापाने छांदसःत्रापोलुक्। सर्वविधयः छं
दसिविकल्प्यंतइतिनलोकाव्ययनिष्ठेतिप्रतिषेधाभावः। ततोंधसइत्यस्यकर्तृकर्मणोरितिषष्ठीसाममाभिमुख्येनपिबंतं
एतादृशमिंद्रमभिप्रगायत प्रकर्षेणाभिष्टुत। कीदृशंविश्वासाहंसर्वेषांशत्रूणामभिभवितारंसर्वेषांभक्तानांवा॥ २५
अतएवशतक्रतुंबहुविधप्रज्ञानंबहुविधकर्माणंवाचर्षणीनांमनुष्याणांमंहिष्ठंधनस्यदातृतमं। यद्वायजमानानां
यष्टव्यत्वेनपूजनीयमिंद्रंप्रगायतेत्यर्थः॥ ॥अथद्वितीया॥ पुरुहूतंपुरुष्टुतंगाथान्यंसनश्रुतं॥ इंद्रइतिब्रवीतनेति॥

हे ऋत्विग्यजमानाः पुरुहूतं यज्ञेषु बहुभिः राहूतं पुरुष्टुतं बहुभिः स्तोतृभिः स्तुत्यादिभिः स्तुतं। अतएवगाथान्यं गानयोग्यं गा 263/1963
तव्यं। सनश्रुतं सनातनं तया प्रसिद्धं एवंविधं देवं इंद्रइति यूयं ब्रवीतन ब्रूवीध्वं। ब्रूञ् व्यक्तायांवाचि इत्यस्य लोटि व्यत्यये
नध्यमस्तमबादेशः अतएवगुणः॥ ॥अथतृतीया॥ इंद्रइन्नोमहानांदातावाजानांनृतुः॥ महाँअभिज्ञ्वायमदिति॥ इंद्रइत्
पूर्वोक्तलक्षण इंद्रएवनोस्मभ्यंमहोनांमघोनांधनवतांपश्वादिलक्षणधनयुक्तानांवाजानांअंनानांदाताभवतु॥ कीदृशं
नृतुः नृतिश्रम्योः कृगितिकुप्रत्ययः। हृस्वश्छांदसः। सर्वस्यनर्तयिता। यद्वा नृनाये धातुः वृणादिकिनुप्रत्ययः। धातोर्ह्रस्वश्छां
दसः। स्तोतृभ्योगवादिनेता अतएवमहान्सइंद्रः अभिज्ञु अभिगताः भीमुकं अस्मभ्यं अयमत्। आयच्छतु ददातु।
यद्वा स इंद्रः अभिज्ञु अस्मदभिमुखमागच्छत धनंस्वहस्तयोः परिगृह्य अस्मान्यतु॥ धनंगृहीत्वा अस्मभ्यंददाति
त्यर्थः॥ मघोनांमहोनामितिपाठौ॥ ॥द्वितीयतृचेप्रथमा॥ प्रवइंद्रायमादनंहर्यश्वायगायत॥ सखायः सोमपाव्नेइति।

हे सखायः। स्तोतारः यो यूयं हर्यश्वाय हरिनामकाश्वोपेताय सोमपाने सोमानां पात्रे मादनं मदकरं हर्षकरं स्तोत्रं प्र गायत।
३६ अथ द्वितीया॥ शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधस इति॥ उत अपि च। हे स्तोतः सुदानवे शोभनदानाय
सत्यराधसे सत्यधनायेंद्राय उक्थं स्तोत्रं यथा नरोऽन्ये स्तोतारः द्युक्षं दीप्तैः साधनभूतं स्तोत्रं शंसंति तद्वत्त्वमपि शंसोच्चार
य॥ इदिति पूरणः। वयमपि च चकृम स्तोत्रं करवाम॥ ॥अथ तृतीया॥ त्वं न इंद्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्य
युर्वसो इति॥ हे इंद्र त्वं नोऽस्माकं वाजयुरन्नकामो भव। हे शतक्रतो बहुविधकर्मवन्निंद्र त्वं नोऽस्माकं गव्युर्गोकामो भव। हे व
सो वासयितरिंद्र त्वं हिरण्ययुः हिरण्यकामोऽपि भव। छंदसि परेच्छायामपि दृश्यत इति क्यच्॥ ॥अथ तृतीयतृ
चे प्रथमा॥ वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः। कण्वा उक्थेभिर्जरंत इति॥ हे इंद्र त्वायंतस्त्वामात्मन इच्छंतः सखा ३६
यः समानख्याना वयं तदिदर्थाः यत्त्वद्विषयं स्तोत्रं तदिदेवार्थः प्रयोजनं येषां ते तादृशाः संतः त्वा त्वां जरामहे स्तुम

हे उ इति पादपूरणः। कण्वाः कण्वगोत्रोत्पन्ना अस्मदीयाः पुत्रादयश्च उक्थेभिः उक्थैः शस्त्रैः जरंते त्वां स्तुवंति॥ ॥अथ द्वितीया॥ न घेम
न्यदा पपन वज्रिन्नपसो नविष्टौ। तवेदु स्तोमं चिकेत इति॥ हे वज्रिन् वज्रवन्निंद्र अपसः अपस्विनः कर्मवतस्तव संबंधिनि नविष्टौ अ
भिनवयागे वर्तमानोऽहं अन्यत् त्वद्विषयादन्यत् स्तोत्रं न घ नैव आ पपन अभिष्टौमि। पनतेः स्तुतिकर्मण उत्तमे णलि रूपं। अपि
तु तवेदु तवैव स्तोमं स्तोत्रं चिकेत अभिजानामि। त्वामेव सर्वदा स्तौमीत्यर्थः॥ ॥अथ तृतीया॥ इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति
। यंति प्रमादमतंद्रा इति॥ सुन्वंतं सोमाभिषवं कुर्वंतं यजमानं देवा इंद्रादयः सर्वे इच्छंति रक्षितुं। स्वप्नाय न स्पृहयंति। स्वप्नावलं
तस्य सुन्वतोऽन इच्छंति। सर्वदा प्रबुद्धमेव। कुर्वंतीत्यर्थः। स्पृहेरीप्सित इति कर्मणि चतुर्थी। स्पृह ईप्सायां चुरादिरदंतः। यत एवम
तः कारणादतंद्रा अनलसा देवाः प्रमादं प्रकर्षेण मदकरं तदीयं सोमं यंति। गच्छंति प्राप्नुवंति॥ ॥अथ चतुर्थतृचे प्रथमा।
इंद्राय मद्वने सुतं परि ष्टोभंतु नो गिरः। अर्कमर्चंतु कारव इति। मद्वने माद्यतेः क्वनिप मदनशीलायेंद्राय तदर्थं सुतम। 265/1983

२७ भिषुतं सोमं नो स्मद्रीच्या गिरः स्तुतिलक्षणा वाचः परिस्तोभंतु। स्तोभतिः स्तुतिकर्मा परितः सोमं स्तुवंतु। ततः कारवः स्तुतिकारणः
स्तोतारश्च अर्कैः सर्वैरर्चनीयं सोमममतु पूजयंतु॥ ॥अथ द्वितीया॥ यस्मिन्विश्वा अधि श्रियो रणंति सप्त संसदः॥ इंद्रं सुते हवामहे इति॥
यस्मिन्निंद्रे विश्वाः सर्वाः श्रियः कांतयः अधि अधिकं भवंति। अतिशयेन तेजस्वीत्यर्थः॥ किंच सत्यसत्यसंख्याकाः संसदः सम्य
ग्यद्रेषु कर्मकरणार्थं सीदंतीति संसदो होत्रकाः सप्त होत्रकाः सप्त होत्रकाः यस्मिन् रणंति सोमप्रदानार्थं रमंते॥ यद्वायं [illegible] स्तुवंति
स्तुवंतीति तं पूर्वोक्तलक्षणमिंद्रं सुते सोमे अभिषुते सति हवामहे वयं सोमपानाय आह्वयामः॥ ॥अथ तृतीया॥ त्रिकद्रुकेषु चेतनं देवासो
यज्ञमत्नत॥ तमिद्वर्धंतु नो गिर इति। देवासो देवा इंद्रादयः त्रिकद्रुकेषु आभिप्लविकेषु ह [illegible] ज्योतिर्गौरायुरिति त्रिकद्रुकाः ते
षु चेतनं चित्तं संज्ञानं च तं तिज्ञानंति अनेन स्वर्गादिकमिति चेतनो ज्ञानसाधनो यज्ञः तं अनत अतन्वत॥ स्वैः स्वैः कर्मभिः पाल २०
ने अथवा विस्तारितवंतः तनु विस्तारे लङि बहुलं छंदसीति विकरणस्य लुक्। तनिपत्योः छंदसीति उपधालोपः निमित्तमेव यज्ञं नो

स्माकं स्तुतिलक्षणा वाचो वर्धंतु वर्धयंतु॥ ॥द्वितीयस्याध्यायस्य प्रथमः खंडः॥ अथ द्वितीयखंडस्य प्रथमतृचे प्रथमा॥ अयं त इंद्र 267/1973
सोमो निपूतो अधि बर्हिषि॥ एहीमस्य द्रवा पिब इति। हे इंद्र ते तुभ्यं त्वदर्थं अयं सोमो बर्हिष्यभिषवार्थं आस्तीर्णे दर्भे निपूतो नितरां द
शापवित्रेण शोधितः। अभिषवादिसंस्कारैः संस्कृत इत्यर्थः। इदानीं अस्य इमं सोमं प्रति एहि आगच्छ। आगत्य च यत्र रसात्मकः सोमो
द्रूयते तं। द्रव ईं पात्रं इयर्ति [illegible] गच्छ। तदनंतरं तं। सोमं पिब॥ ॥अथ द्वितीया॥ शाचिगो शाचिपूजनायं रणाय ते सुतः॥ आखंडल प्र
हूयसे इति। हे शाचिगो शाचिनः शक्ता गावो यस्यासौ शाचिगुः यद्वा शाचयः शक्ता याः वाचि। अस्मात् [illegible] प्रत्ययः। शाच
यः व्यक्ताः प्रख्याता गावो रश्मयो गावः एव वा यस्य तादृश हे इंद्र शाचिपूजन पूज्यते। नेनेति पूजनं स्तोत्रादि प्रख्यातपूजन तेत वर
णाय रमणाय सुखजननाय अयं सोमः सुतो। अभिषुतः अतः कारणात् हे आखंडल शत्रूणामाखंडयितरिंद्र प्रहूयसे प्रकर्षेणाभिसुति
भिराहूयसे॥ उत आगत्य इमं सोमं पिबेत्यर्थः॥ ॥अथ तृतीया॥ यस्ते शृंगवृषो णपात्प्रणपात्कुंडपाय्यः॥ न्यस्मिन्दध्र आ मनः॥

हेशृंगवृषोणपात्शृंगवृषनामाकश्चिदृषिस्तस्येंद्रःस्वयमेवपुत्रतयाजज्ञइत्याख्यायिकानपादित्यपत्यनाम॥हेशृंगवृषपुत्रयद्वा
१८ शृंगाणिवितिहिंसंतीतिशृंगाणिरश्मयःतैर्वर्षतीतिशृंगवृडादित्यस्तस्यनपात्क्षितःस्वकीयेवस्थानेवस्थापयितः॥सत्वामंत्रितइतिषष्ठ्यं
तभ्यंपरं।गवेड्गाविनामंत्रितानुप्रवेशात्।समुदायस्याष्टमिकंसर्वानुदात्तत्वंईदृशहेइंद्रतेतत्संबंधिप्रणपातप्रकर्षेणनपातयि
ता॥रक्षिताकुंडपाय्यः॥कुंडैःपीयतेस्मिन्सोमइतिकुंडपाय्यःक्रतुविशेषः॥क्रतौकुंडपाय्यसंचाय्यौचितिपिबतेरधिकरणेयत
प्रत्ययोयुगागमश्चनिपात्यते।एतत्संज्ञोयःक्रतुरस्ति।अस्मिन्कुंडपाय्येक्रतौमनःस्वांतंआनिदध्मोअभितोवर्तमानाःकुंडपा
य्यिनामानऋषयःपुरानिदधिरे॥सम्यक्चक्रदेवत्यंकृतमनुतिष्ठतवंतइत्यर्थः॥दधातेर्लिटिइरयोरेइतिरेभावः॥ ॥द्वितीयस्यचेप्र
थमा॥आतूनइंद्रक्षुमंतंचित्रंग्राभंसंगृभाय॥महाहस्तीदक्षिणेनेति॥हेइंद्रत्वंमहाहस्तीमहाहस्तवानतूदानीमेवनोस्मदर्थंक्षुमं १८
तंशब्दवंतंस्तुत्यमित्यर्थः॥चित्रंचायनीयंग्राभंग्राह्यंग्रहणार्हंवाधनंदक्षिणेनहस्तेनतुक्षिप्रंआसंगृभायआभिमुख्येनसंगृ
हाण॥

अथद्वितीया॥विद्माहित्वातुविकूर्मिंतुविदेष्णंतुवीमघं।तुविमात्रमवोभिरिति।हेइंद्रत्वात्वांविद्मजानीमः॥खलुकीदृशमितितुविकूर्मिंब
हुकर्माणंतुविदेष्णंबहुप्रदेयंतुविमघंबहुधनंतुविमात्रंबहुप्रमाणंअवोभिःरक्षणैर्युक्तं॥ ॥अथतृतीया॥नहित्वाशूरदेवानमर्तासो
दित्संतं॥भीमंनगांवारयंतेइति॥हेशूरइंद्रदित्संतंदातुमिच्छंतंत्वांत्वां।देवानहिवारयंतेननिवारयंतिरपन्तु॥तथामर्तासोमनुष्याअपि
नवारयंते।भीमंनगांवास्यंते भयजनकंदृष्यंवृषभंयुद्धवसेप्रवृत्तमिवत्वंयथावारयितुंनशक्नुवंतितद्वत्॥ ॥अथतृतीयस्यचेप्रथमा॥
अभित्वावृषभासुतेसुतंसृजामिपीतये॥तृंपाव्यश्नुहीमिति।हेवृषभ।हेइंद्रत्वांत्वांसुतेसोमेभिषुतेसतिसुतंअभिषुतंसोमंपीतयेपा
नायअभिसृजामितृंपत्व्यमदंमदकरं।सोमंव्यश्नुहीच॥ ॥अथद्वितीया॥मात्वामूराअविष्यवोमोपहस्वानआदभन्।माकीब्रह्म
द्विषंवनइति।हेइंद्रत्वात्वांमूराःमूर्खाःमूढामनुष्याणांअविष्यवःपालनकामामामादभन्मांहिंसंतु।उपहस्वानःउपहसनपराश्चमा
भयंतु।ब्रह्मद्विषंब्राह्मणानांद्वेष्टारंमाकीवनः॥माभजेथाः॥ब्रह्मद्विषंब्रह्मद्विषइतिपाठे॥ ॥अथतृतीया॥इहत्वागोपरीणसा

269/1973

महे मदं तु राधसे। सते गौरो यथा पिबेति॥ हे इंद्र त्वां त्वां इह अस्मिन् यज्ञे गोपरीणसा गव्येन पयसा संमिश्रितं सोमं महे महते राधसे धनाय
१९ मदं तु मनुष्या मादयंतु त्वं च तं सोमं यथा गौरो गौरमृगः सरः पिबति तथा पिब॥ परीणसं परीणसमिति पाठौ॥ ॥अथ चतुर्थे तृचे प्रथमा॥
इदं वसो सुतमंधः पिबा सुपूर्णमुदरं॥ अनाभयिन्ररिमा ते इति॥ हे वसो वासयितरिंद्र इदं पुरो वर्तमानं सुतमभिषुतमंधः अन्नं सोमल
क्षणं पिब॥ यथा उदरं त्वदीयं जठरं सुपूर्णं अतिशयेन संपूर्णं भवति तथेत्यर्थः॥ हे अनाभयिन् आ समंतात् बिभेतीत्याभयी बिभेतेरौ
णादिक इनिः॥ न आभयी अनाभयी तादृश इंद्र ते तुभ्यं त्वदर्थं ररिम दत्तलक्षणं सोमं इत्यस्य राते दानकर्मणः छांदसो लिट्॥ ॥अथ द्वितीया॥ नृ
भिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः॥ अश्वो न निक्तो नदीषु इति॥ नृभिरध्वरस्य नेतृभिः ऋत्विग्भिर्धौतः तृणाद्यपनयनेन शोधितः॥
यद्वा धौतो धूतः आधूतः अद्भ्यः ग्रहे आधूननेन संस्कृतः तदनंतरं अश्नैरश्मभिः ग्रावभिः करणभूतैः सुतः अध्वर्युभिरभि १९
षुतः॥ ततः अव्यो वारैः अविर्मेषः तत्संबंधिभिर्वालैः परिपूतः शोधितः दशापवित्रस्य नाभिभूतया ऊर्णास्तुकया हि सोमः परिपूय
ते॥८

त दुक्तं भगवता आपस्तंबेन। ऊर्णास्तुकां यजमानाय प्रयच्छति तां शकृद्दशापवित्रस्य नाभिं कुरुते॥ शुक्लं वलक्ष्याः पवित्रममोतं भव
तीति तदीयुन दत्ताम्बरम्॥ अश्वो न अश्व इव नदीषु निक्तः निर्णिक्तः शोधितः। यथाश्वः स्नातोश्वः अपगतमलः सन् दीप्तो भवति। एवं वसतीव
र्याख्याभिरद्भिरभिषुतः सोमो दीप्तो भवतीत्यर्थः॥ ईदृशाय सोमः तं ते यवमिवेत्यस्य संबंधः धौतो धूत इति पाठौ॥ ॥अथ तृतीया॥
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणंतः॥ इंद्र त्वास्मिन्त्सधमादे इति। तं पूर्वोक्तगुणं सोमं हे इंद्र ते त्वदर्थं वयं यथा यवमयं सवनीयपु
रोडाशमिव गोभिः गविभवैः क्षीरादिभिः श्रयणद्रव्यैः श्रीणंतः मिश्रीकुर्वंतः॥ स्वादुं रसवत्तेनास्वादनीयमकर्म अकार्ष्म करोतेर्लुङि
मंत्रे घसेति च्लेर्लुक्॥ यस्मादेवं तस्माद्धे इंद्र त्वां तादृशं सोमं पातुम् अस्मिन्वर्तमाने सधमादे सह मदने यज्ञे आह्वयामीति शेषः॥ ॥
इति द्वितीयस्याध्यायस्य द्वितीयखंडः॥ ॥अथ तृतीयखंडे प्रथमतृचे प्रथमा॥ इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वस्य गिर्वण
इति॥ हे राधानां पते धनानां स्वामिन् गिर्वणः गीर्भिः स्तुतिभिर्वननीय॥ हे इंद्र ओजसा बलेनाचहितस्त्वं इदमनु आनंतानुक्रमेण

271/1973

उद्देशानुक्रमेणेत्यर्थः। सुतमभिषुतं अस्येमं सोमं तुक्षिप्रं पिबाहि॥ ॥अथ द्वितीया॥ यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वं॥ स त्वा ममत्तु सो
२० म्यंति। हे इंद्र ते त्वदर्थं यः सोमः स्वधामन्नमनु सत्यग्रावभिरभिषुतोसत् भवेत्॥ अस्तेर्लेट्यडागमः॥ यद्वृत्त॥ योगोत्रनिघातः॥ आगम
स्यानुदात्तत्वेधातुस्वरः सुते तस्मिन्सोमे तन्वं स्वकीयं शरीरं नियच्छ प्रेरय॥ स सोमः हे सोम्य सोमार्ह त्वा त्वां ममत्तु मादयतु॥ ॥अथ
तृतीया॥ प्र ते अश्नोतु कुक्ष्योः प्रेंद्र ब्रह्मणा गिर्वणः॥ प्र बाहू शूर राधसेति॥ हे इंद्र स सोमः ते तव कुक्ष्योः कुक्ष्योरुभयोः पार्श्वयोः प्र
अश्नोतु प्रकर्षेण व्याप्नोतु॥ अशूव्याप्तावित्यस्माद्व्यत्ययेन परस्मैपदं। निघातः। तथा ब्रह्मणा स्तोत्रेण सहितः स सोमः शिरः
शरीरं। अवयववाचिना अवयवी लक्ष्यते॥ तच्छरीरं प्राप्नोतु। हे शूर विक्रांतेंद्र राधसाधने निमित्ते तव बाहू अपि प्राप्नोतु। राध
साराधसेति पाठो॥ ॥अथ द्वितीयतृचे प्रथमा॥ आ त्वेता निषीदतेंद्रमभि प्र गायत॥ सखायः स्तोमवाहस इति॥ तु शब्दः क्षिप्रार्थो २०
निपातः द्वाभ्यामाङ्भ्यामन्वेतुमिति शब्दोभ्यसनीयः हे सखायः ऋत्विजः क्षिप्रमस्मिन्कर्मण्यागच्छतागच्छत॥ आदरार्थोभ्यासः॥

आगत्य च निषीदत उपविशत। उपविश्य चेंद्रमभि प्र गायत सर्वतः प्रकर्षेण स्तुत॥ कीदृशाः सखायः स्तोमवाहसः॥ त्रिवृत्पंचदशादि
स्तोमानस्मिन्कर्मणि वहंति प्रापयंतीति। आर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्निति स्तो। मन्प्रत्ययांत स्तोमशब्दो नित्वादा
द्युदात्तः। स्तोमं वहंतीति स्तोमवाहसः। वहिहाधाञ्भ्यश्छंदसीत्यसुन्प्रत्ययः तत्र णिदित्यनुवृत्तेरत उपधाया इत्युपधाया वृद्धिः।
कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकसूत्रात्। समास आद्युदात्तः॥ ॥अथ द्विती
या॥ पुरूतमं पुरूणामीशानं वार्याणां॥ इंद्रं सोमे सचा सुत इति। सखायोभि प्रगायतेति पदद्वयमत्रानुवर्तते॥ हे सखायः ऋत्वि
जः सचा यूयं सर्वे सह। यद्वा सचा परस्परसमवायेन सुतेभिषुते सोमे प्रवृत्ते सति इंद्रमभि प्रगायत। कीदृशमिंद्रं पुरूतमं पुरून्
बहून् शत्रून् तामयति ग्लापयतीति पुरूतमः तमु ग्लान इति धातोरस्मात् पचाद्यच्। चित्वादंतोदात्तत्वेपि कृदुत्तरपदप्रकृतिस्वरं
बाधित्वात्परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। पुरूणां बहूनां वार्याणां वरणीयानां धनानामीशानं स्वामिनं॥ ॥अथ

273/1973

तृतीया॥ स घा नो योग आ भुवत्स राये स पुरंध्या। गमद्वाजेभिरा स नइति। घ इ ह्येव धारणार्थो नो योग आ भुवत्स राये स पुरंध्यागम
२१ निपातितः॥ सर्वेस्त्र छंदोः संबध्यते॥ स घ स एवेंद्रः पूर्वमंत्रोक्तगुणविशिष्टो नोस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबंधे। आ भुव
त। आभिमुख्येन भवतु। पुरंध्यां सा धयां धियेत्यर्थः॥ भवतेराङ्गीर्लिङि परतो लिङ्याशिष्यङित्यङ् प्रत्ययः। तस्य ङित्वेन गुणाभावा
दुवङादेशः॥ क्रिदाशिषीति यासुटेन भवति। आनित्यमागमशासनमिति वचनात् तिङ्ङतिङ इति निघातः॥ रानामंनानां वासाति
ली भो यस्मिन् तादृशाय भराय संग्रामाय। यद्वा भ्रियंते तस्मिन्द्रवीणीति भरो यज्ञः प्रायेण संग्रामनामानि यज्ञनामत्वेन च दृश्यंते
भराय यथार्थं हुवे आह्वयामि। हे इंद्र त्वं कस्मिंश्चित्सुखेधानवालिप्सिलसति नोस्माकमंतलः अंतिकतमः संनिकृष्टतमो भव। तमेना
दिश्चेति अंतिकशब्दश्चैस्यतादिलोपः। तथा च धेव धनार्थं च सखा समानख्यानो मित्रभूतो भव। तमु हुवेत मुन्दइति पाठौ॥ ॥ २१
इति तृतीयः खंडः॥ ॥ अथ चतुर्थखंडे प्रगाथरूपे प्रथमसूक्ते प्रथमा॥ एना वो अग्निं नमसोर्जो नपातमा हुवे॥ प्रियं चेतिष्ठ

मरतिं स्वध्वरं विश्वस्य दूतममृतमिति॥ ऊर्जो बलस्य नपातं नपातयितृत्वात् पत्यनाम॥ नपातं पुत्रं प्रियमस्माकं चेतिष्ठमतिशयेन ज्ञातारं प्रज्ञा 275/1973
पकं वा अरतिं गंतारं स्वामिनं वा स्वध्वरं शोभनयज्ञं विश्वस्य सर्वस्य यजमानस्य दूतममृतं नित्यमग्निमेनानेन नमसा स्तोत्रेण हे ऋत्वि
ग्यजमाना वा युष्मदर्थं आ हुवे आह्वयामि॥ ॥ अथ द्वितीया। स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः॥ सुब्रह्मा यज्ञः सुश
मी वसूनां देवं राधो जनानामिति। सोग्निः अरुषा आरोचमानौ विश्वभोजसा विश्वस्य पालयितारावश्वौ यज्ञ तस्य रथे युनक्तु यद्वा
विश्वभोजसा विश्वस्य रक्षकेण अरुषा आरोचमानेन तेजसा योजते। अयुज्यत तदनंतरं योग्निः स्वाहुतः स्तोतृभिः सुहुतः सनदु
द्रवद्दानेतुं देवान् प्रति शीघ्रं द्रवतु गच्छतु॥ कीदृशः सुब्रह्मा शोभनस्तुतिकः शोभनाग्ना वा यज्ञो यष्टव्यः सुशमी सुकर्म शोभन
कर्मा चि भवति। ततः वसूनां वासकानां जनानां यजमानानां संबंधि राधः हविर्लक्षणं धनं देवं द्योतमानमग्निं प्रतिगच्छन्विति शे
षः॥ ॥ अथ द्वितीयप्रगाथे प्रथमा॥ प्रत्युदर्श्यायत्युच्छंती दुहिता दिवः॥ अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरीति।

आयती आगच्छंती उच्छंतीत मांसि विनाशयंती वर्जयंती दिवः द्युलोकस्य सूर्यस्य वा दुहिता पुत्री ॥ एवंभूता उषाः मत्य दर्शि। सर्वैः प्रतिदृश्य
२२ ते। उ इति पूरणः। सेषा महिम्ना तमोनाशनेनांधकारं चक्षुषा दर्शनेन अप उ इति निपात इयसमुदायः अपेत्यस्यार्थे वर्तते निवारय
ति॥ एवं कृत्वा सूनरी जनानां सुष्ठु नेत्री उषा ज्योतिः प्रकाशं कृणोति करोति। वृणुते चकृ चाख्ययति चक्षः प इति पाठो॥ ॥अथ द्वितीया॥ उद
स्त्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत। तवेदुषो व्युषि सूर्यस्य च संभक्तेन गमेमहीति। सूर्यः सर्वस्य प्रेरक आदित्यः उस्त्रि
याः रश्मीन् सचा सह युगपदेव उन्सृजते उद्गमयति। तथा उद्यन् उद्गच्छन् प्रादुर्भवन् नक्षत्रं नभसि दृश्यमानं ग्रहनक्षत्रादिकं अ
र्चिवत् दीप्तिमत् करोति। सौरेण तेजसा हि नक्तं चंद्रप्रभृतीनि नक्षत्राणि भासंते। सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः इति हि निगमांतर
म्। एवं च सति हे उषः उषो देवते तव सूर्यस्य च व्युषि विवासने प्रकाशने सति भक्तेनान्नेन संगमेमहि वयं गच्छेमहि। उच्छः प्र २२
कः॥ ॥अथ तृतीयप्रगाथे प्रथमा॥ इमा उ वां दिविष्टय उस्रा हवंते अश्विना॥ अयं वामह्वेवसे शचीवसू विशंविशं हि गच्छथः॥

इमा दिविष्टयो दिवमिच्छंत्यः प्रजाः कृतिनोपि उ इति चार्थे हि अश्विना उस्रा वात्मको उस्त्रो वां हवंते आह्वयंति अयं स्तोतापि हे शचीव
सू कर्मधनौ वां युवामवसे अस्मद्रक्षणाय युवयोस्तर्पणाय वा आह्वे आह्वयामि। किमर्थमेवं प्रजा अपि अयमपीत्याह। रक्षा हि
ति। तत्राह। विशंविशं हि गच्छथः सर्वाः कृतिवर्तीः प्रजाः प्रति युवां गच्छथः खलु तस्मादेवमुच्यत इति॥ ॥अथ द्वितीया॥ युवं चि
त्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते। अर्वाग्रथं समनसा नियच्छतं पिबतं सोम्यं मधु॥ इति। हे नरा नेतारावश्विनौ युवं युवां चित्रं चा
यनीयं भोजनं ददथुः धारयेथे॥ तथा च सूनृतावते स्तुतिमते स्तोत्रे चोदेथां प्रेरयतं॥ तदर्थं समानसा समानमनस्कौ संतौ रथं युवयोः संबं
धिनं अर्वाक् अस्मदभिमुखं नियच्छतं नियमतं। तथा कृत्वा सोम्यं सोमसंबंधिनं मधु मधुररसं च पिबतं॥ ॥इति द्वितीयस्याध्याय
स्य चतुर्थः खंडः॥ अथ पंचमखंडे अस्य प्रत्नेति नव ऋचः तत्र प्रथमा॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः॥ पयः सहस्रसामृ
षिं॥ भति॥ अस्य सोमस्य प्रत्नां पुरातनं। द्युतं द्योतमानां तनुमनु शुक्रं दीप्तं सहस्रसां अभिलषितस्यापरिमितस्य फलस्य दा

277/1973

तारं ऋषिं अतींद्रियस्य कर्मफलस्य द्रष्टारं पयः पातव्यं रसं अद्रयः कवयः दुदुह्रे दुहंति॥ ॥अथ द्वितीया॥ अयं सूर्य इवोपदृगयं सरांसि धावति॥
२३ सप्त प्रवत आ दिवमिति॥ अयं सोमः सूर्य इव यथा सूर्यः सर्वस्य लोकस्योपद्रष्टा तथा कर्मणामुपद्रष्टा॥ अपि च अयं सोमः सरांसि त्रिं-
शदुक्थपात्राणीति केचिद्वर्णयंति। अपरे तु त्रिंशदहोरात्राणि सरांसीति तानि धावति। प्रतिगच्छति। तथा च यास्कः॥ तत्रैते याज्ञिका
वेदयंते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबंति तान्यत्र सरांस्युच्यंते त्रिंशदपरपक्षस्या-
होरात्राः त्रिंशत्पूर्वपक्षस्येति नैरुक्ता इति अपि चायं॥ सोमः सप्त प्रवतः सप्त नदीरा व्रजति॥ ॥अथ तृतीया॥ अयं वि-
श्वानि तिष्ठति पुनानो भुवनोपरि॥ सोमो देवो न सूर्य इति॥ पुनानः पूयमानोयं सोमः विश्वानि सर्वाणि भुवना भुवनानि सर्वेषां भुवनानां उ-
परि तिष्ठति। तत्र दृष्टांतमाह॥ देवो न सूर्यः॥ तथा सूर्यो देवः सर्वेषां भुवनानामुपरि तिष्ठति तद्वत्। सोमोपीत्यर्थः॥ ॥अथ चतुर्थी॥ २३
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः॥ हरिः पवित्रे अर्षतीति॥ हरिर्हरितवर्णः देवो द्योतमानः एष सोमः प्रत्नेन पुराणेन जन्मना जन-

नेन देवेभ्यो देवार्थं सुतोभिषुतः सन् पवित्रे अर्षतीति। आरोचते॥ ॥अथ पंचमी॥ एष प्रत्नेन जन्मना देवो देवेभ्यस्परि॥ कविर्विप्रे-
ण वावृध इति॥ प्रत्नेन पुराणेन मन्मना मननसाधनेन स्तोत्रेण युक्त इति शेषः। देवो द्योतमानः एष सोमः देवेभ्यो देवार्थं कविर्मेधावी स-
न् विप्रेण मेधाविना यजमानेन ऋत्विजा वा परि वा परि वावृधे परिवर्धते॥ ॥अथ षष्ठी॥ दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे॥
क्रंदं देवां अजीजन इति॥ प्रत्नमित्पुराणमेव पयो रसं दुहानः हे सोम पवित्रे परि षिच्यसे॥ हे सोम त्वं क्रंदन् शब्दं कुर्वन् देवानिंद्रादी-
न् अजीजनः स्वसमीपे जनयसि। यत्र सोमोभिषूयते तत्र देवा नियतं प्रादुर्भवंतीत्यर्थः॥ अजीजनः अजीजन इति पाठौ॥ ॥
अथ सप्तमी॥ उप शिक्षापतस्थुषो भियसमाधेहि शत्रवे॥ पवमान विदा रयिमिति। हे पवमान सोम उप शिक्ष त्वं समीपे कुरु। अपत-
स्थुषः। अपक्रम्य स्थितानस्मद्विमतानित्यर्थः। शत्रुष्वस्मद्विरोधिषु भियसं भयमाधेहि। कुरु जनय॥ किंच। तेषां शत्रूणां
रयिं धनं विदाः अस्मभ्यं विद्धि देहीत्यर्थः॥ ॥अष्टमीनवम्योर्ऋचोः प्रतीकमेवाम्नातं॥ उपो षु जातमप्तुरं इति उपास्मै गा-

279/1983

२९ यत्नानरइति चनत्राश्वमीप्रदेशांतरे आम्नाता॥ इपो षु ज्ञातममुरंगोभिर्भंगंपरिष्कृतं॥ इंदुं देवा अयासिषुः इति॥ जातं सम्यक्प्रादुर्भू
तं उत्सुरं वसतीवरीभिरद्भिः प्रेरितं भंगंडात्रूणां भंजकं गोभिर्गोविसारैः पयोभिः परिष्कृतमलंकृतं संस्कृतमिंदुं सोमं देवा इंद्रादयः इ
पइइति निपातद्वयसमुदायः इपेत्यस्यार्थे वर्तते तस्कृ उपायासिषुः उपागच्छंति॥ ॥नवमीत्येवमन्यत्राम्नाता॥ इपास्मैगाय्यतानरः प
वमानायेंदवे॥ अभिदेवाँ इयक्षते इति॥ हे नरो नेतारो यज्ञस्य देवानिंद्रादीनभियक्षते॥ आभिमुख्येन यष्टुमिच्छते यजमानाय क्षर
ते अस्मा अभिक्षूयमाणायेंदवे सोमाय उपगायत उपगानं कुरुत॥ ॥इति द्वितीयस्य पंचमः खंडः॥ ॥षष्ठे खंडे प्रथमतृचे प्रथमा॥ प्र
सोमासो विपश्चितोपां नयंत्यूर्मयः॥ वनानि महिषा इवेति॥ विपश्चितो मेधाविनः ऊर्मयः प्रवृद्धाः सोमासः सोमा अपः वसतीवर्या
ख्याः प्रणयंते प्राप्नुवंति। तत्र दृष्टांतः। वनानि महिषा इव॥ यथा प्रवृद्धा मृगाः वनानि प्राप्नुवंति। तद्वत्। अपो नयंते अपां नयंती २४
ति पाठो॥ ॥अथ द्वितीया॥ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया॥ वाजं गोमंतमक्षरन्निति॥ अभिक्षरंतीति शेषः॥ उप

सर्गश्च तेरश्चित्तेर्क्रियाध्याहारः किंप्रति द्रोणानि द्रोणकलशान्यद्यपि द्रोणकलश एक एव तथापि तत्प्राधान्यादितराण्यपि पात्राणि द्रो 281/1973
णानीत्युच्यंते। अथवा कस्मिंश्च पूजार्थे बहुवचनं। के बभ्रवो बभ्रुवर्णाः सोमाः शुक्राः दीप्ताः केन प्रकारेण धारया धाराकारेण कस्मै
प्रयोजनाय ऋतस्य यज्ञस्यार्थे॥ किंच। वाजमन्नं गोमंतं बहुगोयुक्तं अक्षरन् क्षरंत्यस्माकं पाठे कमेव वाक्यम्॥ उक्तविधाः सोमाः यज्ञार्थं
द्रोणानि प्रत्यक्षरन् धारया॥ किं कुर्वंतो गोमंतं वाजं प्रयच्छंत इत्यर्थः॥ ॥अथ तृतीया॥ सुता इंद्राय वायवे वरुणाय मरुद्भ्यः॥ सोमा अ
र्षंति विष्णवे॥ इति॥ सुता अभिषुताः सोमा इंद्रादिदेवार्थं अर्षंतु गच्छंतु। अर्षंतु अर्षंतीति पाठो॥ ॥अथ प्रगाथात्मकद्वितीयसूक्ते प्र
थमा॥ प्र सोम देववीतये सिंधुर्न पिप्ये अर्णसा॥ अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतमिति॥ हे सोम देववीतये देवानां पा
नाय तदर्थमर्णसा वसतीवर्याख्येनोदकेन प्रपिप्ये। प्राप्यायसे। तत्र दृष्टांतः। सिंधुर्न यथा सिंधुरुदकेन प्रपिप्यते तद्वत्। प्याप्यते
र्लिटि लिड्यङोश्चेति पीभावः। ततः सत्वं मदिरो न मदकरः सुरा इव। जागृविर्जागरणशीलः। यद्वा नेति। संप्रत्यर्थे। इदानीं मदकरो

जागरणशीलस्त्वं अंशोः लतारूपस्य पयसा रसेन मधुश्चुतं मधुररसस्य क्षारयितारं कोशं द्रोणकलशं अच्छा अभिगच्छसि॥ ॥अथ द्वि
२५ तीया॥ आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः॥ तमीं हिन्वंत्यपसो यथा रथं नदीष्वा गभस्त्योः॥ इति। हर्यतः स्पृहणी
यः प्रियः प्रीणयिता सूनुर्न सूनुरिव मर्ज्यो मार्जनीयः अर्जुनः श्वेतवर्णः सोमः अत्के रूपे विचित्रे अव्यत आवृणोति। तमीमेनं।
सोमं अंगुलयः नदीषु नद्यमानासु वसतीवरीषु गभस्त्योर्बाह्वोरभिमुख्येन हिन्वंति प्रेरयंति तत्र दृष्टांतः। अपसो यथा वेगवंतः
शूरा नरा रथं संग्रामेषु प्रेरयंति तद्वत्। अर्जुनः अर्जुनो इति पाठौ॥ ॥अथ तृतीयतृचे प्रथमा॥ प्र सोमासो मदच्युतः श्रवसे नो
मघोनां॥ सुता विदथे अक्रमुः॥ इति। सोमासः सोमाः मदच्युतो मदस्राविणः सुता अभिषुताः संतो विदथे यज्ञे मघोनां हविष्म
तां। नोस्माकं श्रवसे अन्नाय कीर्तये वा प्राक्रमुः प्रगच्छंति। मघोनां मघोन इति पाठौ॥ ॥अथ द्वितीया॥ आदीं हंसो यथा गणं विश्व २५
स्यावीवशन्मतिं॥ अत्यो न गोभिरज्यत इति॥ आत् अपि च ईमयं। सोमो हंसो यथा गणं जनसंघं स्वगतिविशेषेण स्ववेनवा

प्रविशति तथा इंद्रः विश्वस्य सर्वस्य स्तोतृजनस्य मतिं बुद्धिं स्तुतिं वा अवीवशत् वशं नयति स च सोमः अत्यो नाश्व इव गोभिर्गोधेर
स्कैर्वा अज्यते सिच्यते स्निग्धीक्रियते॥ ॥अथ तृतीया॥ आदीं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः॥ इंदुमिंद्राय पीतय इति॥ आ
त् आपि च ईं एनं हरिं हरितवर्णं इंदुं सोमं त्रितस्य ऋषेर्योषणा अंगुलयो अद्रिभिर्ग्रावभिर्हिन्वंति। किमर्थं इंद्राय इंद्रस्य पीतये पाना
य॥ ॥अथैकर्चे चतुर्थे सूक्ते प्रथमा॥ अया पवस्व देवयू रेभन्पवित्रं पर्येषि विश्वतः॥ मधोर्धारा असृक्षतेति। हे सोम देव
युर्देवान् कामयमानस्त्वं अया अनया धारया पवस्व क्षर। ततः रेभन् शब्दायमानः पवित्रं विश्वतः पर्येषि सर्वतः परिगच्छसि
अनंतरं मधोर्मदकरस्य तव धारा आत्मीया असृक्षत सृज्यंते॥ ॥अथ द्वितीयतृतीययोः पादयोर्व्यत्ययेन पाठौ॥ अथैकर्चे पंच
मे प्रथमा॥ पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्ष स्तोतृभ्यो वीरवद्यश इति॥ हर्यतः स्पृहणीयः हरिर्हरितवर्णः सो
मः रंह्या तृतीयाया आकारः साधुवेगेन ह्वरांसि कुटिलानि अन्यानि अपवित्राणि अतिपवते अतीत्य गच्छति। किं कुर्वन्।

283/1973

स्तोतृभ्यः वीरवत् पुत्रयुक्तं यशः अभ्यर्ष अभिगमयन् पवते॥ ॥अथैकर्चे पंचमे प्रथमा॥ प्रसुन्वानायांधसो मर्तो न वृत तद्वचः।
२६ अपश्वानमराधसं हता मखं न भृगवः॥ इति। सुन्वानायचतुर्थ्यर्थे षष्ठी। सुन्वानस्याभिषूयमाणस्य अंधसोन्नादीयस्य सो
मस्य तत्याभिषवं च वोचवचनं। घोषं मर्तो मारकः कर्मविघ्नकारी श्वान प्रवृत्तं भवतां न शृणोतीति यावत्। तथा हे स्तोतारः अराध
संसाधककर्मरहितं श्वानं अपहत। तत्र दृष्टांतः। मखं। यथा पुरा अपराद्धं मखं एतन्नामानं भृगवोपहतवंतः तथा अप
हतेत्यर्थः। प्रसुन्वानाय सुन्वानस्येति वष्टवृत्त इति च पाठो॥ ॥इति द्वितीयस्याध्यायस्य षष्ठः खंडः॥ वेदार्थस्य प्रकाशेन
तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्री २६
वीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे द्वितीयोध्यायः
समाप्तः॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥ अथ तृतीयोध्याय

आरभ्यते॥ ॥तत्र पवस्व वाच इति पंचर्चात्मके प्रथमे खंडे प्रथमतृचे प्रथमा॥ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः॥
अभि विश्वानि काव्येति॥ हे सोम अग्रियो मुख्यस्त्वं चित्राभिः पूजनीयैरूतिभिः रक्षणैः सह वाचो अस्मदीयाः स्तुतीः प्रतिपवस्व।
उत्तरार्धं उक्तार्थं विशदयति। विश्वानि सर्वाणि काव्या काव्यानि स्तुत्यात्मकानि वचनानि अभिपवस्वेति॥ ॥अथ द्वितीया॥
त्वं समुद्रिया अपोग्रियो वाचा ईरयन्॥ पवस्व विश्वचर्षण इति। हे विश्वचर्षण सर्वस्य द्रष्टः सोम अग्रियः मुख्यस्त्वं वाचः प्रेरयन्॥
समुद्रिया आंतरिक्ष्याण्यप उदकानि पवस्व धारया रक्ष। विश्वचर्षणो विश्वमेजयति छंदोगबह्वृचानां पाठो॥ ॥अथ तृतीया॥ तुभ्य
मा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यं धावंति धेनवः इति॥ हे कवे क्रांतकर्मन् सोम तुभ्यं त्वं महिम्ने इमा इमानि भुवना
भुवनानि तस्थिरे तिष्ठंति त्वामेव पुरस्कुर्वंतीत्यर्थः। धेनवो नवप्रसूतिकाः देवानां हविः प्रदानेन प्रीणयित्र्यो गावः तुभ्यं त्व
दर्थमेव क्षीरं प्रयच्छामं धावंति आगच्छंति धावंति धेनव इति छंदोगाः। अर्षंति धेनव इति बह्वृचाः॥ ॥ अथ द्वितीये तृचे प्र०

285/1973

थमा ॥ पवस्वेंदो वृषा सुतः कृधी नो यशसो जने ॥ विश्वा अप द्विषो जहीति ॥ हे इंदो सोम सुतोऽभिषुतः वृषा कामानां वर्षिता त्वं पवस्व धा
२७ रया क्षरन् जने पदे नोऽस्मान् यशसो यशस्विनः कृधि कुरु ॥ विश्वा विश्वान् सर्वान् द्विषो द्वेष्टॄन् शत्रून् अप जहि मारय च ॥ ॥अ
थ द्वितीया ॥ यस्य ते सख्ये वयं सासह्याम पृतन्यतः ॥ तवेंदो द्युम्न उत्तम इति ॥ हे इंदो सोम आस्यां स्मिन् प्राग्वर्तमानस्य ते तव सख्ये स
खित्वे सति वयं स्तोतारः तव त्वदीये उत्तमे श्रेष्ठे द्युम्ने अन्ने तत्प्रियं प्राप्ताः ॥ तथा च यास्कः ॥ द्युम्नं द्योततेर्यशो वान्नं वेति पृतन्यातो युद्ध
मिच्छतः शत्रून् सासह्याम अभिभवेम ॥ ॥ द्वितीयतृतीययोः पादयोर्व्यत्ययेन पाठो ॥ ॥अथ तृतीया ॥ या ते भीमान्यायुधा तिग्मा
नि संति धूर्वणे ॥ रक्षा समस्य नो निद इति ॥ हे सोम ते तव यानि भीमानि शत्रूणां भयंकराणि तिग्मानि तीक्ष्णानि आयुधा आ २७
युधानि धूर्वणे शत्रुवधार्थं संति तैः रायुधैः समस्य सर्वस्य शत्रोर्निदो निंदायाः नोऽस्मान् रक्ष पालय ॥ ॥अथ तृतीयतृचे प्रथ
मा ॥ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ॥ वृषा धर्माणि दधिषे इति ॥ हे सोम वृषा कामानां वर्षिता त्वं द्युमान् दीप्तिमान् अ

सि अपि च हे देव द्योतमान सोम वृषा त्वं वृषव्रतो वर्षणशीलकर्मासि किंच ॥ हे सोम वृषा त्वं धर्माणि देवानां मनुष्याणां च हितानि कर्माणि
दधिषे धारयसि ॥ दध्रिषे इत्यर्थ इति पाठो ॥ ॥अथ द्वितीया ॥ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ॥ स त्वं वृषन् वृषेदसीति ॥ हे
वृषन् कामानां वर्षक सोम वृष्णो वर्षितुस्ते तव शवो बलं वृष्ण्यं वर्षणशीलं भवति ॥ वनं तव भजनमपि वृषा वर्षणशीलं सुतः अभि
सुतस्त्वं रसोऽपि वृषा वर्षणशीलः स त्वं वृषेदसि वर्षणशील एवासि भवसि ॥ सुतो मद इति मत्वं सत्यमिति च पाठो ॥ ॥अथ तृती
या ॥ अश्वो न चक्रदो वृषा सं गा इंदो समर्वतः ॥ वि नो राये दुरो वृधीति ॥ हे इंदो सोम वृषा त्वं अश्वो नाश्व इव संचक्रदः संक्रंदसे ॥ अ
पि च गाः पतन् तर्वतोऽश्वांश्चास्मभ्यं संप्रयच्छसीति शेषः ॥ किंच नोऽस्माकं राये धनाय दुरो द्वाराणि वि वृधि विवृतानि कुरु ॥ ॥अथ चतु
र्थतृचे प्रथमा ॥ वृषा ह्यसि भानुना द्युमंतं त्वा हवामहे ॥ पवमान स्वर्दृशमिति ॥ हे सोम त्वं वृषा असि हि अभिमतफलानां वर्षिता भव
सि ॥ खलु तस्मात् । हे पवमान पूयमान वा सोम स्वर्दृशं सर्वस्य सूर्यस्य वा द्रष्टारं सर्वदा वेई दृश्यं वा ॥ भानुना तेजसा द्युमंतं दीप्तिमं

287/1973

२९ तं अतिशयेन तेजस्विनमित्यर्थः। स्फातिमंतं वा त्वां वयं हवामहे। यज्ञेष्वाह्वामहे॥ ॥अथ द्वितीया॥ यदद्भिः परिषिच्यसे मर्मृज्यमानः
आयुभिः। द्रोणा सधस्थमश्नुषे इति। हे सोम त्वं आयुभिर्मनुष्यैः ऋत्विग्भिर्मर्मृज्यमानः अतिशयेन शोध्यमानः सन् अद्भिर्वसती
वर्याख्याभिर्यद्यदा परिषिच्यसे॥ परितः सिच्यमानो भवसि तदानीं द्रोणे द्रोणकलशे न गृह्यमाणः सन् सधस्थं सह तिष्ठंत्यत्रेति
सधस्थं स्थानं ग्रहचमसादिकं अश्नुषे व्याप्नोषि। मर्मृज्यमान आयुभिर्मृज्यमानो गभस्त्योरिति द्रोणे पद्रुणेति च पाठो॥ ॥अथ तृती
या॥ आ पवस्व सुवीर्यं मंदमानः स्वायुध॥ इहो ष्विंदवा गहीति। हे स्वायुध यज्ञस्फ्यकपालादीनि दशायुधानीत्यभिधीयंते॥ शोभना
नि तानि यस्य स तथोक्तः॥ यद्वा धनरादीन्यायुधानि यस्य सः तादृश हे सोम त्वं मंदमानः मोदमानः सन्। यद्वा अंतर्णीतण्यर्थः॥ २९
देवान् स्वयं मादयन् सुवीर्यं शोभनवीर्योपेतं पुत्रादिकमस्माकं आपवस्व आपवतिर्गत्यर्थः। आप्रापय॥ किंच। हे इंदो यद्दे युत्तम
सेषु क्षरणशील सोम इहो इदेवास्मदीये यज्ञे सु आगहि सु आगच्छ॥ ॥अथ पंचमखंडे प्रथमा॥ पवमानस्य ते वयं पवित्र

मभ्युंदतः॥ सखित्वमावृणीमहे इति॥ हे सोम पवित्रमभ्युंदतः पवित्रमभिक्लेदयतः पवमानस्य क्षरतस्य ते तव सखित्वं सख्यं व
यं अमही यव आंगिरसाः स्तोतारः आवृणीमहे प्रार्थयामहे॥ ॥अथ द्वितीया॥ ये ते पवित्रमूर्मयोभिक्षरंति धारया॥ तेभिर्नः सो
म मृळयेति॥ हे सोम ते तव ये अर्मयस्तरंगाः पवित्रं धारया क्षरंति तेभिस्तैरूर्मिभिर्नोस्मान्मृळय सुखय॥ ॥अथ तृतीया॥ स नः
पुनान आ भर रयिं वीरवतीमिषं॥ ईशानः सोम विश्वतः इति॥ हे सोम विश्वतः सर्वस्य जगत ईशान ईश्वरः। सोभिषुतः पुनानः पू
यमानस्त्वं नोस्मभ्यं रयिं धनं वीरवतीं पुत्राद्युपेतं इषमिन्नं वामगाहर॥ ॥इति तृतीयाध्यायप्रथमः खंडः॥ अथ द्वितीयखंडे प्रथम
त्रचे प्रथमा॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥ अस्य यज्ञस्य सुक्रतुमिति। अग्ने दूतत्वमेतन्मंत्रव्याख्याने त्रिरीयब्राह्म
णे समाम्नायते। अग्निर्देवानां दूत आसीदुशना काव्योसुराणामिति॥ तादृशं देवदूतं अग्निं अस्मिन् कर्मणि वृणीमहे संभजा
मः। कीदृशं होतारं देवानामाह्वातारं विश्ववेदसं सर्वधनोपेतं वा हुत्वा होविश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। अस्य प्रवर्तमानस्य

289/1973

यज्ञस्यनिष्पादकत्वेनसुक्रतुंशोभनकर्माणंशोभनप्रज्ञंवा ॥ अथद्वितीया ॥ अग्निमग्निंहवीमभिःसदाहवंतविश्पतिं ॥ हव्यवाहंपुरुप्रिय
१९ मिति ॥ यद्यप्यग्निःस्वरूपेणैकएवतथापिप्रयोगभेदाद्धवनीयादिस्थानभेदात्पावकादिविशेषणभेदाद्वाबहुत्वमभि
प्रेत्याग्निमग्निमितिवीप्सायांतं ॥ हवीमभिराह्वानकरणैर्मंत्रैःसदाहवंतनिरंतरमनुष्ठातारआह्वयंति ॥ कीदृशंविश्पतिंविशां । प्र
जानां । होत्रादीनांपालकंहव्यवाहंयजमानसमर्पितस्यहविषोदेवान्प्रतिवोढारं ॥ अतएवपुरुप्रियंबहूनांदेवानांप्रीत्यास्पदं ॥ अ
ग्निमग्निमित्यत्र । आभीक्ष्ण्यइतिद्विर्भावः ॥ तस्यपरमाम्रेडितमित्युत्तरस्याम्रेडितसंज्ञायामनुदात्तं । चेत्यनुदात्तत्वं । हवी
मभिः । ह्वेञ्स्पर्धायांशब्देच ॥ आह्वानकरणभूतेषुमंत्रेषुस्वव्यापारस्वातंत्र्यात्कर्तृत्वविवक्षया अन्येभ्योपिदृश्यंतइति २०
मनिन् ॥ तस्यछांदसईडागमः ॥ बहुलंछंदसीतिह्वातोःसंप्रसारणं ॥ परपूर्वत्वंगुणावादेशौनित्वादाद्युदात्तत्वं ॥ सदास
र्वैकान्येत्यादिनासर्वशब्दाद्दाप्रत्ययः ॥ सर्वस्यसोन्यतरस्यांदीतिसभावः । व्यत्ययेनाद्युदात्तत्वं । हवंत । ह्वेञोलट् । झस्यअंतादे

शः । देरत्वाभावःछांदसः ॥ ह्वापिबहुलंछंदसीतिसंप्रसारणं । तिङ्ङतिङइतिनिघातः ॥ विश्पतिंपत्यावैश्वर्यइतिपूर्वपदप्रकृतिस्वरे आ
सेपरादिःछंदसिबहुलमित्युत्तरपदाद्युदात्तत्वं ॥ हव्यवाहंवहप्रापणेवहश्चेतिण्विप्रत्ययःतदुत्तरपदप्रकृतिस्वरत्वंपुरूणांप्रि
यंसमासांतोदात्तत्वं ॥ ॥ अथतृतीया ॥ अग्नेदेवांइहावहजज्ञानोवृक्तबर्हिषे ॥ असिहोतानईड्यइति ॥ हेअग्नेजज्ञानोअरण्या
रसंनस्त्वंवृक्तबर्हिषेआस्तरणार्थंछिन्नेनबर्हिषायुक्तायतस्मैयजमानमनुग्रहीतुमिहकर्मणिहविर्भुजोदेवानावह । नोस्मदर्थं
होतादेवानामाह्वातात्वंईड्योस्तुत्योभवसि ॥ ॥ द्वितीयतृचेप्रथमा ॥ मित्रंवयंहवामहेवरुणंसोमपीतये ॥ याजातापूतदक्ष
सेइति । वयमनुष्ठातारःसोमपीतयेसोमपानार्थंदासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वंमित्रंवरुणंचोभावाह्वयामः ॥ कीदृ
शावुभौयाजातायौजातौसंतौप्रदेशंप्रादुर्भवंतौपूतदक्षसाशुद्धबलोपेतौ पूङ्पवनेनिष्ठतिक्तः श्र्युकःकितीतीट्प्रतिषेधः ।
पूतंदक्षोययोस्तौ । बहुव्रीहौप्रकृत्यापूर्वपदमितिपूर्वपदप्रकृतिस्वरत्वं । याजाताजनजननेनिपातौ ॥ ॥ अथद्वितीया ॥ ऋतेनयावृता

291/1978

वृधावृतस्य ज्योतिषस्पती ॥ तामित्रावरुणा हुव इति । यौ मित्रावरुणौ ऋतेन सत्यवचनेन यजमानानुग्रहकारिणे कृतावृधौ ऋतमवः
३० श्यंभावितया सत्यं कर्मफलं तस्य वर्धकौ । ऋतस्य सत्यस्य प्रशस्तस्य ज्योतिषः प्रकाशस्य पती पालकौ श्रुत्यंतरे मित्रावरुणयोरादिति
पुत्रत्वेन श्रुतत्वात् द्वादशादित्यांतर्भूतत्वेन ज्योतिषः पालकत्वं युक्तं श्रुत्यंतरे च अष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चे
त्यादिकमाम्नातं । तामित्रावरुणा तथाविधौ मित्रावरुणौ सुपां सुलुगिति पूर्वसवर्णदीर्घ आकारः । हुवे आह्वयामि । ह्वेञ् आत्म
नेपदे लटि उत्तमपुरुषैकवचने संप्रसारणपरपूर्वत्वे च बहुलं छंदसीति शपो लुक् । ओरगुणप्राप्तौ क्ङिति चेति प्रतिषेधः । उवङादेशः ।
तिङ्ङतिङ इति निघातः ॥ ॥अथ तृतीया ॥ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ॥ करतां नः सुराधस इति । अयं वरुणो ३०
देवः अस्माकं प्राविता भुवत् । प्रकर्षेण रक्षको भवतु ॥ मित्रश्च विश्वाभिरूतिभिः सर्वाभीरक्षाभिः प्राविता भुवत् । तावुभावपि
नोस्मान् सुराधसः प्रभूतधनयुक्तान् करतां कुरुतां । डुकृञ् करणे भ्वादिकः लोटस्तसस्तमस्तामकृतोरडागमः । गुणारपरत्वं ।

शपः पित्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । इंद्रमिद्गाथिन इति चतुर्थं चं तृतीयं सूक्तं तत्र
प्रथमा ॥ इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः ॥ इंद्रं वाणीरनूषतेति । इंद्रं वा महत्त्वस्यास्मच्युत्यं नेन बृहन्नमेकेरनूषतेति ॥
गाथिनो गीयमानसामयुक्ता उद्गातारः इंद्रमित् इंद्रमेव बृहत्वामिषिहृवा महत्त्वस्यास्मच्युत्यं नेन बृहन्नामकेन साम्ना अनू
षत स्तुतवंतः अर्किणः । अर्चनहेतुमंत्रोपेता ॥ होतारः अर्केभिः ऋग्रूपैर्मंत्रैरिंद्रमनूषत ॥ यत्तवदिष्टा अध्वर्यवस्ते वाणीभि
र्यजुरूपाभिरिंद्रमनूषत स्तुतवंतः णु स्तुतौ । णो न इति नत्वं । कुटादित्वे यगात्मानेपदं रभ्य अदादेशः । सिचूडुभावः उकार
स्य दीर्घत्वं छांदसं धातोः कुटादित्वात् सिचो ङित्वेन गुणाभावः ॥ ॥अथ द्वितीया ॥ इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ॥
इंद्रो वज्री हिरण्ययः इति ॥ इंद्रः । तदु इंद्र एव हर्योः हरिनामकयोरश्वयोः सचा सहयुगपदासंमिश्लः सर्वतः सम्यङ्मिश्रयिता ।
कीदृशयोर्हर्योः वचोयुजा इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः । अयमिंद्रो वज्री वज्रयुक्तः हिरण्मयः हिर

2813/1973

ष्मयः सर्वाभरणभूषित इत्यर्थः॥ ॥अथ तृतीया॥ इंद्र वाजेषु नोव सहस्रप्रधनेषु च॥ उग्र उग्राभिरूतिभिरिति॥ हे उग्र उग्रः
३९ शत्रुभिरप्रधृष्यस्त्वं उग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषयरक्षाभिर्वाजेषु इषु नोस्मानव रक्ष॥ तथा सहस्रप्रधनेषु च। सहस्र
संख्याकगजाश्वादिलाभयुक्तेषु महायुद्धेष्वपि रक्ष॥ ॥अथ चतुर्थी॥ इंद्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि॥ वि गोभिर
द्रिमैरयदिति॥ अयमिंद्रो दीर्घाय प्रौढाय निरंतराय चक्षसे दर्शनाय दिवि द्युलोके सूर्यमारोहयत्॥ पुरा वृत्रासुरेण जगति
यदापादितं तमस्तन्निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थं आदित्यं द्युलोकस्थापितवानित्यर्थः॥ स च सूर्यो गोभिः स्वकीयरश्मि
भिरद्रिं पर्वतप्रमुखं सर्वं जगत्। व्यैरयत् विशेषेण दर्शनार्थं प्रेरितवान्। पंचदशसंख्याकेषु रश्मिनामसु खेदयः किरणा
गाव इति पठितं। त्रिंशत्संख्याकेषु मेघनामसु अद्रिः ग्रावेति पठितं॥ ॥अथ त्रचात्मके चतुर्थसूक्ते प्रथमा॥ इंद्र अग्ना नमो ३९
बृहत्सुवृक्तिमेरयामहे॥ धिया धेना अवस्यव इति। अवस्यवः रक्षणकामा वयं इंद्र देव अग्ने च बृहत् प्रवृद्धं वर्धकं। नमो

हविर्लक्षणमन्नं सुवृक्तिं सुप्रवृत्तां स्तुतिं च आ ईरयामहे अभिप्रेरयामः॥ तथा च धिया कर्मणा युक्ता धेनाः वाङ्नामैतत् स्तुतिरू
पा गावश्च अभिप्रेरयामः॥ ॥अथ द्वितीया॥ ता हि शश्वंत ईळत इत्था विप्रास ऊतये॥ सबाधो वाजसातये इति। ता हि तौ खल्विंद्रा
ग्नी शश्वंतः बहवः विप्राः मेधाविनो जना ऊतये रक्षणाय इत्था इत्थमनेन प्रकारेण ईळते स्तुवंति। तथा सबाधः समानं। पर
स्परं बाध्यमानाः जना वाजसातये अन्नलाभाय ता वेवं इंद्राग्नी ईळते यद्वा वाजसातिरिति संग्रामनाम संग्रामार्थं॥ ॥अथ तृतीया
॥ता वां गीर्भिर्विपन्युवः प्रयस्वंतो हवामहे॥ मेधसाता सनिष्यव इति॥ विपन्यवः स्तोत्रमिच्छंतः प्रयस्वंतः हविर्लक्षणेनान्नेनो
पेताः सनिष्यवः सनिर्धनमात्मन इच्छंतो वयं मेधसाता मेधानां यागानां सातौ संभजननिमित्तभूते सति हे इंद्राग्नी ता तौ
वां गीर्भिः स्तुतिभिर्हवामहे॥ विपन्युवः विपन्यव इति पाठे॥ ॥इति तृतीये ध्याये द्वितीयः खंडः॥ वृषा पवस्वेति तृतीयखंडे
प्रथमसूक्ते प्रथमा॥ वृषा पवस्व धारया मरुत्वते च मत्सरः॥ विश्वा दधान ओजसेति। हे सोम त्वं वृषा स्तोतॄणामभिमतफ

295/1973

लस्य वृषेन्द्रः सन धारया तदीयया पवस्व द्रोणकलशमागच्छ। पवतिर्गतिकर्मा। आगतस्त्वं यदास्माभिरिंद्राय दीयसे तदा मरुत्वते
३२ सहायाय मरुतो यस्य संति तस्मा इंद्राय मत्सरो मदकरश्च भव। कीदृशः। विश्वा विश्वानि सर्वाणि व्याप्तानि बाधनानि ओजसा आत्मीये
नैबलेन युक्तः सन स्तोतृभ्यस्तानि दधानः प्रयच्छंस्त्वं मादयिता भवेति समन्वयः॥ ॥अथ द्वितीया॥ तं त्वा धर्तारमोण्योः पवमान
स्वर्दृशं। हिन्वे वाजेषु वाजिनं॥ इति। हे पवमान पूयमान पुनान वा हे सोम ओण्योः द्यावापृथिवी नामैतत्। तयोर्धर्तारं धारकं अत
एव स्वर्दृशं सर्वस्य सूर्यस्य वा द्रष्टारं सर्वैर्द्रष्टव्यं वा॥ वाजिनं बलवंतं तं पूर्वोक्तगुणं प्रसिद्धं च त्वा त्वां वाजेषु संग्रामेषु हिन्वे प्रेरयामि।
यद्वा वाजेषु अन्नेषु विषयेषु प्रेरयामि। अन्नादिकं प्रयच्छेत्यर्थः॥ ॥अथ तृतीया॥ अया चित्तो विपानया हरिः पवस्व धारया॥
युजं वाजेषु चोदय॥ इति। हे पवमान सोम अया। अय पय गते। पवाद्यचात् तया आकारः कर्मार्थमितस्तेनागच्छं ताभिः अनया ३२
विपा विप प्रेरणे हवींष्यग्नौ प्रेरयंतीति विपा अंगुलयः। एकवचनं छांदसं प्रत्येकविवक्षया वा॥ एताभिर्मदीयाभिरंगुलिभि

श्चितो ह्यातः निर्मिताभिः सुतो हरिः हरितवर्णस्त्वं धारया संततया पवस्व। द्रोणकलशं प्रति आगच्छ त्वं। किंच युजं सखायमिंद्रं वाजेषु संग्रा २९७/1973
मेषु चोदय प्रेरय। यदास्माभिरिंद्रार्थं सोमा दीयते तदानीमिंद्रस्त्वत्पानेन हृष्टः सन् शत्रून् हंतीत्यर्थः॥ ॥अथ द्वितीयतृचे प्रथमा॥ वृषा
शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम्। इंद्रस्येव वग्नुराशृण्व आजौ प्रचोदयन्नर्षसि वाचमेमामिति। शोणः शोणवर्णो वृषा
वर्षिता वृषभः गाः पशूनभिलक्ष्य शब्दं करोति। एवं गाः क्रमीः अभिकनिक्रदद् अभिशब्दायमानः तदेवाह नदयन् शब्दमुत्पादयन्॥
हे सोम त्वं पृथिवीमुत अपि च द्यां एतौ लोकौ एषि गच्छसि। किंच वग्नुः वाङ्नामैतत् तस्य वाकूकस्य शब्दः आजौ संग्रामे इंद्रस्येव इंद्रश
ब्द इव शृण्वे सर्वैः श्रूयते ततः प्रचेतयन् आत्मानं सर्वेषां प्रज्ञापयन् इमां वाचं अर्षसि समंताद्गमयसि उच्चैः शब्दायस इत्यर्थः
॥ ॥अथ द्वितीया॥ रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमंतमंशुं॥ पवमानः संतनिमेषि कृण्वन्निंद्राय सोम परिषिच्यमानः
इति। हे सोम रसाय्यः रसेरौणादिक आय्यप्रत्ययः। आस्वाद्यः पयसा पिन्वमानः क्षरंस्त्वं ईरयन् शब्दं प्रेरयन् मधुमंतं माधुर्यो

३३ पेतं अंशुं रसभावं एषि प्राप्नोषि॥ अंशुः शमष्टमाभवतीति यास्कः॥ अनेन सोमरसोभिधीयते किंच हे सोम परिषिच्यमान अद्भिः पा
रिषिक्तो भवं स्त्वं पवमानः पवित्रे पूयमानः सन् संतनि तनु विस्तारे इः प्रत्ययः॥ संततां धारां कृण्वन् कुर्वन् इंद्राय इंद्रार्थं एषि गच्छसि॥
॥ ॥अथ तृतीया॥ एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुं॥ परि वर्णं भरमाणो रुशंतं गव्युर्नो अर्ष परि सोम सिक्तः इति। हे सो
म मदिरो मदकरस्त्वं उदग्राभस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति। उदग्राभं उदकग्राहिणं मेघं
नमयन् इत्यर्थे प्रह्वीकुर्वन् किं दृशं वधस्नुं वज्रवधेन प्रस्नवं तं मदाय मदार्थमेव पवस्व एवं पात्रेषु क्षर॥ किंच रुशंतं आरोचमा
नं श्वेतवर्णं परिभरमाणः परितो बिभ्रत्सिक्तः पवित्रे सिच्यमानस्त्वं गव्युः अस्माकं गा इच्छन् पर्यर्ष परिगच्छ॥ वधस्नुं वधस्ने
ति पाठो॥ ॥इति तृतीयेध्याये तृतीयः खंडः॥ ॥अथ चतुर्थखंडे प्रगाथरूपे प्रथमा मंत्रे प्रथमा॥ त्वामिद्धि हवामहे सा ३३
तौ वाजस्य कारवः॥ त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः इति॥ कारवः स्तोतारो वयं वाजस्यान्नस्य सातौ भंजने निमित्तभू

ते सति हे इंद्र त्वामिद्धि त्वामेव हवामहे स्तुतिभिराह्वयामहे॥ हे इंद्र सत्पतिं सतां पालयितारं श्रेष्ठं त्वां नरः अन्येपि मनुष्याः वृत्रे
ष्वावरकेषु शत्रुषु सत्सु हवंते आह्वयंति। तदुक्तयार्थं अपि च अर्वतो अश्वस्य संबंधिनीषु काष्ठासु यथाश्वः क्रांत्वा तिष्ठति ता
सु काष्ठासु संग्रामेषु युध्यकामास्त्वामेवाह्वयंति अतो वयं त्वामेवाह्वयाम इत्यर्थः॥ सातौ सातेति पाठो॥ ॥अथ द्वितीया॥ स
त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः॥ गामश्वं रथ्यमिंद्र संकिर सत्रा वाजं न जिग्युषे इति। हे चित्र चायनीय वज्रहस्त
वज्रबाहो अद्रिवः वज्रवन्। यद्वा आदृणात्यनेनेत्यद्रिरशनिरसौ इत। एवंभूत हे इंद्र धृष्णुया धृष्णुः शत्रूणां धर्षयिता म
हो महान् सन् तादृशस्त्वं स्तवानो अस्माभिः स्तूयमानः सन् गां रथ्यं रथवाहनमश्वं च संकिर सम्यक् प्रयच्छ। जिग्युषे जितवते प
रुषाया भागार्थं सत्रा हे मेत प्रभूतं वाजं न अन्नमिव यथा शत्रून् जितवते भागार्थं विस्तीर्णं प्रयच्छसि तद्वत्॥ ॥अथ द्वितीयसूक्ते
प्रगाथे प्रथमा॥ अभि प्र वः सुराधसमिंद्रमर्च यथा विदे॥ यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षतीति। पुरूवसुः

299/1973

पश्चादित्व बहुधनोपेतयज्ञबाहुल्यात बहुनिवासको वा मघवा धनवान् य इंद्रः जरितृभ्यः स्तोतृभ्यो अस्मभ्यं सहस्रेण च सहस्रसं-
३५ ख्याकेन धनेन च शिक्षति ॥ शिक्षतिर्दानकर्म ॥ पश्चादित्व बहु धनं अस्मभ्यं प्रयच्छतीत्यर्थः ॥ स इंद्रः यथा च धेय यथास्माभिर्विज्ञा-
यते । तथा हे ऋत्विजो वो यूयं सुराधसं । शोभन धना एतं इंद्रं परमैश्वर्ययुक्तं देवं अभि आभिमुख्येन प्रार्चत प्रकर्षेणार्चयत ।
॥ ॥ अथ द्वितीया ॥ शतानीकेव प्रजिगाति धृष्णुया हंति वृत्राणि दाशुषे । गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः
इति । धृष्णुयः धृष्णु दुर्धर्षणशीलः पुरुषः शतानीकेव यथा शतसंख्याकानि शत्रुसैन्यानि प्रजिगाति जयार्थं प्रकर्षेण गच्छति
। तद्वदिंद्रः दाशुषे यजमानार्थं वृत्राणि यज्ञविघातकान् शत्रून् प्रजिगाति । ततस्तान् हंति । किंच पुरुभोजसः बहुधनस्य ३५
अस्येंद्रस्य संबंधीनि दत्राणि दत्तानि धनानि प्रपिन्विरे यजमानार्थं प्रकर्षेण प्रवर्तंते । तत्र दृष्टांतः । गिरेरिव यथा गिरेः
सकाशात् रसा उदकानि प्रपिन्विरे । प्रवर्तंते तद्वत् ॥ ॥ तृतीया प्रगाथे प्रथमा ॥ त्वामिदा ह्यो नरोऽपीप्यन् वज्रिन् भूर्णयः ।

स इंद्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ हे वज्रिन् वज्रवन्निंद्र यं त्वां भूर्णयो हविर्भरणशीला नरः कर्मणां नेतारो य-
जमानाः इदा अद्य ह्यश्चापीप्यन् सोममपाययन् । स त्वं स्तोमवाहसः स्तोत्रवाहकस्य मम स्तोत्रं इह यज्ञे श्रुधि शृणु । स्वसरं गृहं
च दर्याः स्वसराणीति गृहनामसु पाठात् ॥ उपागहि उपागच्छ ॥ स्तोमवाहस इति छंदोगाः ॥ स्तोमवाहसामिति बह्वृचाः ॥ ॥ अथ द्वि-
तीया ॥ मत्स्वा सुशिप्रिन् हरिवस्तमीमहे त्वया भूषंति वेधसः ॥ तव श्रवांस्युपमान्युक्थ्य सुतेष्विंद्र गिर्वणः ॥ इति ॥ हे सुशिप्रिन्
शोभनहनो शोभनोष्णीषिन् । त्वा स्वाहा हरिवो हरिनामकाश्वोपेत गिर्वणो गीर्भिर्वननीयेंद्र त्वत्वयि वेधसः परिचारकाः आ-
भूषंत्याभवंति मत्स्व सोमेन मदोद्यात्मानं किंच तं त्वां वयमीमहे याचामहे किं याच्यमित्यत्राह ॥ सुतेषु सोमेष्वभिषुतेषु स-
त्सु तव श्रवांस्यन्नानि उपमानि उपमानभूतानि हे उक्थ्य प्रशस्य तव प्रसादात् संत्विति । सुशिप्रिन् सुशिप्रेति पाठो ॥ ॥
इति तृतीयेऽध्याये चतुर्थः खंडः ॥ ॥ पंचमखंडे प्रथमतृचे प्रथमा ॥ यस्ते मदो वरेण्यस्तेना पवस्वांधसा ॥ देवावीर-
घशंसहा ॥

301/1973

३५ इति। हेसोमतेतवदेवावीर्दैवकामः अघशंसहाराक्षसानां हंता॥ वरेण्यः सर्वैर्वरणीयोमदोमदकरोयोरसोविघतेतेनरसेनांध
साअदनीयेनपवस्वक्षर॥ ॥अथद्वितीया॥ जघ्निरत्रममित्रियंसस्निर्वाजंदिवेदिवे॥ गोषाउअश्वसाअसीति॥ हेसोमत्वंअ
मित्रियंअमित्रभवंवृत्रंशत्रुंजघ्निरसिहंताभवसि॥ किंचदिवेदिवेप्रतिदिनंवाजंसंग्रामंसस्निःसंभक्तासिअपिचगोषातिः
गवांसातिर्दातासि॥ अश्वसाःअश्वानांदातावासि॥ गोषातिर्गोषाउइतिपाठौ॥ ॥अथतृतीया॥ संमिश्लोअरुषोभुवःसु
पस्थाभिर्नधेनुभिः॥ सीदञ्छ्येनोनयोनिमाति॥ हेसोमत्वंसुपस्थाभिः शोभनोपस्थानाभिर्धेनुभिर्गोविकारैःपयोभिरित्यर्थः॥
संमिश्लःसंमिश्रितःश्येनोनयथाश्येनः शीघ्रमागत्यस्थानमासीदति॥ तद्वत्। योनिंस्वकीयंस्थानमासीदन्नतिसंप्रत्यर्थे
इदानीमरुषोभुवआरोचमानोभव॥ भुवोभवइतिपाठौ॥ ॥अथद्वितीयतृचेप्रथमा॥ अयंपूषारयिर्भगःसोमःपुना ३५
नोअर्षति॥ पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभेति॥ पूषापोषकःसर्वेषांभगोभजनीयःरयिर्धनहेतुःअयंसोमः

पुनानःपवित्रेणपूयमानःसंनर्षतिकलशमभिगच्छतितथाविश्वस्यसर्वस्यभूमनोभूतजातस्यपतिःपालयितासोमउभेरोदसी 303 / 1973
द्यावापृथिव्यौव्यख्यत्। तस्वतेजसाप्रकाशयति। अनेनलोकद्वयवर्तित्वंसूचितं॥ ॥अथद्वितीया॥ समुप्रियाअनूषतगावोम
दायघृष्वयः॥ सोमासःकृण्वतेपथःपवमानासइंदवः॥ इति। प्रियाःप्रियतमाःघृष्वयः। अत्यंतदीप्ताः। यद्वाअथहेप्रथम
तस्तोमिभहंपुरस्तात्स्तोमातिपरस्परंस्पर्धमानागावस्तुतिलक्षणावाचोमदायसोमस्यमदार्थंसमनूषतसंस्कुर्वंति। उःप्र
सिद्धौ। यद्वागावोधेनवःसोमस्यमदायनूषतव्याप्यंते॥ ततःपवमानासःपूयमानाइंदवोदीप्ताःसोमासःसोमाःपथःमार्गा
नकृण्वतेक्षणार्थंकुर्वंति॥ ॥अथतृतीया॥ यओजिष्ठस्तमाभरपवमानश्रवाय्यं॥ यःपंचचर्षणीरभिरयिंयेनवनामहेइति
॥ हेपवमानपूयमानसोम। तुजिष्ठस्तुओजिष्ठतमोयस्तवदीयोरसोस्तितंश्रवाय्यंश्रवणीयंरसमाभरमस्मभ्यमाहरकिंच॥
योरसःपंचचर्षणीःपंचजनानानिषादपंचमानत्रतुरोवर्णान्अभितिष्ठतिअपिच। येनरसेनवयंरयिंधनंचवनामहे।

यद्वा येन त्वां रयिं याचामहे तमा भर॥ ॥अथ तृतीये तृचे प्रथमा॥ वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः॥ प्रा
३६ णा सिंधूनां कलशाँ अचिक्रददिंद्रस्य हार्दिमाविशन्मनीषिभिरिति॥ अयं सोमः पवते अभिषूयते। कीदृशः सोमः मतीनां मतयः स्तोता
रः तेषां वृषा वर्षकः कामानां विचक्षणो विद्रष्टा अह्नां उषसां दिवो द्युलोकस्य वादित्यस्य वा प्रतरीता प्रवर्धयिता॥ किंच। सिंधूनां
स्यंदमानानां प्राणा प्राणयिता वर्षयिता॥ आनितेः शानच्च बहुलं छंदसीति विकरणस्य लुक् सुपां सुलुगित्याकारः कलशानचि
क्रदत् नादं करोति प्रवेष्टुं। किं कुर्वन् इंद्रस्य हार्दि हृदयमाविशन् प्रविशन् मनीषिभिः स्तुत इति शेषः। यद्वा व्यवहितमपि मनी
षिभिरित्येतत्पवत इत्यनेन संबध्यते॥ अह्नामह्न इति उषसामुषस इति प्राणा प्राण इति च मतिः कं दर्शीविक्रददिति च पाठः॥॥
अथ द्वितीया॥ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत्॥ त्रितस्य नाम जनयन्मधु क्षरन्निंद्रस्य वायुं ३६
सख्याय वर्धयन्निति॥ अयं सोमो मनीषिभिर्मेधाविभिरध्वर्य्वादिभिः पवते पूयते। यद्वा अयं मनीषिभिर्मनीषिणी

भिर्द्वाराभिः पवते क्षरति वा। ईदृशोयं पूर्व्यः पुराणः कविर्मेधावी नृभिर्नेतृभिरध्वर्य्वादिभिर्यतः सन् कोशान् कलशान् प्राप्तुं पर्य 305/1973
सिष्यदत् परितः स्यंदते स्रवति। त्रितस्य त्रिषु स्थानेषु लोकेषु विस्तृतस्य। अस्येंद्रस्य यजमानस्य संबंधि नाम नामकमुदकं जन
यन् उत्पादयन् उत्पादयन् मधु मधुरं रसं क्षरन् क्षरति। किं कुर्वन् इंद्रस्य सखायं सखित्वाय वायुं वर्धयन् प्रवृद्धं कुर्वन्। असि
ष्यदत् अचिक्रददिति पाठः॥ युवां वायो इति च वर्धयन् कर्तव्य इति च॥ ॥अथ तृतीया॥ अयं पुनान उषसो अरोचयदयं
सिंधुभ्यो अभवदु लोककृत्॥ अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः॥ इति॥ अयं सोमः पुनानः पूयमा
न उषसः अरोचयत् अदीपयत्॥ अयं सिंधुभ्यः स्यंदमानाभ्योऽद्भ्यो वसतीवरीभ्यो अभवत् समर्थोऽभवत्। उ इति पूरणः
कीदृशोयं लोककृत्। लोकानां कर्ता वर्षकर्ता द्योता धारकत्वात्तस्य लोककर्तृत्वं। अयं सोमः त्रिः सप्त एकविंशतिं गाः ऋत्विङ्मु
खेन आशिरं दुदुहानः दोहनस्य प्रयोजकत्वात्कर्तापि चारुः मत्सरो मदकरः चारु रमणीयं पवते क्षरति। किमर्थं हृदे हृदया

हरयगमनाय आरोचयाद्रोचयादितिपाठो॥ ॥तृतीयस्य पंचमःखंडः॥ ८ एवाह्यसीति षड्खंडे प्रथमतृचे प्रथमा॥ एवाह्यसिवी
३७ रयुरेवाशूर उत स्थिरः॥ एवा ते राध्यं मनः इति॥ हे इंद्र त्वं वीर युधीरान्युद्धकर्मणि समर्थान् शत्रून् हंतुं कामयमान एवासि भवसि
खलु हि प्रसिद्धौ॥ अत एव त्वं शूर सामर्थ्यवानेव भवसि। उत अपि च स्थिरः संग्रामे धैर्यवान् भवसि। एकश्च स्थित्वैव शत्रून् सं
प्रहरसीत्यर्थः। एवं सति तेतव मनो राध्यं स्तुतिभिराराधनीयमेवायत्ता। तेन मनसा त्वं शत्रुवधं संग्रामे धैर्यादिकं करोषीति
तव मन एव सर्वैः स्तुत्यमित्यमित्यर्थः॥ ॥अथ द्वितीया॥ एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः॥ अधा चिदिंद्र नः स
चेति। हे तुविमघ तु विरिति बहुनाम। बहु धनवन्निंद्र विश्वेभिः सर्वैर्धातृभिः कर्मधारकैर्यज्ञादेवानां हविर्दानेन पोषयि ३७
तृभिः सर्वैर्यजमानैस्तव रातिर्गवाश्वादिदानं धायि धार्यते एवं तथा त्वं ऋद्धिकर्मणि रजपं। चिरेवार्थः। अथानंत
रमेव हे इंद्र मसचेति पाठो॥ ॥अथ तृतीया॥ मो षु ब्रह्मेव तंद्रयुर्भुवो वाजानां पते॥ मत्स्वा सुतस्य गोमतः इति। हे वा

जानां पते अन्नानां पते बलानां वा हे इंद्र त्वं तंद्रयुः निष्कारणं निरस्तकर्मवत्त्वादालस्ययुक्तः ब्रह्मेव ब्राह्मण इति। अथापि तद्धितार्थे भाष्यत इति 307/1973
या त्वमनुष्ठत्यं तंद्रयुत्वमित्युक्तं। अथ वा यागादिकर्मपरित्यागेनालस्यमिव नास्तिको ब्राह्मण इव त्वं। मो षु भुवः सु मा भ
वः। सर्वदा अस्मत्कर्मरतो भव त्वा संशासनं। तदेवाह सुतस्याभिषुतस्य गोमतो गव्येन क्षीरेण दध्ना वा मिश्रणवतः। सोमस्य
पानेन मत्स्व माद्य हृष्टो भव॥ ॥द्वितीयतृचे प्रथमा॥ इंद्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः॥ रथीतमं रथीनां वाजानां सत्पतिं
पतिमिति॥ विश्वाः सर्वा गिरोस्मदीयाः स्तुतयः इंद्रमवीवृधन्वर्धितवत्यः। वृधेर्णिचि चङि उरृदित्यनुवृत्तौ नित्यं छंदसीति ऋकार
स्य ऋकारविधानाल्लघूपधगुणाभावः। निघातस्वरः। कीदृशमिंद्रं समुद्रव्यचसं समुद्रवद्व्याप्तवंतं रथीनां रथयुक्तानां योद्धॄ
णां मध्ये रथीतममतिशयेन रथयुक्तं वाजानामन्नानां पतिं स्वामिनं सत्पतिं सतां सन्मार्गवर्तिनां पालकं पत्यावैश्वर्ये इति पूर्वप
दप्रकृतिस्वरत्वं॥ ॥अथ द्वितीया॥ सख्ये त इंद्र वाजिनो मा भेम शवसस्पते॥ त्वामभि प्रणोनुमो जेतारमपराजितं इति। हे सव

सस्यपालके इंद्र ते तव सख्ये अनुग्रहप्रयुक्ते सख्ये वर्तमाना वयं वाजी। त्वाम्नयंत भिता मा भेम॥ शत्रुभ्यो भीतिं प्राप्ता मा भूम अत
३८ स्त्वाम जयाम हनुं अजितम्। तान् सः सर्वतः प्रकार्षेण यमः गुणकेनाणाम्न इति नत्वं। यङ्लुकु। प्रत्ययलक्षणेन यन्यङ्डारिति द्विर्भा
वगुणाय ऊलुकोरित्यभ्यासस्य गुणः प्रत्ययलक्षणेनः। नुसंज्ञायां लिटो मसो अ दादिश्व द्वाचोछायालुकु। कीदृशं त्वां जेतारं युधे पुज
यशीलं अपराजितं कापि पराजयरहितं। प्रणोनुमः प्रणोनुम इति पाठो॥ ॥अथ तृतीया॥ पूर्वीरिंद्रस्य रातयो न वि दस्यंत्यूतयः।
यदा वाजस्य गोमतः स्तोतृभ्यो मंहते मघमिति। इंद्रस्य संबंधिन्यो रातयो धनदानानि पूर्वीः अनादिकालसिद्धाः। प्रभूता वा अ
स्येंद्रस्य सर्वदा यथा स्याद्धनदानमवश्यंभावमित्यर्थः एवं सति इदानींतनोपि यजमानस्तोतृभ्यो ऋत्विग्भ्यो गोमतो गोसहितस्य ३८
वाजस्यान्नस्य पर्याप्तं समर्थं धनं यदा मंहते दक्षिणारूपेण ददातीति तदानीं अतो याबहुधनदानं पूर्वं कर्णोतीत्यस्मात् द्विप्रयाणि रक्ष
णानि न विदस्यंति विशेषेण नोपक्षीयंते। नेयरायदीति पाठो। सं घोरक्त इत्यादि षष्टाविंशति संख्याकेषु धननामसु मंघशब्दः

पठितः। रातिः दाशतीत्यादिषु दत्सु दानकर्मसु मंहतेः पठितं। पूर्वीः पुरुशब्दस्य वोतोगुणवचनादिति ङीष्। अवस्योकारस्य 309/1973
दीर्घ छांदसः। जसि दीर्घात् जसि चेति निषेधं बाधित्वा वा छंदसीति पूर्वसवर्णदीर्घत्वं। ङीषः प्रत्ययस्वरेणोदात्तत्वं। रातयः मं
त्रे वृषेषु पचमनविदभूवीरा उदात्त इति क्तिन उदात्त इति क्तिन उदात्तत्वं। दस्यंति दस उपक्षये दिवादिभ्यः श्यन् निघातः अय
तः अतिपूर्वात्यादिनात् किंतु दातः। यदा निपातत्वाद्यत् किंदातः। स्तोतृभ्यः ऊअस्तोधनत्वादेशः परस। स्वाश्चित्वादंतोदात्तत्वं। मंहते
इयपः पितादनुदात्तत्वात् तिङ्श्च लसार्वधातुकस्वरेणातिङः इति निघातो न यद्वृत्तान्नित्यमिति निपाते यदादिं तानिषेधात्॥ ॥इति तृ
तीया॥ चतुर्थः खंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥ इति श्रीम
हाराजाधिराजवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थ
प्रकाशे उत्तरार्धग्रंथे तृतीयोध्यायः॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

॥ ॥अथ चतुर्थोध्याय आरभ्यते॥ तत्र प्रथमवर्गे एते असृग्रमिति प्रथमा ऋक्॥ एते असृग्रमिंदवस्तिरः पवित्रमाशवः॥
३० विश्वान्यभिसौभगा॥ तिरः पवित्रं तिर्यगंचितं दशापवित्रं प्रति आशवः शीघ्रगामिनः एते पवमाना इंदवः सोमाः विश्वानि स
र्वाणि सौभगा सौभगानि धनान्यभिलक्ष्य असृग्रं ऋत्विग्भिः सृज्यंते। अथ द्वितीया॥ विघ्नंतो दुरिता पुरु सुगा तोकाय वाजिनः
॥ तना कृण्वंतो अर्वते॥ वाजिनो बलवंतः सोमाः पुरु बहूनि दुरिता दुरितानि विघ्नंतो विशेषेण नाशयंतः मा तोकाय अस्माकं पु
त्राय सुगानि सुखरूपाणि धनानि धारयंतोर्वतेश्वाय तनात्मनास्वयमेवतत्कुर्वंतः। इहत इत्यर्थः ऋत्विग्भिः सृज्यंत इति पूर्वेण संबंधः
। तना तनोतिपाठः॥ अर्वतार्व इति च॥ ॥अथ तृतीया॥ कृण्वंतो वरिवो गवेभ्यर्षंति सुष्टुतिं। इडामस्मभ्यं संयतमिति॥ सो ३०
माः अस्माकं गावः अस्मभ्यं च संयतं तत् अस्मान् संयच्छति। तद् वरिवो धनं इडामन्नं च तत् एवं ते कुर्वंतः सुष्टुतिं अस्मदीयशोभ
नां स्तुतिं अभ्यर्षंति आभिमुख्येन गच्छंति॥ ॥अथ द्वितीयवर्गे प्रथमा॥ राज्ञो मेधाभिरीयते पवमानो मनावधि॥ अंतरि

क्षेण यातव इति॥ मनौ मनुष्ये यागं कुर्वाणे सति। यद्वा मनाम यजि मनुर्मनुष्यो यज्ञः तस्मिन् पवमानः हूयमानः पुनानो धारा राज
त्वशब्दात् सोमोभिधीयते। सोमं राजानमवरुणमग्निम् इत्यादिषु दृष्टत्वात्। स राजा सोमः मेधाभिः स्तुतिभिः ईयते गच्छति कुर्वन् अंतरिक्षेण आका 311/1973
शमार्गेण द्रोणकलशं प्रति यातवे यातुं। द्रोणाभिगमनकाले हि स्तोतृभिः स्तूयते खलु॥ ॥अथ द्वितीया॥ आ नः सोम सहो जुवो
रूपं न वर्चसे भर॥ सुष्वाणो देववीतय इति॥ हे सोम देववीतये देवानां पानाय देवानां कामाय वा सुष्वाणः अभिषुतो बलं सह
जुभिभवनसमर्थं बलं जुवः जु इति गत्यर्थः। ज्रूस्मतिरौप्यगमनं चाय ह्वान्वितागमनरीतिलंबलानेति चार्थो विज्ञोसवर्च
दीप्तौ। दीप्त्यै सर्वस्य प्रकाशनाय रूपं च नो अस्मभ्यम् आभर आहर प्रयच्छ॥ ॥अथ तृतीया॥ आ न इंदो शतग्विनं गवां पोषं स्वश्व्यं॥
वहा भगत्तिमूतय इति। हे इंदो सोम पानेन बुक्षरणशील दीपनशील वा हे सोम शतग्विनं शतसंख्याकाभिर्गोभिर्युक्तं। गवां
पोषं गवादीनां पुष्टिवर्धनं स्वश्व्यं। शोभनाश्वसंघसहितं भगत्तिं भगदत्तिं भजनीयधनदानं च अत ऊतये रक्षणाय नोस्मा

कं आवहत्राप्तय । गवादींश्च तेषां च वृद्धिं प्रयच्छेत्यर्थः ॥ ॥ तंत्वान्नृम्णानीति पंच चैतस्यां सूक्तं तत्र प्रथमा ॥ तं त्वा नृम्णानि विभ्रतं सध
४० स्थेषु महो दिवः ॥ चारुं सुकृत्ययो मह इति ॥ महो दिवः ॥ महतो द्युलोकस्य सधस्थेषु स्थानेषु स्थितं नृम्णानि धनानि बिभ्रतं अ
स्मदर्थं धारयंतं चारुं कल्याणं हे सोम तं त्वा हर्षं पवमान लक्षणं त्वा त्वां सुकृत्यया शोभनकर्मणा यथा याईमहे धनानि याचामहे ॥ ॥ अथ द्वि
तीया ॥ संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं ॥ शतं पुरो रुरुक्षणिमिति ॥ हे सोम संवृक्तधृष्णुं संवृक्ताः संछिन्ना धृष्णवो धर्षणशीलाः श
त्रवो येनासौ संवृक्तधृष्णुस्तं ॥ उक्थ्यं उपगाई प्रशस्यं महामहिव्रतं महदनीय बहुकर्माणं । मदं मदकरं । शतं बहूनि पुरः शत्रूणां पुरा
णि रुरुक्षणिं विनाशयंतं त्वां धनानीमह इति संबंधः ॥ ॥ अथ तृतीया ॥ अतस्त्वा रयिमभिराजानं सुक्रतो दिवः ॥ सुपर्णो अव्यथिर्भरत ४०
इति । हे सुक्रतो शोभनकर्मन पवमान सोम रयिमभि धनं प्रति राजानं त्वां आत दिवो अमुष्मात द्युलोकात अव्यथी अव्यथारहितः
सुपर्णः श्येनः भरत आहरत । तथा च श्रूयते ॥ आदाय श्येनो अभरत्सोममिति अव्यथी । अव्यथिरिति पाठे ॥ ॥ अथ चतुर्थी

अधा हिन्वान इंद्रियं ज्यायो महित्वमानशे ॥ अभिष्टिकृद्विचर्षणिः इति । अधा अथ विचर्षणिः कर्मणां विद्रष्टा । अभिष्टिकृत यजमानानां अ
भीष्टफलस्य कर्ता सोमः इंद्रियं स्वकीयं बलं हिन्वानः प्रेरयन ज्यायः प्रशस्यतरं महित्वं महत्वमानशे प्राप्नोति ॥ ॥ अथ पंचमी ॥ विश्वस्मा 313/1973
इत्स्वर्दृशे साधारणं रजस्तुरं ॥ गोपामृतस्य विर्भरत ॥ इति ॥ रजस्तुरं उदकस्य प्रेरकं ऋतस्य यज्ञस्य गोपां गोपयितारं विश्वस्मै सर्वस्मै स्व
र्दृशे देवाय साधारणमितमानमेवसंतं सोमं विपक्षी श्येनो भरत स्वर्गादाहरत ॥ ॥ अथ तृचात्मके चतुर्थसूक्ते प्रथमा ॥ इषे पवस्व धा
रया मृज्यमानो मनीषिभिः ॥ इंदो रुचाभिगा इहीति ॥ हे इंदो सोम मनीषिभिर्ऋत्विग्भिः मृज्यमानः शोध्यमानः त्वं इषे अस्माकमन्नाय
धारया पवस्व क्षर ॥ रुचा रोचमानेन तेजसा गाः पशून अभि इहि अभिगच्छ ॥ ॥ अथ द्वितीया ॥ पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ॥ हे
रे सृजान आशिरमिति ॥ हे गिर्वणः गीर्भिर्वननीय हरे हरितवर्ण सोम आशिरं क्षीरं प्रति सृजानो विसृज्यमानः पूयमानस्त्वं जनाय
जनार्थं वरिवो धनं ऊर्जं अन्नं च कृधि कुरु ॥ ॥ अथ तृतीया ॥ पुनानो देववीतय इंद्रस्य याहि निष्कृतं ॥ द्युतानो वाजिभिर्हित इति ॥

हे सोम वाजिभिः हविर्लक्षणान्नयुक्तैर्यजमानैः सद्भिः कृतानो दीप्यमानः देववीतये यज्ञार्थं पुनानः पूयमानः हितः हितकरः त्वं इन्द्रस्य निष्कृ
४१ तं स्थानं याहि गच्छ गृहतो यत इति पाठो ॥ ॥ इति चतुर्थाध्यायस्य प्रथमः खंडः ॥ द्वितीयखंडे प्रथमतृचे प्रथमा ॥ अग्निनाग्निः समिध्यते
कविर्गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्य इति । अग्निराहवनीयाख्यः स्वस्मिन्प्रक्षिप्यमाणेनाग्निना निर्मथ्येन प्रणीतेन वा सह समिध्यते
सम्यग्दीप्यते । कीदृशोऽग्निः कविर्मेधावी गृहपतिर्यजमानगृहस्य पालकः युवा नित्यतरुणः हव्यवाड् हवींषि वोढा वहतेर्वहश्चेति ण्वि
प्रत्ययः ॥ णिचादपधाया वृद्धिः । गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं जुह्वास्यः । जुहूरूपेण मुखेन युक्तः । हूयते अनयेति जुहूः ।
हुयश्चेति क्विप् ॥ तत्सन्नियोगाद्दीर्घश्च श्रुवद्भावात् द्विर्भावः शब्दजत्वे प्रातिपदिकस्वरेणान्तोदात्तः । जुहूरास्यं यस्येति बं
हुव्रीहौ । पूर्वपदप्रकृतिस्वरत्वे तस्य चाद्युदात्तत्वे शेषनिघातः यणादेशे उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्याकारः स्वरितः ॥ ॥ ४१
अथ द्वितीया ॥ यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ॥ तस्य स्म प्राविता भव ॥ इति । हे अग्ने देव यो हविष्पतिर्यजमानः देव दूतं

त्वां सपर्यति परिचरति । तस्य यजमानस्य प्राविता भव स्म अवश्यं रक्षको भव । हूयत इति हविः । आर्चिः शुचीत्यादिना इसिः प्रत्यय
स्वरेण इकार उदात्तः हविषः पतिः हविष्पतिः नित्यं समास उत्तरपदस्थस्येति षत्वं ॥ पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । सप 315/1973
र्यति । सपर इत्यस्मात् कण्ड्वादिभ्यो यगिति यक् ॥ धातुत्वे सति अतो लोप इति लोपः सनाद्यन्ता धातव इति धातुसंज्ञायां तिपा कर्तरि श
प् । तस्मिन्पूर्वस्यातो गुण इति पररूपत्वं यकः प्रत्ययस्वरेणोदात्तत्वं । शपा सह एकादेश उदात्त इत्युदात्तत्वं । तिङ्ङतिङः इति निघातो न
भवति यद्वृत्तान्नित्यमिति प्रतिषेधात् ॥ ॥ अथ तृतीया ॥ यो अग्निं देववीतये हविष्मां आविवासति ॥ तस्मै पावक मृळय ॥ इति । हवि
ष्मान् हविर्युक्तो यो यजमानो देववीतये देवानां हविर्लक्षणान्नभक्षणार्थं अग्निमाविवासति । अग्नेः समीपे निक्षेपणात्परिचर्यां क
रोति । हे पावक शोधकाग्ने तस्मै मृळय तं यजमानं सुखय । देववीतये । वी गतिप्रजननकान्त्यसनखादनेष्वित्यस्माद्भावार्थे क्तिन् । देवानां वी
तिर्यस्मिन्यागे स देववीतिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ न लुगिषयस्यानिसन्तस्येति पर्युदासात् हविःशब्दोऽन्तोदात्तः मतुपः

४२ सर्वानुदात्तत्वात् एव निघात्यते। आविवासत विवासतिर्गंधनायाः। अस्मादंतर्भावितण्यर्थाल्लोट् आगमयतिमिच्छतित्यर्थे लिन। आह्वाने छा
परिचर्यायां पर्यवस्यतीति विवासतिशब्दः परिचर्यार्थे निघंटौ पठितः। द्विर्भावः। अभ्यासस्य ह्रस्वः। सन्यतः इतीत्वं। तित्याद्विनि
त्यमित्याद्युदात्तत्वं तिङ्ङतिङः इति निघातो भवति यद्वृत्तान्नित्यमिति प्रतिषेधात्। तिङ्चो दात्तवतीत्यादिना घातः। स ह समपल्य बस
ह योगविभागाद्बहुव्रीहिः स ह समासे समासांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युक्तत्वाद्धांतोदात्तत्वं। तस्मै क्रियाग्रहणं क
र्तव्यमिति संप्रदानत्वाच्चतुर्थी॥ ॥ अथ द्वितीयतृचे प्रथमा॥ मित्रं हुवे पूतदक्षं वरुणं च रिशादसं। धियं घृताचीं साधंतेति। अ
हमस्मिन्कर्मणि हविः प्रदानाय पूतदक्षं पवित्रं बलं मित्रं हुवे आह्वयामि। ह्वयतेर्व्यत्ययः बहुलं छंदसीति शपो लुक्सातेः संप्रसारणमिः ४२
त्यनुवृत्तौ बहुलं छंदसीति संप्रसारणे उवङादेशः। तिङ्ङतिङः इति निघातः। तथा रिशादसं। रिशानां हिंसकानां अदसमत्तारं व
रुणं च हुवे कीदृशौ मित्रावरुणौ घृताचीं घृतमुदकं अंचति भूमिं प्रापयति। या धीयं वर्षणकर्मणा तां घृताचीं धियं साधंता

साधयंतौ। राधसाधसंसिद्धावित्यस्मादंतर्भावितण्यर्थाल्लटः शत्रादेशे शपि नं बाधित्वा व्यत्ययेन शपः। अदुपदेशत्वात् लतुपरि
शत्प्रत्ययस्य लसार्वधातुकानुदात्तत्वं। द्वितीयाद्विवचनस्य डादेशश्चानुदात्तौ सुप्पितावित्यनुदात्तत्वं। धातोरिति धातुस्वर एवशिष्य
ते सुपां सुलुगित्यादिना विभक्तेराकारादेशः॥ ॥अथ द्वितीया॥ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा॥ क्रतुं बृहंतमाशाथे इति।
हे मित्रावरुणौ मित्रश्च वरुणश्चेति मित्रावरुणौ देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः॥ तादृशौ युवां क्रतुं प्रवर्तमानमिमं सोमयां
गं आशाथे अनाशाथे। व्याप्तवंतौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। नुडभावश्छांदसः। केन ऋतेन अवश्यंभावितया सत्ये
न फलेन अस्मभ्यं फलदातुमित्यर्थः। कीदृशौ युवां ऋतावृधौ ऋतमिति उदकनामसु सत्यं वा यज्ञं वेति यास्कः। उदकादीनामन्यत
मस्य वर्धयितारौ। अतएव ऋतस्पृशा उदकादीन् स्पृशंतौ। कीदृशं क्रतुं बृहंतं च अंगैरुपांगैश्चातिप्रौढं॥ ॥अथ तृतीया। कवी
नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसमिति॥ मित्रावरुणावेतौ देवौ नोस्माकं दक्षं बलं अपसं कर्म च दधाते पो

317/1973

षयतः। कविदृशौ कवी मेधाविनौ तुविजातौ बहूनामुपकारकतया समुत्पन्नौ उरुक्षया बहुनिवासौ मित्रावरुणौ। मित्रशब्दः प्रातिपदिकस्वा
४३ रणं॥ तोदात्तः वरुणशब्दो निश्वरेणाद्युदात्तः। तुविजातौ बहूनामुपकारितया तत्संबंधित्वेन जातावति षष्ठीसमासः समासांतोदा
त्तत्वं। चतुर्थ्यसमासे हि कृत्ये चेति पूर्वपदप्रकृतिः स्वरः स्यात्। उरु बहूनां क्षया उरुक्षयौ क्षि निवासगत्योरिति धातोः क्षियंत्यस्मिन्नि
ति क्षय इत्यधिकरणे एरजित्यच प्रत्ययांतस्याचिन इत्यंतोदात्तत्वे प्राप्ते क्षयो निवास इत्याद्युदात्तत्वं विहितं। समासे नु समासस्य
त्यंतोदात्तत्वं बाधित्वात्तदुत्तरपदप्रकृतिस्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं। यद्यपि थाथादिस्वरेणांतोदात्तत्वं न बाध्यते॥
तथापि परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं द्रष्टव्यं। दृक्षो दृक्षतेरश्याद्यकर्मणो घञित्वादाद्युदात्तः। अप्यतेरुक ४३
रुमनेन त्यपः कर्म आपः कर्माख्यायां ह्रस्वो नुट् च वेत्यसुनंतस्य आपसस्य रत्यादौ नित्वादाद्युदात्तस्य प्यसशब्दस्याप्र
त्ययेन प्रत्ययाद्युदात्तत्वं॥ ॥अथ तृतीयऋचप्रथमा॥ इंद्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मंदू समानवर्चसा।

हे मरुद्गण त्वं इंद्रेण संजग्मानः संगच्छमानः संदृक्षसे हि सम्यग्दृश्येथाः खलु अवश्यमस्माभिर्द्रष्टव्य
इत्यर्थः। कीदृशेनेंद्रेण अबिभ्युषा भीतिरहितेन कीदृशाविंद्रमरुतौ मंदू नित्यमुदितौ समानवर्चसा तुल्यदीप्ती पु 319/1973
रा कदाचिदिंद्रो वृत्रवधदशायां इंद्रस्य सखायः सर्वे देवाः वृत्रश्वासेन प्रसारितास्तदानीमिंद्रस्य वृत्रसंबंधिसकलशत्रुजयार्थं
मरुद्भिः संगमोऽभूत्। सोऽयमर्थो वृत्रस्य त्वा श्वसथादिति मंत्रे संगृहीतः। इंद्रो वै वृत्रं हनिष्यन्निति ब्राह्मणे प्रपंचितस्य। इंद्र
शब्दः परमैश्वर्यवंतं मरुद्गणं चाभिधत्ते तदानीमिंद्रस्य संबोधनं बहिरेवाध्याहर्तव्यं। तथा च यास्कः यास्केनैवं व्याख्या
ता इंद्रेण हि संदृश्यसे संगच्छमानो बिभ्युषा गणेन मंदू मदिष्णू युवां स्थोऽपि वा मंदुना तेनेति स्यात् समानवर्चसेत्येतेनैव
व्याख्यानमिति। संदृक्षसे संदृश्येथाः। दृशेश्चेति वक्तव्यमित्यात्मनेपदं॥ दृशेर्लिङर्थे लेट् इति प्रार्थनायां लेट् थासः से
लेटोऽडाटावित्यडागमः सिब्बहुलं लेटीति सिप्। संज्ञापूर्वको विधिरनित्य इति गुणाभावः। व्रश्चादिना षत्वं। षढोः कः सीति

४४ कत्वं। आदेशप्रत्यययोरिति सिषः षत्वं। बहुलं छंदसीति इणातसिपः परस्मा छवपि भवति।। पिण्व्यव धानात पश्चादोऽनभवाति
शपः पित्वादनुदात्तत्वं। उत्तरस्यासार्वधातुकानुदात्तत्वं। धातुस्वर एव शिष्यते। दृशिश्चाय्यामातिङ्तिङ इतीति घातोनभयति दिवे
तिप्रतिषेधात्।। संजग्मानः गमेः संपूर्वाच्छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। समो गम्यृच्छीत्यात्मनेपदविधानात् लिटः कान
जादेशः द्विर्भावो हलादिः शेषोऽभ्यासस्य चुत्वं। गमहनेत्युपधालोपः। कानचश्चित्वादन्तोदात्तत्वं। गतिसमासेतदुत्तरपदप्रकृ
तिस्वरत्वं। अबिभ्युः बिभीभये भाव्यपूर्वे लिट्। उषात्कर्तरीति परस्मैपदं। कुसश्चेति लिटः। उसारादेशः तस्य कित्वाद्गुणाभावः
द्विर्भावः अभ्यासस्य ह्रस्वत्वं श्चुत्वं हशिनियमात्। प्रापह इव स्वकाज्ञा यसामितिनिषमान्निवर्तनेन जसमासेत् तीयेकवच ४४
ने भत्वात् वसोः संप्रसारणमिति वकारस्य उकारादेशः संप्रसारणाच्चेति पूर्वरूपत्वं। शासिवसिघसीनां चेति षत्वं। इयङादे
शं बाधित्वा एरनेकाच इति यणादेशः।। अभ्ययपूर्वपदप्रकृतिस्वरत्वं पूर्वेणोस हसंहिताया माकारस्य एङः पदांतादतो

तिपरपूर्वत्वात्प्रत्याप्रत्यांतः पादमध्यपर इति प्रतनिभानः मंदूमो दस्रातिमोदयमं दस्त्रस्यत्रया तिगतिषु। उदितो नुम धातोरिति नुमा
गमः कृरित्यनुदात्तो नरशंकु पायुर्नतंगु लिग्विमयोः पूर्वसवर्णः तृतीये कवचने चेत कर्पा सकलुगित्यादिना पूर्वसवर्णदीर्घत्वं समा
नं वर्चोय योरिति वाय्यस्योतिव दुर्ग्राहिः। द्विवचने कर्पासहुगित्याकारः। समानपदस्य प्रातिपदिकां तोदात्तत्वं। बहुव्रीहौ पूर्वप
दप्रकृतिस्वरेण तदेवावशिष्यते।। ।।अथ द्वितीया।। आदह स्वधामनु पुनर्गर्भत्वमेरिरे।। दधानानाम यज्ञियमिति। आदित्य
यमानंतर्यार्थो निपातः। अ इत्यवधारणार्थः। आद ह यवीतैरनंतरमेव स्वधामनु इतः परं ज्ञानिष्यमाणं मंनमुदकं वानुलक्ष्य
मरुतो देवा गर्भत्वमारिरे मेघमध्ये जलस्य गर्भाकारं प्रेतिरितवंतः प्रतिसंवत्सरमेवं कुर्वंतीति दर्शयितुं पुनः शब्दः प्रयुक्तः
कीदृशा मरुतः यज्ञियं यज्ञार्हं नामद धानाधारयंतः सत्यकारणेषु मरुतामाहृङ्चेत्यादि नियज्ञयोग्यानि नामान्यन्यत्राम्नाता
नि। अधइत्यादिषु द्वाविंशतिसंख्याकेषु नंनाम सकजर्करसः श्य इति पठितं। अर्ण इत्यादिषु कुशलसंख्याकेषूदकनामसु

321/1973

४५

तेऽः स्वधा अक्षरमिति पठितं आत अह्ननिपातावाद्युदात्तौ स्वधार्थं को कं दधातिपुस्मात्ती तिस्वधा। तानुपसर्गेकिः। तदुत्तरपद
प्रकृतिस्वरत्वं अनु पुनः ग्राब्दो निपातावाद्युदात्तौ गर्भस्य भावो गर्भत्वं प्रत्ययः स्वरः एरिरे अंतर्भावितण्यर्थादीरगताविल्य
स्मादनुदात्तेतः परस्य लिटो रूस्य इति रच्। चिन्नादं तो दात्तः ससहूस्य पत्यत्र सपति योगविभागाद्ध्रस्सहूतिङः समासस्वेत्यं
तोदात्तत्वं। उशीदेश्च गुरुमतोनृच्छ इत्याम्भवति मंत्रत्वात्। अहशब्दयोगान्निघाताभावः। नुपश्यपश्यता हे पृज्ञात्यामितिनिषे
धात्तदधाना ः।शानच्शित्वादंतोदात्तत्वप्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वं। यज्ञमर्हतीति यज्ञियं। यज्ञर्त्विग्भ्यांघखञाविति
घप्रत्ययः। आयिनेयीनीयियः फढखछघां प्रत्ययादीनामितीयादेशः प्रत्ययस्वरेण इकार उदात्तः॥ ॥ अथ तृतीया। बीळु ४५
चिदारुजत्नुभिर्गुहाचिदिंद्र यन्हिभिः। अविंद उस्रिया अनु॥ इति। अस्ति किंचिदुपाख्यानं पणिभिर्देवलोकाद्गावोपहृताः अं
धकारे प्रक्षिप्तास्तासार्थं इंद्रो मरुद्भिः सहाजयदिति। एतच्च बह्वृचानुक्रमणिकायां सूचितं। पणिभिरसुरैर्निगूढा गा अन्वेष्टुं स

रमा देवशुनी इंद्रेण प्रेषिता तासामृग्भिः पणयो मित्रीयंतः प्रोचुरिति मंत्रांतरेपि दर्शनत्तया सूचितं। निरुक्षा आयः पणिनेवगा इ
तितदेतदुपाख्यानमभिप्रेत्योच्यते॥ हे इंद्र वीळु चित् दृढमपि दुर्गमस्थानं आरुजत्नुभिर्भंजनशीलैर्वह्निभिर्वोढृभिः अन्यत्र
नेतुं समर्थैः मरुद्भिः सहितस्त्वं गुहाचित् गुहायामपि स्थापिता उस्रिया गा अन्वाविंदः। अन्विष्य लब्धवानसि। अजः पात इत्यादिष
ण्णवं जाति संख्याकेषु वळुनाम सु दृढः वीळु च्यौत्नमिति पठितं। नत्व संख्याकेषु गोनाम स्वाप्रियाउस्रा उस्रियेति पठितं विदुजाति
पादिकस्वरः चिदात्रिरनुदात्तः आरुजत्नुभिः रुजो भंग इत्यस्मात्सोणादिकः क्नुच प्रत्ययः कित्वाद्गुणाभावः चित्वादंतोदात्तत्वं। स
मासेतदुत्तरपदप्रकृतिस्वरत्वं। गुहासमभ्या डादेशः यामादीनांचेत्याद्युदात्तः। वह्निभिः वहिश्रियुश्रुग्लाहात्वरिभ्यो निरितिच
हेर्निप्रत्ययः। नित्वाद्दाद्युदात्तः अविंदः इगमुपादीनामिति नुमागमः। लुङ् लङ् लृङ्क्ष्वडुदात्तः। वसंतीति उस्रियाः। बसोकर्त
रियक प्रत्ययः। पत्वाभावश्च बाहुलकाद्हनीयः। उक्तंहि यंनपदार्थविपर्यसमुच्छ्र प्रत्ययतः प्रततेश्चतद्दामिति इकारः प्रत्य

323/1973

यस्वरेणोदात्तः॥ ॥अथ चतुर्थतृचे प्रथमा॥ ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतं॥ इंद्राग्नी न मर्धत इति॥ तत्तौ ता हुवे आह्वये इंद्राग्नी हुवे
४६ आह्वये ययोरिंद्राग्न्योः पुरा पूर्वस्मिन् काले तत् विश्वं सर्वं इदं पूर्वोक्तं कीर्तितं वीर्यं पप्ने पप्रथे ऋषिभिः स्तूयते ता तौ इंद्राग्नी हुवे इ
त्यन्वयः। तौ चेंद्राग्नी न मर्धतः न हिंस्तः हिंसा कुर्मा स्तोतृन्नाहिंस्तः। अतोस्मानप्याहूतौ रक्षतामिति भावः॥ ॥अथ द्वितीया॥ उग्रा वि
घनिना मृध इंद्राग्नी हवामहे॥ ता नो मृळात ईदृश इति॥ उग्रा उग्रौ उद्गूर्णबलौ। अत एव मृधः शत्रून् विघनिनौ विशेषेण हंतारौ तौ
इंद्राग्नी हवामहे आह्वयामहे तौ चेदं इंद्राग्नी ईदृशे अस्मिन् संग्रामे नोस्मान् मृळातः सुखयतां। यद्वा मृळातिः उपदयाकर्मा नोस्माकं मृळातः
उपदयां कुरुतां॥ ॥अथ तृतीया॥ हथो वृत्राण्यार्या हथो दासानि सत्पती॥ हथो विश्वा अप द्विष इति॥ हे इंद्राग्नी आर्या आर्यौ कर्मानु
ष्ठानवद्भिः वृत्राण्युपद्रवजातानि सत्पती। हथः हिंस्थः तथा सत्पती सतां पालयितारौ सन्तौ दासानि दासाः कर्महीनाः उपक्षयितारः तत्तानि चो ४६
पद्रवजातानि हथः॥ अपि च विश्वाः सर्वा द्विषः द्वेष्ट्रीरनुभूताः प्रजा अप हथः विनाशयथः अतोस्माकमाणकर्मेव कुरुतामिति भावः॥

हथो हथ इति पाठो॥ ॥इति चतुर्थाध्यायस्य द्वितीयः खंडः॥ अथ तृतीयखंडे प्रथमतृचे प्रथमा॥ अभि सोमास आयवः पवंते म
द्यं मदं॥ समुद्रस्याधि विष्टपो मनीषिणो मत्सरासो मदच्युत इति। आयवः गमनशीलाः सोमासः सोमाः मद्यं मदकरं मदं आत्मी
यं रसमभिपवंते। अभितो निर्गमयंति कुत्रेत्यत्राह समुद्रस्य अंतरिक्षस्य अधि विष्टपे अधिकं समुच्छ्रितप्रदेशे पवित्रे। यद्वा समुद्र 325/1973
स्य यस्मात्समुद्रवंति रसास्तस्य कलशस्य अधि उपरि विष्टपे स्थाने पवित्रे निर्गमयंति कीदृशा मनीषिणः मनस ईशितारो म
त्सरासः मदकराः मदच्युतः मदस्राविणः विष्टपे विष्टभ इति पाठो। मदच्युतः स्वर्विद इति॥ ॥अथ द्वितीया॥ तरत्समुद्रं
पवमान ऊर्मिणा राजा देव ऋतं बृहत्॥ अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् इति॥ पवमानः पूयमानः देवो द्यो
तमानः बृहत् अत्यंतं सत्यभूतः राजा सोमासः समुद्रं अंतरिक्षं कलशं वा ऊर्मिणा धारया तरत् तरति हिन्वानः प्रेर्यमाणः
ऋतं बृहत् अत्यंतं सत्यभूतः स सोमः मित्रस्य वरुणस्य मित्रावरुणयोः धर्मणा धारयार्थं प्रार्ष प्राप्नोति प्रकर्षेण गच्छति। अ

र्षाअर्षादितिपाठो॥ ॥अथआध्यायस्याष्टपात्तृतीया॥नृभिर्येमाणोहर्यतोविचक्षणोराजादेवःसमुद्रियः॥इति। नृभिःकर्म
५७ नेतृभिर्ऋत्विग्भिर्येमानोनियम्यमानहर्यतःस्पृहणीयःविचक्षणोविद्रष्टादेवोदीप्यमानःसमुद्रःअंतरिक्षेभवःराजासो
मः इंद्रार्थंपवतइतिशेषः।येमाणोयेमानइतिपाठो॥ ॥अथद्वितीयतृचेप्रथमा॥तिस्रोवाचईरयतिप्रवह्निर्ऋतस्यधीतिंब्रह्मणो
मनीषां॥गावोयंतिगोपतिंपृच्छमानाःसोमंयंतिमतयोवावशानाः॥इति॥वह्निर्वोढायजमानःतिस्रोवाचःऋग्यजुःसामात्मि
काःस्तुतीःप्रेरयति।तथाऋतस्ययज्ञस्यधीतिंधात्रींब्रह्मणःपरिवृढस्यमनीषांमनसईशित्रींकल्याणींवाचंचप्रेरयति॥
किंचगोपतिंवृषभंयथागावोभिगच्छंतितद्वत्गवांस्वामिनंसोमंगावःपृच्छमानाःपृच्छंत्यःमत्योयंतिस्वपयसाभिश्रयितुंअभि
गच्छंतितथावावशानाःकामयमानामतयस्तोतारश्च।सोमंयंतिस्तोतुमभिगच्छंति॥ ॥अथद्वितीया॥सोमंगावोधेनवोवावशा ५७
नाःसोमंविप्रामतिभिःपृच्छमानाः॥सोमःसुतस्तूयतेपूयमानेसोमेअर्कास्त्रिष्टुभःसंनवंते॥इति॥धेनवःप्रीणयित्र्योगावः

सोमंवावशानाःकामयमानाअभवंतिविप्रामेधाविनःस्तोतारःमतिभिःस्तुतिभिःपृच्छमानाःपृच्छंतोभवंतिसुतोभिषुतःसोमःपूयमा
नऋत्विग्भिर्ऋच्यतेक्षरतितथात्रिष्टुभःत्रिष्टुप्रूपाःअर्काअस्माभिःक्रियमाणाएतेमंत्राःसोमेसंनवंतेशब्दायंते।सोमःसुतःपूय
तेपूयमानइतिच्छंदोगाः।सोमःसुतःपूयतेअज्यमानइतिबह्वृचाः॥ ॥अथतृतीया॥एवानःसोमपरिषिच्यमानआपवस्वपूय
मानःस्वस्ति॥इंद्रमाविशबृहतामदेनवर्धयावाचंजनयापुरंधिमिति॥हेसोमपरिषिच्यमानःपरितःपात्रेषुसिच्यमानःपूयः
मानस्त्वंनोस्माकमेवस्वस्ति॥अविनाशंआपवस्वाप्रापय॥किंचबृहतामहतामदेनमदकारिणारसेनसहइंद्रमाविशप्रविश।तथा
वर्धयावाचंस्तुतिलक्षणांप्रसिद्धांकुरु॥किंचपुरंधिंबहुधियंप्रज्ञामंजनयअस्मभ्यमुत्पादय॥वाक्यभेदादनिघातः॥इति ३२७/१९७३
चतुर्थाध्यायेतृतीयखंडः॥ ॥अथचतुर्थखंडेप्रगाथरूपप्रथमसूक्तेप्रथमा॥यद्यावइंद्रतेशतंशतंभूमीरुतस्युः॥नत्वावज्रि
न्सहस्रंसूर्याअनुनजातमष्टरोदसी॥इति॥हेइंद्रतेतवप्रतिमानार्थंद्यावोद्युलोकाःशतंस्युस्तथापिनस्युर्भवंति।शतापिचभू

मीभूम्यः तेतयमूर्तिप्रतिबिंबायन्नातंस्यस्तथाविनाश्नुवंति। हेवज्रिन्नत्वात्वांसहस्रंसूर्याः अगणिताअपिसूर्याः नानुभवंतिनप्रकाशयं
५८ तीत्यर्थः नतत्रसूर्योभातीतिश्रुतेः। किंबहुनाजातंपूर्वमुत्पन्नंनाकंत्वतामनुनाष्टनाश्नुते। तथारोदसीद्यावापृथिव्यौनाश्नुवातेसर्व
म्यातिरिच्यतइत्यर्थः। ज्यायान्पृथिव्याज्यायानंतरिक्षाज्यायान्दिवोज्यायानेभ्योलोकेभ्यइतिश्रुतेः॥ ॥अथद्वितीया॥ आपप्राथ
महिनावृष्ण्यावृषन्विश्वाशविष्ठशवसा॥ अस्मांअवमघवन्गोमतिव्रजेवज्रिंचित्राभिरूतिभिः इति। हेवृषन् अभिमतवर्षकेंद्र त्वं
अपप्राथ आपूरयसिव्याप्नोषिकानिविश्वासर्वाणिवृष्ण्यावर्षकाणिबलानिभूतानिसंबंधीनिकेनसाधनेनमहिनामहत्ताबलेनअ
स्मदीयानिबलानिपूरयसीत्यर्थः। अथतथात्वतास्मानगोमतिबहुभिर्गोभिर्युक्तेव्रजेशत्रुसंबंधिनिनिमित्तेसतिअस्मानवर
क्षाहेवज्रिन्वज्रयुक्तेंद्रकसाधनेश्चित्राभिर्नानाविधाभिरूतिभिरक्षणैरिति॥ ॥अथद्वितीयसूक्तेप्रथमा॥ वयंघत्वासुतावंतआपो ५८
नवृक्तबर्हिषः॥ पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारआसतेइति॥ हेवृत्रहन्नुद्रत्वांतांवयंघवयंखलुसुतवंतः आपोनअ

पइवप्रवणमभिगच्छामः॥ पवित्रस्यसोमानांप्रस्रवणेषुवृक्तबर्हिषस्तीर्णबर्हिषः स्तोतारश्चत्वांपर्युपासते॥ ॥अथद्वितीया॥ स्वरं
तित्वासुतेनरोवसोनिरेकउक्थिनः॥ कदासुतंतृषाणओकआगमइंद्रस्वब्दीववंसगइति॥ हेवसोवासयितरिंद्रत्वात्वांसुतेऽभि
षुतेसोमेनिरेकेनिर्गमउक्थिनोनरोनेतारः स्वरंतिशब्दायंते॥ अपिचेंद्रः सुतंसोमंप्रतितृषाणः तृष्यन्स्वब्दीवस्वाभरतइवब्दीइववं
सगोवननीयगमनोवृषभः शब्दंकुर्वन्कदाकस्मिन्गमनआगच्छत॥ ॥अथतृतीया॥ कण्वेभिर्धृष्णवाधृषद्वाजंदर्षिसहस्रिणं॥
पिशंगरूपंमघवन्विचर्षणेमक्षूगोमंतमीमहे॥ इति। हेधृष्णोधर्षकेंद्रकण्वेभिः कण्वान्मेधाविनः स्तोतॄननुगृह्याविभाजित्यत्य
यः। सहस्रिणंसहस्रसंख्याकंवाजमादर्षिप्रयच्छसि। हेमघवन्धनवन्विचर्षणेविद्रष्टरिंद्रधृषत। धृष्णुंपिशंगरूपंगोमंतंवा
जंमक्षूशीघ्रंईमहेयाचामहेत्वामितिशेषः॥ ॥अथप्रगाथरूपेतृतीयसूक्तेप्रथमा॥ तरणिरित्सिषासतिवाजंपुरंध्यायुजा॥
आवइंद्रंपुरुहूतंनमेगिरानेमिंतष्टेवसुद्र्वमिति॥ तरणिरितश्कृत्याहिकर्माणितारयन्पुमान्पुरंध्यामहत्याधियायुजा

329/1973

सहायभूतया धाऊमं नेमिषासतिसंभजते पुरूहूतं च दूभिराहूतं उं इवखास्क्रत्वा अहमानमे॥ नेमिश्चक्रस्य वलर्य स्तद्वर्यं शोभनद्रा
४९ नुंनत्वे वतथाव र्धक्रिःसतुनेमिमानमयतेत ध्वदित्यर्थः॥ ॥अथ द्वितीया॥ न दुष्टुति र्द्रविणोदेषु शस्यते नस्त्रेधन्तं रयिर्नशसत्
शक्तिरिन्म घवन्न तुभ्यमावते देष्णं यत्पार्यो दिवीति॥ द्रविणोदेषु धनदातृषु पुरुषेषु दुष्टुतिः समीचीना स्तुतिर्न शस्यते नाभिधी
यते किंच स्त्रेधंतं हिंसंतं धनदातारं विषयस्तुत्यादि कर्माण्यकुर्वाणमित्यर्थः॥ एवंभूतं जनं रयिर्धनं न नशन्न व्याप्नोति। तथा हे मघ
वन् धनवन्निंद्र पार्ये दिवि सोत्ये दिवसे मावते मसदृशाय स्तोत्रे देष्णं दातव्यं यद्धनमस्ति तत्तुभ्यं त्वत्तः तथा सकाशात् स्तुशक्तिरि
त शोभनस्तुतिकृदेव स्तोता लभत इति शेषः। न दुष्टुति द्रविणोदेषु शस्यत इति छंदोगाः न दुष्टुतीमर्त्यो विंदते यस्त्रिति वहूचाः॥ ॥
इति चतुर्थाध्याये चतुर्थः खंडः॥ अथ पंचमखंडे प्रथमतृचे प्रथमा॥ तिस्रो वाच उदीरते गावो मिमंति धेनवः॥ हरिरेति कनिक्र ४९
ददिति॥ तिस्रो वाचः ऋगादिभेदेन उदीरते प्रातमयं ऋत्विजः धेनवः प्रीणयित्र्यो गावः मिमंति शब्दयंति दोहार्थं हरिर्हरितवर्णश्च

सोमः कनिक्रदत् शब्दं कुर्वन्नेति गच्छति द्रोणकलशं॥ ॥अथ द्वितीया॥ अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः॥ मर्मृज्यंते दिवः शि
शुमिति॥ ब्रह्मीर्ब्राह्मणप्रेरिताः यह्वीर्महत्यः यह्व इति महन्नाम ऋतस्य यज्ञस्य मातरो निर्मात्र्यः स्तुतयः दिवो द्युलोकस्य शिशुं शि
शुस्थानीयं सोमं गच्छंतीः वाचयंती रभ्यनूषत स्तुवंति। तृतीयस्यामितो दिवि सोम आसीदित्यादि श्रुतेः युष्मिः शुत्वं तस्य मार्जयं
ति मर्मृज्यत इति पाठो॥ ॥अथ तृतीया॥ रायः समुद्रांश्चतुरोस्मभ्यं सोम विश्वतः॥ आ पवस्व सहस्रिण इति॥ रायो धनस्य संबंधिन
श्चतुरस्समुद्रान् मणिमुक्तादि धनपूर्णानित्यर्थः॥ तादृशान् समुद्रानस्मभ्यमर्थाय हे सोम विश्वतः सर्वतः आपवस्व तथा सहस्रिणो
परिमितान् कामान आपवस्व प्रयच्छ॥ चतुः समुद्रस्य धनविशेषप्राप्तेः तन्मध्यगभूमिस्वामित्वमंतरेणासंभवाच्चतुःसमुद्रामु
द्रितमध्यगतभूमंडलस्वामित्वमेवाशास्ते यजमानः॥ ॥अथ द्वितीयतृचे प्रथमा॥ सुतासो मधुमत्तमाः सोमा इंद्राय मंदिनः॥
पवित्रवंतो अक्षरं देवान् गच्छंतु वो मदा इति॥ मधुमत्तमाः। अतिशयेन माधुर्योपेताः अतएव मंदिनो मदकराः सुता सोभिषुताः

331/1973

५० सोमाः पवित्र यंतः पवित्रे वर्तमानाः संतः इंद्रायेंद्रार्थं अक्षरन्पात्रेषु क्षरंति। अथ प्रत्यक्षकृतः वायुश्चाकं मदाय मदहेत
वो रसाः देवानिंद्रादीन्गच्छंतु॥ ॥अथ द्वितीया॥ इंदुरिंद्राय पवत इति देवासो अब्रुवन्॥ वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा इ
ति॥ इंदुः सोमः इंद्रायेंद्रार्थं पवते कलशे क्षरतीति देवासः स्तुतिकारिणः स्तोतारो अब्रुवन्। ब्रुवंतीति यद्वा स्तोतार एवं ब्रुवंति॥ तदानीं वाच
स्पतिः प्रतिपालयिता यद्वा शब्दस्य स्वामी अत्यंत शब्दायमान इत्यर्थः। तादृशः सोमः मखस्यते स्तुतिभिः पूजामिगच्छति॥ मख
सायां स्कागमः कीदृशं तु सो बलवंतः विश्वस्य सर्वस्य ईशानः प्रभुः। ओजसः ओजसेति पाठे॥ ॥अथ तृतीया॥ सहस्रधारः प
णं। वते समुद्रो वाचमीङ्खयः॥ सोमः पती रयीणां सखेंद्रस्य दिवेदिव इति॥ सहस्रधारः बहुविधधारोपेतः सोमः पवते क्षरति कीदृशः स ५०
मुद्रः यस्यात समुद्रः यस्मात समुद्रवंति रसा रसस्थानीयः वाचमीङ्खयः ईङ्खतेर्ण्यंतस्य सकर्म्युपपदे खश्प्रत्ययः स्तुतीनां प्रेर
यिता रयीणां धनानां पतिः प्रभुः। यद्वा रयीणां हविषो दातॄणां यजमानानां पतिः पालयिता दिवेदिवे प्रत्यहं इंद्रस्य सखा मित्र

भूतः सोमः पवते सोमस्यातिः सोमः पतिरिति पाठे॥ ॥अथ तृतीये तृचे प्रथमा॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि प
र्येषि विश्वतः॥ अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतस्तत्समासतेति। हे ब्रह्मणस्पते मंत्रस्य स्वामिन् सोम ते पवित्रं 333/1973
शोधकमंगं विततं सर्वत्र विस्तृतं स प्रभुः प्रभविता त्वं गात्राणि पीविना नुरंगानि पर्येषि परिगच्छसि विश्वतः सर्वतः तव तत्पवि
त्रं अतप्ततनूः पयोव्रतादिना असंतप्तगात्रः आमो अपरिपक्वो नाश्नुते न व्याप्नोति शृतास इत् शृता एव परिपक्वा एव वहंतो
यागं निर्वहंतः तत्सात्पवित्रमाशत व्याप्नुवंति॥ संत दाशत तत्समाशतेति पाठे॥ ॥अथ द्वितीया॥ तपोष्पवित्रं विततं दि
वस्पदे र्चंतो अस्य तंतवो व्यस्थिरन्॥ अवंत्यस्य पवीतारमाशवो दिवः पृष्ठमधिरोहंति तेजसेति॥ तपोः शत्रूणां तपक
स्य सोमस्य पवित्रं शोधकमंगं दिवस्पदे स्वर्लोकस्योच्छ्रितस्थाने विततं विस्तृतं तृतीयस्यामितो दिवि सोम आसीदिति ब्रा
ह्मणं अस्य तंतवो रश्मयः अर्चंतो दीप्यमानाः व्यस्थिरन् विविधं तिष्ठंति पृथिव्यां हविर्धाने वा॥ अस्य सोमस्य आशवः

॥ स्वर्गगामिनो रसाः पवितारं पावयितारं यजमानं अर्यंति रक्षंति होमद्वारा पश्चात् हुताद्दिवो द्युलोकस्य पृष्ठं पृष्ठभागमुन्नतं दे
५१ वं तेजसा स्वप्रकाशेन सार्धं रोहंति। आरोहणं कुर्वंति। अर्चंतः शोचंत इति पाठो॥ ॥अधिरोहंति तेजसा अधीतिष्ठंति चेत
सीतिपाठो॥ ॥अथ तृतीया॥ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः॥ मायाविना ममिरे अस्य माय
या नृचक्षसः पितरो गर्भमादधुरिति॥ उषसः संबंधी पृश्निरादित्यः पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति निरुक्तं॥ अ
ग्रियो मुख्यः सो यं सोमः एमरूरुचत् रोचयति। स उक्षा उक्षकस्या सेक्ता भुवनेषु भूतजातेषु मिमेति मिनोति उदकं प्रक्षिपतीत्यर्थः।
वाजयुः तेषामंनमिच्छन् मायाविनो माया प्रज्ञा तद्वंतो देवा अस्य सोमस्य मायया प्रज्ञया ममिरे निर्मितवंतः समस्तो के कांशया ५३
न बद्धा अग्न्यादयः स्वस्वव्यापारेण जगत्सृजंतीत्यर्थः। तथास्य मायया नृचक्षसो नृणां द्रष्टारः पितरः पालका देवा अं
गिरसः पितरो वा गर्भमादधुः धारयंति नु वधो भुवा अन्नरसात्मकः सोमः स्तूयते। सूर्यरश्मानुगमाधीनवर्धनाच्चंद्र

स्य अपमुषसः पृश्निः सविता अरूरुचत् रोचते रोचयति या सर्वजिष्ठं समानं तत्संबंधिनः नृचक्षसः नृणां द्रष्टारः पितरो जग
द्रक्षकारः रश्मयो गर्भमादधुः वृष्ट्यर्थं मिमेति भुवने षु बिभर्ति भुवनानीति पाठो॥ ॥अथ चतुर्थाध्यायस्य पंचमः खं ३३५/१९७३
डः॥ अथ षष्ठे खंडे प्रथमसूक्ते प्रगाथे प्रथमा॥ प्र मंहिष्ठाय गायत ऋतावने बृहते शुक्रशोचिषे॥ उपस्तुतासो अग्नये इति।
हे उपस्तुतासः उपस्तोतारः यूयं मंहिष्ठाय दातृतमाय ऋतावने यज्ञवते बृहते महते शुक्रशोचिषे दीप्ततेजसे अग्नये प्र
गायत स्तोत्रं प्रवदत॥ ॥अथ द्वितीया॥ आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः॥ कुविन्नो अस्य सुमतिर्नवीयस्य
च्छा वाजेभिरागमदिति॥ मघवा धनवान् द्युम्नी अंनवान् यशस्वी वा। तथा च यास्कः॥ द्युम्नं द्योततेर्यशो वान्नं वेति। समिध्यः
सम्यग्दीप्तः आहुतः अभिमुख्येन हुतो योग्निः वीरवत् पुत्रवद्यशो यशस्करमंनं आ वंसते यजमानेभ्य आ प्रयच्छति। त
स्याग्नेः भवीयसी असासु अतिशयेन भवितुं योग्या सुमतिरनुग्रहबुद्धिः नो अस्मानच्छ प्रति वाजेभिरंनैः सह कु

वितब्रदृसलिलंकुर्विदितिबहूनाम् आगमदागच्छतुभवीयसीनवीयसीतिपाठौ। ॥अथद्वितीयतृचेप्रथमा॥ तंतेमदंगृ
५२ णीमसिवृषणंपृत्सुसासहिं॥ उलोककृत्नुमद्रिवोहरिश्रियमिति॥ हे अद्रिवोवज्रवन्निंद्रतेत्वदीयंतंमदंसोमपानजनितंहृ
र्षंगृणीमसिगृणीमः॥प्रशंसामः॥ गृशब्देत्यादिःप्वादीनांह्रस्वः॥ इदंतोमसीतिमसइकारागमः॥ कीदृशंवृषणंवर्षिता
रंकामानांपृक्षत्यपृक्षतेनरश्याहकर्मणोघञिलादाद्युदात्तः॥ आप्यतेफलमनेनेत्यपः कर्म आपः कर्माख्यायांह्रस्वोनुट्
चवेत्यसुन्तस्यअपसस्थारेइत्यादौनित्वादाद्युदात्तस्याप्ययस्कावस्याप्यल्पयेनप्रत्ययाद्युदात्तत्वं॥ ॥अथतृतीयतृचेप्र
थमा॥ इंद्रेणसंहिदृक्षसेसंजग्मानोअबिभ्युषा॥ मंदूसमानवर्चसेति॥ हेमरुद्गणत्वंइंद्रेणसंजग्मानःसंगच्छमानःसं
दृक्षसेहिसम्यग्दृश्यसेखलु अबिभ्युषास्माभिर्द्रष्टव्य इत्यर्थः॥ कीदृशेनेंद्रेणअबिभ्युषाभीतिरहितेनकीदृशाविंद्रम ५२
रुद्गणौमंदूनित्यप्रमुदितौसमानवर्चसातुल्यदीप्तीपुराकदाचिद्वृत्रवधप्रसंगेइंद्रस्यसखायःसर्वेदेवाःवृत्रश्वासेन

पसारिताःस्तदानीमिंद्रस्यवृत्रसंबंधिसकलसेनाजयार्थंमरुद्भिःसंगमोभूत्सोयमर्थोवृत्रस्यत्वाश्वसथादितिमंत्रेसं 337/1973
गृहीतःइंद्रोवैवृत्रंहनिष्यन्नितिब्राह्मणेप्रपंचितस्यो।ग्वा। इंद्रशब्दःपरमैश्वर्यवंतंमरुद्गणंचाभिधातत्तदानीमिंद्रस्य
संबोधनंबहिरेवाध्याहर्तव्यं॥ तथाचेधमकयाघेनैवंव्याख्याता इंद्रेणहिसंदृश्यसेसंगच्छमानोबिभ्युषागणेनमंदूमदी
ऋयुवांस्तोपिवामदुतातेनेतिस्यात्समानवर्चसेत्येनेनैवव्याख्यातमिति॥ संदृक्षसेसंपश्येथाः॥ दृशोश्चत्तिवक्तव्यमि
त्यात्मनेपदं। दृशोलिङर्थेलिङितिप्रार्थनाधालेट्॥ यासःसलेटाडाटावित्यडागमः सिब्बहुलंलेटीतिसिप्। संज्ञापूर्वको
विधिरनित्यइतिगुणाभावः॥ व्रश्चादिनाषत्वं। षढोःकःसीतिकत्वं। आदेशप्रत्यययोरितिसिपःषत्वं।बहुलग्रहणा
त्।सिपःपरस्ताच्छलपिभवतिसिपोव्यवधानात्पश्चाद्दशोनभवति। अपःपित्वादनुदात्तत्वं।उत्तरस्यलसार्वधा
तुकानुदात्तत्वंधातुस्वरएवशिष्यते।हिशब्दयोगान्निघातिङ इतिनिघातोनभवति।हिचेतिप्रतिषेधात्।संजग्मानः

संगमे : संपूर्वाछंदसि लुङ् लङ् लिट् इति वर्तमाने लिट्। समो गम्यृछीत्यात्मनेपदविधानात् लिटः कानजादेशः द्विर्भावो हला
५३ दिः शेषाभ्यासस्य श्चुत्वं। गमहनजनखनघसां लोपः क्ङित्यनङीत्युपधालोपः कानच्श्चित्वादंतोदात्तत्वं॥ गतिः समासे तदुत्तरपदप्रकृतिस्वरत्वं। अबि
भ्युषा त्रिभिर्भये। पूर्ववल्लिट्। ञिभी भये इत्यस्मात् कर्तरि परस्मैपदं। क्वसुश्चेति लिटः क्वसुरादेशः तस्य कित्वाद्गुणाभावः द्विर्भावः अभ्या
सस्य ह्रस्वः अभ्यासे चर्च इति जश्त्वं। क्र्यादिनियमात्। प्राप्तइट् वस्वेकाजाद्घसामिति नियमान्निवर्तते। न न अ समासे तृतीयैकवचनेन भत्वाद्
सोः संप्रसारणमिति वकारस्य उकारादेशः संप्रसारणाच्चेति पूर्वरूपत्वं। शासिवसिघसीनां चेति षत्वं॥ उ यणादेशं बाधि
त्वा एरनेकाचः इति यणादेशः अव्ययपूर्वपदप्रकृतिस्वरत्वं पूर्वेण सह समासः इतायामोकारस्य एङः पदांतादतीति पररूपत्वं ५३।
प्राप्ते प्रत्ययांतः पादमध्यपर इति प्रकृतिभावः॥ मंदमदस्कति मोदमदस्वप्नकांतिगतिषु। इदितो नुम् धातोरिति नुमा
गमः॥ कुरित्यनुवर्तते स्वरशं कुपीयुनिलं गुलिग्विल्यन्तो विभक्तिकनिर्देशार्थम्॥ तादिंगुरिति तद्धात्वं तदादिप कुरियुनं।

प्रत्ययस्वरेणांतोदात्तः द्विवचने मौ। प्रथमयोः पूर्वसवर्णः तृतीयैकवचने चेतः सुपां सुलुगित्याद्निा पूर्वसवर्णदीर्घत्वं समानं वर्चोप
योरितिबहुव्रीहिः द्विवचने सुपां सुलुगित्याकारः समानपदस्य प्रातिपदिकांतोदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणत देवावज्रिष्य
ते॥ ॥अथद्वितीया॥ आदहस्वधामनु पुनर्गर्भत्वमेरिरे॥ दधानानामयज्ञियमिति॥ आदित्ययमानंतर्यार्थो निपातः॥ अहेत्येव
धारणार्थः॥ आदह वर्षतोरनंतरमेव स्वधामनु इनः परं जनिष्यमाणमनमुदकं चानुलक्ष्य मरुतो देवा गत्वमीरिरे घमथ्येज
लस्य गर्भाकारं प्रेरितवंतः प्रतिसंवत्सरमेवं कुर्वन्नीतिदर्शयितुं पुनः शब्दः प्रयुक्तः कीदृशा मरुतः यज्ञियं यज्ञार्हं नामदधानाधार
यंतः सप्तसप्तगणपुमरुतामीदृङ् चेत्यादिनियज्ञयोग्यानि नामान्यन्यत्राम्नातानि॥ अंध इत्यादिषड्विंशतिसंख्याकेषु अन्ननाम
सूक्तकेषु रसः स्वधेति पठितं। अर्ण इत्यादिष्वेकशतसंख्याकेषु उदकनामसु तेजः स्वधा अक्षरमिति पठितं आत् अह निपातावा
युदात्तौ स्वधामनु लोकं दधाति पुष्णातीति स्वधा आतो नुपसर्गे कः तदुत्तरपदप्रकृतिस्वरत्वं। अनु पुनः शब्दौ निपातावाद्युदात्तौ

339/1973

गर्भस्य भावो गर्भत्वं प्रत्ययः ॥ एरिरे अंतर्भावितण्यर्थादीरतातावित्यस्मादनुदात्तेतः परस्य लिटो झस्य इरेच । नित्वादंतोदात्तः ॥ स
५४ हस्कपेत्यत्र स्कपेति योगविभागाद्‌घनसहतिङः समासस्वेत्यंतोदात्तत्वं । इन्द्रादेश्च गुरुमतान् छ इत्यान्न भवति मंत्रत्वात् । अहश
बृ योगं निघातो भावः नु पश्यं पश्यताद्भिः पृजायामिति निषेधात् दृधाना ॥ नामन्यश्चित्वादंतोदात्तत्वं प्राप्ते अभ्यस्तानामादि
रित्याद्युदात्तत्वं ॥ यज्ञमर्हतीति यज्ञियं यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः ॥ आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति या
देशः ॥ प्रत्ययस्वरेण इकार उदात्तः ॥ ॥ अथ तृतीया ॥ वीळु चिदारुजत्नुभिर्गुहा चिदिंद्र वह्निभिः ॥ अविंद उस्रिया अन्विति ॥ अ
त्र किंचिदुपाख्यानं पणिभिर्देवलोकाद्गावोपहृताः अंधकारे प्रक्षिप्तास्तांश्चेंद्रो मरुद्भिः सहाजयदिति । एतच्च बह्वृचानुक्रम ५४
णिकायां सूचितं । पणिभिरसुरैर्निगूढा गा अन्वेष्टुं सरमा देवशुनी इंद्रेण प्रेषिताता ऋग्भिः पणयो मित्रीयंतः प्रादुरिति । मंत्रां
तरेपि द्रष्टांतनया सूचितं । निरुद्धा आपः पणिनेव गाव इति तदेतदुपाख्यानमभिप्रेत्योच्यते ॥ हे इंद्र वीळु चित् दृढमपि दु

र्गमस्थानं आरुजत्नुभिर्भंजनशीलैर्वह्निभिर्वोढृभिः अन्यत्र नेतुं समर्थैः मरुद्भिः सहितस्त्वं गुहा चित् गुहायामपि स्थापिता उस्रिया
गा अन्वविंदः ॥ अन्विष्य लब्धवानसि ॥ पाज इत्यादिष्वष्टाविंशतिसंख्याकेषु बलनामसु सहस्रः वीळु च्यौत्नमिति पठितम् ॥ नवसंख्या 341/1973
केषु गोनामसु उस्रिया उस्रा उस्रियेति पठितं स्सः वीळु च्यौत्नमिति पठितं ॥ नवसंख्याकेषु गोनामसु उस्रिया उस्रा उस्रियेति पठितं वीळु प्रा
तिपदिकस्वरः ॥ चित्सादिरनुदात्तः ॥ आरुजत्नुभिः रुजो भंग इत्यस्मादौणादिकः कत्नुच प्रत्ययः कृत्वा गुणाभावः ॥ चित्वादंतोदात्तत्वं स
मासे तदुत्तरप्रकृतिस्वरत्वं ॥ गुहा सप्तम्या डादेशः ॥ ग्रामादीनां चेत्याद्युदात्तः ॥ वह्निभिः वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्ति नि प्र
त्ययः ॥ नित्वादाद्युदात्तः ॥ अविंदः शे मुचादीनामिति नुमागमः ॥ लुङ् लङ् लृङ्क्ष्वडुदात्तः ॥ वसंतीति उस्रियाः ॥ वसेर्वर्तनीयक प्रत्ययः ॥ प
त्वाभावश्च बाहुलकादूहनीयः ॥ उक्तो हि यं न पदार्थविशेष समुत्प्रत्ययतः प्रततेश्च नदृशामिति ईकारः प्रत्ययस्वरेणांतोदात्तः ॥ ॥
अथ चतुर्थर्चे प्रथमा ॥ तादुदेवयोरिदंपम्रावश्यं पुराकृतं ॥ देवयंतो यथा मतिरिति । तांतोना द्यावं इन्द्रहुवे आरुय । ययोरिंद्रा

न्योः पुरा पूर्वस्मिन्काले वृत्रं विश्वं सर्वं इदं पूर्वास्तरकं कार्तिनं वीर्यं प्रपन्यते अभिष्टूयते तावेवं इंद्राग्नी हुवे इत्यन्वयः। तौ चेंद्राग्नीनम
५५ र्धतः मर्धातिर्हिंसाकर्मा ततोन्त्राहिंसः। अतोस्मान्व्याहूतो रक्षतामिति भावः॥ ॥अथ द्वितीया॥ उग्रा विघनिना मृध इंद्राग्नी हवाम
हे। ता नो मृळात ईदृश इति॥ उग्रा उग्रौ उद्गूर्णबलौ। अतएव मृधः शत्रून् विघनिना विघनिनौ विशेषेण हंतारौ तौ इंद्राग्नी हवामहे।
तौ चेंद्राग्नी ईदृशेस्मिन्संग्रामे नोस्मान्मृळातं सुखयतां। यद्वा मृळातिः उपदयाकर्मा। नोस्माकं मृळातः उपदयां कुरुतां॥ ॥अ
थ तृतीया॥ हथो वृत्राण्यार्या हथो दासानि सत्पती॥ हथो विश्वा अप द्विष इति॥ हे इंद्राग्नी आर्या आर्यैः कर्मानुष्ठातृभिः कृतानि
वृत्राण्युपद्रवजातानि हथः हिंस्थः तथा सत्पती सतां पालयितारौ सतौ दासानि दासोः कर्महीनाः शत्रवः तैः रितानि चोपद्रवजा ५५
तानि हथः। अपि च विश्वा सर्वा द्विषः द्वेष्टॄः शत्रुभूताः प्रजा अप हथः विनाशयथः। अतोस्माकमप्येवमेव कुरुतामिति भावः।
हथो हत इति पाठो॥ ॥ इति चतुर्थोध्यायस्य द्वितीयः खंडः॥ अथ द्वितीयः खंडः प्रथमतृचे प्रथमा॥ अभि सोमास आयवः पवंते मद्यं

मदं। समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युत इति॥ आयवः गमनशीलाः सोमासः सोमाः मद्यं मदकरं मदं आत्मीयं रसम
भिपवंते। अभितो निर्गमयंति। वुत्रेच्युते॥ समुद्रस्य अंतरिक्षस्य अधिविष्टपे अधिकं समुच्छ्रिते पवित्रे यद्वा समुद्रस्य यस्मात्समुद्रवंति रसा
स्तस्य कलशस्य अधि उपरि विष्टपे स्थाने पवित्रे। विष्टपे विष्टपीति पाठो॥ मदच्युतः स्वर्विद इति च॥ ॥अथ द्वितीया॥ तरत्समुद्रं पव
मान ऊर्मिणा राजा देव ऋतं बृहत्॥ अर्षान्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहदिति॥ पवमानः पूयमानः देवो द्योतमानः बृह
त् अत्यंतं ऋतं सत्यभूतः राजा सोमासः समुद्रमंतरिक्षं कलशं वा ऊर्मिणा धारया तरत् तरति हिन्वानः प्रेर्यमाणः ऋतं बृहत्सत्यं
तं सत्यभूतः स सोमः मित्रस्य वरुणस्य मित्रावरुणयोः धर्मणा धारणार्थं आर्ष प्राप्नोति प्रकर्षेण गच्छति अर्षो अर्षादिति पाठो।
॥ ॥अथ तृतीया॥ नृभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः इति। नृभिः कर्मनेतृभिः ऋत्विग्भिर्येमानो नियम्यमानः ह
र्यतः स्पृहणीयः विचक्षणो विद्रष्टा देवो दीप्यमानः समुद्र्यः अंतरिक्षे भवः राजा सोमः इंद्रार्थं पवत इति शेषः। येमाणा येमा

343/1973

५.६ न इति पाठः॥ ॥अथ द्वितीयस्तृचे प्रथमा॥ तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषां॥ गावो यंति गोपतिं पृच्छमानाः सोमं यंति
मतयो वावशानाः॥ इति॥ वह्निर्वोढा यष्टा ब्रह्मणः परिवृढस्य सोमस्य मनीषां यज्ञमानः तिस्रो वाचः ऋग्यजुःसामात्मिकास्तुताः प्रे
रयंति। तथा ऋतस्य यज्ञस्य धीतिं धारयित्रीं ब्रह्मणः परिवृढस्य सोमस्य मनीषां मनसि ईंखित्रीं कल्याणीं वाचं च प्रेरयति। किंच गोपतिं व
षभं यथा गावो ऽभिगच्छंति तद्वत्। गावः स्वामिनं सोमं गावः पृच्छमानाः पृच्छंत्यः सत्यो यंति। स्वपयसा मिश्रयितुं अभिगच्छंति तथा वावशा
नाः कामयमाना मतयः स्तोतारश्च सोमं यंति स्तोतुमभिगच्छंति॥ ॥अथ द्वितीया॥ सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः
पृच्छमानाः॥ सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवंत इति॥ धेनवः प्रीणयित्र्यो गावः सोमं वावशानाः कामयमाना भवं
ति विप्रा मेधाविनः स्तोतारः मतिभिः स्तुतिभिः पृच्छमानाः पृच्छंतो भवंति सुतो ऽभिषुतः सोमः पूयमानः कलशे गोभिरज्यमानश्च भवति। ५.६
तथा त्रिष्टुभः त्रिष्टुब्रूपाः अर्का अस्माभिः क्रियमाणा एते मंत्राः सोमे सन्नवंते संगच्छंते सोमः सुतः अज्यते पूयमान इति छंदो

गाः सोमः सुतः पूयते अज्यमान इति बह्वृचाः॥ ॥अथ तृतीया॥ एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति॥ इंद्रमा विश बृ
हता रवेण वर्धया वाचं जनया पुरंधिमिति॥ हे सोम परिषिच्यमानः परितः पात्रे परिषिच्यमान पूयमानस्त्वं नो ऽस्माकमेवं स्वस्ति अविना 345/1973
शं आ पवस्व प्रापय। किंच बृहता महता रवेण मदकारणरसेन सह इंद्रमा विश प्रविश तत्स्थाय धर्षस्थिरेण स्तोतारः अनुप्रवंति कामं प्रसंसंति
सर्वत्र पयली धात नास्य संग्रामे पुसा सहिष्णुः शत्रूणामभिभवितारं लोकद्रु तं लोकस्य स्थानस्य कर्तारं हरिश्रियं हरिभ्यामश्वाभ्यां प्र
यणीयं स ह्यं इशब्द एषां समुच्चये पदपूरणो वा। पृक्ष पृक्षेति पाठः॥ ॥अथ द्वितीया॥ येन स्या तोमान्याययं मनवे चाविवेदिथ॥ मं
दानो अस्य बर्हिषो विराजसीति॥ हे इंद्र येनात्मीयेन मदेन आयवे ईयसे याय मनवे विवस्वतः पुत्राय ज्योतींषि सूर्यादीनि स्वरश्मिभि
रावृतानि तद्वारेण विवेदिथ अलंभयः। प्रकाशितवान् वा प्रकाशितवानसीत्यर्थः। तेन मदेन मंदानो मादमानस्त्वं अस्य बर्हिषः वृद्धस्य
यज्ञस्य विराजसि विशेषेण विशेषयद्वा अस्येति तृतीयार्थे षष्ठी॥ अनेन बर्हिषा वृद्धेन मदेन हूयमानो विराजसि विशेषेण दीप्यसे॥

॥ ॥ अथ तृतीया ॥ नरश्चाविन्न उक्थिनो नु ष्टुवंति पूर्वथा ॥ ऋतपत्नीरपो ज्याया दिवे दिवे इति ॥ हे इंद्र ते त्वं दीर्यं तत्तत्प्रसिद्धं बलं अश्वाचित
५७ अश्वापि पूर्वथा पूर्वस्मिन्काले उक्थिन उक्थिनः शास्त्रिणः स्तोतारः अनुष्टुवंति क्रमेण प्रशंसंति ॥ स त्वं ऋतपत्नीः ऋतपालयित्रीः अपः पर्जन्यः प
तिर्यासां ता इमा अपः दिवे दिवे प्रतिदिवसं ज्यायस्व आयतां कुरु ॥ ॥ अथ तृतीये खंडे प्रथमा ॥ श्रुधी हवं तिरश्च्या इंद्र यस्त्वा सपर्यति ॥ सुवी
र्यस्य गोमतो रायस्पूर्धि महाँ असीति ॥ हे इंद्र यः त्वां त्वां सपर्यति ॥ स परशब्दः कर्त्रादिः हविर्भिः परिचरति तां इत्थं स्याति तिरश्च्याः एतं ना
मकस्य ऋषेर्मे हवं स्तुतिभिस्त्वद्विषयमाह्वानं श्रुधि शृणु श्रुत्वा च हे इंद्र त्वं सुवीर्यस्य शोभनवीर्योपेतस्य यथा वीरे पुत्रे भवं वीर्यं स
पुत्रवतः गोमतः गवादिपशुमतः रायो धनस्य दाने नः अस्मान् पूर्धि पूरय ॥ एतत्सामर्थ्यं कुत इत्यत आह ॥ त्वं महान् गुणाधिकः दे
वानां श्रेष्ठो ऽसि भवसि खलु ॥ ॥ अथ द्वितीया ॥ यस्त इंद्र नवीयसीं गिरं मंद्रामजीजनत् ॥ चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्यु ५७
षीमिति ॥ हे इंद्र यो यजमानो नवीयसीं नवतरां पुनः पुनः क्रियमाणतया मंद्रां मदकरीं गिरं स्तुतिलक्षणां वाचं त्वदर्थं अजीजनत्

उदपीपदत् ॥ अकार्षीदित्यर्थः ॥ तस्मिन्स्तोत्रे त्वं प्रत्नां पुरातनीं ऋतस्य सत्यस्य संबंधि यज्ञात् तृतीयार्थे षष्ठी सत्येन पिप्युषीं प्रवृद्धां लिङ्ग्य
ज्ञाश्चेति प्यायतेः पीभावः तादृशीं चिकित्विन्मनसं चिकितज्ञानं प्रकाशकं यं आकारस्येकारश्छांदसः ॥ चिकित्वांसि ज्ञातानि सर्वेषां हृदयानि येन
ति अमायया क्रियमाणं यत्नवत्तरं क्षणं ततः सर्वेषां हृदयं प्रज्ञापयतीति ॥ ततः अतींद्रियार्थदर्शकं धियं त्वदीयं रक्षणाख्यं कर्म तस्मै कु
रु यस्त इंद्र यस्त्वमुक्तलक्षणेन पाहि ॥ ॥ अथ तृतीया ॥ तमु ष्टवाम यं गिर इंद्रमुक्थानि वावृधुः ॥ पुरूण्यस्य पौंस्या सिषासंतो वनाम
हे ॥ इति ॥ ऋषयः परस्परमाहुः तं पूर्वोक्तलक्षणं । उ इत्यवधारणे तमेवेंद्रं स्तवाम स्तुतिभिः स्तुमः ॥ यमिंद्रं गिरो अस्माकं स्तुत
यः उक्थानि शस्त्राणि च वावृधुः प्रावर्धयन् तं स्तुमः ॥ ततो वयमस्येंद्रस्य पुरूणि बहूनि पौंस्यानि वीर्याणि सिषासंतः षण संभक्तौ
सनोतेरिच्छायां पदे आत्वं कृते रूपं सनोतेश्च न इति सांहितिकं षत्वात्तानि वीर्याणि संभक्तुमिच्छंतः संतो वनामहे तामिंद्रं स्तुतिभिस्संभ
जामहे ॥ ॥ इति चतुर्थाध्याये षष्ठः खंडः ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

347/1973

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसा
५८ मवेदार्थप्रकाशेउत्तरार्धग्रंथेचतुर्थोध्यायः॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत।निर्ममेतमहंवंदेविद्यातीर्थमहे
श्वरं॥ ॥अथपंचमाध्यायआरभ्यते।तत्रप्रथमखंडेप्रतआश्विनीरितितृचंप्रथमंसूक्तंतत्रप्रथमा॥ ॥प्रतआश्विनीःपव
मानधेनवादिव्याअसृग्रनपयसाधरीमणि॥प्रांतरिक्षास्थाविरीस्तेअसृक्षतयेत्वामृजंत्यृषिषाणवेधसइति।हेपवमानसो
मतेतवआश्विनीर्व्याप्ताःअश्व्याव्याप्तावित्यस्मादौणादिकोवनिः।ततःप्रत्ययस्ययेनाद्युदात्तः।धेनवःप्रीणयित्र्यःदिव्यादिविभ
वाःदिवःपतंत्योधाराःपयसायुक्ताःधरीमणिधारकद्रोणकलशेप्रासृग्रनगच्छंति।येवेधसःविधाताऋत्विजहेसामऋषि
षाणऋषिभिःसंभक्तत्वात्त्वांमृजंतिअभिपुण्वंतिवेधसःस्थाविरीःस्थविराधाराअंतरिक्षात्सकाशात्प्रासृक्षतपात्रंप्रति ५८
सृजंतिधेनवाजुवोइतिपाठो॥प्रांतरिक्षात्स्थाविरीस्तेअसृक्षतात्प्रातऋष्यमाणविरीरसृक्षतेतिच॥ ॥अथद्वितीया॥उभयतः

पवमानस्यरश्मयोध्रुवस्यसतःपरियंतिकेतवः॥यदीपवित्रेअधिमृज्यतेहरिःसत्तानियोनाकलशेषुसीदतीति॥पवमानपूय
मानस्यध्रुवस्यस्थयमविचलितस्यसतोविपुमानस्यसोमस्यकेतवःप्रज्ञापकारश्मयःउभयतःइतश्चामुतश्चपरियंतिपरितोगच्छं
तिअभिपवसमयएवंभवतियदियदापवित्रेदशापवित्रेहरिर्हरितवर्णोयंसोमःअधिमृज्यतेतदानींसत्तासदनशीलोयंयोनायोनिषु
स्थीयेषुकलशेषुद्रोणकलशादिषुपात्रेषुनिषीदतिनिषसाभवतियोनीयोनेतिचपाठो॥ ॥अथतृतीया॥विश्वाधामानिविश्व
चक्षाऋभ्वसःप्रभोस्तेसतःपरियंतिकेतवः॥व्यानशीपवतेसोमधर्मणापतिर्विश्वस्यभुवनस्यराजसीति॥हेविश्वचक्षःसर्वस्य
द्रष्टःसोमप्रभोःपरिवृढस्यसतस्तेऋभ्वसःऋभ्वाइतिमहन्नाममहतःकेतवोरश्मयोविश्वासर्वाणिधामानितेजस्थानानिदे
वशरीराणिपरियंतिपरितोगच्छंतिप्रकाशयंतीत्यर्थः।हेसोमव्यानशीव्यापनशीलस्त्वंधर्मणाधारकेणरसनिष्पंदेनपव
सेपूयसेकिंच।विश्वस्यभुवनस्यपतिःस्वामीत्वंराजसिईश्वरोभवसि।प्रभोष्टेसतःपरियंतिप्रभोस्तेसतःपरियंतीतिपाठो॥

349/1973

मानश्रीश्वानश्चिरितिधर्मणाधर्मैभिरितिच॥ ॥अथद्वितीयतृचेप्रथमा॥ पवमानोअजीजनद्दिवश्चित्रंनतन्यतुं॥ ज्योतिर्वैश्वानरं
५९ बृहद्रिति॥ पवमानः पूयमानः सोमोऽस्मिन्नहत वैश्वानरेणाख्यंज्योतिस्तेजोदिवो द्युलोकस्याचित्रंविचित्रंतन्यतुंन्न॥ अत्रानिमिव अजी
जनदजनयत॥ ॥अथद्वितीया॥ पवमानरसस्तवमदोराजन्नदुच्छुनः॥ विवारमव्यमर्षति॥ हेराजन्दीप्यमानपवमानपूयमान
सोमतवत्वदीयोमदोमदकरः अदुच्छुनारक्षोवर्जितोरसः अव्यमविमयंवारंवालंदशापवित्रमर्षतिगच्छति॥ अभिगच्छतिपवमा
नरसस्तवपवमानस्यतेरसइतिपाठो॥ ॥अथतृतीया॥ पवमानस्यतेरसोदक्षोविराजतिद्युमान्॥ ज्योतिर्विश्वंस्वर्दृशइति॥ हेसो
मपवमानस्यपूयमानस्यतेत्वदीयोरसः दक्षः द्युमान्दीप्तिमान्विराजतिप्रकाशतेनकेवलंस्वयमेवप्रकाशते॥ किंतुविश्वंव्या ५९
प्तंस्वंसर्वंज्योतिस्तेजःस्वर्दृशेद्रष्टुंकरोतीतिशेषः पवमानस्यतेरसः पवमानरसस्तवेतिपाठो॥ ॥अप्रयग्द्रावइतिपंचर्चंतत्ती
यंसूक्तंतत्रप्रथमतृचेप्रथमा॥ प्रयद्गावोनभूर्णयस्त्वेषाअयासोअक्रमुः॥ घ्नंतःकृष्णामपत्वचमिति॥ पवमानेअभिषुताःसो

माःगावोनउदकानीवतानीयथात्वर्णमधःपातंतितद्वतगावएववोपमीयंतेतायथागोबंपत्याशुगच्छतितद्वत॥ अथवागावःस्तु
तिवाचःतायथाकल्यंप्रतिक्षिप्रंप्राप्नुवंतितद्वत भूर्णयःक्षिप्रात्वेषादीप्ताःअयासःअयागमनशीलाःकृष्णांकृष्णवर्णांअपत 351/1973
चंअपकृष्टांचंघ्नंतःविनाशयंतःईदृक्भूतायेसोमाःप्राक्रमुतांस्तवइतिशेषःएतयेइतिपाठो॥ ॥अथद्वितीया॥ सुवितस्य
मनामहेतिसेतुंदुराव्यं॥ साह्वांसोदस्युमव्रतमिति॥ सुवितस्यशोभनंप्राप्तस्यसोमस्यसंबंधिनंअतिसेतुंरक्षोविषयंबंधनं
वनामहे॥ सोमकर्तृकंरक्षसांबंधनंस्तुमइत्यर्थः॥ कीदृशंदुराव्यंदुराव्यंसाह्वांसमसाह्वांसोइतिपाठः॥ ॥अथतृतीया॥ शृण्वे
वृष्टेरिवस्वनःपवमानस्यशुष्मिणः॥ चरंतिविद्युतोदिवीति॥ शृण्वेश्रूयतेकस्वनःकिमिववृष्टेर्वर्षणस्यस्वनइवतस्ययथाम
हानस्वनःश्रूयतेतद्वत आभृतरसपालसमयेश्रूयते॥ कस्यस्वनइतितत्राह॥ पवमानस्यपूयमानस्यशुष्मिणोबलवतस्तस्यैव
विद्युतोदीप्यमानाःदिव्यंतरिक्षेचरंति॥ ॥अथचतुर्थी॥ आपवस्वमहीमिषंगोमदिंदोहिरण्यवत्॥ अश्वावत्सोमवीरवदिति॥ हेइंदो

६० सोम अभिषुतस्त्वं महीमिषं महदन्नं आपवस्व कीदृशं अन्नं गोमद्गोभिर्गोभिर्युक्तं॥ हिरण्यवत्सुवर्णोपेतं अश्ववत् अश्वयुक्तं। वीरवतः
पुत्रयुक्तं अश्ववत्सोम वीरवत् अश्ववत् इडावत्सुत इति पाठो॥ अथ पंचमी॥ ॥पवस्व विश्वचर्षण आ मही रोदसी पृण॥ उषाः सू-
र्यो न रश्मिभिरिति॥ हे विश्वचर्षणे विश्वस्य द्रष्टः सोम सत्वं॥ पवस्व क्षर रसं तथा तत्वा तेन रसेन मही महत्यौ रोदसी द्यावापृथिव्यौ
आ पृण आपूरय॥ उषा उषसः एकदेशवाचिना षः शब्देनाहान्युपलक्ष्यंते तत्प्राधान्यात्॥ अहानि रश्मिभिः सूर्यो न सूर्य इव
पवस्व विश्वचर्षणे पवस्वा क्षिच स्पृणोति पाठो॥ ॥अथ षष्ठी॥ परि णः शर्म यंत्या धारया सोम विश्वतः॥ सरा रसेव विष्टपमि-
ति॥ हे सोम नोऽस्माकं शर्म यंत्या सुखं यच्छंत्या धारया विश्वतः सर्वतः परि सर परिचर रसेव रसेन वा विष्टपं भूलोकं यद्वा रसा ६०
नदी सा स्थानं प्रवणरूपमिव॥ परि नः परि ण इति पाठो॥ ॥इति पंचमाध्याये प्रथमः खंडः॥ ॥अथ द्वितीयखंडे आशु-
रर्षेति षड्ऋचं प्रथमं सूक्तं तत्र प्रथमा॥ आशुरर्ष बृहन्मते परि प्रियेण धाम्ना॥ यत्र देवा इति ब्रुवन् इति॥ हे बृहन्मते

सोम प्रियेण देवानां प्रियतमेन धाम्ना शरीरेण धारया आशुः शीघ्रः सन् पर्यर्ष परिगच्छ॥ यत्र देवा इंद्रादयो वर्तंते इति ब्रुवन्
अनुचारयन् तं देशं गच्छामीति ब्रुवन्नित्यर्थः॥ ॥अथ द्वितीया॥ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः॥ वृष्टिं दिवः परि
स्रवेति॥ अनिष्कृतमसंस्कृतं यजमानं स्थानं वा परिष्कृण्वन् संस्कुर्वन् जनाय यागकर्त्रे इषोऽन्नानि यातयन् गमयन् दिवो- 353/1973
ऽन्तरिक्षाद्वृष्टिं परिस्रव॥ ॥अथ तृतीया॥ अयं स यो दिवस्परि रघुयामा पवित्र आ॥ सिंधोरूर्मा व्यक्षरदिति॥ सोऽयं सो-
मः पवित्रे आसिच्यमान इति शेषः॥ सिंधोर्जलस्य ऊर्मौ संघाते॥ व्यक्षरत् विविधं क्षरति स इत्युत्कर्षक इत्याह॥ यो दिव-
स्परि द्युलोकस्योपरि रघुयामा लघुगमनो देवप्राप्तो सौ यामिति संबंधः॥ ॥अथ चतुर्थी॥ सुत एति पवित्र आ त्विषिं द-
धान ओजसा॥ विचक्षाणो विरोचयन्निति॥ सुतोऽभिषुतः सन् पवित्रे दशापवित्रे आ इत्यनर्थकः ओजसा बलेन आ घ्रंणति
गच्छति कीदृशः सन् त्विषिं दीप्तिं दधानो धारयन् विचक्षणः सर्वं पश्यन् विरोचयन् दीपयन्नर्कं देवानिति शेषः॥

।। ।।अथपंचमी।।आचिद्यासन्परावतोअथोअर्वावतःसुतः।। इंद्रायासिच्यतेमध्विति।।सुतोभिषुतःसोमःपरावतःदूरनामे
६६१ ततदूरस्थान्अथापिचअर्वावतोंतिकस्थांश्चदेवानाविद्यानाविवासन्परिचरन्रसेनपरिरक्षणायेत्यर्थः।। इंद्रायेंद्रार्थंम
धुमधुरंसहशसोमःसिच्यते।। ।।अथषष्ठी।।समीचीनाअनूषतहरिंहिन्वंत्यद्रिभिः।। इंदुमिंद्रायपीतयइति।।समीची
नाःसम्यगंचिताःसंगताःस्तोतारःअनूषतस्तुवंतिकिंचसोमंहरिंहरितवर्णंहिन्वंतिप्रेरयंति।।गमयंतिअद्रिभिर्ग्रावभिः
किमर्थंहिन्वंतिइंदुंदीप्तंसोममिंद्रायइंद्रस्यपीतयेपानाय।। ।।अथत्र्यचात्मकेद्वितीयसूक्तेप्रथमा।।हिन्वंतिसूरमुस्र
यस्वसारोजामयस्पतिं।।महामिंदुंमहीयुवइति।।उस्रयःकर्मार्थानिवसत्यःसर्वत्रगत्यइत्यर्थः।।जामयएकस्यासाधारण ६३
संनत्वासरस्परंबंधुभूताःस्वसारःअंगुलिनामैतत।।सकृत्कर्मसुप्रेर्यंतेऋत्विग्भिरितिस्वसारोंगुलयः महीयुवःसो
माभिषवंकामयमानाःसत्यःसूरंसुवीर्यंसोमपीतेवीर्यंभवतीतिशोभनवीर्यकारणंवासर्वेषांकर्मणिप्रेरकंवाता

दृशंपतिंसर्वस्यस्थावरजंगमजातस्यस्वामिनंयस्माद्देवार्थमिज्यते।अतएवमहांतंदेवेभ्योदीयमानत्वेनमहांतंमदनीयंवाइंदुमग्रहेषुस्यं
दनमानंसोमंहिन्वंतिप्रेरयंतिहिविर्धनगत्योरितिधातोरेतद्रूपंस्यादिः।। ।।अथद्वितीया।। पवमानरुचारुचादेवोदेवेभ्यस्परि।। 355/1973
विश्वावसून्याविशेति।।हेपवमानदृशापवित्रेणपूयमानयद्वापुनानमेनरुच्यंसोमरुचारुचाचदीप्तोसवर्णतेजसाहेदेवदीप्य
मानदेवेभ्योदेवार्थंसुतोभिषुतस्त्वंविश्वाव्याप्तानिसर्वाणिवसूनिवसूनिधनानिआविशअस्मान्प्राप्नय।।यद्वासर्वाणिवसूनि
वासस्थानानिग्रहादीनिआविशसमंतात्प्रविशदेवेभ्यःसुतःदेवेभ्यस्परीतिपाठो।। ।।अथतृतीया।।आपवमानसुष्टुतिं
वृष्टिंदेवेभ्योदुवः।।इषेपवस्वसंयतमिति।।हेपवमानपूयमानपुनानइंदोसोमसुष्टुतिंशोभनस्तुतियुक्तांवृष्टिंदेवेभ्योदेवानांदु
वःस्तुपांसुस्तुगिति चतुर्णांलुक्दुवसेपरिचरणायआपवस्वआगमयत्वंपंथामतोयथास्तुत्यावृष्टिर्भवति।तथाकुरुवि
त्यर्थः।।किंचअस्माकमिषेन्नार्थंचसंयतंसम्यगस्मात्संगच्छंतींवृष्टिंकुरु।।यद्वादुवःपरिचर्यामभिलक्ष्यक्रियमाणंस्तुतिं

शोभनस्तुतिरूपां चरिष्टिं बृहद्दशः स्तुतिमित्यर्थः एतां देवेभ्यः प्रापय॥ ॥इति पंचमाध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे पंच
६२ मस्य च प्रथमा॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे॥ घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभा
ति भरतेभ्यः शुचिरिति॥ जनस्य गोपा गोपयिता रक्षिता जागृविर्जागरणशीलः सदा प्रबुद्धः सुदक्षः सुबलः सर्वैराघ्यनीय
बलः सोऽग्निः नव्यसे नवतराय सुविताय लोकानां कल्याणाय अजनिष्ट जातः ततः घृतप्रतीकः एवंविधोऽग्निः भरतेभ्यः ऋ
त्विग्भ्यः तदर्थं द्युमत् दीप्तिमत् यथा भवति तथा ज्वाति प्रकाशते॥ ॥अथ द्वितीया॥ त्वामग्ने अंगिरसो गुहा हितमन्ववि
दन्छिश्रियाणं वने वने॥ स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिर इति॥ हे अग्ने अंगिरसः एतं नामकः ऋष ६२
यः गुहा कुहायां हितं निहितं निगूढं वा नवने रक्षश्रियाणं आश्रितं त्वां अन्वविंदन्। अलभंत महत् महता सहसा बले
नयुक्तः सन् मथ्यमानो जायसे हे अंगिरः अंगिरसां प्रकृतिभूत त्वां सहसस्पुत्रमाहुः॥ ॥अथ तृतीया॥ यज्ञस्य केतुं प्रथ

मं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते॥ इंद्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुरिति॥ नरः कर्मणां ने
तारः ऋत्विजः यज्ञस्य यागस्य केतुं प्रज्ञापकं पुरोहितं यजमानैः पुरस्कृतं इंद्रेण देवैश्च सरथं तेषामन्यत्वात् समानरथं अ 357/1973
ग्निं त्रिषधस्थाने विहारप्रदेशे समिधा तस्य स्पर्शयंति॥ ततः सुक्रतुः शोभनकर्मा होता देवानामाह्वाता सोऽग्निर्बर्हिषि ब
र्हिषि युक्ते तस्मिन् स्थाने यजथाय यज्ञाय निषीदन् न्यसीदन् प्रतिष्ठितो भवति इति यावत् समिंधात समिधीर इति पाठे॥ ॥अथ
द्वितीयस्य च प्रथमा॥ अयं वां मित्रावरुणा सुतः सोम ऋतावृधा॥ ममेदिह श्रुतं हवमिति॥ हे ऋतावृधा सत्तस्य यज्ञस्य
ववर्धकौ हे मित्रावरुणौ वां युवाभ्यां अयं सोमः सुतोऽभिषुतः यस्मादेवं तस्मात् इहास्मिन् यज्ञे ममेत् मदीयमेव हवं
आह्वानं श्रुतं शृणुतं॥ ॥अथ द्वितीया॥ राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे॥ सहस्रस्थूण आशाते इति॥ राजानौ ईश्व
रौ दीप्यमानौ वा अनभिद्रुहा अनभिद्रोग्धारौ यौ मित्रावरुणौ ध्रुवे स्थिरे उत्तमे उत्कृष्टे सहस्रस्थूणे सहस्रस्थाने आशाते उप

६३

विज्ञानः तायागगछतामितिशेषः॥ ॥अथतृतीया॥तासंम्राजाधृतासुती आदित्यादानुनस्पती॥ सचेते अनवह्वरमिति॥संम्राजासं

म्राजौआज्ञयैवसर्वेशासितारौघृतांनौतद्धांमहिलंघृतांनावल्लितिमंत्रांतरात॥आदित्याआदितेः पुत्रौदानुनस्पतीदानुनोदानस्य

देयस्यधनस्यपतीस्वामिनौतौमित्रावरुणौअनवह्वरंअकुटिलंयजमानंसचेतेहविर्भक्षणार्थंसेवेते॥ ॥अथतृतीयत्वेन

थमा॥ इंद्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः॥ जघाननवतीर्नवेति॥ अत्रशाट्यायनिनइतिहासमाचक्षते अथर्वणस्यदधी

चोजीवतोदर्शनेन असुराः पराबभूवुः अथतस्मिन्स्वर्गतेसति असुरैः पूर्णापृथिव्यभवत्॥ अथेंद्रस्तैरसुरैः सहयोद्धुम

शक्नुवन्स्तमृषिमन्विच्छन्स्वर्गंगतइतिशुश्राव अथपप्रच्छतत्रत्यान्नेहकिमस्यकिंचित्परिशिष्टमंगमस्तीतितस्माअवो ६३

चन्॥ अस्त्येतदाश्वंशीर्षंयेनशिरसाअश्विभ्यांमधुविद्यांप्राब्रवीत्॥ तन्नविद्मः॥ यत्राभवदितिपुनरिंद्रोब्रवीत्॥ तदन्वि

छतेतितद्यान्वैषिषुस्तच्छर्यणावत्यनुविंदाजहुः शर्यणावद्धैनामकुरुक्षेत्रस्यजघनार्धेसरः स्यंदतेतस्यशिरसोस्थिभि

रिंद्रोसुरानजघानेति। अप्रतिष्कुतः। परैरप्रतिशब्दितः। प्रतिकूलशब्दरहितइंद्रः अथर्वणस्यदधीचएतत्संज्ञकस्यऋषेः अ

स्थभिः अश्वशिरः संबंधिरस्थिभिर्नवतीर्नवसंख्याकाः नवतीरशीतिरष्टशतसंख्याकाः तथाहिलोकत्रयवर्तिनोदेवानजे

तुं आसुरावासुरीमायात्रिधासंपद्यते। त्रिविधासा अतीतानागतवर्तमानकालभेदेनतत्तत्कालवर्तिनोजेतुं पुनरपिप्रत्येकंत्रि

गुणिताभवतिएवंनवसंपद्यंते पुनरपिउत्साहादित्रयशक्तिरूपेणत्रैगुण्येसतिसप्तविंशतिः संपद्यंते। पुनः सात्विकादिगुण

त्रयभेदेनत्रैगुण्येसतिएकाशीतिः संपद्यंते एवंचतुर्भिस्त्रिकैर्गुणितायामायायाः दशसुदिक्षुप्रत्येकमवस्थानेसतिनवन

वतयः संपद्यंते एवंविधमायारूपाणिवृत्राण्यावरकाण्यसुरजातानिजघानहतवान्। दधीचः दधि अंचतीतिदध्यङ्। अंचतेऋ

त्विगित्यादिनाक्विन्। अनिदितामितिलोपः। षष्ठ्येकवचनेभचउत्यकारलोपेचावितिदीर्घत्वं उदात्तनिवृत्तिस्वरेणविभक्त्युदात्तत्वेतथा

सेम्मदपवादत्वाद्वावितिपूर्वपदस्यांतोदात्तत्वंप्राप्तं। अचेश्छंदसि सर्वनामस्थानमितिपुनर्विभक्त्युदात्तत्वविधानेनतद्बाध्यतेअ

359/1973

६४ स्तभित्वं दस्यापि दृश्यत इति अनद्या रावाप अस्थिरा स्यान इन्द्रेशः सचोदात्तः॥ ॥अथ द्वितीया॥ इच्छन्नश्वस्य यच्छिरः पर्वतेष्वप
श्रितं॥ तद्विदच्छर्यणावतीति॥ पर्वतेषु पर्ववत्सु गिरिषु अपश्रितं अपगत्य स्थितं अश्वस्य अश्वसंबंधि दधीचो यच्छिरः इच्छन्निंद्रो व
र्तते॥ शर्यणावति एतत्संज्ञे केसरसि तस्मिन् तद्विदत् लब्धवान् तदीयैरस्थिभिर्वृत्राणि जघनेति पूर्वस्यामृचि संबंधः इ
च्छन् इषु इच्छायां तुदादित्वाच्छप्रत्ययः विदत् विद्लृ लाभे लुङि च्लेरङादेशः शर्यणानामादेशाः तेषामदूरभवः सरः शर्यणावत्
मध्वादिषु शर्यणशब्दस्य पाठात् मध्वादिभ्यश्चेति चातुरर्थिको मतुप् संज्ञायामिति मन्तुपो वलं मतौ बह्वचोऽनजिरादीनामि
ति दीर्घः॥ ॥अथ तृतीया॥ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं॥ इत्था चंद्रमसो गृह इति॥ अत्राह अस्मिन्नेव गोर्गंतुश्चंद्रमसो ६४
गृहे मंडले त्वष्टुस्त्वष्टुरादित्यस्य संबंधि अपीच्यं तत्रांतर्हितं स्वकीयं नाम तदादित्यरश्मयः इत्था इत्थमनेन प्रकारेण अमन्वत॥
अज्ञानन् उदकमये स्वच्छे चंद्रबिंबे सूर्यकिरणाः प्रतिफलंति तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभंते। तादृशीं

चंद्रेपि वर्तमाना लभंत इत्यर्थः एतदुक्तं भवति यद्यप्यर्वाचांतर्हितं सौरं तेजस्तच्चंद्रमंडलं प्रविश्य अहर्नामेनेशं तमो निवार्य सर्वं प्रका
शयति ईदृक्प्रभूतं तेजसा युक्तः सूर्यश्चंद्र एतद्वौ दृश्यत्वादित्येषु इंद्रस्यापि परिगणितत्वात्॥ अतो ह्यहोरात्रयोः प्रकाश इंद्र एवेति। इं
द्रस्य तेः प्रतीयमानत्वादिंद्राद्देवतत्वेन तदुपयमनं भवति। अत्र निरुक्तं अथाप्यस्यैको रश्मिश्चंद्रमसं प्रति दीप्यते॥ तदेतेनो
पेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति। स सुषुम्नः सूर्यरश्मिश्चंद्रमा गंधर्व इत्यपि निगमो भवति सोपि गौरुच्यते अत्राह गोरम
न्वतेति। अत्र इत्था समममंतादित्यरश्मयः संनामापीच्यम पचितमपगतमपहृतमंतर्हितं चेति। अमन्वत मनु अवबोधने भ
पीच्यं अपपूर्वादंचेर्नोतेरर्थादपश्चातिनिपातनाद्यत। अत एवाभिमतरूपसिद्धिः॥ यद्वा अपिपूर्वादंचतेः क्विन् गत्यादिना क्विन्।
आनिदितामिति नलोपः अपिगतोऽनिगतो भवमपीच्यं। भवः छंदसीति यत्। भव इत्यकारलोपश्चाविति दीर्घत्वं। अपीच्या प्रका
शा इति भट्टभास्करमिश्रः॥ इत्था इदमस्थमुरिति थमुप्रत्ययः॥ अन्ययादापत्कपदुः इति सिकबुकं बाधिला सपासकद्गितिरुद्देशः चंद्र

361/1923

मसः चंद्रमा आल्हादनं निमितेर्निर्मित इति चंद्रमाः चंद्रमाडौ तेर्डितिइत्यसिप्रत्ययः। दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वं।
६५ पूर्वपदस्य चस्यापि तंचौत्यादिना रकप्रत्ययांतमंतोदात्तत्वं॥ ॥अथ चतुर्थत्वचे प्रथमा॥ इयं वामस्य मन्मन इंद्राग्नी पूर्व्यस्तुतिः॥ अभ्रा
द्वृष्टिरिवाजनि॥ हे इंद्राग्नी इयं पूर्व्यस्तुतिः पूर्व्या मुख्या स्तुतिः कस्य संबंधिनी अस्य मन्मनः स्तोतुः अस्मात् इसि वात् वां युवाभ्यां
युवयोरर्थं अभ्रान्मेघाद्वृष्टिरिव बर्हीसति अजनि प्रादुर्भूतां तां शृणुतमित्युत्तरसंबंधः॥ ॥अथ द्वितीया॥ शृणुतं जरितुर्हवमिंद्रा
ग्नी वनतं गिरः॥ ईशाना पिप्यतं धियः॥ इति। हे इंद्राग्नी जरितुः स्तोतुर्हवमाह्वानं युवां शृणुतं श्रुत्वा च गिरस्तदीयाः स्तुतीर्वनतं सं
भजतं। तथा ईशाना ईश्वरौ युवां धियः अनुष्ठितानि कर्माणि पिप्यतं तैस्तैः फलैः पूरयतं॥ ॥अथ तृतीया॥ मा पापत्वाय नो नरें ६५
द्राग्नी माभिशस्तये॥ मा नो रीरधतं निदे इति॥ हे नरा नेतारौ इंद्राग्नी नोस्मान् पापत्वाय पापवत्त्वाय पहीनताय मा रीरधतं मा
वृतं नयतं। तथा अभिशस्तये शत्रुभिः कृताया अभिशंसनाय मा रीरधतं तथा निदे निंदकाय जनाय नोस्मान् मा रीरधतं मा वशी

कुरुतं॥ ॥इति पंचमेध्याये तृतीयः खंडः॥ अथ चतुर्थखंडे प्रथमत्वचे प्रथमा॥ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे॥
मरुद्भ्यो वायवे मद इति॥ हे हरे हरितवर्ण वा पदं तं वा सोम दक्षसाधनः दक्षो बलं तस्य साधकः मदो मदकृत् त्वं पवस्व क्षर कि 353/1973
मर्थं देवेभ्यः॥ इंद्रादिभ्यः पीतये पानाय। तथा मरुद्भ्यो वायवे च पीतये पवस्व॥ ॥अथ द्वितीया॥ सं देवैः शोभते वृषा कविर्यो
नावधि प्रियः॥ पवमानो अदाभ्य इति॥ अयं सोमः संशोभते देवैः सह। कीदृशः सोमः वृषा वर्षकः कविः क्रांतदर्शी। योनौ स्था
ने स्वीये अधिष्ठितः प्रियः भूतः सर्वेषां य इष्टः प्रीणयिता पवमानः क्षरन्। अदाभ्यः केनाप्यहिंसितश्च भवति। अत एव सोमः संशो
भते॥ ॥अथ तृतीया॥ पवमान धिया हितोभि योनिं कनिक्रदत्॥ धर्मणा वायुमारुह इति॥ हे पवमान सोम धिया कर्मणा
स्मादृक्व्यापारेण अंगुल्या वा हितो धृतः सन् कनिक्रदन् शब्दं कुर्वन् योनिं स्थानं ग्रहं कलशं वा अभ्यारुहः। आभिमुख्येनारोहणं
कुरु प्रविशेत्यर्थः तदेवाह॥ धर्मणा कर्मणा वायुं वायुसंबंधि पात्रमित्यर्थः तदारुह प्रविश। आरुहः आविशेति पाठो॥

अथ प्रगाथरूपो द्वितीये सूक्ते प्रथमा ॥ तवाहं सोम रारण सख्य इंदो दिवेदिवे । पुरूणि बभ्रो नि चरंति मामव परिधींरति तांइहि ॥ हे इंदो त्वं
६६ दमान सोम तव सख्ये सखित्वे कर्मणि अहं दिवेदिवे अन्वहं रारण रमे रणतिर्लिटि उत्तमे णलि रूपं ॥ हे बभ्रो बभ्रुवर्ण सोम पुरूणि बहूनि
रक्षांसि मां तव सख्ये स्थितं न्यक्चरंति नीचीनं चरंति बाधंते ये मां बाधंते तान् परिधीन् राक्षसान् त्वं अतीहि अतीत्य गच्छ जहीति या
वत् ॥ ॥अथ द्वितीया ॥ तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ॥ घृणा तपंतमति सूर्यं परः शकुना इव पप्तिम ॥ हे ब
भ्रो बभ्रुवर्ण हे सोम उत अपि च नक्तं उत अपि च दिवा अहोरात्रयोः सख्याय सख्यार्थं तव ऊधनि समीपे आं हरं इति शेषः ॥ तव वयं
घृणा दीप्त्या तपंतं तं तपंतं परस्थाने स्थितं सूर्यं त्वत्सकाशात् अतिपप्तिम ॥ तत्र स्थितं तं प्राप्तुं अतिपतेम । कथमिव शकुना इव यथा सु
पर्णादयः पक्षिणः । सूर्यमतिगच्छंति तद्वत् पत्ऌ गतौ अस्माल्लिङ्दसलिङ्गनिपात्यो छंदसीत्यकपधालोपः ॥ दुहानः सख्यायेति पा ६६
ठौ ॥ ॥अथ तृतीय तृचे प्रथमा ॥ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ॥ शुंभंति विप्रं धीतिभिरिति ॥ पुनानः पूयमा

नः विचर्षणिः विद्रष्टा सोमः विश्वाः सर्वान् मृधो हिंसकान् शत्रून् अभ्यक्रमीत् । अतिक्रांतवान् तं विप्रं मेधाविनं धीतिभिः कर्मभिः
रभिषवादिभिः अङ्गुलिभिर्वा शुंभंति दीपयंति अलंकुर्वंति ॥ ॥अथ द्वितीया ॥ आ योनिमरुणो रुहद्गमदिंद्रं वृषा सुतं ॥ ध्रुवे स
दसि सीदति ॥ अयमरुणो रुणवर्णः सोमः योनिं स्थानं द्रोणकलशं आरुहत् आरोहति । ततः वृषा कामानां वर्षक इंद्रः सुतमभि 365/1973
षुतं सोमं गमत् गच्छति । गत्वा ध्रुवे सदसि स्थिरे स्थाने यज्ञलोके आसीदति निषीदति ॥ इंद्रो वृषा सुतं इंद्रं वृषा सुत इति पाठौ ॥ ॥अ
थ तृतीया ॥ नू नो रयिं महामिंदोऽस्मभ्यं सोम विश्वतः ॥ आ पवस्व सहस्रिणमिति ॥ हे सोम अभिषुत त्वं हे इंदो नु क्षिप्रं महाम म
हांतं सहस्रिणं असंख्यातं रयिं धनं विश्वतः आपवस्व सर्वतः परिस्रव ॥ ॥इति पंचमाध्याये चतुर्थः खंडः ॥ अथ पंचमखं
डे प्रथमतृचे प्रथमा ॥ पिबा सोममिंद्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः ॥ सोतुर्बाहुभ्यां सुयतो नार्वेति ॥ हे इंद्र सोमं पिब स सोम
स्त्वां मंदतु मादयतु ॥ हे हर्यश्व हरिसंज्ञकाश्ववन्निंद्र ते त्वदर्थं सोतुरभिषवं कर्तुः बाहुभ्यां अर्वा न रश्मिभ्यामश्व इव यः

कृतवतः क्रतुपरिगृहीतादृत्विग्वीर्यं सोमं कृपाय अभिषवं करोतीति समं दधातीति पूर्वेण संबंधः ॥ ॥ अथ द्वितीया ॥ यस्ते मदो युज्यः
६७ श्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ॥ स त्वामिंद्र प्रभूवसो ममत्तु ॥ हे हर्यश्व इंद्र ते तव मदः युज्यो योग्यः चारुः शर्मदो मदो
दकरः यः सोमोऽस्ति विद्यते । येन च पीतेन सोमेन वृत्राण्यावरकाणि राक्षसादीनि हंसि हे प्रभूवसो प्रभूतधन इंद्र त्वां स सोमो
ममत्तु मादयतु ॥ ॥ अथ तृतीया ॥ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिं ॥ इमा ब्रह्म सधमादे जुषस्व ॥ हे
हे मघवन् इंद्र ते तव प्रशस्तिं स्तुतिरूपां यां वाचं वसिष्ठो नाम ऋषिः ॥ अर्चति वदति । इमां मे वसिष्ठस्य संबंधिनीं वाचं त्वं सुबोध सुष्ठु
भिबुध्यस्व किंच इमा इमानि ब्रह्म ब्रह्माणि हवी रूपाण्यन्नानि सधमादे यज्ञे त्वं जुषस्व सेवस्व ॥ ॥ अथ द्वितीया । यं त्वं प्रथमा
विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिंद्रं जजनुश्च राजसे ॥ क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनमिति ॥ ६७
विश्वाः सर्वाः घामाना पृतनाः प्रियुज्यायोमध्या प्रियंत इति पृतनाः सेनाः अंहूः परस्परं संगताः सत्यः अभिभूतरं अत्य

णामत्यर्थमभिभवितारमिंद्रं ततक्षुः आयुधादिभिस्तीक्ष्णीचक्रुः आयुधवंतमश्ववंतं च चक्रुरित्यर्थः ॥ यद्वा पृतनाइति संग्रामना
म ॥ व्याप्रियंते अत्रेति पृतनाः संग्रामाः सर्वानेव संग्रामानभिभावुकमिंद्रं नरो नेतारः स्तोतारः अन्योन्यं संगताः स्तुतिभिस्ती
क्ष्णं अकुर्वन् स्तुतो अति बलवान् भवतीति यद्वा यष्टारो हविः प्रदानेन वीर्यवंतं कुर्वंतीति । किंच स्तोतारः राजसे राजनाय तुम
र्थे असे प्रत्ययः ॥ आत्मनो विराजनार्थं प्रकाशनार्थं सर्वात्मानमिंद्रं जजनुः जनयामासुः ॥ स्तोत्रशस्त्रैः स्तुत्यस्य प्रादुर्भाव
यन्नित्यर्थः किंच ॥ क्रत्वा कर्तव्य यज्ञादिकर्मार्थं स्तोमनिष्ठे यवतिवरे वरणीये धने इंद्रं स्तोतारश्चक्रुः ॥ आत्मनां धनलाभार्थं स्तु
वंतीत्यर्थः ॥ वरिष्ठं श्रमिंद्र आमुरिं शत्रूणामाभिमुख्येन मारयितारं उग्रं उद्गूर्णबलं अत एव ओजिष्ठमोजस्विनं तरं संभव ध्वं
तरस्विनं संग्रामे शत्रुवधार्थं वेगवंतं बलवंतं वा एवंभूतमिंद्रं धनार्थं स्तुवंति । क्रत्वेव रस्थमनिष्कृतावरिष्ठंवर इति पाठः ॥ ॥
॥ अथ द्वितीया ॥ नेमिं नमंति चक्षसा मेषं विप्रा अभिस्वरा ॥ सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिरिति ॥ नेमिं

367
1973

अन्यथा नेमिर्यथा प्रोतिन तद्वदिंद्रः सर्वं व्याप्नुते तादृशं नमनशीलमिंद्रं चक्षसा दर्शनमात्रेणैव विप्रा मेधाविनः अभिस्वरे अ
६८ भिस्वरणाय स्तोत्राय इंद्रविषयं स्तोत्रं कर्तुमित्यर्थः नमंति नमस्कुर्वंति ॥ कीदृशं मेषं इंद्रो मेषो भूत्वा मेधातिथिं स्वर्गगमनय
तस्मान्मेधातिथेर्मेषभूतमिति यावत् । इदानीं यजमानः स्तोतॄनाह ॥ अपि च हे स्तोतारः सुदीतयः शोभनदीप्तयः अद्रु
हः कस्याप्यद्रोग्धारो वो यूयं कर्णसमीपदेशे तरस्विनः कर्मसु स्तोत्रेषु वा त्वरायुक्ताः संतः इंद्रस्य कर्णे श्रोत्रसमीपे ऋक्व
भिः अर्चनयुक्तैर्मंत्रैः यद्वा ऋक्वो वयस्यः येषु संति तैः स्तोत्रादिभिः संभृत इंद्रो यथा युष्मदीयानि स्तोत्राणि शृणोति तथा स
म्यगभिष्टुतेत्यर्थः ॥ अभिस्वरे अभिस्वरतिपाठो ॥ ॥ अथ तृतीया ॥ सं भुरेभासो अस्वरन्निंद्रं सोमस्य पीतये ॥ स्वःपतिं यदीं वृ
धे धृतव्रतो ह्योजसा समूतिभिरिति ॥ रेभासः रेभृ शब्दे स्तुत्ययितारः स्तोतारो रेभासः कश्यपपुत्रा रेभाः एतन्नामका ऋ ६८
षयः इंद्रमिंद्रमेव समस्वरन् सम्यक् शब्दयन् समस्तुवन् किमर्थं सोमस्य पीतये सोमपानाय यदा स्वःपतिः स्वर्गस्य

पालयिता धनस्य स्वामी वा इंद्रः वृधे यजमानादीनां वर्धनाय तर्पयति तदा धृतव्रतः धृतकर्मेंद्रः तु ओजसा बलेन ऊतिभिर्मरुद्भिः पाल
नैश्च वा सह गच्छति तैरूतिभिर्बलैर्मरुद्भिः पालनैश्चेंद्रस्य भवतीत्यर्थः समु समीपति पाठो ॥ स्वःपतिं स्वर्यतिमिति च ॥ ॥ 369/1973
अथ प्रगाथरूपे तृतीयसूक्ते प्रथमा ॥ यो राजा चर्षणीनां याता रथेभिरध्रिगुः ॥ विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा
गृण इति ॥ इंद्रश्चर्षणीनां मनुष्याणां राजा स्वामी रथेभिः रथैर्याता गंता च अध्रिगुः धृतगमनोन्यारै विश्वासां पृतनानां सेना
नां तरुता तारकः यश्च वृत्रहा वृत्रं हतवान् ज्येष्ठं गुणैर्ज्यायांसं संतं महाभागमिंद्रं गृणे स्तौमि ॥ ॥ अथ द्वितीया ॥ इंद्रं तं
शुंभ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ॥ हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्य इति ॥ हे पुरुहन्मन् कण्वपुत्र तं
मिंद्रं शुंभ हविः प्रदानादिना अलंकुरु किमर्थं अवसे रक्षणाय एवमात्मनात्मानं संबोध्य ब्रवीति ॥ यस्य तथा विधर्तरि
विधारके इंद्रे द्विता द्वित्वमस्ति नुद्यमनोऽन्यंतरशत्रून् हंतुमुद्यतं तत्र हस्ताय अनोप्यं चेति द्वैतमस्ति तत्रोच्यतेऽन्यदिहं

शयति। दर्शतो दर्शनीयः महान्प्रभूतो वज्रः देवो न सूर्यः द्योतमानः सूर्य इव स्थितः हस्तेन करेण प्रतिधाय्यप्रतिनिहितो
६१ भवति हस्तो यतिपाठो॥ मह्यं देवो महो दिव इति च॥ ॥इति पंचमेध्याये पंचमखंडः॥ अथ षष्ठे खंडे प्रथमतृचे प्रथमा॥
परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः॥ स्वानैर्याति कविक्रतुः इति॥ कविर्मेधावी कविक्रतुः क्रांतप्रज्ञः कांतप्रज्ञो वा न कर्मा
प्त्योरधिषवणफलकयोर्हितो निहितः सोमः दिवो द्युलोकस्य परि प्रिया अतिप्रियाणि वयांसि प्राप्नुः स्वानैः सवनैः क्रतु
भिः सह याति गच्छति तथा च मंत्रवर्णः श्येना अतिष्वयः पर्वतानां ककुभ इति स्वानैः स्वान इति पाठो॥ ॥अथ
द्वितीया॥ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत॥ महान्मही ऋतावृधा इति॥ जातः उत्पन्नः शुचिः शुद्धः सोमः महान् हवि ६०
रूपत्वमः स सोमाख्यः सूनुः पुत्रा मही महत्यौ ऋतावृधा यज्ञस्य वर्धयित्र्यौ जाते विश्वस्य जनयित्र्यौ मातरा आत्मनो मातरौ द्या
वापृथिव्यावरोचयत रोचयदीपयति॥ ॥अथ तृतीया॥ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे॥ वीत्यर्षचनि

ष्ठया इति॥ हे सोम प्रप्र अर्षं त्वं क्षयाय यंत्रनिवासभूय अद्रुहः॥ अद्रुहे अद्रोग्ध्रे पंन्यसे स्तोत्रे जनाय मनुष्याय वीतिवी
त्ये भक्षणाय जुष्टः पर्याप्तस्त्वं पनिष्ठये स्तुतये अर्ष यागं प्रतिगच्छ अद्रुहः अद्रुह इति पाठो। पनिष्ठये वनिष्ठये ति च॥ ॥ 369/1973
अथ प्रगाथे द्वितीयसूक्ते प्रथमा॥ त्वं ह्यं३ग दैव्य पवमान जनिमानि द्युमत्तमः॥ अमृतत्वाय घोषयन्॥ हे पवमान पूयमा
न दैव्य देवसंबंधि सोम द्युमत्तम इति षयेन द्युमांस्त्वं हि त्वमेव अंग क्षिप्रं घोषयन् शब्दयन् शब्दं कुर्वन् जनि देवसंबंधी
नि रूक्ष्यामृतत्वाय तेषाम् सरणाय आगच्छ इति शेषः दैव्यं देव्या इति पाठो॥ घोषयन् घोषयति च॥ ॥अथ द्वितीया॥
येना नवग्वा दध्यङ्ङपोर्णुते येन विप्रास आपिरे॥ देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत॥ नवग्वा नवीयगति
यद्वा नवभिर्मासैः संनस्यानुष्ठातार दध्यङ् एतन्नामकोंगिरः येन सोमेन पणिभिरपहृतानां वां द्वारं अपोर्णुते अपस्थाद
यति यन्त्रतमकार्षीत् विप्रासः सम्मुखाः सर्वे मेधाविनोंगिरसः येन च सोमेन पणिभिरपहृतानां वां द्वारं आपिरे तेरे

रपहृताग्नाः अन्यवत्सकंचदेवादीनां इंद्रादीनां काम्ये काव्ये यज्ञे नसंजातेसतिचारणः कल्याणस्यामृतस्योदकस्यसंबंधीनिश्च
७० वांस्यंनानियेनचसोमेनयजमान आशत व्याप्नुवन् अलभंत सत्वंदेवानां अमरणायागच्छेतिपूर्वेणसंबंधः ॥ नवम्यानवचेति
पाठो ॥ आशत आनशुरिति ॥ ॥ अथतृतीयस्यचप्रथमा ॥ सोमः पुनान ऊर्मिणाव्योवारंविधावति ॥ अग्रेवाचः पवमानः क
निक्रदत् ॥ पुनानः पूयमानः सोमः ऊर्मिणास्वीययाधारयाव्यमवेः संबंधिनवारंवारवालंपवित्रंविधावति विगच्छति ॥ की
दृशः सोमः पवमानः पूतः वाचः स्तोत्रस्याग्रेकनिक्रदत् पुनः पुनः शब्दंकुर्वन् विधावति ॥ अव्यमव्येति पाठो ॥ ॥ अथद्वि
तीया ॥ धीभिर्मृजंतिवाजिनंवनेक्रीळंतमत्यविं ॥ अभित्रिपृष्ठंमतयः समस्वरन् ॥ वाजिनंबलवंतंवनेवननीयेवसतीवि
र्याख्येउदकेवाक्रीडंतंसंक्रीडमानं अत्यविं अविशब्देनतद्रोमकृतंपवित्रमभिधीयते अतिक्रांतपवित्रंसोमंस्तुतिजाधी ७०
भिस्तुतिभिः मृजंतिशोधयंति ॥ यद्वा धीभिर्वर्णलोपश्छांदसः धीभिरंगुलीभिर्मृजंति ॥ किंचत्रिपृष्ठंत्रीणिपवित्राणिद्रो

णकलशाधवनीयपूतभृदात्मकानिपात्राणिपृष्ठानीतित्रीणिसवनानिवायस्यपृष्ठानीतिसतथोक्तः ॥ तंसोमंमतयः स्तोतारः अ
भिसमस्वरन् अभितः संस्तुवंति मृजंतिहिन्वंतीतिपाठो ॥ अथतृतीया ॥ असर्जिकलशां अभिमीळ्हे सप्तिर्नवाजयुः ॥ पुना 371/1973
नोवाचंजनयन्नसिष्यदत् ॥ वाजयुर्यजमानानामन्नमिच्छन्मीढ्हेसेक्ता सोमकलशान् अभिलक्ष्य कलशेषु असर्जि सृज्यतेतत्र
दृष्टांतः सप्तिर्यथासर्पणशीलोश्वसंग्रामेसृज्यतेतद्वत् ॥ पुनः पुनानः पूयमानः सोमवाचंशब्दंजनयन्नुत्पादयन् असिष्य
दत् पात्रेषुस्यंदते मीळ्हे इतिपाठो ॥ अथतृतीयस्यचप्रथमा ॥ ॥ सोमः पवतेजनितामतीनांजनितादिवोजनितापृ
थिव्याः ॥ जनिताग्नेर्जनितासूर्यस्यजनितेंद्रस्यजनितोतविष्णोः ॥ सोमः अभिपूयमाणः पवते पात्रेषुक्षरति कीदृशः मती
नांबुद्धीनांयद्वामननीयानांस्तुतीनांजनिताजनयिताजनितामंत्रेइतिनिपातनान्निलोपः ॥ किंचदिवोद्युलोकस्यजनिताप्राद
र्भवयिता ॥ तथापृथिव्याजनयिताअग्नेर्जनिताप्रकाशयिता ॥ सूर्यस्यसर्वस्यप्रेरकस्यादित्यस्यजनिता इंद्रस्यजनिता

पानेन महस्य जनिता । उतापि च विष्णोर्व्यापकस्य च जनिता ॥ एतत्सर्वं सोमेमभिषूयमाणो भवतीति ॥ ॥ अथ द्वितीया ॥ ब्रह्मा
७१ देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ सोम एव रू
पो भवति । देवानां स्तोत्रकारिणां ऋत्विजां ब्रह्मा ब्रह्माख्य ऋत्विक्स्थानीयो भवति । यद्वा देवानां द्योतमानानां उद्गात्रादीनां ब्रह्मा
राजा भवति ॥ तथा कवीनां क्रांतप्रज्ञानां रक्षंति पदानि सारधत्वेन योजयतीति स पदवीः ॥ वी गत्यादिष्विति तस्मात्क्विप्रूपं
तथा विप्राणां मेधाविनां मध्ये सर्वज्ञ ऋषिर्भवति तथा गृध्राणां पक्षिविशेषाणां श्येनः शंसनीयः पक्षिराजो भवति वनानां वनाति
हिंसाकर्मा हिंसकानां छेदकानां मध्ये स्वधितिः तन्नामकः छेदकोसि एवंप्रभावः सोमः रेभन् शब्दायमानान् पवित्रं ऊर्णा
स्तुकं नरुतमत्येति अतिगच्छति ॥ ॥ अथ तृतीया ॥ प्रावीविपद्वाच ऊर्मिं न सिंधुर्गिरः सोमः पवमानो मनीषाः ॥ अंतः प ७१
श्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ पवमानः सोमः मनीषाः मनस ईशित्रीः हृदयंगमाः स्तोमान्प्रा

वीविपत् स्तनकं पणाविपर्यासितप्रेरयत् कथमिव सिंधुः स्यंदमाना नदी यथा वाचः ॥ शब्दस्य ऊर्मिं न संघं यथा प्रेरयति तद्वत् ॥ किंच वृषभः का
मानां उदकानां वा वर्षकः ॥ सोमः अंतरं ताईवतस्तु जातं पश्यन् वराणि उबलैर्वरयितुमशक्यानि इमा वृजना इमानि बलानि आतिष्ठ 373/1973
ति असौ सोमः किं कुर्वन् गोषु जानन् गवां उपायं जानानः ॥ सन् परबलानि प्रविशति ॥ स्तोमान् स्तोमेति पाठो ॥ ॥ इति षष्ठः खंडः ॥ अ
थ तृचत्रयात्मकं सप्तमं खंडं प्रथमतृचे प्रथमा ॥ अग्निं वो वृधंतमध्वराणां पुरूतमम् ॥ अच्छा नप्त्रे सहस्वते ॥ अध्वराणां अहिंस्या
नां बलिनां नप्त्रे बध्रुं सहस्य तत्र वंतोति भाति व्यत्ययः वृधंतं ज्वालाभिर्वर्धमानं पुरूतमं अतिशयेन बहुलं अग्निं हे ऋत्विजो वो यूय
मच्छाभिगच्छत ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ ॥ अथ द्वितीया ॥ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ॥ अस्य क्रत्वा
यशस्वतः ॥ अयमग्निर्नोस्मान् तक्ष्या विकर्तव्यानि रूपेव त्वष्टा रूपाणि व धोकारि व यथा येन प्रकारेण आभुवत् आभवति
प्राप्नोति तथैनमग्निं अभिगच्छतेत्यर्थः ॥ किंच वयं अस्याग्नेः क्रत्वा प्रज्ञानेन युक्ताः यशस्वतो यशस्वंतो भवामेति शेषः ॥

॥ ॥ अथ तृतीया ॥ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ॥ आ वाजैरुप नो गमत् ॥ मनुष्याणां विश्वाः सर्वाः श्रियः संपदः । देवेषु दे
१२ वानां मध्ये योयमग्निरभिपत्यते अभिगच्छति सोऽग्निरस्मान् अपि वाजैरन्नैरुपागमत् उपागच्छतु ॥ ॥ अथ तृतीये तृचे प्रथमा ॥
इममिंद्र सुतं पिब ज्येष्ठममर्त्यं मदं ॥ शुक्रस्य त्वाभ्यक्षरन् धारा ऋतस्य सादने । हे इंद्र सुतमभिषुतं इमं सोमं सोमं पिब कीदृशं ज्येष्ठ
मतिशयेन प्रशंस्यं मदं मदकरं अमर्त्यं मारकं सोमपानजन्यो मदो नरस्य न मारको न भवतीत्यर्थः । तथा ऋतस्य यज्ञस्य संबंधिनि
सदने गृहे वर्तमानाः शुक्रस्य दीप्तस्य सोमस्य धाराः त्वामराः त्वामभ्यक्षरन् आभिमुख्येन संचलंति ॥ त्वां प्राप्नुवंत्वयमेवागच्छ
तीत्यर्थः । ज्येष्ठं प्रशस्यतमं वृद्धस्य चेति ज्यादेशः ॥ अक्षरन् क्षर संचलने छांदसो लङ् ॥ ॥ अथ द्वितीया ॥ नकिष्ट्वद्रथीतरो
हरी यदिंद्र यच्छसे ॥ नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥ हे इंद्र यत् यस्मात्त्वं हरी एतत्संज्ञावश्वौ यच्छसे रथे योजयसि तस्मा १२
त्वत्तोऽन्यः ॥ कश्चिन्न रथीतरः ॥ अतिशयेन रथवान् नकिर्नास्ति । अन्येषामुदग्राश्वयुक्तरथाभावात् ॥ त्वा त्वां त्वामनु लक्ष्य मज्मना

बलनामैतत् ॥ बलेन सदृशोपि नकिर्न ह्यस्ति ॥ स्वश्वः शोभनाश्वोन्यश्च त्वां न्याकिरानशे न प्राप्तः । इंद्रस्य बलाश्वयोरसाधारणा
त्वादिंद्रसदृशो बलवान् अश्ववान् का कश्चिदपि नास्तीत्यर्थः ॥ नकिष्ट्वत् युष्मः तत्त्वदस्मदावंतः । पारमिति पठ्यते रथीतरः । अतिशयेन
रथी रथीतरः अपि उ इत्येव द्वित्वेन उकारांतादेशः । पंचासेयमेव्यत्ययेनात्मनेपदं । स्वश्व बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं ।
आनशे आश्नोतेश्छंदसि अभ्यासात् उत्तरस्य नुट् ॥ ॥ अथ तृतीया ॥ इंद्राय नूनमर्चतोक्थानि च ब्रवीतन ॥ सुता अमत्सुरिंदवो ज्ये
ष्ठं नमस्यता सहः ॥ हे ऋत्विजः इंद्राय नूनं शीघ्रं अर्चत पूजनं कुरुत । एतदेव स्पष्टीक्रियते ॥ सुता अमत्सु आयतमेनमिंद्रं मत्तं कुर्व
तु अनंतरं ज्येष्ठं प्रशस्यतमं सहः सहस्विनं बलवंतं तमिंद्रं नमस्यत नमस्कुरुत । ब्रवीतन । ब्रवीतेर्लोटि । तप्तनप्तनथनाश्चे
ति तनबादेशः ॥ अमत्सुः मदी हर्षे छांदसः लुङ् कारेणकारेकाश्च वक्तव्या इति मत्वर्थे यस्य लुङ् ॥ ॥ अथ चतुर्थे तृचे प्रथमा
॥ इंद्र जुषस्व प्र वहा याहि शूर हरिह ॥ पिबा सुतस्य मतिर्न मध्वश्चकानश्चारुर्मदाय ॥ यानि मया हवींषि दत्तानि तानि प्रवह ।

375/1973

आयाहिभागछुभूरविभ्रतउपसर्गाक्षराणि। हरिहूअथवा हरितवर्णाः ह्र्याायस्यसहरिह्र्याः तस्यसंनोधनंत्रि। यतेस्तेहरि
७३ हश्चांद्र सोयकारलोपः। पिबाफलस्यसोमस्यउपसर्गाक्षराणि॥ मतिर्नमधोश्वकानः चारुशोभनः मदाय भक्षणाय॥ ॥अथ
द्वितीया॥ इंद्रजठरन्नव्यन्नपृणस्वमधोर्दिवोन॥ अस्यफलस्यस्वार्उर्नोपत्वामदाः फवानोभस्तुः। इंद्रजठरंउदरंनव्यंनव्यतरंपृणस्व
पूरयस्वमधोः मधुरदिवोनसोमस्यास्यसुतस्याभिषुतस्यस्वर्नस्वर्गस्येवउपत्वाउपसमीपेत्वांमदाः फवाचः शोभनवाचःभ
स्तुः स्तितवतः॥ ॥अथतृतीया॥ इंद्रस्तुरषाण्मित्रोनजघानवृत्रंयतिर्न। बिभेदवलंभृगुर्नससाहेशत्रून्मदेसोमस्य॥ इंद्रस्तु
राषाइतिशुरसीदतियः सः तुराषाट्॥ मित्रोनमित्रएवजघानवृत्रशत्रुंयतिर्नउपसर्गाक्षराणिबिभेदमंदस्यवलंबलोनामदान
वः। तंबलंभृगुर्नात्रिणिवीक्षिणिपदंस्तांतेपुउपसर्गाक्षराणिभवंति। समासेसहितावान्। मदेभक्षणेकृतेसोमस्य॥ ॥वेदार्थ- ७३
स्यप्रकाशेनइत्यारभ्यउत्तरार्धग्रंथेपंचमोध्यायः॥ ॥यस्येत्यादिमेहेश्वरमित्यंतंज्ञेयं॥ ॥छ॥ अथपष्ठोध्यायआरंभः॥

तत्रगोवित्पवस्वेतिप्रथमखंडप्रथमा॥ गोवित्पवस्ववसुविद्धिरण्यविद्रेतोधाइंदोभुवनेष्वर्पितः॥ त्वंसुवीरोअसिसोमविश्ववित्तंत्वानर
उपगिरेमआसते॥ हेइंदोसोमत्वंपवस्वक्षरकोदृशस्त्वंगोवितगवांलंभकः वसुवितधनस्यलंभकः हिरण्यवितहिरण्यस्यलंभ 377/1973
कः रेतोधाः रेतउदकंतस्यधातोपधीनां। यद्वारेतः भजननसामर्थ्यंतस्यधारयिता। भुवनेषुलोकेषुअर्पितः सोमकीदृशस्त्वं
सुवीरोसिशोभनवीर्योभवसिविश्ववित्सर्वस्यवेत्तासियस्मादेवंतस्मात्त्वाहृशंत्वामिमेनरोनेतारोगिरास्तुत्याउपासते नरो
विप्राइतिपाठो॥ ॥अथद्वितीया॥ त्वंनृचक्षाअसिसोमविश्वतःपवमानवृषभताविधावसि। सनःपवस्ववसुमद्धिरण्यवद्वयं
स्यामभुवनेषुजीवसे॥ भोसोमत्वंविश्वतः सर्वतः सवनेषुभुवनेषुनृचक्षाअसिनृणांद्रष्टाभवसिपवमानपुनानसोमवृषभ
अपांवर्षकताअपाविधावसिअपांविविधंगच्छसिसत्वंनोस्माकंपवस्वक्षरवसुमत्तीवहुभिर्वसुभिर्वासकैर्गवादिद्रव्यैर्युक्तं
तथाहिरण्यवतबहुभिर्हिरण्यैर्युक्तं धनंवयंचवसुभिर्हिरण्यैश्चयुक्ताभुवनेषुलोकेषुजीवसेजीवितुंप्रभवः स्यामभवेम॥

॥ ॥अथतृतीया॥ ईशानइमाभुवनानिवीयसेयुजानइंदोहरितः सुपर्ण्यः॥ तास्तेक्षरंतुमधुमद्घृतंपयस्तववृतेसोमतिष्ठंतुकृष्टयः॥
हेइंदोसोमईशानः सर्वस्यस्वामीत्वमिमाइमानिभुवनानिभूतजातानिईयसेगच्छसिईङ्गतौ॥ दिवादिभ्यः श्यन्नितिनिश्यन्नकृतकुर्व
नहरितोहरितवर्णाः सुपर्ण्यः सुपतनाअश्वाः रथेयुञ्जानोयोजनयन्ता॥ सुपर्ण्यस्तेनचसंबंधिन्यः मधुमन्माधुर्योपेतंच
तदृशंपयउदकंक्षरंतु॥ हेसोमतववृतेकर्मणितिष्ठन्तुकृष्टयोमनुष्याः सर्वेईयसेवियसइतिपाठो॥ ॥अथद्वितीयस्यचप्रथमा
॥पवमानस्यविश्ववित्प्रतेसर्गाअसृक्षत॥ सूर्यस्येवनरश्मयः॥ हेविश्ववित्सर्वस्यज्ञः सोमपवमानस्यक्षरतस्तेतवसर्गाः
सृज्यमानाधाराः सूर्यस्येवरश्मयस्सूर्यस्यकिरणाइवप्रकाशमानानीतिसंप्रत्ययर्थेइदानींप्रासृक्षतप्रसृज्यंते॥ ॥अथद्वितीया॥
केतुंकृण्वन्दिवस्परि विश्वारूपाभ्यर्षसि॥ समुद्रः सोमपिन्वसे॥ हेसोमसमुद्रः समुद्रवंतियस्माद्रसाः समुद्रः समुद्रवंतियस्मा ७४
द्रसा॥ समुद्रः सत्वंकेतुंप्रज्ञानंकृण्वंकुर्वन्अस्माविश्वारूपाविश्वानिरूपाणिदिवोंतरिक्षादभ्यर्षसिअभिपवसेपिन्वसेनानाः

विधानिधनानिअस्मभ्यंप्रयसि॥ ॥अथतृतीया॥ जज्ञानोवाचमिष्यसिपवमानविधर्मणि॥ क्रंददेवोनसूर्यः॥ हेपवमानसो 379
मदेवोनसूर्यः द्योतमानः सूर्यइवजज्ञानः प्रादुर्भूतस्त्वंविधर्मणिविधारकेदशापवित्रेक्रंदनन्शब्दंकुर्वन्वाचंइष्यसिप्रेरयसिजज्ञानः 1973
हिन्वानः इतिपाठो॥ क्रंदन्नक्रामिति॥ अथप्रसोमासइतिसप्तमेतृतीयेसूक्तेतत्रप्रथमा॥ ॥ प्रसोमासोअधन्विषुः पवमाना
सइंदवः॥ श्रीणानाअप्सुरंजते॥ पवमानासः पूयमानाः इंदवोदीप्ताः स्तोमासः सोमाः प्रधन्विषुः धन्वतिर्गतिकर्मा॥ प्रग
च्छंतिकिंचश्रीणानागोभिः श्रयमाणाअप्सुवसतीवरीषुवृंजते गच्छंतिअव्रजागतौ सर्वत्राभवंतीत्यर्थः रुजनेमृजतेतिपाठो
॥अथद्वितीया॥ अभिगावोअधन्विषुरापोनप्रवतायतीः॥ पुनानाइंद्रमाशत॥ गावोनगमनशीलाः इंदवः सोमाः अधन्वि
षुः दशापवित्रमभिगच्छंतिकिमिवापवताप्रवणवतादेशेनयतीर्गच्छंत्यआपोनआपइवपश्चात्पुनानाः इंद्रंप्रीणयितुंअ
शतव्याप्नुवन्॥ पात्रमाद्रुतिप्रणाद्रुतिइंद्रमेवव्याप्नुवन्॥ अथतृतीया॥ प्रपवमानधन्वसिसोमेंद्रायमादनः॥ नृभिर्यतो

विनीयसे॥ हे पवमानान्सोम इंद्राय इंद्रस्य मादनो मादयिता त्वं प्रधन्व प्रगच्छसि। पवित्रवंतं देवाहृत्कृत्विग्भिर्नेतृभिः ऋत्विग्भिः
७५ यतो गृहीतः विनीयत हविर्धानात मादनः पातवेति पाठो॥ अथ चतुर्थी॥ इंद्रो यदद्रिभिः सुतः पवित्रं परिदीयसे। अरमिं
द्रस्य धाम्ने॥ हे इंद्रा त्वं यद्य दा अद्रिभिर्ग्रावभिः सुतोभिषुतः। पवित्रं दशापवित्र परिदीयसे परिगच्छसीत्यर्थः। तदा इंद्रस्य
धाम्न स्थानाताताय धास्को योदुरा यथा भवयाप्तो भवति परिदीयसे परीधसीति पाठो॥ ॥अथ पंचमी॥ त्वं सोम नृमाद
नः पवस्व चर्षणीधृतिः॥ सस्निर्यो अनुमाद्यः॥ हे सोम नृमादनो नृणां मादयिता चर्षणीधृधिः। चर्षणीधृतिः। चर्षणीभिर्ऋ
त्विग्भिः प्रजाभिर्धृतस्त्वं पवस्व यस्त्वं सस्निः शुद्धः अनुमाद्यः। स्तुत्यः स पवस्वेति समन्वयः। चर्षणीधृतिः चर्षणीसहे इ ७५
ति पाठो॥ अथ षष्ठी॥ पवस्व वृत्रहंतम उक्थेभिरनुमाद्यः॥ शुचिः पावको अद्भुतः॥ हे सोम वृत्रहंतम शत्रूणामतिशयेन हंतस्त्वं
पवस्व क्षराद्भुतः शास्त्रमुख्यैर्नवाक्यैरनुमाद्यस्तुत्यः शुचिः शुद्धः पावकोन्यस्य शोधकः अद्भुतो महान् एवं महानुभावः प

वस्व वृत्रहंतमः वृत्रहंतमेति पाठो॥ ॥अथ सप्तमी॥ शुचिः पावक उच्यते सोमः सुतस्य मध्वः॥ समधुमान्। देवावीरघशंसहा 381 / 1973
सुतोभिषुतः मधुमान्माधुर्योपेतः स सोमः शुचिस्वयंशुद्धः पावकोन्यशोधकश्चोच्यते तथा देवावीर्देवानामवितातर्पयिता
। अघशंसहा अघं पापं शंसतीत्यघशंसा असुरास्ते हंतेति चोच्यते सुतः मधुमान् सुतस्य मध्वेति पाठो॥ ॥इति षष्ठाध्याये
प्रथमः खंडः॥ अथ द्वितीयखंडे प्रकारांतरेण समर्चं प्रथमं सूक्तं तत्र प्रथमा॥ प्रकाविर्देववीतयेव्यो वारेभिरर्षत॥ साह्वान्विश्वा
अभिस्पृधः॥ काविर्मेधावी सोमः देववीतये देवानां पानाय आयावारेभिः अवि संबंधीभिर्वालैर्दशापवित्रेण अर्षत अर्ष्यते
गम्यते साह्वान् शत्रूणां सोढा सोमः विश्वाः स्पृधः सर्वान्संग्रामान् हिंसया चाभिभवतीति शेषः। अव्यो वारेभिरर्षतीति व
हृचाः॥ ॥ अथ द्वितीया॥ स हि ष्मा जरितृभ्य आ वाजं गोमंतमिन्वति। पवमानः सहस्रिणं॥ स हि स हि स्म स खलु पवमा
नः सोमः जरितृभ्यः स्तोतृभ्यः गोमंतं पशुभिर्गोभिर्युक्तं सहस्रिणं सहस्रसंख्याकं वाजमन्नं आभिमुख्येन इन्वति व्याप्नोति प्रय

त्तीत्यर्थः॥ ॥अथ तृतीया॥ परि विश्वानि चेतसा मृशसे पवसे मती॥ स नः सोम श्रवो विदः॥ परि विश्वा हे सोम त्वं मती मत्या अस्मः
७६ च्युत्या मृशसे स्पृशसि पवित्रेण शोध्यसे ततः पवसे रसं क्षरसि एवंभूतः स त्वं नोऽस्मभ्यं श्रवो अन्नं विदो देहि। किंच चेतसा ख्यातियेनी स्यदनु
ते स्तेन चित्तेन॥ परि विश्वा परितः स्थितानि विश्वानि सर्वाणि धनानि देहीति शेषः मृशसे मृशसीति पाठः॥ ॥अथ चतुर्थी॥ अभ्यर्ष बृ
हद्यशो मघवद्भ्यो ध्रुवं रयिं॥ इषं स्तोतृभ्य आ भर॥ अभ्यर्ष॥ हे सोम त्वं बृहद्यशः महतीं कीर्तिं अभ्यर्ष अभिगमय मघवद्भ्यः
बलवद्भ्यो हविष्मद्भ्यः अस्मभ्यं ध्रुवं स्थिरं धनं चाभ्यर्ष किंच इषमन्नं स्तोतृभ्य आ भराहर॥ ॥अथ पंचमी॥ त्वं राजेव सुव्रतो
गिरः सोमाविवेशिथ॥ पुनानो वह्ने अद्भुत॥ त्वं राजा हे वह्ने यज्ञस्य वोढः॥ अद्भुत महत् सोम सुव्रतः सुकर्मा पुनानस्त्वं रा
गिरोऽस्मदीयाः स्तुतीः आविवेशिथ आविशसि॥ ॥अथ षष्ठी॥ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः॥ सोमश्चमूषु सी ७६
दति॥ स वह्निः स सोमः वह्निः यज्ञस्य वोढा अप्सु अंतरिक्षे वर्तमाना दुष्टरः दुस्तरो दुस्तरो दुःखेनान्यैस्तरणीयो मृज्यमानः शोध्यमानः

गभस्त्योः हस्तयोरेवंभूतः सन् चमूषु पात्रेषु सीदति॥ ॥अथ सप्तमी॥ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि॥ दधत्स्तोत्रे सु 383/1973
वीर्यं॥ क्रीळु॥ हे सोम क्रीळुः क्रीडनशीलस्त्वं मंहयुर्मंहितिर्दानकर्मा दानेच्छुः मखो न दानमिव पवित्रं गच्छसि किं कुर्वन् स्तोत्रे स्तोतृतिकर्तृसुवीर्यं शो
भनवीर्यं दधत् प्रयच्छन्॥ अथ यवं यवमिति चतुर्ऋचं द्वितीयसूक्तं तत्र प्रथमा॥ ॥ यवंयवं नो अंधसा पुष्टंपुष्टं परि स्रव॥ विश्वा च
सोम सौभगा॥ यवं यवं हे सोम त्वं नोऽस्मभ्यं सु भव्यं तव हुतं यवं यवं पुनः पुनर्यवरूपं रसं अंधसा अन्नरूपया धारया परिस्रव क्षर
तत्र प्रार्थयितुरुक्तत्वात्त्वं तर्पयितव्यं॥ अवधेर्द्वितीयाभावः अबाधनमात्राधपीडा॥ प्रयात्वधर्मो नाभिधेय धर्मः उत्कृष्ट
निकारणा॥ अपि च विश्वा विश्वानि सौभगा सौभगानि धनानि परि परिस्रव अस्मभ्यं प्रयच्छेत्यर्थः॥ ॥अथ द्वितीया॥ इंदो यथा त
व स्तवो यथा ते जातमंधसः॥ नि बर्हिषि प्रिये सद इति॥ हे इंदो सोम अंधसः अन्नरूपस्य ते तव संबंधि यः स्तवः अस्मभ्यं देवमनं यथा
जातं प्रादुर्भूतमस्ति स्तवः स्तोत्रं बलं यथा प्रादुर्भूतमस्ति तथा त्वं प्रिये प्रीणयितरि बर्हिषि अस्मद्यज्ञे निषदः निषण्णो भव॥ ॥

अथ तृतीया॥ उत नो गोविदश्ववित्पवस्व सोमांधसा॥ मक्षूतमेभिरहभिरिति॥ उतापि च॥ हे सोम नोस्माकं गोवित् गोप्रदाश्ववित् अ-
७७ श्वप्रदश्च त्वं मक्षूतमेभिर्मक्षूतमैरतिशयेन शीघ्रैरहभिरहोभिर्हेतुभिरंधसा पवस्वान्नरूपेण धारया क्षर॥ ॥अथ चतुर्थी॥
यो जिनाति न जीयते हंति शत्रुमभीत्य॥ स पवस्व सहस्रजिदिति॥ हे सहस्रजित् असंख्यात शत्रूणां जेतः सोम यो भवान् जिनाति
शत्रून् जयति स्वयं शत्रुभिर्न जीयते प्रकारांतरेण मदेवाह शत्रुमभीत्य स्वयः॥ मच शत्रुमागत्य हंति किंतु तेन न हन्यत इति
शेषः॥ एवंभूतः स त्वं पवस्व धारया क्षर॥ ॥अथ तृचात्मके तृतीयसूक्ते प्रथमा॥ यास्ते धारा मधुश्चुतोसृग्रमिंद ऊतये॥
ताभिः पवित्रमासद इति॥ भो इंद्र सोम ते तव मधुश्चुतो मधुररसस्य श्चोतयित्र्यो धाराः ऊतये रक्षणाय असृग्रं सृज्यंते ता ७७
भिर्धाराभिः पवित्रमासदः आसीद॥ ॥अथ द्वितीया॥ सो अर्षेंद्राय पीतये तिरो रोमाण्यव्यया॥ सीदन् ऋतस्य योनिमा॥ हे
सोम सोभिषुतस्त्वमव्यया अविमयानि वाराणि वालानि तिरस्तिरस्कुर्वन् ऋतस्य यज्ञस्य योनिं कारणभूतं दशापवित्रमा

सीदन् आतिमुख्येन उपविशन् इंद्रायेंद्रस्य पीतये पानाय अर्ष क्षर॥ ऋतस्य योनिमासीदन्नित्यो नावनेघेति पाठो॥ ॥अथ तृ-
तीया॥ त्वं सोम परिस्रव स्वादिष्ठो अंगिरोभ्यः॥ वरिवोविद्घृतं पय इति॥ हे सोम स्वादिष्ठः स्वादुतमः वरिवोवित् अस्मदभिल-
षितस्य धनस्य लंभकस्त्वमंगिरोभ्योंगिरसामर्थाय घृतं दीप्तं पयः क्षीरवत् सारभूतं रसं परिस्रव परिक्षर॥ त्वं सोमत्व-
मिंद्रो इति पाठो॥ ॥इति पंचमाध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे प्रथमतृचे प्रथमा॥ ॥तव श्रियो वर्ष्यस्येव विद्युतोग्ने-
श्चिकित्र उषसामिवेतयः॥ यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनीति॥ हे अग्ने अग्नेः अंगनादि गुण-
युक्तस्य तव श्रियो रश्मिलक्षणा विभूतयः श्चिकित्रे प्रज्ञायंते तत्र दृष्टांतः॥ वर्ष्यस्येव विद्युतः यथा वर्षितुर्मेघस्य संबंधिन्यो वि-
द्युतः उषसामिवेतयः यथा चोषसां एतयः गमनशीलाः व्याप्ताः प्रकाशाः प्रज्ञायंते तद्वदित्यर्थः॥ कदेत्यत्राह॥ यद्यदा
त्वं ओषधीर्व्रीह्याद्या वनान्यरण्यानि च अभिसृष्टो दग्धुं विसृष्टः सन् स्वयं स्वदा आत्मनाश्वासन्यास्ये मुखे अंनमदनीयं स्था

385/1973

चरलक्षणं परिचिंनुषे परिक्षिपसीत्यर्थः॥ विद्युतोऽग्नेः विद्युत्श्चित्रा इति॥ रक्षसां न केतवः॥ उषसामिव केतव इति॥ आसनि आस्य इ
७८ त्विषपाठः॥ ॥ अथ द्वितीया॥ वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे॥ आ ते यतन्ते रथ्यो यथा पृथक् शर्धांस्यग्ने
अजरस्य धक्षत इति॥ हे अग्ने त्वं यद् यदा वातोपधूतो वायुना कंपितो वशान् कांतान् वनस्पतीननु प्रति तृषु क्षिप्रं इषितः॥ प्रे
षितः सन् अन्ना अन्नान्यन्नस्थानीयानि वनस्पत्यादीनि स्थावराणि वेविषद्व्याप्नुवन् वितिष्ठसे इतस्ततो गच्छसि॥ तदानीं अ
जरस्य जरारहितस्य धक्षतः काष्ठानि दहतस्ते तव यथा शर्धांसि तेजांसि यथा रथ्यो रथिनः तद्वत् पृथक् पृथक् आयतन्ते गच्छन्ति॥
अजरस्य अजराणीति पाठः॥ ॥ अथ तृतीया॥ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतरं मतिं॥ त्वामर्भस्य हविषः ७८
समानमित्त्वां महोवृणते नान्यं त्वदिति॥ मेधाकारं प्रज्ञायाः कर्तारं विदथस्य यज्ञस्य प्रसाधनं प्रकर्षेण साधकं होतारं देवाना
माह्वातारं परिभूतरं अतिशयेन शत्रूणां परिभवितारं मतिं मंतारं एतादृशमग्निं वयमृत्विजः वृणीम इति शेषः॥ हे अग्ने

त्वामित्त्वामेवार्भकस्याल्पस्य हविषः पुरोडाशादिकस्य भक्षणार्थमिति शेषः॥ समानमिशा हे ऋत्विजः वृणते प्रार्थयन्ते महो मह 387/1973
तः सामात्मकस्य हविषो भक्षणार्थं त्वामित्त्वामेव वृणुते त्वत्तोऽन्यं आतिरिक्तं देवं न वृणते परिभूतरं परिभूतमं इति छंदोगाव
ह्वानीपाठे॥ त्वामर्भस्य हविषः तमिदर्भे हविष्या तिवृत्वामहः तस्मिन्महीति च॥ ॥ अथ द्वितीय तृचे प्रथमा॥ पुरूरुणा चिद्ध्य
स्त्यवो नूनं वां वरुणा॥ मित्र वंसि वां सुमतिमिति॥ हे मित्रावरुणौ वां युवयोः पुरूरुणा प्रथमार्थे तृतीया पुरोरपि बहुतरं॥ अथ
वा पुरूवत दुरुत्व पुरूरु॥ अत्यंतं बहुतरमित्यर्थः॥ तावकं अवो रक्षणं नूनं निश्चयेन अस्ति हि प्रसिद्धो ह्यस्तीति पूरणः॥ हे वरुणः
हे मित्र। वां युवयोः सुमतिमनुग्रहबुद्धिं वसि संभजामि यस्माद्वोस्ति तस्माद्वंसीति भावः॥ ॥ अथ द्वितीया॥ ता वां सम्यगद्रुह्वा
णेषमश्याम धाम च॥ वयं वां मित्रस्यामेति॥ हे अद्रुह्वाणा हे अद्रोग्धारौ तौ प्रसिद्धौ वां युवयोः सम्यक् सुमतिरिति शेषः॥ स्तोता
रो वयं इषमन्नं धाम च आधारं अश्याम प्राप्नुयाम हे मित्रावरुणौ ते स्तोतारो वयं स्याम तव मम सद्रा इति शेषः॥ युवाभ्यां सभृ

ता यास्याम॥ धामन्च धायरूइति पाठो। मित्रा रुद्रेति च॥ ॥अथ तृतीया॥ पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा॥ साह्याम
७० दस्यून्तनूभिरिति॥ हे मित्रावरुणौ देवौ युवां नोस्मान्पायुभिः रक्षणैः पातं रक्षतं॥ उतापि च। सुत्रात्रा शोभनेन त्रात्रा तेन त्रा
येथां पालयथं। इष्टप्राप्त्यनिष्टपरिहाररूपभेदेन भेदः स्त्रात्रादिवं कल्प्या छ त्रायेथां॥ अभिमतं प्रापयताम् रक्षतमित्यर्थः।
वयं च तनूभिः पुत्रादिभिः सहिताः स्वीयैरंगैर्वा दस्यून् शत्रून् सह्याम अभिभवेम॥ मित्रा रुद्रेति पाठो॥ त्रायेथां। त्रायेतामि
ति। सह्याम ईर्ष्यामेति च॥ ॥अथ तृतीयतृचप्रथमा॥ उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः॥ सोममिंद्र चमू सुतमि
ति। हे इंद्र त्वं पीत्वा नु ओजसा बलेन सार्धं उत्तिष्ठन् शिप्रे हनू अवेपयः कंपयः मदावेशादिति भावः। किं पीत्वा चमू चम्वोरधिषण
फलकयोः सुतमभिषुतं सोमं पीत्वा पीत्वाति पाठो॥ अथ द्वितीया॥ अनु त्वा रोदसी उभे स्पर्धमानमददेताम्॥ इंद्र यद्दस्यु ७१
हाभवइति॥ स्पर्धमानं शत्रुभिः सह हे इंद्र त्वां उभे रोदसी उभे अपि द्यावापृथिव्यौ मदे॥ तां दृष्यंती॥

यदा दस्युहाभवः शत्रूणां हंता त्वमासित दा मदेतामिति संबंधः स्पर्धमानमदेतां कृश्रमाणमकृपेतामिति पाठो॥ ॥अथ तृती
या॥ वाचमष्टापदीमहं नवस्रक्तिमृतावृधं॥ इंद्रात्परि तन्वं ममे इति॥ अष्टापदीं अष्टाभिर्द्विगुणित्वाष्टापदीं नवस्रक्तिं उपरि
स्थितेनाद्विस्थेन नवस्रक्तिं। आमुदिक्ष्व्यासामित्यर्थः॥ ऋतावृधं यज्ञस्य वर्धयित्रीं ई वैतीं वाचं स्तुतिमर्यापरिपूर्णादिंद्रात्तन्वं तनूं त्वास
तीं अहं परिमामन्यूनयन्ती करोमीत्यर्थः। कार्त्स्न्येन स्वरूपस्य कल्यावित्ययीकर्तुमशक्यत्वादिति भावः॥ ऋतावृधं ऋतस्पृशमिति
पाठो॥ ॥अथ चतुर्थखंडे प्रथमा॥ इंद्राग्नी युवामिमेभि स्तोमा अनूषत॥ पिबतं शंभुवा सुतमिति॥ हे इंद्राग्नी युवां इमे
स्तोमाः स्तोतारः अन्ननूषत अभिष्टुवंति। हे शंभुवा सुखस्य भावयितारावित्द्राग्नी सुतमभिषुतमस्मदीयं सोमं पिबतं॥ ॥
अथ द्वितीया॥ या वां संति पुरुस्पृहो नियुतो दाशुषे नरा॥ इंद्राग्नी ताभिरागतमिति॥ हे नरौ नेतारौ इंद्राग्नी वां युवयोः स्वभू
ताः पुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीयाः दाशुषे हवींषि दत्तवते यजमानार्थं उत संन्नाया नियतो श्वाः संति इंद्राग्नी ताभि

389/1973

र्नियुद्भिः सह आगतमागच्छतं॥ ॥अथ तृतीया॥ ताभिरागच्छतं नरोपेदं सवनं सुतं॥ इंद्राग्नी सोमपीतय इति ॥ हे नरा नेता
८० रौ इंद्राग्नी सूयते अभिषूयते इति सवनः सोमः प्रति ताभिर्नियुद्भिरागच्छतं किमर्थं सोमपीतये अस्य सोमस्य मः इदं सवन
इमं संस्कृतमभिषुतं उप प्रति। यद्वा इदं प्रातःसवनं उप अस्मिन्सवने कृतमभिषुतं॥ सोमं प्रपिबताभिर्नियुद्भिः रागच्छतं कि
मर्थं सोमपीतये अस्य सोमस्य पानार्थं॥ ॥इति षष्ठाध्याये तृतीयः खंडः॥ ॥अथ चतुर्थखंडे प्रथमतृचे प्रथमा॥ अर्षा सोम
द्युमत्तमोभि द्रोणानि रोरुवत॥ सीदंछ्येनो यनेषति॥ हे सोम पवमान द्युमत्तमः अतिशयेन दीप्तिमानवत सुरण्यद्युम
ध्ययो नो स्वकारणभूत पर्वतादिस्थाने आसीदन् सर्वतो गच्छ स्वं द्रोणानि प्रयोगबाहुल्यापक्षमेतत बहुवचनं॥ द्रोणकलश ८०
नभिलक्षीकृत्य रोरुवत पुनःपुनः भृशं वा शब्दं कुर्वन्नर्षता नागच्छ। दशापवित्रमध्यान्निर्गतः॥ सोमः अविच्छिन्नधारया
द्रोणकलशे पतन शब्दं करोति खलु॥ योनौ यने श्येनो न योनिमतिपाठो॥ ॥अथ द्वितीया॥ अप्सा इंद्राय वायवे वरुणा

य मरुद्भ्यः सोमा अर्षति विष्णवे॥ इति। अप्साः वसतीवरीनामधेयानामपां संभक्तारः॥ वनयण संभक्तो। जनसनेतिविद्व आत्वंविद्यु
नाविति। तादृशाः सोमाः अर्षंतु द्रोणकलशमागच्छंतु। किमर्थं इंद्राय। सर्वदेवानां प्रथमत एव इंद्रः सोमानपिबत्॥ तस्मात्पूर्वमेवाभि
हित इंद्रः तास्मै वायवे तत्सहायाय च ऐंद्रवायवौ हि इंद्रस्यानंतरं वायुः सोमान्पिबति तस्मात् तदनु वायुरुक्तः तस्मै वरुणाय तदनंतरं वरु
णः सोमानपिबति तस्मै च। ततः मरुद्भ्यो मितंद्राव्यं ऊर्ध्वं उदाः एतंनामकेभ्यो देवेभ्यः विष्णवे सर्वजगद्व्यापिने एतंनामकाय देवाय च एते
भ्यः सर्वेभ्यो देवेभ्यः सोमा आगच्छंतिइत्यर्थः॥ सोमा अर्षंतु सोमा अर्षंतीति पाठो॥ ॥अथ तृतीया। इषं तोकाय नो दधदस्मभ्यं सो
म विश्वतः॥ आ पवस्व सहस्रिणमिति॥ हे सोम त्वं नो अस्माकं तोकाय पुत्राय इषमन्नं दधद्दधत् प्रयच्छन् सहस्रिणं सहस्रसंख्याकं ध
नं विश्वतः सर्वतो दिक्क्रमस्मभ्यं आ पवस्व आ प्रापय अस्मभ्यं पुत्राय च अन्नं धनादिकं च प्रयच्छेत्यर्थः॥ अथ प्रगाथरूपे द्वितीयस्तृचः प्रथ
मा॥ ॥सोम उ ष्वाणः सोतृभिरधिष्णुभिरवीनां॥ अश्वयेव हरिता याति धारया मंद्रया याति धारयेति। सोतृभिरभिषुवद्भि

391/1978

त्विगभिः स्तानोभिष्ठूयमाणः सोमः अवीनां स्तकविर्मास्य तस्त्वं नामुपसंख्यानमिति सानुशब्दस्य लोपाभावः समुच्छ्रितैर्वालैः पवित्रैः अधि
८१ याति अधिकं गच्छति। इ इति प्रसिद्धौ। अश्वयेव यव उव यव हारिताद्दरिवर्मर्याधारयायातिमंद्रयामदकारिण्या धारयाम द्रोणकलश
मधिगच्छति। इवाणे उणुवाणे इति पाठो॥ ॥अथ द्वितीया॥ अनूपे गोमानगोभिरक्षाः सोमो दुग्धाभिरक्षाः। समुद्रं न संवरणा
न्यग्मन मंदी मदाय तोशते इति। गोमान् गोयुक्तः सोमः अनूपे निम्ने देशे कलशे गोभिर्गोविकारैः क्षीरादिभिः सह अक्षाः क्षर इति।
तदेवोच्यते। स सोमः आत्मनो मिश्रणार्थं दुग्धाभिर्गोभिः सह अक्षाः अक्षरत् क्षरति। लुङि रूपं किंच। समुद्रं न यथा समुद्रमुद
कानि गच्छंति तद्वत् संवरणानि संभजनीयानि रसरूपाणि अन्नानि द्रोणकलशं अग्मन् गच्छंति। गमेर्लुङि च्लेर्लुकि रूपम् किंच॥
मंदी मदकरः सोमः मदाय मदार्थं तोशते हन्यते अभिषूयते। तोशतिर्वधकर्मा॥ ॥अथ तृतीयस्य तृचे प्रथमा॥ यत्सोम चित्रमुक् ८१
थ्यं दिव्यं पार्थिवं वसु॥ तं नः पुनान आभरेति। हे सोम यच्चित्रं चायनीयं उक्थ्यं स्तुत्यं दिव्यं दिवि भवं पार्थिवं पृथिव्यामं भव

चयदस्ति धनमस्ति तन्नोस्मभ्यं पुनानः पूयमानः सन् आभर आहर॥ ॥अथ द्वितीया॥ वृषा पुनान आयूंषि स्तनयन्नधि बर्हिषि। 393
हरिः सन्योनिमासदद् इति। हे सोम आयूंषि यजमानादीनां कृत्स्नां जीवितकालान् पुनानः शुध्यन् इंधन वृषा कामानां वर्षकः स्तनयन् स्तनय 1973
न् शब्दं कुर्वन् अधि बर्हिषि अधीति सप्तम्यर्थानुवादी। आस्तीर्णे दर्भे हरिः सन् हरितवर्णः सन् योनिं च कार्यं स्थानं आसदः आसीद् आयूं
षि आयुंषीति पाठो॥ आसदः आसदतीति च॥ ॥अथ तृतीया॥ युवं हि स्थः स्वर्पती इंद्रश्च सोम गोपती। ईशाना पिप्यतं धियं इति। हे सो
म च इंद्रश्च युवं हि युवां खलु स्वः पती सर्वस्य स्वामिनौ स्थः भवथः॥ तथा गोपती गवां पालकौ ईशाना ईश्वरौ संतौ धियो मदीयानि कर्मा
णि पिप्यतं प्याययतं। युवं हि स्वः स्थः पती युवं हि स्थः स्वर्पतीति पाठो॥ ॥इति चतुर्थे ध्याये चतुर्थः खंडः॥ अथ पंचमखंडे प्रथमतृचे
प्रथमा॥ इंद्रो मदाय वावृधे शवसे वृत्रहा नृभिः। तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्रनोविषत् इति॥ वृत्रहा वृत्रस्यावर
कस्य शत्रोर्निरोधकस्य आमस्य पापस्य वा हंता। यद्वा आवरकाणां शत्रूणां हंता इंद्रः मदाय हर्षार्थं शवसे बलनाम तत्बलार्थं च नृ

भिः यज्ञस्थैर्नृभिः ऋत्विग्भिः वर्धः स्तोत्रशस्त्ररूपाभिः स्तुतिभिः प्रवर्धितो बभूव। स्तुत्यादिदेवता प्राप्तबला सति प्रवर्धते। तमिन्
८२ मं चेन्द्रं महत्सु प्रभूतेषु आजिषु संग्रामेषु ऊतिं रक्षार्थे तमिति शेषः हवामहे अस्माकं रक्षणाय आह्वयामहे॥ आपि च तममतमर्भ
तमिं ईम् अर्भे अल्पे संग्रामे हवामहे अस्माभिराहूतः स चेन्द्रः वाजेषु संग्रामेषु संग्रामेषु नोऽस्मान् प्राविशत् प्रावतु प्रकर्षेण रक्षतु॥
इति मर्भे इतमर्भ इति पाठो॥ वावृधे वृधः कर्मणि लिट्। तुजादित्वादभ्यासस्य दीर्घत्वं नृभिः सावेकाचः इति प्राप्तस्य विभक्त्युदात्तत्वस्य
नृ चान्यतरस्यामिति प्रतिषेधः। हवामहे ह्वः यतो लिङि यङ्लुयनुर्लोबहुलं छन्दसीति। संप्रसारणं शपि गुणावादेशौ॥ आविषत्॥
अव रक्षणे लुङ्यड्डागमः। इतश्च लोप इति अकारलोपः सिब्बहुलं लेट्यतिसिप्। तस्यार्धधातुकत्वात् वलादिलक्षण इट्॥ ॥अथ ८२
द्वितीया॥ असि हि वीर सेन्योऽसि भूरि परादतिः॥ असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु॥ हे वीर शत्रुक्षे
पणकुशल इन्द्र त्वं सेन्योऽसि सेनार्हो भवसि॥ त्वमेकोऽपि सेनासदृशो भवसीत्यर्थः। हि यस्मादेवं तस्मात् भूरि प्रभूत शत्रूणां धनं परादादिः।

परादिदिः परादाता शत्रूणां पराङ्मुखं यथा भवति तथा। आदाताऽसि भवसि। दभ्रस्य चित् अल्पनामैतत् अल्पस्यापि तव प्रानुवृधो व 395/1973
र्धयितासि। तथा यजमानाय यागं कुर्वते सुन्वते सोमाभिषवं कुर्वते पुरुषाय शिक्षसि अपेक्षितं धनं ददासि। शिक्षतिर्दानकर्मा।
यस्मात्ते तव स्वभूतं धनं भूरि बहुलं अक्षय्यं धनं विद्यते तस्माद्ददासीति भावः। परादिदिः। डुदाञ् दाने। आदृगमहनजन इति किप्रत्ययः
लिड्वद्भावाद्द्विर्वचने कृते। अतो लोप इति इत्याकारलोपः। वृधः वृधेरन्तर्भावितण्यर्थादिगुपधलक्षणः कः। सुन्वते तस्माच्छ्नुम
इति विभक्तेरुदात्तत्वं॥ ॥अथ तृतीया॥ यदुदीरत आजयो धृष्णवे धीयते धना॥ युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र
सोऽदध इति। अत्रेदमाख्यानं। राहूगणपुत्रो गोतमः कुरुसृंजयानां राज्ञां पुरोहित आसीत्। तेषां राज्ञां परैः सह युद्धे सति स कुरुसृंजयेन
सन्नेनेन्द्रं स्तुत्वा स्वकीयानां जयं प्रापयामासेति। तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातं। गोतमो ह वै राहूगणः उभयेषां कुरुसृं
जयानां पुरोहित आसीदिति। यदा आजयः संग्रामा उदीरत उद्गच्छन्ति तस्मिन् काले इदानीं धनानि धनं धृष्णवे धर्षयित्रे शत्रू

णां त्रेता भवति तस्मै धीयते निधीयते। जयतो धनं भवतीत्यर्थः॥ देवं इंद्रत्वं तादृशेषु युधे प्रवृत्तेषु मदच्युता शत्रूणां मदस्य गर्वस्य च्यावयि
८३ तारौ हरी तदीयावश्वौ युक्ष्व स्वरथे योजय। योजयित्वा च कंचिद्विद्वां जानंतं पंचपारिवरणं यद्ध्रुवं तं हतः हन्या कंचन त्वां परिचरंतं वसा
धनेन दधः॥ स्थापय। उदीरत ईर गतौ आदिदात्तिकः॥ अनुदात्तेत्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। यद्वृत्तान्नित्य
मिति निघातप्रतिषेधः॥ धनामुषांस्त। लुगित्ति इन॥ दृशः॥ युक्ष्वं युजिर् योगे। अंतर्भावितण्यर्थाल्लोट्। द्व्यचोतस्तिङ इति संहि
तायां दीर्घत्वं दधः दधतेर्लुङि छंदस्यपि दृश्यत इति डागमः॥ हनश्च दधश्चेति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघात
प्रतिषेधः॥ वासो गिं व्यत्ययः॥ दधः दध धारणे लेटि व्यत्ययेन परस्मैपदं॥ ॥अथ द्वितीयर्चः प्रथमा॥ स्वादोरित्था विषूव ८३
तो मधोः पिबंति गौर्यः। या इंद्रेण सयावरीर्वृष्णा मदंति शोभथा वस्वीरनु स्वराज्यं॥ स्वादोः स्वादुभूतस्य रसयुतः
स्य इत्था विषूवतः इच्छमानः प्रकारेण सर्वेषु यज्ञेषु व्याप्तस्य युक्तस्य मधोर्मधुररसस्य सोमस्य क्रियाग्रहणं कर्तव्यमिति

कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ एवंविधं सोमं गौर्यो गौरवर्णा गावः पिबंति या गावः शोभथाः॥ वचनव्यत्ययः॥ इंद्रेण स
ह शोभंते। एतस्मा कामाभिवर्षकेणेंद्रेण सयावरीः सहयांत्यो गच्छंत्यः सत्यो मदंति हृष्टा भवंति तेनेंद्रेण पीतस्य सोमस्य शेषेभ 397/1973
वंतीत्यर्थः॥ वस्वीः पयः प्रदानेन निवासकारिण्यस्ता गावः स्वराज्यं स्वस्य इंद्रस्य यद्राज्यं राजत्वं तदनुलक्ष्य वर्तिता इति शेषः॥ विषूव
तः विषूव्याप्तौ॥ अस्माद्देशिणादिकः ई प्रत्ययः॥ ततो मतुप्॥ ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं॥ अन्येषामपि दृश्यत इति सां
हितको दीर्घः॥ व्यत्ययेन मत्वर्थे वं मधोः उसाद्विषु छंदसि वा वचनमिति विघेर्ङितीति गुणः॥ गौर्यः॥ षिद्गौरादिभ्यश्चेति ङी
ष्। जयसि णाद्दशो उदात्तस्वरितयोर्यण इति। परस्यानुदात्तस्य स्वरितत्वं। सयावरीः या प्रापणे आतो मनिन्क्वनिब्वनिपश्च
नो र चेति ङीब्रेफौ॥ मदंति मदी हर्षे॥ श्यान्निप्रासेन्यत्ययेन शपः। वस्वीः वस निवासे शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्चेत्युप्रत्ययः॥ धा
त्वादित्यनुवर्त्तनादाद्युदात्तत्वं। वोतो गुणवचनादिति ङीष्। गुणवचनात् इति वाद्युदात्त उदात्तार्थः इति वचनात्। तमु शब्दात्

८४ इयणादेशः॥ असिचाछंदसीति पूर्वसवर्णदीर्घत्वं स्वस्वराज्यं अकर्मधारये राज्यमित्युत्तरपदाद्युदात्तत्वं॥ ॥अथ द्वितीया॥ ता
अस्य पृतनायुवः सोमं श्रीणंति पृश्नयः॥ प्रिया इंद्रस्य धेनवो वज्रं हिन्वंति सायकं। वस्वीरनु स्वराज्यमिति॥ ताः पूर्वोक्ताः
अस्येंद्रस्य पृतनायुवः स्पर्शनकामाः पृश्नयो नानावर्णा गावः इंद्रेण पातव्यं सोमं पयसा श्रीणंति मिश्रीकुर्वंति इंद्रस्य प्रि
याः प्रीतिहेतुभूतास्ता धेनवः सायकं शत्रूणामंतकारकं वज्रमायुधं हिन्वंति। शत्रुषु प्रेरयंति। इंद्रो यथा शत्रुषु वज्रं प्रेर
यति तथेंद्रस्य मदमुत्पादयंतीत्यर्थः। अन्यत्पूर्ववत्। हिन्वंति। हिवि प्रीणनार्थः। व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये
इदित्वान्नुम्। सायकं षो अंतकर्मणि। ण्वुल्यातो युगागमः॥ ॥अथ तृतीया॥ ता अस्य नमसा सहः सपर्यंति प्रचेतसः॥ व्रतान्यस्य ८४
सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यमिति। प्रचेतसः प्रकृष्टज्ञानास्ता गावो अस्येंद्रस्य सहो बलं नमसा स्वकीयेन प
योरूपेणान्नेन सपर्यंति परिचरंति॥ पुरूणि बहूनि अस्येंद्रस्य व्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणि सश्चिरे सचिरंता

तव्यतया इत्यर्थः॥ किमर्थं पूर्वचित्तये युयुत्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय। अन्यत्पूर्ववत्। पूर्वचित्तयो चित्ती संज्ञानेन
युध्यमानाः शत्रवः। सर्वे मरणं प्राप्ताः। किमर्थं भवद्भिः प्राप्तव्यं बलमिति तेषां बोधनायेत्यर्थः॥ अन्यत्पूर्ववत्। पूर्वचित्त
ये चित्ती संज्ञाने भावे क्तिन्। मरुद्वृधादित्वात् पूर्वपदांतोदात्तत्वं॥ ॥इति षष्ठाध्याये पंचमः खंडः॥ अथ षष्ठखंडे प्रथमर्क्षु प्रथ
मा॥ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः॥ श्येनो न योनिमासदत्॥ गिरिष्ठाः पर्वते जातोंशुः सोमो मदाय
मदार्थं असावि अभिषुतः अप्सु वसतीवरीषु दक्षः प्रवृद्धश्च भवति किंच श्येनो न यथा श्येनः पक्षी वेगेनागत्य स्थान
मासीदति तद्वत्। सोमो यागनिष्पन्नं स्थानं समासदत् आसीदति॥ ॥अथ द्वितीया॥ शुभ्रमंधो देववातमप्सु धू
तो नृभिः सुतं॥ स्वदंति गावः पयोभिः। यद्देववातं देवैः प्रार्थितं शुभ्रं शोभनमंधोन्नं चरुरूपं नृभिर्नेतृभिः
सुतमभिषुतं अप्सु वसतीवरीषु धौतं शोधितं सोमं गावः पश्चात् पयोभिराशिरैः स्वदंति स्वदयंति धौतं सुषुतं

399/1973

९५ धृतः सुत इति पाठो॥ ॥अथ तृतीया॥ आदीमश्वं न हेतारोऽशूशुभन्नमृताय॥ मध्वो रसं सधमाद इति॥ आत् आदनंतरं हे
तारं प्रेरकं ईमेनं मधोर्मधुरस्य सोमस्य रसं सधमादे यज्ञे अमृताय अमरणाय अशूशुभन् ऋत्विजः शोभयंति। तत्र दृ
ष्टांतः। अश्वं न यथा प्रेरकमश्वं संग्रामे सादितः शोभयंति तद्वत्। हेतारं हेतार इति पाठो। मधोर्मध्व इति॥ ॥अथ प्र
गाथरूपा द्वितीय सूक्ते प्रथमा॥ अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुं॥ वि कोशं मध्यमं युव इति॥ हे इषस्पते अं
नस्य पते देव स्तोतव्य सोम द्युम्नं द्योतमानं बृहत् प्रभूतं यशोऽन्नरूपं देवयुं देवान् कामयमाना हविर्लक्षणं त्वदी
यं रसं अभिदीदिहि अस्मभ्यमाभिमुख्येन प्रकाशय प्रकाशयेत्यर्थः। यद्वा हे सोम यशोऽन्नं देवयुं देवान् इच्छंतं यज
मानमभिलक्ष्य प्रकाशय आमंत्रितस्याविद्यमानत्वेन पादादित्वान्निघातः। किंच मध्यमं अंतरिक्षस्थितं कोशं मे
घं वियव वियुव विशेषेण मोचय॥ देवयुं देवयुरिति पाठो॥ ॥अथ द्वितीया॥ आ वच्यस्व सुदक्ष चम्वोः सुतो ९५

विशां वह्निर्न विश्पतिः॥ वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः इति॥ हे सुदक्ष शोभनबलं चम्वोः अधिषवणफ
लकयोः सुतोऽभिषुतस्त्वं वह्निर्न विश्पतिः। सर्वासां प्रजानां। वोढा राजेव विशां प्रजानां। वोढा सन्। आ वच्यस्व आगच्छ कलशमा
पवस्व यच्चर्गत्यर्थस्य व्यत्ययेन श्नानिरूपं। किंच त्वं अपां उदकानां रीतिं व्याप्तीं वृष्टिं दिवो द्युलोकात् पवस्व उत्सृज किं कुर्वन्
गविष्टये गामात्मन इच्छते यजमानाय धियः कर्माणि जिन्वानाः प्रेरयन्। अपां जिन्वन अपनां जिन्वेति पाठो॥ ॥अथ तृतीय
तृचे प्रथमा॥ प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं। विश्वा परि प्रिया भुवदध द्विता इति। प्राण आनेतेशानाच्चिवहुलं छं
दसीति विकरणस्य लुक्। क्रयां सलुगिति रूप आकारादेशः। यज्ञस्य प्राणयिता। नेष्टयिता। महीनां महतीनां महनीयानां वा
अपां शिशुः पुत्रस्थानीयः सोमः ऋतस्य यज्ञस्य दीधितिं प्रकाशकं धारकं वा स्वीयं रसं हिन्वन् प्रेरयन् विश्वा सर्वाणि प्रिया
णि हवींषि परि परितः भुवत् परिभवति। व्याप्नोति अध अपि च द्विता द्विधा भवति। दिवि च पृथिव्यां च वर्तत इत्यर्थः॥ प्रा

401
1973

णा क्राणेति पाठः॥ ॥अथ द्वितीया॥ उप त्रितस्य पाष्योरभक्त यद्गुहा पदं॥ यज्ञस्य सप्त धामभिरध प्रियमिति॥ त्रितस्य
८६ एतंनामकस्य ऋषेः। स्तोतुर्मम यज्ञे गुहा गुहायां। हविर्धाने वर्तमानयोः पाष्योः पाषाणवत् दृढयोः अधिषवणफलक
योः पदं स्थानं सोमो यद्यदा धा उपाभक्त समभजत। अथानंतरं यज्ञस्य धामभिर्धारकैः सप्तसप्तभिः छंदोभिर्गायत्र्यादि
भिः प्रियं प्रीणयितारं सोमं अभिष्टुवंति॥ अपि वा सप्तपर्णशीलैर्वसतिर्वर्याभिः रहकैः सोममभिषुण्वंति॥ ॥अथ तृ
तीया॥ त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिं। मिमीते अस्य योजना वि सुक्रतुरिति॥ सोमः त्रितस्य मम यज्ञस्य स्वभूतानि
त्रीणि सवनानि आत्मीयया धारया पृष्ठेषु सामसु रयिं। दातारमिंद्रं एरयत। आगमयतु सुक्रतुः शोभनप्रज्ञस्तावा अ
स्येंद्रस्य योजना योजनानि संयोजनकारिणि स्तोत्राणि विमिमीते करोति यस्मादेवं तस्मादिंद्रं सामसु प्रेरयतीत्यर्थः। ८७
ऐरयत। ऐरयेति पाठः॥ ॥अथ चतुर्थे वर्गे प्रथमा॥ पवस्व वाजसातये पवित्रे धारया सुतः॥ इंद्राय सोम विष्णवे देवे

भ्यो मधुमत्तर इति। हे सोम सुतोऽभिषुतस्त्वं इंद्राय विष्णवे च अन्येभ्यो मित्रादिभ्यो देवेभ्यश्च मधुमत्तरः अतिशयेन माधु
र्योपेतः सन् वाजसातये अन्नलाभाय पवित्रे धारया सह पवस्व क्षर वाजसातये वाजसातय इति पाठः॥ मधुमत्तरः मधु
मत्तम इति च॥ ॥अथ द्वितीया॥ त्वां रिहंति धीतयो हरिं पवित्रे अद्रुहः॥ वत्सं जातं न मातरः पवमान विधर्मणीति॥ हे पवमा
न पूयमान सोम विधर्मणि विविधधर्मणि विविधधारके यज्ञे अद्रुहः द्रोहवर्जिता धीतयोंऽगुलयः धीतय इत्यंगुलिनाम हरिं हरि
तवर्णं पवित्रे स्थितं त्वां रिहंति लिहंति निष्पीडनार्थं स्पृशंतीत्यर्थः। तत्र दृष्टांतः। वत्सं जातं न मातरः मातरः मातृभूता गावः
उत्पन्नं वत्सं यथा लिहंति तद्वत् धीतयो मातर इति पाठो मातरो धेनव इति॥ ॥अथ तृतीया॥ त्वं द्यां च महिव्रत पृथिवीं चा
ति जभ्रिषे॥ प्रति द्रापिममुंचथाः पवमान महित्वनेति॥ हे महिव्रत महाकर्मन् सोम त्वं द्यां द्युलोकं च पृथिवीं च अति
जभ्रिषे। अत्यंतं बिभर्षि डुभृञ् धारणपोषणयोः तस्य छांदसे लिटि सर्वविधीनां छंदसि विकल्पितत्वात् अत्र इडागमः॥

403/1973

८७ अंतरिक्षेसोमात्मनापृथिव्यांलतारूपेणेतिएवंलोकत्रयवर्तित्वं। हेपवमानक्षरन्सोमत्वंमहित्वनामहत्वेयुक्तःसन्द्रापिंच
यंप्रत्यंमुंचथाः। प्रतिमुंचसिसंवृणोषि॥ ॥अथपंचमतृचेप्रथमा॥ इंदुर्वाजीपवतेगोन्योघाइंद्रेसोमःसहइन्वन्मदाय॥
हंतिरक्षोबाधतेपर्यरातिंवरिवस्कृण्वन्वृजनस्यराजेति। इंदुःक्षरणशीलःसोमःवाजीबलवान्गोन्योघाःगमनशीलनी
चीनाम्यरससंघातःइंद्रेसहोबलकरंरसंइन्वन्प्रेरयन्सोमःवाजीबलवान्मदायतस्यमदार्थंपवतेक्षरति।किंचर
क्षोराक्षसंईलुंहंतिहिनस्ति।किंच।अरातिंशत्रुंपरिबाधतेपरितःसंहरति।कीदृशःवरिवोवरणीयंधनंकृण्वन्स्तोतॄ
णांकुर्वन्वृजनस्यबलस्यराजास्वामिनासोमइति। अरातिंअरातिरितिपाठः॥ ॥अथद्वितीया॥ अधधारयामध्वापृचान
स्तिरोरोमपवतेअद्रिदुग्धः। इंदुरिंद्रस्यसख्यंजुषाणोदेवोदेवस्यमत्सरोमदायेति॥ अधअथानंतरंअद्रिदुग्धःग्रावभिः ८७
दुग्धोअभिषुतःसोमःमध्वामदकारिण्याधारयापृचानः। स्पृशन्सःपर्ययन्संयोजयन्रोमअविरोमभिःकृतं

पवित्रंतिरस्तिरस्कृत्यव्यवधायकंकृत्वापवतेकलशेषुक्षरति।किंचइंद्रस्यसख्यंसखिभावंकर्मवाजुषाणःसेवमानःदेवोद्यो
तमानःमत्सरोमदकरःइंदुःसोमःदेवस्यइंद्रस्यमदायमदार्थंपवते॥ ॥अथतृतीया॥ अभिव्रतानिपवतेपुनानोदेवोदेवान्
स्वेनरसेनपृंचन्॥ इंदुर्धर्माण्यृतुथावसानोदशक्षिपोअव्यतसानोअव्यइति॥ धर्माणिधारकाणिव्रतानिकर्माणिऋतुथा
ऋतौकालेवसानआच्छादयन्इंदुःसोमःपुनानःपूयमानःसन्अभिपवतेकलशानभिलक्ष्यक्षरति। कीदृशःदेवःक्री
डनशीलःस्वेनात्मीयेनरसेनदेवानिंद्रादीन्पृंचन्संपर्चयन्संयोजयन्तेमिमंसोमंदशदशसंख्याकाःक्षिपःअंगुलि
नामैतत्। कर्मार्थंप्रेर्यंतइतितत्संख्याकाअंगुलयःसभ्नोसमुच्छ्रिताअव्येअविभवेपवित्रेअव्यतगमयंति। यद्वातत्रपवित्रे
पूयमानंसोमंअव्यतगच्छंति। वीगत्यादिषुलङिव्यत्ययेनात्मनेपदंव्रतानिप्रियाणीतिपाठः॥ ॥इतिषष्ठेध्यायेषष्ठःखंडः
अथसप्तमेखंडेप्रथमसूक्तेप्रथमा॥ आतेअग्नइधीमहिद्युमंतंदेवाजरं॥ यद्धस्यातेपनीयसीसमिद्दीदयतिद्यवी

405/1993

यं स्तोतृभ्य आभरेति। हे अग्ने देव द्युमंतं दीप्तिमंतं मजरं मजीर्णं त्वा आ सर्वत इधीमहि दीपयामः यद्ध यद्ध खलु ते तव स्या
८८ पनीयसी सुष्ठुतमा समिद्दीप्तिर्द्यवि द्युलोके दीदयति दीप्यते तदा हे अग्ने स्तोतृभ्यो स्यावृत्यते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्यः
आभरेति॥ ॥अथ द्वितीया॥ आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते। सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तो
तृभ्य आभर॥ हे ज्योतिषस्पते दीप्तेः स्वामिन् अग्ने शुक्रस्य दीप्तस्य ते तुभ्यं ऋचा मंत्रेण सह। हविराभिमुख्येन हूयते। हे सु
श्चंद्र सकलाह्लादक शोभनहिरण्य वा हे दस्म शत्रूणामुपक्षयितः विश्पतिं विशां प्रजानां पालक हव्यवाट् हविषो वोढः इषि
संगतं॥ ज्योतिषः शोचिष इति पाठो॥ ॥अथ तृतीया॥ उभे सुश्चंद्र विश्पते दर्वी श्रीणीष आसनि। उतो न उत्पुपूर्या उक्थेषु ८८
शवसस्पत इषं स्तोतृभ्य आभरेति॥ हे सुश्चंद्र शोभनाह्लादन शोभन हिरण्य वा अग्ने हे विश्पते विशां प्रजानां पते उभे द्वे
दर्व्यौ हविः पूर्णे जुहूपभृतौ आसनि आस्ये आश्रीणीषे आश्रयसि पचसि वा। उतो अपि च नो अस्मान् उक्थेषु यागेषु

उत्पूर्या उत्पूरय फलैः॥ हे शवसस्पते बलस्य पालयितः इषमित्यादि गतं॥ ॥अथ तृतीयर्चे प्रथमा॥ इंद्राय साम गायत वि
प्राय बृहते बृहत्॥ ब्रह्मकृते विपश्चिते पनस्यव इति॥ हे उद्गातारः इंद्राय बृहत् एतन्नामकं साम गायत पठत॥ कीदृशाय
विप्राय मेधाविने बृहते। ते महते ब्रह्मकृते दृष्टि द्वारा हविर्लक्षणस्यान्नस्य कर्त्रे विपश्चिते विदुषे पनस्यवे स्तुतिमिच्छते ब्रह्म
कृते धर्मकृतेति पाठो॥ ॥अथ द्वितीया॥ त्वमिंद्राभिभूरसि त्वं सूर्यमरोचयः॥ विश्वकर्मा विश्वदेवो महाँ असीति॥ हे इंद्र त्वं
अभिभूः शत्रूणामभिभविता असि भवसि किंच त्वं सूर्यमादित्यं अरोचयः तेजोभिरदीपयः। किंच विश्वकर्मा विश्वस्य कर्ताऽसि
विश्वदेवः सर्वदेवश्चासि तथा च यजुर्ब्राह्मणं अग्निर्वा अन्वन्यद्देवता इंद्र मन्वन्या इति अतो महान् सर्वाधिकोऽसि॥ ॥अथ तृ
तीया॥ विभ्राजं ज्योतिषा स्वऽरगच्छो रोचनं दिवः॥ देवास्त इंद्र सख्याय येमिर इति॥ हे इंद्र त्वं ज्योतिषा तेजसा दिव आदित्य
स्य रोचनं प्रकाशकं अधिकरणत्वेन स्वः स्वर्गं विभ्राजन् प्रकाशयन् अगच्छः अप्राप्नोः किंच देवाः सर्वे ते तव सख्याय येमि

407/1973

त्वाय येभिरे त्वस्य मात्मानं नियमितवंतः अस्माकं इंद्रः सखायथास्यादिति सर्वे देवाः प्रपन्नमकुर्वन्नित्यर्थः॥ ॥अथ तृतीयर्क्
८० चे प्रथमा॥ असावि सोम इंद्र ते शविष्ठ धृष्णवागहि॥ आ त्वा पृणक्त्विंद्रियं रजः सूर्यो न रश्मिभिः॥ हे इंद्र ते त्वदर्थं सो
मोसावि अभिषुतो अभून् हे शविष्ठ अतिशयेन बलवन् अत एव धृष्णो शत्रूणां धर्षयितरिंद्र आगहि देवयजनदेशमा
गच्छ। आगतं च त्वां इंद्रियं सोमपानेनोत्पन्नं प्रभूतं सामर्थ्यं आपृणक्तु आपूरयतु॥ रजः लोकं रश्मिभिः किरणैः सूर्यो निय
थासूर्याः पूरयति तद्वत् शविष्ठ शवस्विन् शब्दादिष्ठनि विन्मतोर्लुक् इति टिलोपः पादादित्वान्निघाताभावः गहि गम
लोटि बहुलं छंदसीति शपो लुक् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः तस्मासिद्धवदत्राभादित्यसिद्धत्वाद्धेर्लुग- ८०
भावः॥ ॥अथ द्वितीया॥ आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी॥ अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना॥ हे वृत्र
हन् शत्रूणां हंतरिंद्र रथमातिष्ठ आरोह यस्मात् ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्रलक्षणेन मंत्रेण युक्तौ रथे विस्ना

भिर्योजितौ कथंकारं युगित्याकारः॥ तस्मात्त्वं रथमातिष्ठ॥ ते मनस्त्वदीयं मनः ग्रावा अभिषवार्थं प्रवृत्तः पाषाणः वग्नुना व
चनीयेनाभिषवशब्देन वचेर्गश्चेति नुप्रत्ययः गकारश्चांतादेशः अर्वाचीनं अस्मदभिमुखं सु कृणोतु सुष्ठु करोतु॥ ॥अथ 409
तृतीया॥ इंद्रमिद्धरी वहतोऽप्रतिधृष्टशवसं॥ ऋषीणां सुष्टुतीरुप यज्ञं च मानुषाणामिति॥ अप्रतिधृष्टशवसं केनाप्यप्रति 1973
धर्षितबलं अहिंसितबलमित्यर्थः इंद्रमित् इंद्रमेव ऋषीणां वसिष्ठादीनां मानुषाणां अन्येषां मनुष्याणां च सुष्टुतीः शो
भनाः स्तुतीः यज्ञं च हरी अश्वौ उपवहतः समीपं प्रापयतः यत्र स्तुवंति यत्र यजंते तत्र सवितृं इंद्रमश्वौ प्रापयत इत्यर्थः मा
नुषाणां मनोर्जाताविति। मनुशब्दादनुषुगागमश्च ऋषीणां सुष्टुती ऋषीणां च स्तुतिरिति पाठो॥ ॥इति षष्ठाध्याय
स्य सप्तमः खंडः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्रा
जाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवी

येसामवेदार्थप्रकाशे उत्तराग्रंथेषष्ठोध्यायः॥ ॥छ॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्यातीर्थ
१० महेश्वरं॥ ॥अथसप्तमाध्याय आरभ्यते॥ तत्रप्रथमखंडेप्रथमतृचेप्रथमा॥ ज्योतिर्यज्ञस्यपवतेमधुप्रियंपितादेवा
नांजनिताविभूवसुः॥ दधातिरत्नंस्वधयोरपीच्यंमदिंतमोमत्सरइंद्रियोरसइति॥ यज्ञस्याग्निष्टोमादेर्ज्योतिर्दीपकःसोमः
प्रियंइंद्रादीनांप्रियभूतंमधुमधुरंरसंपवतेक्षरत्यभिषुतस्सन्रसमुत्पादयति। यद्वाज्योतिर्यज्ञस्यस्येत्येतन्मधुविशेष
णंउक्तलक्षणंप्रियंमधुमधुरःसोमरसःपवतेपूयतेदशापवित्रेणशोध्यतइत्यर्थः। रसोविशेष्यतेदेवानांपितापालकः
जनिताफलस्योत्पादकःविभूवसुःप्रभूतधनःतेनसंपादयितुंशक्यतेदेवानांपितापालकःजनिताफलस्योत्पादकःविभूव १०
सुःप्रभूतधनःतनयंपादयितुंशक्यत्वात्तादृशःसोमरसःस्वधयोःस्वधइतिद्यावापृथिव्योर्नाम॥ अपीच्यमितिवां
तर्हितं तस्यद्यावापृथिव्योर्मध्येहितं रत्नंरमणीयंधनंदधातिस्थापयतियजमानेषु। सएवपुनर्विशेष्यते॥ तेरसोरसः

यितामदिंतमोमादयितृतमःमत्सरःससोमःइंद्रियइंद्रेणजुष्टःइंद्रियवर्धकोवा॥ ॥अथद्वितीया॥ अभिक्रंदन्कलशं
वाज्यर्षतिपतिर्दिवःशतधारोविचक्षणः। हरिर्मित्रस्यसदनेषुसीदतिमर्मृजानोविभिःसिंधुभिर्वृषेति॥ सोमरसोवाजी 411/1923
वेजनवानगमनवान्। यद्वाअश्वसदृशः अभिक्रंदन्अभितःशब्दंकुर्वन्कलशंद्रोणकलशमर्षति। गच्छति॥ कीदृ
शःदिवोद्योतमानस्यांतरिक्षस्यदशापवित्रलक्षणस्यपतिःपालकःस्वामीयद्वाद्युलोकस्यस्वामीदिविदिविसोमकर्षनःतृतीयः
स्यामितोदिविसोमअसीदितिश्रुतेःशतधारापरिमितधारोपेतःविचक्षणःविशेषेणद्रष्टा। हरिर्हरितवर्णःसोमरसोमित्र
स्यमित्रवद्धितकरस्ययज्ञस्यसदनेषुस्थानेषुसीदतिनिषण्णोभवतिकीदृशःसन्सिंधुभिःस्यंदनसाधनैरद्भिरावसोमभि
र्दशापवित्रावयवैर्मर्मृजानःशोध्यमानःवृषावर्षकःफलानां॥ ॥अथतृतीया॥ अग्रेसिंधूनांपवमानोअर्षत्यग्रेवाचो
अग्रियोगोषुगच्छसि॥ अग्रेवाजस्यभजसेमहद्धनंस्वायुधःसोतृभिःसोमसूयतइति॥ हेसोमत्वंसिंधूनांस्यंदनस्वभावा

९१ नामुदकानां अग्रे पुरस्तात्पवमानः पूयमानः शोध्यमानः सन् अर्षसि गच्छसि वृष्ट्युदकं जनयितुमाहुतिद्वारेणांतरिक्षे गच्छसी
त्यर्थः। तथा वाचो माध्यमिकाया अग्रेत्वमपि अग्रियोऽग्रार्हः पूज्यः सन् गच्छसि तथा गोषु रश्मिषु तेषामग्रे गच्छसि। तथा
वाजस्य शत्रूणामंनस्यास्मांऽशभाग्भवेति शेषः॥ तदर्थं महाधनं संग्रामं भजसे सेवसे कीदृशः सन् स्वायुधः शोभनप्रहर
णसाधनायुधः हे सोम तादृशस्त्वं सोतृभिरभिषुद्भिरध्वर्य्वादिभिः सूयसेऽभिषूयसे॥ ॥अथ द्वितीये तृचे प्रथमा॥ अस्र
क्षत प्र वाजिनो गव्या सोमासो अश्वया॥ शुक्रासो वीरयाशव इति॥ वाजिनो वेगवंतः शुक्रासो दीप्ताः आशवो वेगवंतश्च सो
मासः सोमाः गव्यया यजमानस्य गवेच्छया तथा अश्वया अश्वेच्छया तथा वीरया वीराः पुत्रभृत्यादयस्तेषामिच्छया प्रास्रक्ष
त प्रासृज्यंत रसान्वा विसृजंति॥ ॥अथ द्वितीया॥ शुंभमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवंते वारे अव्यय इति॥ ९१
ऋतायुभिर्यज्ञेच्छुभिरध्वर्युप्रभृतिभिः शुंभमानाः अलंक्रियमाणाः गभस्त्योर्हस्तयोः हस्ताभ्यां मृज्यमानाः शोध्य

मानाः सोमाः वारे वाले दशापवित्रे कीदृशे अव्यये अविमये पवंते पूयंते॥ ॥अथ तृतीया॥ ते विश्वा दाशुषे वसु सोमा दिव्या
नि पार्थिवा॥ पवंतामांतरिक्ष्येति। ते सोमाः अभिषूयमाणाः दाशुषे हविः प्रदात्रे यजमानाय विश्वा सर्वाणि वसूनि वासकानि
गवादिधनानि आपवंतां सर्वतः क्षरंतु वस्वित्येकत्वं कथं वसूनां विश्वत्वमिति उच्यते। दिव्यानि दिविभवानि पार्थिवानि पृथिवी
संबंधानि अंतरिक्ष्या अंतरिक्षाणि अंतरिक्षे भवानि एवमुक्तप्रकारेण विश्वानीत्यर्थः॥ ॥पवस्व देववीरिति दशर्चे तृतीयसू
क्ते प्रथमा॥ पवस्व देववीरति पवित्रं सोम रंह्या॥ इंद्रमिंदो वृषा विशेति॥ हे सोम देववीर्देवकामस्त्वं रंह्या वेगेन पवित्रं यथा
भवति तथा अतिपवस्व अतिक्षर किंच। हे इंदो वृषा सेचकस्त्वमिंद्रमाविश प्रविश॥ ॥अथ द्वितीया॥ आ वच्यस्व महि प्सरो
वृषेंदो द्युम्नवत्तमः॥ आ योनिं धर्णसिः सद इति। हे इंदो सोम वृषा कामानां वर्षको द्युम्नवत्तमो यशस्वितमो धर्तासि धर्त्वं म
हि महत्तरः पानीयं मंधो अन्नं आ वच्यस्वास्मान् प्रति आगमय किंच योनिं स्वकीयं स्थानमासदः आसीदस्व॥ ॥अथ तृ°

413/1973

अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ॥ अपो वसिष्ट सुक्रतुरिति ॥ सुतस्याभिषुतस्य वेधसो ऽभिलषितस्य विधातुर्यस्य सो॰
९२ मस्य धारां प्रियं प्रीतिकरं मधु अमृतं मधुक्षत दुग्धा स सुक्रतुः सुकर्म सोमः आपो वसतीवरीर्वसिष्ट आच्छादयति ॥ ॥अथ
चतुर्थी ॥ महांतं त्वा महीरन्वापो अर्षंति सिंधवः ॥ यद्गोभिर्वासयिष्यस इति ॥ हे सोम त्वं यद्यदा यज्ञे गोभिर्गोविकारैः पयोभि
र्वासयिष्यसे ॥ आच्छादयिष्यसे । तदा महांतं गुणैः प्रवृद्धं त्वामनु त्वां प्रति सिंधवः स्यंदमाना महीर्महत्य आपो अर्षंति गच्छंति
॥ ॥अथ पंचमी ॥ समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः ॥ सोमः पवित्रे अस्मयुरिति ॥ समुद्रवंत्यस्माद्रसा इति समुद्रो विष्टं
भो दिवः स्वर्गस्य धरुणो धर्ता च अस्मयुरस्मकामः सोमोऽप्सु उदकेषु मामृजे मर्मृज्यते पवित्रे ऽभिषिच्यते चेत्यर्थः ॥ ॥अथ ष
ष्ठी ॥ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ॥ सं सूर्येण रोचत इति ॥ वृषा कामानां वर्षको हरिर्हरितवर्णो महान्सर्वेषु महत्तमो मित्रो ९२
न यथा सखा तद्वद्दर्शतो दर्शनीयो यः सोमो ऽचिक्रदच्छब्दं करोति सो ऽयं सोमः सूर्येण सह संदिद्युते समित्येकीभावे सूर्येण स

द्योतत इत्यर्थः । रोचत इति बहवृचानां पाठः ॥ ॥ अथ सप्तमी ॥ गिरस्त इंद ओजसा मर्मृज्यंते अपस्युवः ॥ याभिर्मदाय शुंभस
इति । हे इंदो त्वत्त्वाजसा बलेन अपस्युवः कर्मेच्छोः संबंधिन्यस्ता गिरस्तुतयो मर्मृज्यंते शोध्यंते याभिर्गीर्भिस्त्वं मदायाक्षरन् शुं 415/1973
भसे अलंक्रियसे ॥ ॥अथाष्टमी ॥ तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ॥ तव प्रशस्तयो महीरिति ॥ हे सोम तं त्वा तादृशं उक्तगु
णकं लोककर्तुं लोकस्य कर्तारं त्वां त्वां घृष्वये शत्रूणां घर्षणशीलाय मदाय ईमहे याचामहे सोमपानमिति शेषः किमर्थमिति
उच्यते तव महे महते प्रशस्तये प्रशंसनाय च ॥ ॥अथ नवमी ॥ गोषा इंदो नृषा अस्यश्वसा वाजसा उत ॥ आत्मा यज्ञस्य
पूर्व्य इति ॥ हे इंदो क्लिद्यमान सोम यज्ञस्य ज्योति सोमाद् पूर्व्यः पुराणो नित्यः आत्मा स्वरूपभूतः सोमस्य यज्ञस्य स्वरूपं त्वं
प्रसिद्धं तादृशस्त्वं गोषा अस्मभ्यं गवां दातासि भवसि ॥ नृषाः नृणां पुत्रभृत्यादीनां दातासि ॥ अश्वसाः अश्वानां दाता चा
सि । उतापि च वाजसा अन्नानां दाता चासि ॥ ॥अथ दशमी ॥ अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया ॥ पर्जन्यो वृष्टि

मां दुवेति॥ हे इंद्रो सोम इंद्रियमिंद्रेण जुष्टमिंद्रियस्मवीर्यस्य वावर्धकं रसं मूर्धा मदकरस्याम तस्य धारया पर्जन्यो वृष्टिमां इव॥ यथा वर्ष
९३ वान् पर्जन्यो मेघस्तस्यास्मभ्यमेधातिथिभ्यः पवस्व क्षर॥ ।अतिसप्तमेध्याये प्रथमः खंडः॥ ॥अथद्वितीयखंडे सनाचेति द्वश
चे प्रथमे सूक्ते प्रथमा॥ सनाच सोम जेषि च पवमान महिश्रवः॥ अथानो वस्यसस्कृधीति॥ हे महिश्रवो महदंनं पवमान सोम सना
स्मधागे यजनीयान् देवान् भजे च जेषि च योगविघ्नकारिणो राक्षसांश्च जयं॥ अथ देवान् प्राप्य राक्षसांश्च जित्वानंतरं नोस्मान् वस्य
सः श्रेयसं स्कृधि कुरु श्रेयोस्मभ्यं देहीत्यर्थः॥ ॥अथद्वितीया॥ सनो ज्योतिः सना स्वर्विश्वा च सोम सौभगा॥ अथानो वस्यसस्कृ
धीति॥ हे सोम त्वं ज्योतिः तेजः सनास्मभ्यं प्रयच्छ॥ अपि च स्वः स्वर्गं सनास्मभ्यं देहि विश्वा विश्वानि सौभगा सौभाग्यानि वसना ९३
निधमन्यत॥ ॥अथतृतीया॥ सना दक्षमुत क्रतुमप सोम मृधो जहि॥ अथानो वस्यसस्कृधीति॥ हे सोम त्वं दक्षं बलं सनाः
स्मभ्यं देहि उतापि च क्रतुं प्रज्ञानं सना मृधो हिंसकान् शत्रूंश्चाप जहि मारयसि धमन्यत॥ ॥अथचतुर्थी॥ पवीतारः पुनीतनसो

मसिमिंद्राय पातवे॥ अथानो वस्यसस्कृधीति॥ हे पवीतारः सोमस्य शोधयितार ऋत्विजः सोमं पुनीतन स्तोममिंद्राय पातवे॥ अथानोव
स्यसस्कृधीति॥ हे पवीतारः पावयत दशापवित्रेण शोधयत किमर्थं इंद्राय पातवे इंद्रस्य पानस्यै यगत मन्यत॥ ॥अथपंच॰ 417/1973
त्वं सूर्ये न आभज तव क्रत्वा तवोतिभिः॥ अथानो वस्यसस्कृधीति॥ हे सोम त्वं तव क्रत्वा तवोतिभिः स्वकुरीकणकर्मणे त्वकर्तृकाभी
रक्षाभिश्च नोस्मान् सूर्ये आभज प्रापयसि धमन्यत॥ ॥अथषष्ठी॥ तव क्रत्वा तवोतिभिर्ज्योक् पश्येम सूर्यं॥ अथानो वस्यस
स्कृधीति॥ हे सोम तव क्रत्वा प्रज्ञानेन तवोतिभी रक्षाभिश्च ज्योक् चिरं पश्येम सूर्यं पश्याम दृश्यामः सिधमन्यत॥ ॥अथसप्त
मी॥ अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिं॥ अथानो वस्यसस्कृधीति॥ हे स्वायुध शोभनायुध सोम त्वं द्विबर्हसं द्वयोर्द्यावापृथि
व्योः स्थानयोः परिवृढं रयिं धनं अभ्यर्ष अस्मानभिगमयसि द्वस्य मन्यत॥ ॥अथाष्टमी॥ अभ्यर्षानपच्युतो रयिं समत्सु सा
सहिः॥ अथानो वस्यसस्कृधीति॥ हे यात्तिन् सोम समत्सु संग्रामेषु अनपच्युतः शत्रुभिरनभिहृतः सासहिः शत्रूणां

अभिभवतात्वं अभ्यर्षअभिगच्छक्षरगतमन्यत्॥ ॥अथनवमी॥त्वांयज्ञैरवीवृधन्पवमानविधर्मणि॥अथानोवस्यसस्कृधीति
९५ ॥हेपवमानशोध्यमानसोमत्वांविधर्मणिविविधफलस्यधारकेयज्ञेयज्ञैर्यज्ञसाधनैस्तोत्रैरवीवृधन्यजमानावर्धयंतिगतमन्यत्॥
अथदशमी॥रयिंनश्चित्रमश्विनमिंदोविश्वायुमाभर॥अथानोवस्यसस्कृधीति॥हेइंदोयागेप्रक्लिद्यमानसोमत्वंचित्रंनानावि
धंअश्विनंअश्ववंतंचविश्वायुंसर्वगामिनंरयिंधनंनोस्मभ्यमाभरआहरगतमन्यत्॥ ॥तरत्समंदीतिचतुर्ऋचंद्वितीयंसूक्तं॥तत्र
प्रथमा॥तरत्समंदीधावतिधारासुतस्यांधसः॥तरत्समंदीधावतीति॥मंदीदेवानांहर्षकरःससोमःतरत्तारकःपाप्मनःसका
शात्तारयन्धावतिदशापवित्रात्दृथःक्षरतितरेयदर्शयतिसुतस्याभिषुतस्यांधसोदेवानामन्नात्मकस्यसोमस्यधाराधावतीति
पुनरपितदेवाह्यासंतादृशार्थंतरत्समंदीधावतीति॥यद्वाअस्यान्तोयास्केनोक्तोर्थोद्रष्टव्यः॥तद्यथाव्यात्तरतिसपापंसर्वंमंदीयः ९६
स्तोतिधावतिगच्छत्यूर्ध्वांगतिंधारासुतस्यांधसोधारयाभिषुतस्यसोमस्यमंत्रपूतस्यवाचासुतस्येति॥ ॥अथद्वितीया॥उस्रा

वेदवसूनांमर्तस्यदेव्यवसः॥तरत्समंदीधावतीति॥वसूनांधनानांउस्रोत्सरणशीलाप्रदात्रीदेवीद्योतमानास्तूयमानावासोमस्य
धारामर्तस्यमनुष्यस्ययजमानमवसारक्षितुंवेदजानातिसिद्धमन्यत्॥ ॥अथतृतीया॥ध्वस्रयोःपुरुषंत्योराससहस्राणिदद्म
हे॥तरत्समंदीधावतीति॥ध्वस्रयोःपुरुषंत्योर्ध्वस्नःकःश्चिद्राजातथापुरुषंतिश्चतयोरुभयोरत्रेतरयोगविवक्षयाद्विवच 419/1973
नंद्रष्टव्यं॥सहस्राणिधनानांसहस्राण्याददद्महेतयोःसंबंधिधनंवयंप्रतिगृण्हीमस्तदस्माभिःप्रतिगृहीतंधनंसुत्तममः
स्त्वितिऋषिःसोमंप्रार्थयतइतिसोमस्यस्तुतिःसिद्धमन्यत्छे॥यद्यथावृत्तारएतयोधनानिप्रतिजग्राहएवंतरंतस्तुरमीदोप्र
तिजग्रहतुःतथाचशाट्यायनकं॥अथहवैतरंतपुरमीढौवैदश्वीध्वस्रयोःपुरुषंत्योर्दुःप्रतिग्रहंसगरग्णिराविवमेनाततो
हस्मांगुल्यासातंप्रतिमृशंततावकामयेतामसातंनाविवेदसातंस्यादिदंत्रमेववनप्रतिगृहीतमितितावेतत्रतुर्ऋचमपश्यतां
तोनप्रत्येतांततोवैत।योरसातंसातमभवदात्तामिवेवनप्रतिगृहीतंसयःप्रतिगृह्यकामयेतेत्यादि॥ ॥अथचतुर्थ॥॥

१५ भाय योस्त्रिंशतंतनाम हस्त्राणिच दृप्सदे। तरत्समंदी धावतीति॥ ययोर्ध्वस्त्रिपुरुषं त्योस्त्रिंशतांत्रिंशतानिसहस्त्राणिचतनावस्त्राण्या
दस्य हृव्य यंप्रतिगृह्णीमः तयोरस्माभिः प्रतिगृहीतंतत्सर्वमप्रतिगृहीतमस्त्विति। सोमंऋषिः प्रार्थयत इतिसोमस्यैवस्तुतिःग
तमन्यत॥ ॥ एते सोमा इति तृचं तृतीयं सूक्तं तत्र प्रथमा॥ ॥ एते सोमा असृक्षत गृणानाश्रवसे महे॥ मदिंतमस्य धारयेति॥ म
दिंतमस्य देवानां मादयितृतमस्य रसस्य संबंधिन एते सोमा अभिषुताः कृ रूपा गृणानाः स्तूयमानाः महे महते श्रवसे अस्मा
कं बलाय धारया असृक्षत गच्छति॥ ॥ अथ द्वितीया॥ अभिगव्यानि वीतये नृम्णा पुनानो अर्षसि॥ सनद्वाजः परिस्रवेति॥
हे सोम वीतये देवानां भक्षणाय नृम्णान् नृम्णानि धनवनुप्रियतराणि गव्यानि गोसंबंधीनि क्षीरादीनि पुनानः पूयमानः सन्
अभ्यर्षसि अभिगच्छसि हे सोम सनद्वाजः दीयमानान्नस्त्वं परिपरितः स्रव दशापवित्रादधः क्षर॥ ॥ अथ तृतीया॥ उत १५
नो गोमतीरिषो विश्वा अर्ष परिष्टुभः॥ गृणानो जमदग्निनेति॥ उतापि च हे सोम जमदग्निना जमदग्निनाम्ना ऋषिणा मया स्तू

णानः स्तूयमानस्त्वं नोस्माकं गोमती गोमती गोभिर्युक्तानि परिष्टुभः परितः स्तोतव्यानि विश्वाः सर्वाणीषोन्नान्यर्ष गच्छति अस्मभ्य
मेवं वि धान्यन्नानि देहीत्यर्थः॥ ॥ इति सप्तमाध्याये द्वितीयः खंडः॥ ॥ इमं स्तोममिति तृतीयखंडे प्रथमऋचे प्रथमा॥ इमं स्तो 421/1973
ममर्हते जातवेदसे रथमिव संमहेमा मनीषया॥ भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तवेति॥ अर्हते पूज्याय
जातवेदसे जातानामुत्पन्नानां वेदित्रे जातप्रज्ञाय जातधनाय वाग्न्याय मनीषया निश्चितया बुध्या इमं एतत्सूक्तरूपं स्तोमं
स्तोत्रं रथमिव यथा तक्षा रथं संस्करोति तथा संमहेम सम्यक्पूजयाम इति तं इमं॥ तस्याग्नेः संसदि संभजनेनोस्माकं प्रमतिः प्र
कृष्टा बुद्धिः भद्रा हि कल्याणी समर्था खलु॥ अतस्तया बुध्या स्तुम इत्यर्थः॥ हे अग्ने तव सख्ये अस्माकं त्वया सह सख्ये
सति वयं मा रिषाम मा हिंसिता न भवाम॥ अस्मान् रक्षेत्यर्थः॥ अर्हते अर्ह पूजायां अर्हः प्रशंसायामिति लटः शत्रादेशः
शपः पित्वादनुदात्तत्वं। शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणाद्युदात्तत्वं॥ महेम मह पूजायां रिषायां रिष हिंसायां॥ व्य

त्वयेन शपः पित्वाद्नुदात्तत्वं॥ तव युष्मदस्मदोर्ङसीत्या एकदात्तत्वं॥ ॥अथ द्वितीया॥ भरामेध्मं कृणवामा हव्यंषि ते चित्तयंतः पर्वणा
पर्वणा वयं॥ जीवातवे प्रतरं साधया धियाग्ने सख्ये मा रिषामा वयं तव॥ ३॥ हे अग्ने त्वत्प्रयोगार्थं इध्मं इंधनसाधनं एकविंशतिदर्भा
९६ त्मकं सामित्समृद्भरामसंपादयाम त्वदनंतरं ते तुभ्यं हवींषि च पुरोडाशादिलक्षणान्यन्नानि वयं कृणवाम करवाम किंकुर्वंतः प
र्वणा पर्वणा प्रतिपक्षमावृत्ताभ्यां दर्शपूर्णमासाभ्यां चिंतयंतस्त्वां प्रज्ञापयंतः सत्वं जीवातवे अस्माकं जीवनाय धाया चिरका
लमवस्थानाय धियः कर्माण्यग्निहोत्रादीनि प्रतरां प्रकृष्टतरं साधय निष्पादय अन्यत्समानं चितयंत श्चितीसंज्ञाने संज्ञाप
र्वकस्य निधेरनित्यत्वाल्लघूपधगुणाभावः॥ पर्वणा पर्वणा नित्यवीप्सयोरिति वीप्सायां द्विर्भावः तस्य परमाम्रेडितमिति पर ९६
स्याम्रेडितसंज्ञायां अनुदात्तत्वे त्यनुदात्तत्वं प्रतरां तरबंतात् प्रशब्दात् क्रियाप्रकर्षे वर्तमानात् किमेत्यङ्व्यय घादाम्वद्रव्यप्रक
र्षे इत्यामुप्रत्ययः॥ ॥अथ तृतीया॥ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतम्॥ त्वमादित्यां आवह

423
1973

तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव॥ हे अग्ने त्वां समिधं सम्यग्दीप्यमानं शकेम शक्ता भूयास्म त्वं च धियः अस्मदी
यानि दर्शपूर्णमासादीनि कर्माणि साधय निष्पादय त्वयि हि सर्वे यागा निष्पाद्यंते यस्मात्त्वय्यग्नावाहुतं ऋत्विग्भिः
प्रक्षिप्तं चरुपुरोडाशादिकं हविर्देवा अदंति भक्षयंति तस्मात्त्वं साधयेत्यर्थः॥ अपि च त्वं आदित्यान् अदितेः पुत्रान् सर्वान्
देवानावह अस्मद्यज्ञार्थमानय॥ तान्हि इदानीं वयमुश्मसि काम्यामहे॥ अन्यत्पूर्ववत् शकेम शक्लृ शक्तौ लिङ्याशिष्यङ्
अदुपदेशाल्लसार्वधातुकानुदात्तत्वे अङ एव स्वरः शिष्यते॥ समिधां त्री इंधी दीप्तौ अस्मात्संपदादिलक्षणः कर्मणि क्वि
प् त्वे सुपां सुलुगिति सप्तम्येकवचनस्य शे आदेशः उश्मसि वश कांतौ इदंतो मसिः आ। दादित्वात् उपोलुक्॥ ग्रहिज्यादिना
संप्रसारणं॥ ॥अथ द्वितीयतृचे प्रथमा॥ प्रति वां सूर उदिते मित्रं गृणीषे वरुणं॥ अर्यमणं रिशादसमिति॥ हे मित्रावरु
णौ मित्रं त्वां वरुणं च वायुं वां रिशादसं शत्रूणामत्तारमर्यमणं च प्रति प्रत्येकं गृणीषे स्तुवे को इति उच्यते सूरे सूर्ये

देवं उदितेसतिप्रातरित्यर्थः॥ ॥अथद्वितीया॥ रायाहिरण्ययामतिरियमवृकायशवसे॥ इयंविप्रामेधसातय इति॥ हिरण्ययाहि
९० तरमणीयेनरायाधनेनसहितायावृकायाहिंसायशवसेस्माकंबलाय इदमिदानींक्रियमाणप्रतिस्तुतिर्भवत्वितिशेषः हि
रण्ययेसत्रकपांसुलुगितितृतीयैकवचनस्ययाजादेशः किंच॥ हेविप्राः प्राज्ञाः इयमेवस्तुतिर्मेधसातयेयज्ञलाभायचभ
वतु॥ ॥अथतृतीया॥ तेस्यामदेववरुणतेमित्रसूरिभिःसह॥ इषंस्वश्चधीमहीति॥ हेदेववरुणतेवयंतवस्तोतारःस्यामस
मृध्याभवेमनकेवलंवयमेवयजमानाः किंतुसूरिभिःस्तोतृभिःऋत्विग्भिःसहतथाहेमित्रदेवतेवयंसूरिभिःसहस्यामभवे
मकिंचइषमन्नंस्वरुदकंचधीमहिधारयामहे॥ ॥अथतृचात्मकतृतीयसूक्तप्रथमा॥ भिंधिविश्वाअपद्विषःपरिबाधोज ९०
हीमृधः॥ वसुस्पार्हंतदाभरेति॥ हेइंद्रत्वंविश्वाःसर्वाःद्विषाःद्वेष्ट्रीः शत्रुसेनाः अपभिंधिविदारयतथाबाधोहिंसकान्

मृधः संग्रामंस्त्वंपरिजहिपरिभावयहेवासवेंद्रस्पार्हंस्पृहणीयंइष्टुणांधनंयदस्तितदाभरास्मभ्यमाहर॥ ॥अथद्वि
तीया॥ यस्यतेविश्वमानुषग्भूरेर्दत्तस्यवेदति॥ वसुस्पार्हंतदाभरेति॥ हेइंद्रतेतवविभक्तिव्यत्ययः दत्तस्यदत्तंभूरेर्बहुप्रस्य 425/1973
यधनंसर्वत्रकर्मणिषष्ठीवेदितव्याविश्वंसर्वंतद्धनमानुषक्इतिअनुषक्त्वासततंसर्वोमनुष्योवेदतिजानातितस्पार्हंस्पृ
हणीयंवसुभर॥ ॥अथतृतीया॥ यद्वीडाविंद्रयत्स्थिरेयत्पर्शानेपराभृतं॥ वसुस्पार्हंतदाभरेति॥ हेइंद्रत्वयावीडौदृ
ढेपर्वतेस्थिरेयत्पर्शानेपराभृतंततस्पार्हंस्पृहणीयंस्त्वाभरआहर॥ ॥अथतृचात्मकतृतीयंसूक्तंतत्रप्रथमा॥ यज्ञ
स्यहिस्थऋत्विजासस्नीवाजेषुकर्मसु॥ इंद्राग्नीतस्यबोधतमिति॥ हेइंद्राग्नीयुवांयज्ञस्यज्योतिष्टोमादेःऋत्विजौस्थःऋतौका
लेकालेयष्टव्यौभवथः॥ अतोवाजेषुसंग्रामेषुकर्मसुयज्ञात्मकेषुचसस्नीसंस्नातौशुद्धौसंतौतस्यतंमांहेइंद्राग्नीबोधतं
अथवातस्यममस्तुतिंजानीतं॥ ॥अथद्वितीया॥ तोशासारथयावानावृत्रहणापराजिता॥ इंद्राग्नीतस्यबोधतमिति।

हे इंद्राग्नी तो शासा नास्त्र नहिंसितो रथयावानारथेन गच्छंतो र. वृहणा रक्षस्य हंतारो अपराजिता केनाप्यपराजितौ तस्यतं मां बोधतं ॥
९८ ॥ ॥ अथ तृतीया ॥ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ॥ इंद्राग्नी तस्य बोधतमिति ॥ हे इंद्राग्नी वां युवां इदं इ.श्च नरो यज्ञस्य नेतारो
द्रिभिर्ग्रावभिर्मदिरं मदकरं मधु सोमात्मकममृतं मधुक्षन् अपूरयन् सिधमन्यत ॥ ॥ इति सप्तमे ध्याये तृतीयः खंडः ॥ अथ इंद्रा
येंदो मरुत्वत इति चतुर्थखंडे तृचात्मके प्रथमसूक्ते प्रथमा ॥ ॥ इंद्रायेंदो मरुत्वते पवस्व मधुमत्तमः ॥ अर्कस्य योनिमासदमि
ति ॥ हे इंदो सोम मधुमत्तमो अतिशयेन मधुमान् त्वं अर्कस्यार्चनीयस्य यज्ञस्य योनिं स्थानमासदमुपवेष्टुं मरुत्वते इंद्राय इंद्रार्थं
पवस्व क्षर ॥ ॥ अथ द्वितीया ॥ तं त्वा विप्रा वचोविदः परिष्कृण्वंति धर्णसिं ॥ सं त्वा मृजंत्यायव इति ॥ हे सोम तं पवमानं त्वां ९८
धर्णसिं धर्तारं विप्रा प्राज्ञा वचोविदः स्तोतारः परिष्कृण्वत्यलंकुर्वंति ॥ अपि च त्वां मा आयवो मनुष्याः संमृजंति सम्यक् शो
धयंति ॥ ॥ अथ तृतीया ॥ रसं ते मित्रो अर्यमा पिबंति वरुणः कवे ॥ पवमानस्य मरुतः इति ॥ हे कवे क्रांतकर्मन् सोम पवमा

नस्य क्षरतस्ते तव रसं मित्रो अर्यमा च वरुणश्च मरुतश्च ते सर्वे देवाः पिबंतु ॥ ॥ मृज्यमान इति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथ
मा ॥ ॥ मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ॥ रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि इति ॥ सुहस्त्य हस्ते भवा हस्त्या
अंगुल्यः शोभना अंगुलिका सोम मृज्यमानः शोध्यमानस्त्वं समुद्रे अंतरिक्षे कलशे वा वाचं शब्दमिन्वसि प्रेरयसि किंच हे पवमान
पूयमान सोम पिशंगं हिरण्यैः पिशंगवर्णं बहुलं प्रभूतं पुरुस्पृहं बहुभिः स्पृहणीयं रयिं धनमभ्यर्षसि स्तोतृणामभिक्षरसि प्र
यच्छसि ॥ ॥ अथ द्वितीया ॥ पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने ॥ देवानां सोम पवमान निष्कृतं गोभिरंजानो अ
र्षसि ॥ इति ॥ अयं सोमः वृषः वृषसदृशः सन् पुनानो अभिपूयमाणः सर्वं शोधयन् वा अव्यये अविमये वारे बाले पवित्रे
पवमानः पूयमानः सन् वने वननीये उदके काष्ठे कलशे वा अचिक्रदत् शब्दमकरोत अथ प्रत्यक्षवादः हे सोम पवमान त्वं
गोभिर्गव्यैः क्षीरादिभिः अंजानो अज्यमानः सन् निष्कृतं संस्कृतं देवानां स्थानं अर्षसि गच्छसि ॥ ॥ एतमु त्यमिति तृचात्मकं

427/1973

तृतीयं सूक्तं तत्र प्रथमा ॥ एतमुत्यं दश क्षिपो मृजंति सिंधुमातरं ॥ समादित्येभिरख्यत इति ॥ सिंधुमातरं यस्य सोमस्य सिंधवो नद्यो
९९ मातरो भवंति त्यं तमेतमिमं सोमं दश क्षिपो दश संख्याका अंगुल्यो मृजंति शोधयंति अपि च सोमं सोमः आदित्येभिरादित्यैः स
मख्यत संगच्छते ॥ ॥ अथ द्वितीया ॥ समिंद्रेणोत वायुना सुत एति पवित्र आ ॥ सं सूर्यस्य रश्मिभिरिति ॥ सुतोऽभिषुतः सोमः पवि
त्रे इंद्रेण समेति संगच्छते ॥ उतापि च वायुना समेति सूर्यस्य रश्मिभिः किरणैरपि समेति ॥ ॥ अथ तृतीया ॥ स नो भगाय वायवे
पूष्णे पवस्व मधुमान् ॥ चारुर्मित्रे वरुणे चेति ॥ हे सोम मधुमान् मधुररसः चारुः कल्याणस्वरूपश्च अभिषुतस्त्वं नोऽस्माकं यज्ञे
भगाय भगाख्याय देवाय वायवे पूष्णे च मित्र मित्राय देवाय वरुणाय च पवस्व क्षर ॥ ॥ इति सप्तमाध्याये चतुर्थः खंडः ॥ ॥
अथ पंचमखंडे रेवतीर्न इति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ रेवतीर्नः सधमाद इंद्रे संतु तुविवाजाः ॥ क्षुमंतो याभि ९९
र्मदेमेति ॥ क्षुमंतो नवंतो वयं याभिर्गोभिः सह मदेम हृष्येम इंद्रे सधमादे अस्माभिः सह हर्षयुक्ते सति नोऽस्माकं ता

गावो रेवतीः क्षीराद्यादिधनवत्यस्तुविवाजाः प्रभूतबलाश्च संतु ॥ रेवतीः रयिशब्दान्मतुप् रयेर्मतौ बहुलमिति संप्रसारणं
परपूर्वत्वे छंदसीर इति मतुपो वत्वं आच्छंदसीति पूर्वसवर्णदीर्घः ॥ आरेवत्याच्च मतुप उदात्तत्वं वक्तव्यमिति रेशब्दादुत्तरस्यापि
भवतीति पूर्वमेवोक्तं सधमादे मदतेः सह योगे वो गादिकः सह मादयंतीति सधमादः पचाद्यच् ॥ सधमादस्थयोः छंदसीति सह
स्य सध आदेशः थाथादिना उत्तरपदांतोदात्तत्वे प्राप्ते परादिः छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं तुविवाजाः बहुव्रीहौ पूर्
वपदप्रकृतिस्वरत्वं क्षुमंतः दुक्षुशब्दे अस्माद्धि विपि नुगभावः छांदसः ॥ ह्रस्वनुड्भ्यां मतुबिति ॥ मतुप उदात्तत्वं ॥ मदेम मदी हर्षे
व्यत्ययेन शप् ॥ अदुप ॥ दृशाद्युसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वे ततो धातुस्वरः शिष्यते ॥ ॥ अथ द्वितीया ॥ विघ
त्वावांत्मना प्रः स्तोतृभ्यो धृष्णवियानः ॥ ऋणोरक्षं न चक्र्योरिति ॥ हे धृष्णो धार्ष्ट्ययुक्तेंद्र त्वावान् तत्सदृशो देवताविशेषः त्मना
आत्मना अस्मदनुग्रहबुध्यायुक्त इयानोऽस्मा ॥ र्यायमानः स्तोतृभ्यः स्तोतृणामनुग्रहाय तदभीष्टमर्थं यश्च अवश्यं आक्

424
1973

णो आनीय प्रक्षिपतु ॥ तत्र दृष्टांतः ॥ चक्रयोः रथस्य चक्रयोः अक्षं न यथा अक्षं प्रक्षिपति तद्वत् ॥ त्वावान् वतुप् प्रकरणे युष्मदस्म
१०० भ्यां छंदसि । सादृश्य उपसंख्यानमिति वतुप् प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः आ सर्वनाम्न इति दकारस्यात्वं वतुपः
पित्वादनुदात्तत्वे प्रातिपदिकस्वरः । क्षिप्यते अनेना मंत्रे बाहुल्यादेरात्मने इत्याकारलोपः । घस्मोत्रि घस्वा प्रागल्ये त्रसिगृधिधृषि
क्षिपेः क्नुः । आमंत्रितानुदात्तत्वं । ईयानः ईङ् गतौ छंदसि लिट् । तस्य लिटः कानच् इति कानजादेशः । अचिश्नुधात्वित्यादिना
इयङादेशः ॥ चित इत्यंतोदात्तत्वं । कृणोः । कृणु गतौ । लङि व्यत्ययेन तिप् । सिप् इतश्चेति इकारलोपः । तनादिकृञ्भ्य उः । सार्व
धातुकगुणः । बहुलं छंदस्यमाङ्योगेपीत्यडागमाभावः । विकरणस्वरेणांतोदात्तत्वं । अक्षं अक्षस्यादेवनस्येत्याद्युदात्तत्वम् । च
क्रयोः अकारस्येकारः छांदसः ॥ ॥ अथ तृतीया ॥ आयद्दुवः शतक्रतवा कामं जरितॄणां ॥ ऋणोरक्षं न शचीभिरिति । हे श
तक्रतो इंद्र यत् दुवः धनं कामितार्थरूपं ओ स्तोतृभिरास्तव्यमस्ति तं कामं जरितॄणां स्तोतॄणामनुग्रहाय आ कृणोः आनी १००

य प्रक्षिपसि । तत्र दृष्टांतः शचीभिः कर्मभिः शकटोचितव्यापारविशेषैः अक्षं न यथा अक्षं प्रक्षिपति तद्वत् ॥ शचीभिः शची
शब्दः शार्ङ्गरवादिङीनंत आद्युदात्तः ॥ ॥ सुरूपकृत्नुमिति चाल्मकं द्वितीयं सूक्तं तत्र प्रथमा ॥ सुरूपकृत्नुमूतये सुदुघा
मिव गोदुहे ॥ जुहूमसि द्यविद्यवीति ॥ सुरूपकृत्नुं शोभनरूपोपेतस्य कर्मणः कर्तारमिंद्रं ऊतये रक्षणार्थं द्यविद्यवि
प्रतिदिनं जुहूमसि ॥ आह्वयामः ॥ द्योशब्दः प्रातिपदिकस्वरेणांतोदात्तः ॥ नित्यवीप्सयोरिति द्विर्भावः ॥ तस्य परमाम्रेडितं
अनुदात्तं च इति द्वितीयस्यानुदात्तत्वं । जुहूमसीत्यत्र इदंतो मसीति इकार आगमः । प्रत्ययस्वरेण मकार उदात्तः । आह्वा
ने दृष्टांतः गोदुहे गां धुगर्थं गां दोग्धीति गोधुक् । सत्सूद्विषेत्यादिना क्विप् । कृदुत्तरप्रकृतिस्वरत्वं । सुदुघामिव सुष्ठु दोग्
ध्रीं गामिव । यथा लोके गोधो गोगां धानरर्थं तस्य अभिमुख्येन दोग्ध्रीं गामाकारयति तद्वत् ॥ सुदुघ इति सुदुघा
दुहः कप् घश्चेति कप्रत्ययः । हकारस्य च घकारः । कित्वाद्गुणाभावः । कपः पित्वादनुदात्तत्वे धातुस्वरेणोकार उदात्तः ।

431/1973

॥ ॥अथद्वितीया॥ उपनःसवनागहिसोमस्यसोमपाःपिब॥ गोदाइद्रेवतोमदइति। हेसोमपाःसोमस्यपालयितरिंद्रसोमंपातुमस्म
१०२ दीयानिसवनानित्रीणिसवनानि उपसमीपे आगहि आगच्छ सवनेसोमंपिबेति सवनानिसुपोडादेशः।टिलोपश्च।लितीति
प्रत्ययात्पूर्वस्याकारस्यउदात्तत्वं। गहीत्यत्रगमेर्बहुलंछंदसीतिशपोलुक्। हेर्ङित्वादनुदात्तोपदेशेत्यादिनामकारलोपः
॥अतोहेरित्याभाच्छास्त्रीयेलुकिकर्तव्येअसिद्धवदत्राभादितिआभाच्छास्त्रीयोमकारलोपोसिद्धवद्भवति। आगत्यचसोम
स्यसोमंपिब।रेवतोधनवतस्तवमदोहर्षोगोप्रदायिदेव॥ गोप्रदत्वंतस्यविद्यतइत्यस्माभिर्गावोलभ्यंतइत्यर्थः॥ ॥अथतृती
या॥ अथातेअंतमानांविद्यामसुमतीनां॥ मानोअतिख्यआगहीति॥ अथसोमपानानंतरंहेइंद्रतेतवांतमानामंतिक
तमानांअतिशयेनतवसमीपवर्तिनांसुमतीनांशोभनमतियुक्तानांशोभनप्रज्ञानांपुरुषाणांमध्येस्थिताविद्यामवयं १०१
त्वांज्ञानीयाम।यद्वासुमतीनांशोभनबुद्धीनांकर्मानुष्ठानविषयाणांलाभार्थमित्यध्याहारः। बहुव्रीहौपूर्वपदप्र

कृतिस्वरापवादोनञ्सुभ्यामित्युत्तरपदांतोदात्तः। कर्मधारयपक्षेपिअव्ययपूर्वपदप्रकृतिस्वरापवादः। कृत्स्वरेणांतोदात्तेनवा।
अंतमानुपित्त्वादंतोदात्तात्तमस्मातिशयप्रत्ययस्यनामन्यतरस्यामित्युदात्तत्वं।त्वमपिनोस्मानतिक्रम्यमातिख्याःअ 433/1973
न्येषांत्वत्स्वरूपंमाप्रकथय।अख्यःख्याप्रकथनइत्यस्यलुङिअस्यतिवक्तिख्यातिभ्योङितिच्लेरङादेशः। आतोलोपइटिचेत्या
कारलोपः। इतश्चेतीकारलोपेरुत्वविसर्गौ।नमाङ्योगइत्यडभावः।गहीतिगमेर्बहुलंछंदसीतिशपोलुकिहेर्ङित्वादनुदात्तो
पदेशेतिमकारलोपस्यासिद्धवदत्राभादितिअसिद्धवद्भावाद्धातोहेरितिलुङ्नभवति। उभेयदिंद्ररोदसीइति।तृचात्मकं
तीयंसूक्तं तत्रप्रथमा॥ ॥उभेयदिंद्ररोदसीआपप्राथोषाइव॥ महांतंत्वामहीनांसम्राजंचर्षणीनां। देवीजनित्र्यजीज
नद्भद्राजनित्र्यजीजनदिति॥ हेइंद्रउभेरोदसीद्यावापृथिव्यौयत्यस्त्वंआपप्राथस्वतेजसाआपप्राप्यचपूरयसीप्रपू
रणेआदादिकःछांदसोलिट्॥ उषाइवयथाउषाःस्वभासासर्वंजगदापूरयति। तद्वत्तंमहीनांमहतांदेवानामपिमहां

तं न मधिकं चर्षणीनां मनुष्याणामपि सम्राज्ञमीश्वरमिंद्रं त्वां देवी वचनशीला जनित्री साधुज। नयित्री अदितिः अजीजनत् अजनयत् तां जने
१०२ सूर्यतोर्धर्मुङ्ङ् चाङ् रूपमेतत् यस्मादेवाजनयित्री ईदृशं पुत्रमजीजनत्। अतः कारणात् सा भद्रा कल्याणी प्रशस्ता जाना जने सूर्यतासाधु
कारिणी नूनं जनितामंत्र इति इडा द्वौणिको पानिपात्यते क्त्रेभ्य इत्तिजीपू।। ।।अथ द्वितीया।। दीर्घं ह्यंकुशं यथा शक्तिं बिभर्षि मंतुमः
।पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनदिति।। दीर्घं आयतं अंकुशं सृणिं यथा बिभर्षि।
एवमायतां शक्तिं हे मंतुमः मंतुर्ज्ञानं तद्वन् अनुचसारशिति संतु।। ह्यो नकारस्य रत्वं। ईदृशं द्वि बिभर्षि। धारणपोषणयोः जोहोः
त्याद्रिकः।।श्लोभ्र ज्ञामिदिन्य भ्यासस्यत्वं। हे मघवन् धनवन्निंद्र यथा पूर्वेण देहस्य पूर्वभागे वर्तमानेन पदा पादेन जो अजः। १०२
छागः। वयां शाखां आकर्षति तथा पूर्वोक्तया शक्त्या आयच्छ यमः। आत्रून्निय छसि यमे र्लेघडागमः। बहुलं छंदसीति श
पोलुक्। गतमन्यत।। ।।अथ तृतीया।। अवस्मद्दुर्हणायतो मर्तस्य तनुहि स्थिरं।। अवस्पदं तमीं कृधि यो अस्मां अभिदासति।
पोलुक्।

देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्।। इति। दुर्हणायतः दुःखप्रदं हरणमाचरतो मर्तस्य मनुष्यस्य शत्रोः स्थिरं दृढं बलं अवत
नुहि अवतनं नीचीनं कुरु। स्मेति पूरकः। तं शत्रुमीं एनं अधस्पदं पादयोरधस्तात् वर्तमानं कृधि कुरु। यः शत्रुरस्मान् अभिदासति।उप 435/1973
मानं मन्यत।। ।। इति सप्तमे ध्याये पंचमः खंडः।। अथ पवमानखंडे परिसुवानो इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा।। ।। परिसुवानो
गिरिष्ठाः पवित्रे सोमो अक्षाः।। मदेषु सर्वधा असीति।। अयं सोमः पवित्रे दशापवित्रे पर्यक्षरन् परितः क्षरति। कीदृशः सुन्
स्वानः शब्दायमानः सवान इति वक्तव्ये सुवान इति पाठः। सूयमानः गिरिष्ठाः गिरिस्थायी पाषाणस्थः वर्णमान इत्यर्थः। हे सोम स त्वं म
देषु मादकेषु सोमेषु सर्वधा असि सर्वस्य धाता दाता वा भवसि।। ।।अथ द्वितीया।। त्वं विप्रस्त्वं कविर्मधु प्रजातमंधसः।। मदेषु स
र्वधा असीति। हे सोम त्वं विप्रः विविधं प्राणयिता विप्रस दृशो वा। त्वं च कविः मेधावी। अतस्त्वां अंधसो नाजातं मधुमधुर
संप्रयच्छसीति शेषः।। ।।अथ तृतीया।। तव विश्वे सजोषसो देवासः पीतिमाशत।। मदेषु सर्वधा असीति।। हे सोम ते

त्वयिपीतिंपानंविश्वेदेवासोदेवाः समानप्रीतयः संतः आभजंत प्राप्नुवन्॥ ॥ सरूत्वइति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥
३०३ सरूत्वेयो वसूनांयोरायामानेतायइळानां॥ सोमोयःसुक्षितीनामिति॥ ससोमः सुत्वे अभिषवे ऋत्विग्भिर्यः॥ सोमःवसू
नांधनानांमानेताप्रापयिताश्च रायारातिंप्रयच्छति॥ क्षीरादिकामिति रायोगावः तेषामानेतायश्चइडानामन्नानां चायश्च सोमसु
क्षितीनांसुनिवासानांशोभनमनुष्ययुक्तानां गृहाणामानेताविघतेसाभिषुतो भूदिति॥ ॥अथद्वितीया॥ यस्यत इंद्रः
पिबाद्यस्यमरुतोयस्यवार्यमणाभगः॥ आयेनमित्रावरुणाकरामहएंद्रमवसेमहइति॥ हे सोम यस्यप्रसिद्धस्यतेतवर
सइंद्रः पिबात्पिबतिपानलेघगगम॥ यंचसोमंमरुतः पिबंतिवाअपिच अर्यमणाएतंनामकेन देवेनसहभगोदे ३०३
वोयंसोमंपिबति॥ येनसोमेनमित्रावरुणामित्रावरुणौवयमाकरामहेअभिमुखीकुर्महेतथामहेमहतेअवसेर
क्षणायये नचसोमेनइंद्रमभिमुखीकुर्महेतंत्वामभिषुणोमीत्यर्थः॥ ॥तंवइति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ ॥

तंवः सखायोमदायपुनानमभिगायत॥ शिशुंनहव्यैःस्वदयंतगूर्तिभिरिति॥ हे सखायः ऋत्विजो वोयूयंमदायदेवानामदा
र्थं पुनानंपूयमानंतंसोममभिगायत अभिष्टुत तमिमंसोमंशिशुंनशिशुमिवालंकाराक्षीरादिभिश्च स्वादुकुर्वंतितद्वत्। ह
व्यैर्हविर्भिर्मिश्रणैर्गूर्तिभिःस्तुतिभिश्चस्वदयंतस्वादूकुर्वंति॥ ॥अथद्वितीया॥ संवत्सइवमातृभिरिंदुर्हिन्वानोअज्यते॥
देवावीर्मदोमतिभिःपरिष्कृतइति॥ हिन्वानःप्रेर्यमाणः इंदुःसोमवसतीवरीभिः समज्यतेसम्यक्सिक्तोभवति॥ तत्र दृष्टां
तः॥ वत्सइववत्सो यथामातृभिर्गोभिः समक्तोभवतितद्वत्। कीदृशः देवावीः देवानांरक्षकः मदोमदकरःमतिभिः
स्तुतिभिः परिष्कृतोलंकृतः भूषणार्थेसंपर्युपेभ्यइतिसुडागमः॥ परिनिविभ्यइतिषत्वं॥ ॥अथतृतीया॥ अयं
दक्षायसाधनोयंशर्धायवीतये॥ अयंदेवेभ्यामधुमत्तरः सुतःइति॥ अयंसोमः दक्षायबलायवर्धनायवासाधनः
साधयिताभवति। तथायंसोमःशर्धायबलायवीतयेदेवानांभक्षणार्थंचभवति। सुतःअभिषुतोयंसोमः देवे

437/1975

भ्य इंद्रादिभ्यो मधुमत्तरः अतिशयेन माधुर्योपेतो भवति। अत्यंतं मदकरो भवतीति वा॥ ॥सोमाः पवंत इति षळृचात्मकं चतुर्थं
१०४ सूक्तं तत्र प्रथमा॥ ॥सोमाः पवंत इंदवोऽस्मभ्यं गातुवित्तमाः। मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विद इति॥ गातुवित्तमाः
अतिशयेन मार्गस्य लंभकाः इंदवो दीप्ताः सोमाः पवंते अस्मभ्यमस्मदर्थं क्षरंति आगच्छंति वा॥ कीदृशाः मित्राः देवा
नां सखिभूताः स्वानाः सूयमानाः अभिषूयमाणाः अरेपसः पापरहिताः अत एव स्वाध्यः शोभनाध्यानाः स्वर्विदः स
र्वज्ञाः स्वर्गप्रापका वा॥ ॥अथ द्वितीया॥ ते पूतासो विपश्चितः सोमासो दध्याशिरः॥ सूरासो न दर्शतासो जिगत्नवो ध्रुवा
घृते इति॥ पूताः पवित्रेण परिपूताः विपश्चितो मेधाविनो दध्याशिरः दध्यामिश्रयोः घृते वसतीवर्याख्ये उदके जिगत्नवो १०४
गमनशीलाः ध्रुवास्तत्र स्थैर्येण वर्तमानाः ते सोमासः सोमाः सूरासो न सूर्या इव दर्शतासः पात्रेषु सर्वैर्दर्शनीया
भवंति॥ ॥अथ तृतीया॥ सुष्वाणासो अद्रिभिश्चिताणा गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविद इति॥

गोरनुदुहः अधि त्वचि अधिषवणि चर्मणि चिताणा ज्ञायमाना अद्रिभिर्ग्रावभिर्विविधं सुष्वाणासः सूयमानाः वसुविदो
वसुलंभकाः। एते सोमाः अस्मभ्यमिषमन्नमभितः। समस्वरन् सम्यक् शब्दयंति॥ प्रयच्छंतीति यावत्॥ ॥अथास्या
पवेति षळृचात्मकं पंचमं सूक्तं तत्र प्रथमा॥ ॥अया पवा पवस्वैना वसूनि मांश्चत्व इंदो सरसि प्र धन्व। ब्रध्नश्चिद्यस्य
वातो न जूतिं पुरुमेधाश्चित्तकवे नरं दादिति॥ हे सोम अया अनया पवा पवमानया धारया एना एनानि वसूनि धना
नि पवस्व क्षर पवा पूङ् पवने अन्येभ्योपि दृश्यंत इति विच् प्रत्ययः। अर्थ धातुकलक्षणो गुणः सा च का च इति तृती
यायाः डादेशः तथा हे इंदो त्वं मांश्चत्वे मन्यमानानां चातके सरसि उदके वसतीवर्याख्ये प्रधन्व प्रगच्छ यस्य सोमस्य
शोधने सति ब्रध्नश्चित् सर्वेषां प्रज्ञापकः मूलभूतो वा आदित्योपि वातो न वायुरिव जूतिं। वेगं प्राप्तः सन् किंच पुरु
मेधाश्चित् बहुविधयज्ञः इंद्रोपि तकवे॥ नकतिर्गतिकर्मसु पठितः॥ अस्मात् औणादिकः उन् प्रत्ययः। सोमममभिग

439/1973

२०५ षृतेमसंनरंकर्मनेतारंपुत्रंधात॥ दधातु प्रयच्छतु॥ सत्वंप्रधान्वेतिपूर्वेणसंबंधः॥ यस्यान्वेतिपादौ॥ ज्ञातिङ्त इति धातूदा
त्तिच॥ ॥अथद्वितीया॥ उतनएनांपवयापवस्वाधिश्रुतेश्रवाय्यस्यतीर्थे॥ षष्टिंसहस्रानैगुतोवसूनिवृक्षंनपक्वंधूनु
वद्रणायेति॥ हेसोमउतापिचश्रवाय्यस्यसर्वैःश्रवणीयस्यतवश्रुते प्रसिद्धायद्रूपस्थयेचतुर्थ्यर्थे॥ श्रुतःशब्दस्यती
र्थेस्थितेनास्माकंस्वभूतेयज्ञेएनाएनयापवयापूयमानयाधारयाअधिकंपवस्वक्षरनेगुनःनीचीनंगंतवेशब्दायंतइति
निगुतःशत्रवःतेषांहंतृत्वेनसंबंधीसोयंसोमःषष्टिंषष्टिसंख्याकानियसहस्रासहस्राणिवसूनिधनानिरणायशत्रूणां
जयार्थंधिनवतअस्माकमकंपयत्प्राप्यत्वदित्तियावत्॥ कथमिववृक्षंनपक्वंपक्वफलंवृक्षंयथाकाम्पयतिफलार्थी
तद्वत्॥ ॥अथतृतीया॥ महीमेअस्यवृषनामशूषेमांश्चत्वेवापृशनेवावधत्रे॥ अस्वापयंनिगुतस्तेयच्छापा २०५
मित्रांस्यपाचितान्यचेतइति॥ महेमहतेप्रभृतेवृषनामासकृपांसकुगितिसकृपालुकं वृषनामनीवर्षणनमने

तुराणांचधर्षणंशत्रूणांमित्रस्यपाचितान्यचेतइति। महेमहतेप्रभृतेवृषनामासकृपांसकुगितिसकृपोलुक्कं नमनंइमेएतेद्वेकर्मणीअ
स्यसोमस्यपृषेसकृत्वेकरभवतः॥ येचकर्मणीमांश्चत्वेअश्वनामेतत॥ मक्षुचरतीतिअश्वेशंक्रियमाणेयुधेतत्साध्यत्वाद्युद्ध
मिहरुगच्छतोवाअपिनास्पृशनेस्पर्शनसाध्येवाहुयुद्धेवधत्रेशत्रूणांहिंसनशीलेभवतः॥ सोयंनिगुतःनीचैःशब्दयमाना 441/1973
नशत्रूनस्वापयन। ताभ्यामस्वापयत। अवधीदित्यर्थः॥ किंचस्त्वंहृयतप्राद्रवयत। संग्राच्छत्रून्॥ अथप्रत्यक्षः॥ हेसो
मसत्वंअमित्रानशत्रूनअपाच्यअपगमय। तथान्व। अचितःअग्निचयनमकुर्वतोनास्तिकांश्चइतोस्मात्सकाशाद्दपाच्व
अपगमय॥ अयंनिगतेकर्म॥ ॥इतिसप्तमेध्यायेषष्ठःखंडः॥ ॥अससप्तमखंडे प्रथमतृचेप्रथमा॥ अंग्नेत्वंनोअं
तमउतत्राताशिवोभवावरूथ्यः॥इति। हेअग्नेवरूथ्यः॥ वरणीयासंभजनीयः यद्वावरूथैः पार्थिवैर्धनैःस्वंनोस्माकं
अंतमोतिकृतमःभुवोभवउताअपिचत्राताशकंः शिवःसुखकरश्चभवाभुवोभवतिपार्थे॥ ॥अथद्वितीया॥ वसु

रग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दा इति॥ वसुर्वासकोग्निः सर्वेषामग्रणीः वसुश्रवाः ख्यातान्नः स्तुत्यः अच्छाभिमुख्येन नक्षि अः
१०६ स्मान् व्याप्नुहि। द्युमत्तमः अतिशयेन दीप्तिमांस्त्वं रयिं पश्वादिलक्षणं धनं दाः अस्मभ्यं देहि द्युमत्तमो द्युमत्तममिति पाठो॥ ॥अ
थ तृतीया॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्य इति॥ हे शोचिष्ठ अतिशयेन शोचिष्मन् दीदिवः स्वतेजोभिर्दी
प्यमान तं त्वा सुम्नाय सुखाय सुम्नमिति सुखनामैतत्। तदर्थं सखिभ्यः समानख्यातिभ्यः तदर्थं च नूनमीमहे
याचामहे॥ ॥अथ तृतीयस्यर्चे प्रथमा॥ इमा नु कं भुवना सीषधामेंद्रश्च विश्वे च देवाः इति॥ इमा इमानि परिदृश्यमानानि १०६
भुवनानि नु क्षिप्रं सीषधेम साधयेम॥ वशीकरवाम कमिति पूरकः॥ यद्वा इमानि सर्वाणि भूतजातानि अस्मभ्यं सकलं सी
षधेम। साधयंतु पुरुषव्यत्ययः॥ इंद्रश्च विश्वे सर्वे अन्ये देवाश्च सुष्ठु प्रीता इममर्थं साधयंतु। सीषधेम सीषधामेति
पाठो॥ ॥अथ द्वितीया॥ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह सीषधातीति॥ नोस्माकं यज्ञं ज्योतिष्टोमादिकं यजमानं त

न्वं शरीरं च प्रजां पुत्रादिकां च आदित्यैरदितिपुत्रैरन्यैर्देवैः सह वर्तमान इंद्रः सीषधातु साधयतु सह सीषधाति सह चीक्लृ
पातीति पाठो॥ ॥अथ तृतीया॥ आदित्यैरिंद्रः सगणो मरुद्भिरस्मभ्यं भेषजा करदिति॥ आदित्यैरदितिपुत्रैर्मित्रादिभिर्म
रुद्भिश्च सगणः सह इंद्रः अस्माकमस्मभ्यं भेषजा भेषजान्यौषधानि करत् करोतु भेषजा करत् भूत्वविता तनूनामिति पाठो
अथ चतुर्थी नवकं सूक्तं। प्रवो ग्रावाण इति चतुरक्षराधिकान्विते द्यामस्य ऋषिः प्रायशः ब्रह्मचानां भङ्गः इद्धो अपि वासयमन इत्येकः एव पाद
ऋगा च्युतवदुत्॥ हे कल्विग्यजमाना वो युष्मानुपसमीपे प्राञ्चं प्रकर्षेण इंद्रं प्रजुयत॥ ॥इति सप्तमेध्याये सप्तमः खंडः॥ वेदार्थ
स्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराज परमेश्वर वैदिक
मार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्य० उत्तरग्रंथे सप्तमोध्यायः॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। नि
र्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ १॥ ॥अथाष्टमोध्याय आरभ्यते॥ तत्र प्रथमा॥ प्रकाश्यमिति प्रथमं खंडं द्वाद

५५३/१९७३

ज्ञाकल्पे प्रथमसूक्ते प्रथमा॥ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति। महिव्रतः शुचिबंधुः पावकः पदा वराहो अभ
भ्येति रेभन्निति॥ उशनेव एतं नामक ऋषिरिव काव्यं कविर्म स्तोत्रं ब्रुवाण उच्चारयन्॥ देवः स्तोता देवानामिंद्रादीनां जनिम
१०७ जन्मानि प्रविवक्ति प्रकर्षेण ब्रवीति। वच परिभाषणे व्यत्ययेन विकरणस्य श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। महिव्रतः प्रभू
तकर्म शुचिबंधुः। बध्नंति शत्रूनिति बंधवः तेजांसि बलानि वा दीप्तान्यस्य सः पावकः। पापानां शोधकः। वराहः वरं व्रतदहश्च।
वराहः। सखिभ्य टजिति टच् समासांतः तस्मिन्नहनि अभिषूयमाणत्वेन तद्वान्। अर्श आदित्वान्मत्वर्थीयोऽच्। ता
दृशः सोमः रेभन् शब्दं कुर्वन्। पदा पदानि स्थानानि पात्राणि अभ्येति अभिगच्छति। यद्वा यथा कश्चन वराहः पदा पादेन १०७
भूमिं विक्रममाणः शब्दं करोति तद्वत्॥ ॥अथ द्वितीया॥ प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः।
अंगोषिणं पवमानं सखायो दुर्मर्षं वाणं प्रवदंति साकं इति॥ हंसासः शत्रुभिर्हन्यमानाः हंसा इव आचरंतो वा वृ

षगणाः एतं नामका ऋषयः अमात शत्रूणां बलात् त्रासिताः संतः तृपलात् तृपलं सुपां सुलुगिति सोराकारादेशः तृपलशब्दः
क्षिप्रवाची। नदकं यास्केन तृपलप्रभर्मा क्षिप्रहोमा इति। क्षिप्रप्रहारिणं वग्नुं अभिषवजन्यमच्छा निलक्ष्यास्तं यज्ञगृहं प्राया 445/1973
सुः प्रायासिषुः प्रगच्छंति। ततः सखायः तुल्यस्तोत्रलक्षणेन संबंधेन सखिभूता स्तोतारः अंगोषिणं सर्वैरभिगंतव्यं
। यद्वा अंगोषिणं स्तोत्रार्हं दुर्मर्षं शत्रुभिर्दुर्धरं दुःसहं। एवंविधं सोमं पवमानमुद्दिश्य वाणं वाग्विशेषं साकं सह प्रवदंति
प्रवादयंति तदुपलक्षितं गानं कुर्वंतीत्यर्थः॥ ॥अथ तृतीया॥ स योजत उरुगायस्य जूतिं वृथा क्रीळंतं मिमतेन गावः। प
रीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः॥ इति स सोमः उरुगायस्य बहुभिः स्तुत्यस्यात्मनो जूतिं गतिं योजते
युनक्ति अंतरिक्षे प्रेरयति॥ वृथा क्रीळंतं अनायासेन विहरंतं गच्छंतं तं सोमं गावः अन्ये गंतारः न मिमतेन परिच्छिंदंति।
तमनुमातुं न शक्नुवंतीत्यर्थः। किंच। तिग्मशृंगः शृणाति हिंसंति तमासीति शृंगाणि तेजांसि तीक्ष्णतेजस्कः परीणसं

व दृश्यमानेन त॥ बहुविधं तेजः कृणुते करोति अंतरिक्षे वर्तमानो यः सोमो दिवा अहनि हारः हरितवर्णः ददृशे दृश्यते न प्रकाशत इ
१०८ त्यर्थः॥ नक्तं रात्रौ तु रुशः ऋजुगामी विस्पष्टः प्रकाशयुक्तो दृश्यते॥ दृशेः कर्मणि लिटि रूपं॥ ॥अथ चतुर्थी॥ प्रस्वानासो
रथा इवार्वंतो न श्रवस्यवः॥ सोमासो राये अक्रमुरिति। प्रस्वानासः अभिषववेलायां ग्रावभिः शब्दं कुर्वंतः सोमासः सोमाः
रथाः इव। शब्दं कुर्वंतो रथाः तथा अर्वंतो न यथा शब्दं कुर्वंतो अश्वाः तथा अवस्यवः अन्नेभ्यः सकाशादन्नमिच्छंतो रा
ये यजमानानां धनाय प्राक्रमुः प्रगच्छंति॥ ॥अथ पंचमी॥ हिन्वानासो रथा इव दधन्विरे गभस्त्योः॥ भरासः कारिणा
मिवेति॥ रक्षा इव युद्धदेशं प्रति यथा रथास्तथा हिन्वानासः यागदेशं प्रतिगच्छंतः सोमा गभस्त्योः ऋत्विजां बाह्वोः दध १०८
न्विरे धीयंते॥ तत्र दृष्टांतः। भरासो भराः कारिणामिव यथा भारवाहिनां बाह्वोर्धीयते तद्वत्॥ ॥अथ षष्ठी॥ राजानो न
प्रशस्तिभिः सोमासो गोभिरंजते॥ यज्ञो न सप्त धातृभिरिति॥ सोमासः सोमाः प्रशस्तिभिः प्रशस्ताभिः स्तुतिरूपाभि

र्वाग्भी राजानो न यथा राजानः सप्तधातृभिः सप्त होत्राभिर्यज्ञो न यथा यज्ञः तथा गोभिर्गोविकारैः पयोभिरंजते आज्यते सं
स्क्रियंत इत्यर्थः॥ ॥अथ सप्तमी॥ परि सुवानास इंदवो मदाय बर्हणा गिरा॥ सुता अर्षंति धारयेति॥ सुवानासः सुवानाः
अभिषूयमाणाः इंदवः सोमाः बर्हणा महत्या गिरा॥ स्तुतिरूपया वाचा युक्ताः संतः मदाय मदार्थं मधोर्मधुररसस्य धा
रया परि पर्यर्षंति परितो गच्छंति। परिस्रुवानासः परिस्रुवान इति पाठो॥ मधो सुतानां इति च॥ ॥अथाष्टमी॥ आपानासो विव
स्वतो जनंत उषसो भगं॥ सूरा अण्वं वितन्वत इति॥ विवस्वतः ऋत्विग्यजमानः इंद्रस्य आपानासः आपानभूताः उषसो भगं उ
षसः शोभां जिन्वंतः प्रेरयंतः सूराः सूरास ईरंतः सोमाः अण्वं इति तन्वते अभिषववेलायां उपरवे पुरा शब्दं कुर्वंति जिन्वंतो
जनंत इति पाठौ॥ ॥अथ नवमी॥ अप द्वारा मतीनां प्रत्ना ऋण्वंति कारवः॥ वृष्णो हरस आयव इति॥ मतीनां कारवः स्तो
तारो द्वारा यज्ञस्य द्वाराणि अप ऋण्वंति विवृण्वंति॥ ॥अथ दशमी॥ समीचीनास आसते होतारः सप्तजामयः प

447/1973

दमेकस्य पिप्रत इति॥ समीचीनासः समीचीनाः आनयो ज्ञानिसहृष्टाः एकस्य सोमस्य पदं स्थानं पिप्रतः पूरयन्तः सप्त होतारः सप्त होत्रकाः
१०० यज्ञे सोममाप्नुवन्त्यानुवन्ति। आशत आसत इति पाठो॥ ज्ञानयो ज्ञामय इति च॥ ॥अथैकादशी॥ नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये
सचा॥ कवेरपत्यमा दुहे इति॥ नाभिं यज्ञस्य नाभिभूतं सोमं नोऽस्माकं नाभा नाभौ अहमाददे सोमं पीत्वा नाभिस्थाने करोमीत्यर्थः
किमर्थं च ज्ञयास्तर्यं दृशे द्रष्टुं किं च नः क्रान्तकर्मणः सोमस्य अपत्यं रसं आ ददे आपूरयामि स्वाः सूर्यं दृशेन चक्षुश्चित्सूर्ये स्विचेति
पाठो॥ ॥अथ द्वादशी॥ अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितं॥ सूरः पश्यति चक्षसेति॥ सूरः कर्त्ता य इंद्रः चक्षसा च
प्रपाद्दिवो दीप्तस्य आत्मनः प्रियं पदं अध्वर्युभिर्गुहा गुहायां कुरयो हितं निहितं पीतं सोमम् अभिपश्यति प्रियंप्रियेति पाठो॥ ॥
इत्यष्टमेध्याये प्रथमः खण्डः॥ अथ द्वितीयखण्डे असृग्रमिति द्वादशर्चं द्वितीयं सूक्तं तत्र प्रथमा॥ ॥असृग्रमिन्दवः पथा धर्मन्नृ १०१
तस्य सुश्रियः॥ विदाना अस्य योजनेति॥ अस्य अनेन यजमानेन कृतान्॥ योजनानि देवताभ्यो ग्यान संबंधानि विदाना ज्ञानं वः

सुश्रियः शोभनश्रयणाः इंदवः सोमाः धर्मन् कर्मणि कृतस्य यज्ञस्य पथा मार्गेण असृग्रन् हविर्धानात सृज्यंते योजनायोज्ञामिमिति
पाठो॥ ॥अथ द्वितीया॥ प्र धारा मध्वो अग्रियो महीरपो वि गाहते॥ हविर्हविःषु वंद्य इति॥ हविषु हविषां मध्ये वंद्यः स्तुत्यो हविर्ह
विरात्मकोयः सोमः महीर्महतीरपो वसतीवरीर्विगाहते॥ तस्य मध्वः सोमस्य अग्रियो मुख्या धाराः प्रपतंतीत्यर्थः॥ मधो
र्मध इति पाठो॥ ॥अथ तृतीया॥ प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने॥ सद्माभि सत्यो अध्वर इति॥ अग्रियो हविषां म
ध्ये मुख्यः सोमः युजा युक्ता वाचः प्रकरोतीत्यर्थः॥ एतदेव दर्शयति। वृषा कामानां वर्षकः सत्यः सत्यभूतः अध्वरो हिंसा
वर्जितः सोमः सद्म दिग्गृहं अभि प्रति वने उदके अचिक्रदत॥ शब्दं करोतीत्यर्थः॥ वृषो अचिक्रदत। वृषा वचिक्रदिति पाठो॥
॥ अथ चतुर्थी॥ परि यत्काव्या कविर्नृम्णा वसानो अर्षति॥ स्वर्वाजी सिषासतीति॥ कविः क्रांतकर्मा सोमो नृम्णानि बलानि
पुनानः शोधयन् काश्च काव्यानि कविकर्मणि स्तोत्राणि यच्च दापर्यन्ते यन्ति परि गच्छति। तदा स्वः स्वर्गं वाजी बलवानन्नवा

449
1973

त्वेंद्रः सिषासतियागंप्रत्यागंतुंस्वकीयंबलंभनुमिश्रंतति॥ पुनानोवसानइतिपाठो॥ ॥अथपंचमी॥ पवमानोअभिस्पृधोविशो
११० राजेवसीदति॥ यदीमृण्वंतिवेधसइति॥ यद्यदाईमेनंसोमंवेधसः कर्मणांकर्तारः। ऋत्विजः ऋण्वंति। प्रेरयंतितदापवमा
नः श्वरंनेषसोमः स्पृधः स्पर्धमानान्यागविघ्नकारिणोराक्षसादीनभिषीदति। नाशयितुमभिगच्छति॥ तत्रदृष्टांतः॥ विशो
राजेवयथाराजाविशः स्पर्धमानान्मनुष्यान्नाशयितुमभिगच्छतितद्वत्॥ ॥अथषष्ठी॥ अव्योवारेपरिप्रियोहरिर्वनेषुसी
दति॥ रेभोवनुष्यतेमतीति॥ हरिर्हरितवर्णः प्रियोदेवानांप्रियतमः एषसोमः वनेषूदकेषुसंरक्तः अव्याअवेःवारेबाले
परिषीदतिकिंचरेभोभिषववेलायांउपरवेषुशब्दंकुर्वन्मतीमत्यास्तुत्यावनुष्यते। सेव्यते॥ ॥अथसप्तमी॥ सवायु ११०
मिंद्रमश्विनासाकंमदेनगच्छति॥ रणायोअस्यधर्मभिरिति। योयजमानः अस्यसोमस्यधर्मभिः कर्मभिः क्रियमाणाभिष
वादिभिः रणरमते। सयजमानोवायुमिंद्रंचअश्विनाअश्विनौचमदेनसाकंसहगच्छति। प्राप्नोति॥ ॥अथाष्टमी॥ ॥

आमित्रावरुणाभगंमध्वःपिबंतऊर्मयः॥ विद्रानाअस्यशक्मभिरिति॥ येषांयजमानाः मध्वः सोमस्योर्मयस्तरंगाः मित्रावरुणौ
देवौभगंभगाख्यंदेवंचप्रतिपर्यंतेक्षरंति॥ तेयजमानाः अस्यसोमस्यइमंसोमंविद्रानाः जानंतः शक्मभिः कर्मभिः संगच्छंतइ
तिशेषः॥ ॥अथनवमी॥ अस्मभ्यंरोदसीरयिंमध्वोवाजस्यसातये॥ श्रवोवसूनिसंजितमिति॥ हेरोदसीद्यावापृथिव्यौयु
वांमध्वादेवानांमादयितुर्वाजस्यसोमात्मकस्यान्नस्यसातयेलाभाय अस्मभ्यंरयिंधनंश्रवोन्नंचवसूनिवासकान्यन्यान्यपि
पश्वादीनिधनानिसंजितंसंजयतंप्रयच्छतमित्यर्थः॥ ॥अथदशमी॥ आतेदक्षंमयोभुवंवन्हिमद्यावृणीमहे॥ पांत
मापुरुस्पृहमिति॥ हेसोमयस्तारोचयंतेतवस्वभूतंदक्षंबलंअद्यास्मिन्यागेअभिमुख्येनावृणीमहेसंभजामहे
कीदृशंमयोभुवंसुखस्यभावकंवन्हिंधनादीनांप्रापकंपातंशत्रुभ्योरक्षकंपुरुस्पृहंबहुभिःस्पृहणीयंकांक्ष्यमाणं
बलमिति॥ ॥अथैकादशी॥ आमंद्रमावरेण्यमाविप्रमामनीषिणं॥ पांतमापुरुस्पृहमिति॥ हेसोमंमंद्रंमदंम

451/1973

दक्षं स्तुत्यं वा त्वा मा वृणीमहे वरेण्यं सर्वैर्वरणीयं संभजनीयं च ॥ किंच । विप्रं मेधाविनं त्वां तथा मनीषिणं मनस ईषा मनीषा
३३१ तद्वंतं स्तुतिभिर्मतं वा त्वा मा वृणीमहे । प्रत्येकं विशेषणापेक्षया आङुपसर्गः कृतः ॥ किंच । पातं सर्वेषां रक्षकं पुरुस्पृहं बहु
भिः स्पृहणीयं च त्वां संभजामहे ॥ ॥ अथ द्वादशी ॥ आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा ॥ पांतमा पुरुस्पृहमिति ॥
हे सुक्रतो शोभनप्रज्ञ सोमलक्षीयं रयिं धनं वयमावृणीमहे ॥ किंच । सुचेतनं चिती संज्ञाने भावे उणादिक उनप्रत्ययः ॥
सुज्ञानं च । किंच । तनूषु अस्मत्पुत्रेषु च धनं सुज्ञानं च त्वमाविधेहि । यद्वा पुत्रार्थं वयमावृणीमहे ॥ तथा पातं सर्वस्य
रक्षकं पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे ॥ ॥ इत्यष्टमाध्याये द्वितीयः खंडः ॥ अथ तृतीयखंडे प्रथमऋ ३३१
चे प्रथमा ॥ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं ॥ कविं सम्राजमतिथिं जनानामासन्ना पात्रं जन
यंत देवा इति ॥ मूर्धानं शिरोभूतं कस्य दिवो द्युलोकस्य पृथिव्याः प्रथितायाः भूमेः अरतिं गंतारं यद्वा गंतव्यं स्वामिनं

वैश्वानरं विश्वेषां नराणां संबंधिनं ऋते ऋतमिति सत्यस्य यज्ञस्य वा नाम निमित्तसप्तम्येषा कृतनिमित्तं आभिमुख्येन जातं सृष्ट्यादावु
त्पंनं कविं क्रांतदर्शिनं सम्राजं सम्यग्राजमानं जनानां यजमानानां अतिथिं हविर्वहनाय सततं गंतारं । यद्वा अतिथिवत्पूज्यं । आस 453
न् आसनि द्वितीयार्थे सप्तमी ॥ अस्य भक्तं अग्निलक्षणेनास्येन हि देवा हवींषि भुंजते ॥ नोस्माकं पात्रं त्रातारं रक्षकं वैश्वानरमग्नि 1973
देवाः स्तोतारः ऋत्विजः देवा एव वा आजनयंत अभ्याभिमुख्येनाजीजनन ॥ अरण्योः सकाशात् उदपादयन आसंनः पात्रं आसंना
पात्रमिति पाठो ॥ ॥ अथ द्वितीया ॥ त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवंते ॥ तव क्रतुभिरमृतत्वमायन्वैश्वान
र यत्पित्रोरदीदेः ॥ इति ॥ हे अमृत मरणरहिताग्ने विश्वे सर्वे देवाः स्तोतारः जायमानं अरण्योः सकाशात् उत्पद्यमानं त्वां शि
शुं न पुत्रमिव अभिसंनवंते अभिसंस्तुवंति । यद्वा णुवंतीति देवा रश्मयः ते सर्वे जायमानं त्वां अभिसंनवंते अभिसंगच्छं
ते ॥ यथा पितरः पुत्रमभिगच्छंति ॥ अपि च । हे वैश्वानराग्ने यत् यदा पित्रोः पालयित्र्योः द्यावापृथिव्योः मध्ये अदीदेः दीप्यते ॥

तदानीं तव दीप्यैः क्रतुभिः कर्मभिर्ज्योतिष्टोमादिभिर्यागैरमृतत्वं देवत्वमायन् यजमानाः प्राप्नुवंति ॥ ॥अथ तृतीया॥ नाभिं य
११२ ज्ञानां सदनं रयीणां महामाहावमभि संनवंत ॥ वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवाः इति ॥ यज्ञानां ज्योतिष्टोमादि
यागानां नाभिं नंदनं बंधकं ॥ तथा रयीणां धनानां सदनं स्थानं कं । महांतं आहावं आहूयंते अस्मिन्नाहुतय इत्या
हावः । तादृशं पय उदकधाराणां आहावस्थानीयमेवंभूतमग्निं अभिसंनवंत स्तोतारः सम्यक् स्तुवंति । तथा वै
श्वानरं विश्वेषां नराणां संबंधिनं अध्वराणां यज्ञानां रथ्यं रथिनं यथा रथी स्वरथं नयति । तद्वन्नेतारं हूयतां गमयि
तारं यज्ञस्य केतुं प्रज्ञापकं एवंविधमग्निं देवाः स्तोतारः ऋत्विजो देवा एव वा जनयंत जनयंति मथनेनोत्पादयंति ॥ ॥अथ ११२
द्वितीयवर्गे प्रथमा ॥ प्र वो मित्राय गायत वरुणाय विपा गिरा ॥ महिक्षत्रावृतं बृहत् इति ॥ हे मदीया ऋत्विजो वा यूयमि
त्यर्थः ॥ मित्राय वरुणाय च विपा व्याप्तया गिरा स्तुत्या गायत स्तुतिं कुरुत ॥ स्तुत्यांश्च स्तुतेश्च तत्साकं पचतीति वचन॥

हे महिक्षत्रौ प्रभूतबलौ युवां ऋतं यज्ञं बृहन्महत् ॥ अति प्रशस्तं वा प्रत्यर्थमागच्छतमिति शेषः । अथ वा महत्प्रभूतं ऋतं
स्तोत्रं शृणुतमिति शेषः ॥ ॥अथ द्वितीया॥ सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च ॥ देवा देवेषु प्रशस्ता इति ॥ यो मि
त्रश्च वरुणश्च परस्परापेक्षया चशब्दः ॥ उभाउभौ संम्राजा सर्वस्य स्वामिनौ घृतयोनी उदकस्योत्पादकौ देवा द्योतमा
नौ देवेषु मध्ये प्रशस्ता प्रकर्षेण स्तुत्यौ तौ स्तुत्या गायतेति पूर्वत्रान्वयः ॥ ॥ अथ तृतीया ॥ ता नः शक्तं पार्थिवस्य महो
रायो दिव्यस्य ॥ महि वां क्षत्रं देवेषु ॥ इति ॥ तौ नो स्मदर्थं पार्थिवस्य पृथिवी संबद्धस्य दिव्यस्य दिविभवस्य च महो म
हतो रायो धनस्य शक्तं समर्थौ भवतं दातुमिति शेषः । हे देवौ वां युवयोर्महिमहत्प्रज्यं क्षत्रं बलं देवेषु प्रसिद्धं स्तुम इति शे
षः ॥ ॥अथ द्वितीयवर्गे प्रथमा ॥ इंद्रा याहि चित्रभानो सुता इमे त्वायवः ॥ अण्वीभिस्तना पूतास इति ॥ इति चित्रभानो हे
विचित्रदीप्त इंद्र अस्मिन्कर्मणि आयाहि आगच्छ सुता अभिषुता इमे सोमाः त्वायवः त्वां कामयमाना वर्तंते । अण्वीभि

455/1973

रध्ये इत्यंगुलिनामैतेते। ऋत्विजामंगुलिभिः स्रुता इत्यन्वयः। किंच ते सोमाः तना नित्यं प्रतासः मुद्रायर्णापवित्रेण शोधितत्वा
333 त्॥ ॥अथ द्वितीया॥ इंद्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः इति॥ हे इंद्र त्वमायाहि अस्मिन् कर्म
ण्यागच्छ। किमर्थं वाघतः ऋत्विजः नामैतत्॥ ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राण्युपैतुं। कीदृशस्त्वं धिया अस्मदीयया प्रज्ञ
या इषितः व्याप्तः अस्मद्भक्त्या प्रेरित इत्यर्थः॥ विप्रजूतः यथा यजमानभक्त्या प्रेरितः। तथान्यैरपि विप्रैः मेधाविभिर्ऋत्विग
भिः प्रेरितः कीदृशस्य वाघः सुतावतः अभिषुतसोमयुक्तस्य॥ ॥अथ तृतीया॥ इंद्रा याहि तूतुजान उप ब्रह्माणि हरिवः।
सुते दधिष्व नश्चन इति॥ हरिशब्दः इंद्रसंबंधिनो रश्वयो नामधेयं॥ हरी इंद्रस्य लोहितो ग्नेरिति तदीयाश्वनामसु लेन प
ठितत्वात्। हे हरिवो श्वयुक्त इंद्र त्वं ब्रह्माण्युपैतुमायाहि॥ कीदृशस्त्वं तूतुजानः त्वरमाणः अगत्याः वा अस्मिन् सुते सो 333
माभिषवयुक्ते कर्मणि नो अस्मदीयं चनः॥ अंननामैतत्। हविर्लक्षणमन्नं दधिष्व धारयास्यौदर्यमित्यर्थः॥ ॥अथ चतु

र्थ्यृचे प्रथमा॥ ॥तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत्॥ कृष्णा कृणोति जिह्वया इति॥ हे स्तोतस्त्वं अग्निमीळिष्वः
स्तुहि॥ यो ग्निरर्चिषा ज्वालारूपेण तेजसा विश्वा सर्वाणि वनानि वनान्यरण्यानि परिष्वजत परिष्वजति। परितो वेष्टयति। य
श्च तानि वनानि जिह्वया ज्वालया दग्ध्वा कृष्णा कृष्णवर्णानि कृणोति तमीळिष्वेति संबंधः॥ ॥अथ द्वितीया॥ य इद्ध आवि 457/1973
वासति सुम्नमिंद्रस्य मर्त्यः। द्युम्नाय सुतरा अप इति॥ यो मर्त्यो मनुष्य इद्धे दीप्ते ग्नौ सुम्नं सुखकरं हविरिंद्रस्य चतुर्थ्यर्थे षष्ठी।
इंद्राय आविवासति परिचरति प्रयच्छति। तस्य मर्त्यस्य द्युम्नाय द्योतमानायान्नाय तदर्थं सुतराः सुखेन तरणीया अप उ
दकानि इत्यात्मनि इंद्रः करोतीति शेषः॥ ॥अथ तृतीया॥ ता नो वाजवतीरिष आशून् पिपृतमर्वतः॥ इंद्रमग्निं च वोढव इ
ति॥ हे इंद्राग्नी ता तौ युवां वाजवतीः अंनवतीः इष इष्यमाणा दृष्टीः यद्वा वाजो बलं तद्वतीरिषो न्नानि आशून् शीघ्रगान् अ
र्वतो श्वान् अस्मभ्यं पिपृतं पूरयतं प्रयच्छतं। किमर्थं इंद्रमग्निं च युवां आवोढवे आसमंतान् वोढुं हविर्भिः प्रापयितुं॥ ॥

इत्यष्टमेध्यायेतृतीयखंडः॥ अथचतुर्थखंडेप्रथमसूक्तेप्रथमा॥ प्रोअयासीदिंदुरिंद्रस्यनिष्कृतंसखासख्युर्नप्रमिनातिसं
११५ गिरः॥ मर्यइवयुवतिभिःसमर्षतिसोमाःकलशेशतयाम्नापथेति॥ इंदुःसोमःकलशेशतयामनापथेति। इंदुःसोमःइंद्रस्य
निष्कृतंसंस्कृतंस्थानमुदरंप्रोअयासीत्प्रैवगच्छति॥ मत्वाच्चसखासखिभूतःसोमःसख्युरिंद्रस्यसंगिरंसम्यग्गिरणाधारभूत
मुदरंनप्रमिनाति॥ नहिनस्ति॥ किंच॥ मर्यइवयुवतिभिर्मर्त्योयथातरुणीभिःस्त्रीभिःसहसंगतोभवतितद्वदयमपि
सोमःयुवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिःअद्भिःसहसमर्षतिसंगच्छते अभिषवकालेपश्चात्। सोमःशतयाम्नाअ
नेकयामनसाधनछिद्रोपेतेनपथामार्गेणदशापवित्रसंबंधिनाकलशेद्रोणकलशेगच्छतीतिशेषः। यद्वैकमेववा
क्यंयथामर्त्योमित्योयुवतिभिःसहसंगच्छतएवंकलशेशततयामनापथासंगच्छतेद्भिः शतयामनाशतयाम्नेतिपा ११४
ठो॥ ॥अथद्वितीया॥ प्रवोधियोमंद्रयुवोविपन्युवःसंवरणेष्वक्रमुः॥ हरिंक्रीळंतमभ्यनूषतस्तुभोभिधेनवःप

यसेदंशिश्रियुरिति। हेसोमवोयुष्माकंधियोध्यातारःमंद्रयुवःमदकरंशब्दंकामयमानाःपनस्युवःस्तुतिंकामयमानाःवि
पन्युवःस्तोतृनामैतत्। स्तोतारःसंवरणेषुतृणकटावरणोपेतेषुयागगृहेषुप्राक्रमुःक्रमंते॥ तदेवाह। स्तुतःस्तोतारःहरिं
हरितवर्णंक्रीळंतंक्रीडनशीलंसोमंअभ्यनूषतअभिष्टुवंति॥ धेनवोपिपासयेत्सौम्येनक्षीरेणेयंचरुमंसोममभिलक्ष्यअशि 459/1973
श्रयुःरथिकंश्रीणंसंवरणेषुसवनेनोष्टितिपाठो॥ ॥इहरिंक्रीळंतंसोमंमनीषाइतिचपयसेदंशिआयुःपयसेसमश्रा
युरिति॥ ॥अथतृतीया॥ आनःसोमसंयतंपिप्युषीमिषमिंदोपवस्वपवमानऊर्मिणा॥ यानोदोहतेत्रिरहन्नसश्चुषी
क्षुमद्वाजवन्मधुमत्सुवीर्यमिति॥ हेइंदोदीप्तसोमपवमानस्त्वंनोस्माकंसंयतंसंगृहीतंपिप्युषीं प्रवृद्धंइषमन्नंऊर्मि
णाप्रवाहरूपेणतदीयेनरसेनापवस्वप्रयच्छेत्यर्थः। याइट् ॥नोस्माकंअहन्अहनिअन्हःत्रिःत्रिषुसवनेषुत्तवलवत्तम
धुमवतमाधुर्यमितंसुवीर्यशोभनसामर्थ्यंपुत्रंदोहतेतामिषंपवस्वेतिसमन्वयः। ऊर्मिणाअभ्रियामितिपाठो॥ ॥

अथ नकिरिति प्रगाथस्य द्वितीयस्य प्रथमा ॥ नकिः सं कर्मणा नशद्यश्चकार सदावृधं ॥ इंद्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजस
३३५ मिति ॥ तं नकिः न कोपि जनः कर्मणा हननादिव्यापारेण न किर्न शत न व्याप्नोति । यः इंद्रं स्तुत्याकार इंद्रमेवानुकूलं यज्ञैस्त्याग
नैश्चकार कीदृशमिंद्रं सदावृधं सर्वदा वर्धकं विश्वगूर्तं सर्वैः स्तुत्यं ऋभ्वसं महांतं तु ओजसा स्वीयेन बलेन अधृष्टं शत्रुभिरनभिभू
तं धृष्णुं शत्रूनभिभवशीलं धृष्णुमोजसा धृष्ण्वोजसमिति पाठो ॥ ॥अथ द्वितीया ॥ अषाढमुग्रं पृतनासु सासहिं यस्मिन्
महीरुरुज्रयः ॥ सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुरिति ॥ अषाढं असोढं उग्रमुद्गूर्णबलं पृतनासु शत्रुसेना
सु सासहिं अभिभवितारमिंद्रं स्तोमीत्यर्थः यस्मिन्निंद्रे जायमाने महीर्महत्यः उरुज्रयो बहुवेगाः धेनवः हविरादिना प्री
णयित्र्यः प्रजा गावः एव वा समनोनवुः समस्तुवन् न केवलं धेनव एव अपितु द्यावो द्युलोकाः क्षामाः पृथिव्यश्च समनो ३३५
नवुः स्तुतवत्यः सर्वे प्राणिनो ननमुरित्यर्थः ॥ त्रिषु लोकेष्विति श्रुतेर्बहुवचनं क्षामीः क्षाम इति पाठो ॥ ॥इत्यष्टमे ध्याये

चतुर्थः खंडः ॥ अथ पंचमखंडे प्रथमसूक्ते प्रथमा ॥ सखाय आनिषीदतेति पुनानाय प्रगायत ॥ शिशुं न यज्ञैः परिभूषत श्रिय
इति । हे सखायः सखिभूताः स्तोतारः ऋत्विजः आनिषीदत । स्तोतुमुपविशत । अथ पुनानाय सोमाय प्रगायत प्रकर्षेण गाय
नमभिष्टुतं च नः अभिषुतं सोमं यज्ञैर्यजनीयैर्हविर्भिर्मिश्रणैः श्रिये शोभार्थं परिभूषत परितोऽलंकुरुत । तत्र दृष्टांतः शिशुं
न यथा शिशुं बालं पुत्रं पितरं आभरणैरलंकुर्वंति तद्वत् ॥ अथ द्वितीया ॥ समी वत्सं न मातृभिः सृजता गयसाधनं ॥ देवाव्यं
दमभिद्विशवसमिति । हे ऋत्विजः गयसाधनं गृहस्य साधनभूतं इमं सोमं मातृभूताभिर्वसतीवरीभिः समसृजत संमिश्र
यत । कथमिव वत्सं न यथा वत्सं मातृभिर्गोभिः संयोजयंति तद्वत् कीदृशं देवाव्यं देवानां रक्षकं मदं मदनहेतुं द्विशवसं द्विगु
णवेगं अतिशयितबलं वा । यद्वा द्वयोर्लोकयोस्तत्र स्थिता देवमनुष्या इत्यर्थः । तेषां हविर्धनप्रदानेन प्रवर्धयितारं तं सोम
मभिसंसृजत ॥ ॥अथ तृतीया ॥ पुनाता दक्षसाधनं यथा शर्धाय वीतये ॥ यथा मित्राय वरुणाय शंततममिति ॥ दक्षसा

461/1973

धनं बलस्य साधनं धनादिरयोर्वा साधकं सोमं पुनपवित्रेण पुनीत॥ पूङ् पवने क्रियादिः तस्माल्लोटि तप्तनप्तनथनाश्चेति तस्य त
११६ बादेशः पित्वादीत्वाभावः॥ शर्धाय वेगार्थं वीतये देवानां पानार्थं तथा भवति तथा मित्राय वरुणाय च शंतमं मित्रि शयेन सुखं
यथा भवति तथा पुनीतेत्यर्थः॥ शंतमं शंतम इति पाठो॥ ॥ अथ प्र वाज्यीति तृचात्मकं द्विपर्वंद्वितीयं सूक्तं तत्र प्रथमा॥ प्र वा
ज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यमिति॥ वाजी बलवान्वेगवान्वा॥ सहस्रधारः बहुधारायुक्तः सोमः स्वयं अवि
भवं वारं बालं पवित्रं तिरः व्यवधायकं कुर्वन्प्राक्षाः विविधं प्रक्षरति॥ क्षरते। लुङि रूपं। प्र वाजी प्र सवान इति पाठो॥ ॥
अथ द्वितीया॥ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणान इति॥ वाजी रसात्मकान्नवान् स सोमः अक्षाः क्ष
रति कीदृशः सहस्ररेताः बहुरेतस्कः बहूदकः अद्भिर्वसतीवरीभिर्मृजानो मृज्यमानः गोभिर्गोविकारैः क्षीरादिभिः श्रीणा ११६
नः श्रीयमाणः॥ ॥ अथ तृतीया॥ प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुत इति॥ हे सोम नृभिः कर्मनेतृभिर्येमानो नि

यम्यमानः अद्रिभिर्ग्रावभिः सुतोऽभिषुतः इंद्रस्य कुक्षा समस्याः उदरदेशः इन्द्रोदरभूते कलशे वा प्रयाहि प्रकर्षेण गच्छ। संहिता
यां येमान इत्यत्र णत्वं॥ ॥ अथ ये सोमास इति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ ये सोमासः परावति ये अर्वावति सुन्विरे॥ ये
वादः शर्यणावति॥ एतदादिस्त्यासृग्यामिंद्रार्थं सर्वत्र सोमाभिषवो स्तीत्याह॥ ये सोमासः सोमाः परावति विप्रकृष्टे दूरे
देशे ये वा अर्वावति अंतिके देशे सुन्विरे अभिषूयंते॥ अभिषूयंते वा ये वा शर्यणावति कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञ
कं मधुरसैर्युक्तं सोम च सरोस्ति। अदः अदस्मिन्सरसि सुकरसा ये सोमाः इंद्रायाभिषूयंते तस्माकमभिमतफलं प्रयच्छंतीति
वक्ष्यमाणेन संबंधः॥ ॥ अथ द्वितीया॥ य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानां। ये वा जनेषु पंचसु इति॥ ये वा सोमाः आर्जी
केषु ऋजीकानाम देशस्य वा आर्जीका देशास्तेषु तथा कृत्वाः सुकृत्वान इति देशाभिधानं तेषु कर्मवत्सु देशेषु च॥ किंच पः
स्त्यानां सरस्वत्यादीनां नदीनां मध्ये समीपे च ये सोमा अभिषूयंते कृष्या वा ये सरस्वत्याः सत्रमासतत्यादिषु नदीतीरेषु

483/1973

हुंकुरणस्य श्रवणात्। किंच यज्ञेषु पंचकनिपाद्दपंचमाश्चत्वारो वर्णाः पंचजना स्तेषु च ये या सोमा अभिता स्ते सोमाः त्वस्माकमभि
११७ मतं प्रयच्छंत्विति कृत्तरेण संबंधः॥ अथ तृतीया॥ तेना रात्सींद्दिवस्यारिपवं तामास्कथार्थं॥ कथाना देवासद्देवइति॥ त्वाना: कथाना:
तत्र चात्र चाभिपूयमाणाः देवासो देवाः दीपनशीलाः स्तुत्या वाइंदवः यं ह पुच मसेपु श्वरंतः ते सोमा नो स्माकं दिवस्परि परिश
ब्दः पंचमी द्युलोकः अंतरिक्षाद्दाहित्याद्धा यद्वा अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिरिति वृष्टिकारणत्वा
त्। किंचास्कवीर्यं शोभनवीर्योपेतं पुत्रं च धनादिकं वा अपर्वतां प्रापयंतु यज्ञमानः सोमेनाभिमतफलानि प्राप्नोति खलु स्वानासुवा
नाइति पाठो॥ ॥इत्यष्टमेध्याये पंचमः खंडः॥ अथ षष्ठे खंडे आ ते वत्स इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ आ ते वत्सो म
नो यमत् परमाच्चित्सधस्थात्॥ अग्ने त्वां कामया गिरा इति॥ हे अग्ने वत्स ऋषिस्ते तव मनः परमाच्चित् उत्कृष्टादपि सधस्थात् सह ११७
स्थानात् द्युलोकादायमत् आयमयति आगमयति। केन साधनेन त्वां कामये कामया चा मभिलषंत्या गिरा स्तुत्या कामयइत्य

त्राणि छंआदेशः पूर्ववत्। यद्वा त्वां कामये अभिलषामि कामये कामया इति पाठो॥ ॥अथ द्वितीया॥ पुरु त्वा हि सदृङ्ङसि विशो वि
श्वा अनु प्रभुः॥ समत्सु त्वा हवामहे इति॥ हे अग्ने पुरुत्रा हि बहुषु हि देशेषु त्वं सदृङ्ङसि समानदर्शनो भवसि। अत एव विश्वाः सर्वा द
शा अनु लक्ष्य प्रभुरीश्वरो भवसि॥ ईदृशं त्वां समत्सु संग्रामेषु रक्षणार्थं हवामहे आह्वयामहे। दिशो विश इति पाठो॥ ॥अथ
तृतीया॥ समत्स्वग्निमवसे वाजयंतो हवामहे॥ वाजेषु चित्रराधसमिति॥ समत्सु सहमहनेषु संग्रामेषु वाजयंतो बलमिच्छंतो वयं
अवसे रक्षणार्थं अग्निं हवामहे कीदृशं। वाजेषु संग्रामेषु चित्रराधसं चायनीयधनं॥ ॥अथ द्वितीयस्य सूक्तस्य प्रथमा॥ त्वं न इंद्रा भर
ओजो नृम्णं शतक्रतो विचर्षणे॥ आ वीरं पृतनासहमिति॥ हे शतक्रतो बहुकर्मन् विचर्षणे विद्रष्टरिंद्र त्वं नोस्मभ्यमोजो बलं
नृम्णं धनं च आभर आहर वीरं वीर्योपेतं पृतनासहं सेनानामभिभवितारं त्वां आयावामहइति शेषः॥ आभरन्नुत्रः आभरंन्नुत्र
इति पाठो॥ ॥अथ तृतीया॥ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ॥ अथा ते सुम्नमीमहे इति। हे वसो वासक इतः॥ शतक

465/1973

३३८ नोवहुकर्माणिंद्रत्वंनोअस्माकंपितापितृवत्पालकोबभूविथाभवत्वंमातामातृवद्धेशतक्रतोबहुकर्मन्बभूविथ॥ अथवयंतेतवसुम्नंसु
खमीमहेयाचामहे॥ ॥अथतृतीया॥ त्वांशुष्मिन्पुरुहूतवाजयंतमुपब्रुवेसहस्कृत॥ सनोरास्वसुवीर्यमिति॥ सहसाबलेनस्तोतृ
भिर्युक्तःकृतःसहस्कृतइंद्रः॥ स्तुत्याहिदेवताबलंवर्धते॥ तस्यसंबोधनं॥ हेसहस्कृतशुष्मिन्नतएवबलवन्पुरुभिर्बहुभिर्यज
मानैराहूतेंद्रवाजयंतंबलमिच्छंतंयंत्वाउपब्रुवेउपस्तौमिसत्वंनोस्मभ्यंसुवीर्यंधनंरास्वदेहिसहस्कृतशतक्रतोइतिपाठो॥
॥ ॥अथतृतीयेतृचेप्रथमा॥ यदिंद्रचित्रमेहनास्तित्वादातमद्रिवः॥ राधस्तन्नोविदद्वसउभयाहस्त्याभरेति॥ हेअद्रिवःयत्तव
नचित्रचायनीयंइंद्रत्वादातंत्वयादातव्यंयद्धनंमेममइहास्मिन्लोकेनास्तिहेचिदद्वसालब्धधनंहेनोस्मभ्यंउभयाहस्तीउभाभ्यां
हस्ताभ्यांतद्राधोधनंआभरआहरमइहामहेनेतिहेंद्रगानांवसूचानोपाठो॥ अत्रउपातहृयपक्षेयास्केनव्याख्यातं॥ यदिंद्रचित्र ३३८
चायनीयमंहनीयंधनमस्तीतियन्मइहनास्तीतिवात्रीणिमध्यमानिपदानिस्यादि॥ ॥अथद्वितीया॥ यन्मन्यसेवरेण्यमिंद्रद्युक्षं

तदाभर॥ विद्यामतस्यतेवयमकूपारस्यदावनइति॥ हेइंद्रयत्द्युक्षमंनंवरेण्यंवरणीयमन्यसेतत्॥ द्युक्षंमाभरास्मभ्यंतेनतवसंबं
धिनोवयंनस्यतादृशस्यानेकलक्षणस्यअकूपारस्यउत्तिलःपारोनायस्यतादृशस्यान्नगन्यस्यदावनोदानस्यविद्यामस्याम॥ द्यावनोदावा
नइतिपाठो॥ ॥अथतृतीया॥ यत्तेदित्सुप्रराध्यंमनोअस्तिश्रुतंबृहत्॥ तेनदृढाचिदद्रिवआवाजंदर्षिसातयइति॥ हेइंद्रतेनव
दित्सुप्रराध्यंप्रकर्षेणआराध्यंश्रुतंविश्रुतंबृहन्महत्॥ यन्मनोस्तितेनमनसाहेअद्रिवोवक्षवर्तिप्रदृढाचित्दृढमपिवाजमन्नं
आदर्षिआदारयसिसातयेअस्मत्संभजनायलाभायवादिक्षादर्षिइतिपाठो॥ ॥इतिअष्टमेध्यायेषष्ठःखंडः॥ छ॥ वेदार्थ
स्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्ग
प्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेअष्टमो
ध्यायः॥ छ॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ॥अथनवमोध्यायः

457
1973

आरभ्यते॥ तत्र शिशुं जज्ञानमिति प्रथमखंडे तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ शिशुं जज्ञानं हर्यतं मृजंति शुंभंति विप्रं मरुतो ग
३३० णेन॥ कविर्गीर्भिः काव्येना कविः सन् सोमः पवित्रमत्येति रेभन् इति॥ शिशुं इदानीमुत्पन्नत्वाच्छिशुवन्निषंतं यद्वा पापानित
नूकर्तृविनाशयंतं अज्ञानं प्रादुर्भूतमत एव च हर्यतं॥ हर्य गतिकांत्योः॥ भृमृदृशी त्यादिना अतच्॥ सर्वैः काम्यमानं सोमं स्तुं:
ति मरुतः शोधयंति॥ किंच विप्रं मेधाविनं सोमं गणानात्मीयेन सप्तसंख्याका येनथुं भंस्तुतं कुर्वंति॥ ततः कविः क्रांतप्रज्ञः सो
मः काव्येन कवी कर्मणा च कविः शब्दयितव्यः सन् रेभन् शब्दायमानो गीर्भिः स्तुतिभिः सह पवित्रमत्येति अतीत्य गच्छ
ति॥ विप्रमतिछंदोगाः वह्निमिति बह्वृचाः पठंति॥ ॥अथ द्वितीया॥ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः क
वीनां॥ तृतीयंम महिमन सोमो विराजमनुराजति ष्टुबिति॥ ऋषिमनाः सर्वदर्शनमनस्कः अत एव ऋषिकृत्सर्वस्य दर्श ३३१
नकर्ता प्रकाशनस्य कर्ता॥ स्वर्षाः सर्वस्य सूर्यस्य वा संभक्ता सहस्रनीथः बहुविधस्तुतिकः कवीनां

क्रांतप्रज्ञानां मध्ये पदवीः स्खलितानां पदानां साधुत्वेन संयोजयिता यः सोमो विधत्ते स महिषो महान् पूज्यो वा सोमस्तृतीयं
धाम द्युलोकाख्यं सिषासन् संभक्तुमिच्छन् स्तूयमानः सन् विराजं विशेषेण राजंतं दीप्यमानमिंद्रं अनु राजति प्रकाशयति
॥ ॥अथ तृतीया॥ चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स आयुधानि बिभ्रत्॥ अपामूर्मिं सचमानः समुद्रं तुरीयं
धाम महिषो विवक्ति॥ चमूषन् चमंति भक्षयंत्यस्मिन्निति चमस्तिर्श्चमसाः तेषु सीदन्निति चम्वो अधिषवणफल
के तयोर्वर्तमानो श्येनः शंसनीयः शकुनः शक्तः सामर्थ्यकारी विभृत्वा हरतेरातोमनिन्क्वनिब्वनिपश्चेत्यादिना क्वनिप्॥ पात्रेषु वि
हरणशीलः गोविंदुर्यजमानानां गवां लंभकः विंदुरिच्छुरिति इच्छार्थे प्रत्ययांतो निपातितः॥ द्रप्सः प्रसरणशीलः॥ आयुधानि
स्फ्यकपालादीनि बिभ्रत् धारयन् अपामुदकानामूर्मिं प्रेरकं समुद्रं अंतरिक्षं नामितत्॥ अंतरिक्षलोकं सचमानः
सचमानः महिषो महान् य एवंविधः सोमः स तुरीयं चतुर्थं धाम चांद्रमसं स्थानं विवक्ति सेवते सूर्यलोकस्योपरि स्थितं द्व

469 / 1923

मसोलोकाद्विचलइति। यमः पृथिव्या अधिपतिः समायात्वित्यादिति श्रुतेश्च द्रुमान क्षत्राणामधिपतिः समायात्वित्यां लेमंत्रेन्नीयते॥
३२० ॥ ॥ एतेसोमाइतिनवर्चंद्वितीयंसूक्तं तत्र प्रथमा॥ ॥ एते सोमा अभिप्रियमिंद्रस्य काममक्षरन्॥ वर्धंतो अस्य वीर्यमिति॥ ए
ते अभिषुता इमे सोमाः अस्येंद्रस्य वीर्यं शक्तिं वर्धंतो वर्धयंत इंद्रस्य कामं काम्यं प्रियं प्रीतिकरं रसमक्षरन् अभ्यवर्षंत॥ अ
भिपवंते॥ ॥ अथ द्वितीया॥ पुनानासश्चमूषदो गच्छंतो वायुमश्विना॥ ते नो धांतु सुवीर्यमिति॥ हे सोमाः पुनानासः पुना
ना अभिषूयमाणाश्चमूषदः चमसेषु सीदंतो वायुमश्विनौ गच्छंतः प्राप्नुवंतस्ते यूयं नास्मभ्यं सुवीर्यं शोभनवीर्यं धत्त
प्रयच्छत धांरधत्तेति पाठो॥ ॥ अथ तृतीया॥ इंद्रस्य सोम राधसे पुनानो हार्दि चोदय॥ देवानां योनिमासदमिति॥ हे सोम ३२०
पुनानः पूयमानस्त्वं राधसे इंद्रस्य संराधनाय हार्दि तत् हृदयसंबंधिस्थानं चोदय प्रेरय तथा सति अहमपि देवानामिं
द्रादीनां योनिं स्वर्गाख्यं स्थानं आसदं प्राप्नुयामि॥ यद्वा देवानां यजनसाधनं यज्ञाख्यं स्थानं प्राप्नुयामस्मि॥ देवानां कृत

स्येति पाठो॥ ॥ अथ चतुर्थी॥ मृजंति त्वा दश क्षिपो हिन्वंति सप्त धीतयः॥ अनु विप्रा अमादिषुरिति॥ हे सोम त्वां त्वां दश संख्या 471/1973
काः क्षिप अंगुलिनामैतद् अंगुलयः मृजंति। शोधयंति। ततः सप्त सप्त संख्याकाः धीतयो होत्रकाश्च त्वां हिन्वंति स्व स्वव्या
पारैः प्रीणयंति॥ तथा विप्रा मेधाविनः स्तोतारश्च त्वां त्वामनु अन्वमादिषुः अनुमादयंति॥ ॥ अथ पंचमी॥ देवेभ्यस्त्वा
मदाय कं सृजानमति मेष्यः॥ सं गोभिर्वासयामसीति॥ हे सोम कं सुखभूतं त्वा त्वां देवेभ्यो देवानां मदाय मदार्थं गोभिः गो
विकारैः पयोभिः सर्वासयामसि संवासयामः संस्थापयामः। कीदृशं मेष्यः सर्वसामानि दशापवित्ररूपेण अतिसृजानं अ
त्यंतं सृजंतं दशापवित्ररूपेण पुष्पावालमिश्रकवर्तमानमित्यर्थः॥ ॥ अथ षष्ठी॥ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः॥ परि
गव्यान्यव्यतेति॥ पुनानः पूयमानः कलशेषु द्रोणकलशेषु आसिच्यमानः अरुष आरोचमानः हरिः हरितवर्णः सो
म गव्यानि गोसंबंधीनि पयः प्रभृतीनि वस्त्राणि वासांसि वपर्व्यव्यत पर्याच्छादयति॥ ॥ अथ सप्तमी॥ मघोन आ पव

यखनो अग्निर्विश्वा अपदुरितः ॥ इंद्रो सरखायमाविवेशेति ॥ हे इंद्रो सोम मघोनो धनवतो नो स्मान् अभिमुख्येन पवस्व क्षर । विश्वा विः
१२३ श्वानि द्विषो धेनून् अमुष्य पज्रहि मारय ॥ सखायं मित्रभूतमिंद्रं आविवेश प्राप्नुहि ॥ अथाष्टमी ॥ नृचक्षसं त्वा वयमिंद्रपीतं स्वर्विदं
। भक्षीमहि प्रजामिषमिति ॥ हे सोम नृचक्षसं नृणां द्रष्टारं स्वर्विदं सर्वज्ञं इंद्रपीतं त्वां सेवमाना वयं प्रजां पुत्रादिकं इषमन्नं च भ
क्षिमहि भजेम ॥ ॥अथ नवमी ॥ वृष्टिं दिवः परिस्रव द्युम्नं पृथिव्या अधि ॥ सहो नः सोम पृत्सु धा इति ॥ हे सोम त्वं द्युलोका
द्वृष्टिं वर्षं परिस्रव परितो वर्ष पृथिव्याः अधि । अधीति सप्तम्यर्थानुवादी ॥ द्युम्नमन्नं च उत्पादयेति शेषः । नोस्माकं सहो ब
लं पृत्सु संग्रामेषु धा धेहि ॥ ॥इति नवमोध्यायः प्रथमः खंडः ॥ अथ द्वितीयखंडे सोमः पुनान इति नवर्चे सूक्तं तत्र प्रथमा १२३
॥ सोमः पुनानो अर्षति सहस्रधारो अत्यविः ॥ वायोरिंद्रस्य निष्कृतमिति ॥ अयं पुनानः पावकः सोमः अर्षति गच्छति की
दृशो यं सहस्रधारः अपरिमितधारः अत्यविः । अत्राविशब्देन तल्लोमान्युच्यंते ॥ अविलोमभिर्निष्पादितं दशापवि

त्रमित्यर्थः । तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थं वायोरिंद्रस्य च पानाय शेषः । किं प्रति निष्कृतं निरित्यय संमित्ये तस्मिन्नर्थे संस्कृतं 473
पात्रं प्रति ॥ ॥अथ द्वितीया ॥ पवमानमवस्यवो विप्रमभि प्रगायत ॥ सुष्वाणं देववीतय इति ॥ हे अवस्यवो रक्षणकामाः उद्गा 1973
त्रादयो यूयं पवमानं शोधकं विप्रं विशेषेण देवानां प्रीणयितारं विप्रं वक्षुद्रवा ॥ अथ च विप्र इति मेधाविनाम मेधाविनं
देववीतये देवपानाय सुष्वाणं । अभिषूयमाणं सोमं अभि आभिमुख्येन प्रगायत प्रकर्षेण स्तुत ॥ ॥अथ तृतीया ॥ पवं
ते वाजसातये सोमाः सहस्रपाजसः ॥ गृणाना देववीतय इति ॥ पवंते सोमाः किमर्थं वाजसातये अन्नस्य लाभाय की
दृशाः सहस्रपाजसः बहुबलाः पाजो बलम् अप्रसाद इत्यर्थः । गृणानाः कर्मणि कर्तृ प्रत्ययः । स्तूयमानाः पुनः किमर्थं दे
ववीतये देवानां वीतिर्गतिः प्राप्तिलक्षणं वाप्यस्मिन्यज्ञे देववीतिर्यज्ञः तदर्थं । यज्ञसिद्धिः साक्षात्प्रयोजनं तद्द्वारा वाज
लाभ इति ॥ ॥अथ चतुर्थी ॥ उत नो वाजसातये पवस्व बृहतीरिषः ॥ द्युमदिंदो सुवीर्यमिति ॥ उतापि च नोस्माकं वाः

१२२ जसातये अन्नलाभाय । हे इंदो सोम बृहतीरिषः महतीरन्नानि स धारा द्युमत् दीप्तिमत् सुवीर्यं शोभनवीर्यसामर्थ्यं च पवस्व क्षर । शो
भनसामर्थ्योपेता धाराः पवस्वेत्यर्थः । अथवा वाजसातये संग्रामाय बृहतीरिषः द्युमत् सुवीर्यं संपादयितुं पवस्वेति योज्यं
॥ ॥ अथ पंचमी ॥ अत्या हियाना न हेतृभिरसृग्रं वाजसातये ॥ वि वारमव्यमाशव इति ॥ वाजसातये संग्रामाय हियानाः प्रेर्य
माणाः आशवः शीघ्रं धावंति तद्वत् । हेतृभिः प्रेरकैः प्रेर्यमाणाः आशवः शीघ्रगामिनः सोमाः वाजसातये अन्नलाभाय
अव्यं वारं वालं दशापवित्रं व्यसृग्रं व्यसृज्यंते ॥ ॥ अथ षष्ठी ॥ ते नः सहस्रिणं रयिं पवंतामा सुवीर्यं ॥ च आपवंतां । कीदृशाः
स्वानाः सुवानाः सूयमानाः देवास इंदव इति पाठो ॥ ॥ अथ सप्तमी ॥ वाश्रा अर्षंतींदवोऽभि वत्सं
नमातरः ॥ दधन्विरे गभस्त्योरिति ॥ वाश्राः शब्दयंत इंदवः सोमाः अभ्यर्षंति पात्रं प्रति वाश्राः शब्दकारिण्यो मातरः मातृभूता गा १२२
वः ॥ वत्सं न वत्सं यथा प्रत्यागच्छंति तद्वत् एवं गभस्त्योर्बाह्वोर्दधन्विरे धियंते च मातरो धेनव इति पाठो ॥ ॥ अथाष्टमी ॥ जुष्ट

इंद्राय मत्सरः । पवमानः कनिक्रदद्विश्वा अप द्विषो जहीति ॥ इंद्राय जुष्टः प्रियः सोमः मत्सरः सोमो भवतीति शेषः । मत्सरः सोमो मद
ते स्तुतिकर्मण इति निरुक्तं पवमानः पूयमानः तादृशः सोमः कनिक्रदत् शब्दयन् विश्वा द्विषः सर्वान् अस्माकं द्वेष्टॄन् । अप जहि प
वमानः पूयमानः तादृशः सोमः कनिक्रदत् शब्दयो पवमानेति पाठो ॥ ॥ अथ नवमी ॥ अपघ्नंतो अराव्णः पवमानाः स्वर्दृशः
। योनावृतस्य सीदतेति ॥ हे पवमानाः अराव्णः अदानान् अयजमानान् अपघ्नंतो हिंसंतः स्वर्दृशः सर्वस्य द्रष्टारः स्थ यूयं ऋतस्य
योनौ यज्ञस्य स्थाने सीदत ॥ अथवा सोमपानार्थं उदकलक्षणात् देवाः ऋतस्य योनौ सीदतेति योज्यं ॥ ॥ इति नवमाध्यायस्य द्विती
यः खंडः ॥ अथ तृतीयखंडे सोमा असृग्रमिति नवर्चं विधमानेमर्कसूक्तं तत्र प्रथमा ॥ सोमा असृग्रमिंदवः सुता ऋतस्य धार
या ॥ इंद्राय मधुमत्तमा इति ॥ ऋतस्य यज्ञार्थं सुतार्थं अभिषुता मधुमत्तमाः अतिशयेन माधुर्योपेताः इंदवः सोमाः इंद्रायेंद्रा
र्थं धारया असृग्रं सृज्यंते धारया सादन इति पाठो ॥ ॥ अथ द्वितीया ॥ अभि विप्रा अनूषत गावो वत्सं न धेनवः ॥ इंद्रं सोमस्य पीतय

475/1923

इति॥ विप्रामेधाविनासोमस्यपीतयेपानायइंद्रं अभ्यनूषत अभिष्टुवंति। तत्र दृष्टांतः। धेनवः प्रीणयित्र्योगावः वत्सं न वत्संय
३२३ थापयः पानाय अभिक्रोदयंति तद्वत्। धेनवोमातरइतिपाठो॥ ॥अथतृतीया॥ मदच्युत्क्षेतिसादनेसिंधोरूर्माविपश्चिता॥
सोमोगौरी अधिश्रितइति॥ मदच्युत मदकरस्यरसस्यच्यावयितासोमःसदने यज्ञस्य स्थाने क्षेतिनिवसति। एतदेवविवृणोतिसिं
धोर्नदेर्मा उर्मौतरंगे वसतीवरीष्वित्यर्थः। विपश्चिता विदुषा ने सोमो गौरी अधिगौर्यामधिअ श्रीतिसप्तम्यर्थानुवादः माध्य
मिकायाः वाचिगौरीगांधर्वीति वा हृनामेतत्श्रितो निवसतीति॥ ॥अथचतुर्थी॥ दिवोनाभाविचक्षणोव्यावारेमहीय
ते॥ सोमोयःसुक्रतुः कविरिति॥ यः सुक्रतुः सुप्रज्ञः कविः क्रांतकर्माविचक्षणो विद्वान्ससोमः दिवोंतरिक्षस्य नाभा नाभौ
नाभिभूते अव्यावारेबालमयेमहीयते पूज्यते॥ ॥अथपंचमी॥ यः सोमः कलशेष्वा अंतः पवित्र आहितः। तमिंदुः परि ३२३
षस्वजेइति॥ यः सोमः कलशे पुकुंभे आस्ते यश्च पवित्रे पवित्रस्यांतर्मध्येआहितो निहितः। तं स्वांशभूतं सोमं इंदुः तदभि

मानी सोमो देवः परिष्वजे प्रविशति॥ ॥अथषष्ठी॥ प्रवाचमिंदुरिष्यतिसमुद्रस्याधिविष्टपि। जिन्वन्कोशं मधुश्चुतमिति। इंदुः 477/1923
सोमः उंदीक्लेदने उतिध्यानात् इंदुः इनवान् स मधुश्चुतं मधुनः च्यावकं द्रोणकलशं जिन्वन्प्रीणयन्पूरयन्नित्यर्थः॥ समुद्र
स्यांतरिक्षस्य अधिविष्टपि विष्टपे स्थाने वाचं प्रेष्यतिप्रेरयति। पवित्रे पूयमानः शब्दं करोतीत्यर्थः॥ ॥अथसप्तमी॥ नित्य
स्तोत्रो वनस्पतिर्धीनामंतः सबर्दुघः। हिन्वानो मानुषा युगेति। नित्यस्तोत्रः संततस्तोत्रः वनस्पतिः वनानां स्वामी सोमः मानु
षा मानुषाणि कृतादियुगमानि अहीने काहात्मकानि हिन्वानाः प्रीणयन् सबर्दुघांअमृत सदृशानि प्रियवचनानि दोग्धीं अं
तः स्तोतॄणां मध्ये स्थितां धेनां स्तुतिरूपां वाचं गरणातितिशेषः। धेनामंतः सबर्दुघा धेनामंतः सबर्दुघः सरतिपाठो॥ अथा
ष्टमी॥ ॥आपवमानधारय रयिं सहस्रवर्चसं॥ अस्मे इंदो स्वाभुवमिति॥ हे पवमान पूयमान पुनानवा इंदो सोम त्वं सहस्रवर्च
सं बहुदीप्तिं स्वाभुवं शोभन भवनं रयिं धनं अस्मे अस्मासु धारय प्रक्षिपेत्यर्थः॥ ॥अथनवमी॥ अभिप्रियाणिदिवः कविर्

प्रः सधारया कृतः॥ सोमो हिन्वे परावति॥ कविः क्रांतकर्मा कृतोभिष्टुतः सोमः परावति विप्रकृष्टे देशे स्थितः सन्विप्रः मेधा
१२५ वीतस्य धारया दिवो द्युलोकस्य प्रियाणि स्थानान्यभिलक्ष्य हिन्वे प्रेरयति। दिवः कविः दिवस्य देपाठो। हिन्वे परावति दिः
न्वानो अपवः। नीतिच कृतः कविरिति॥ ॥इति नवमाध्याये तृतीयः खंडः॥ ॥अथ उत्ते शुष्मास इति चतुर्थ खंडे विद्यमानं पं
चर्चं सूक्तं तत्र प्रथमा॥ उत्ते शुष्मास ईरते सिंधोरूर्मेरिव स्वनः॥ वाणस्य चोदया पविमिति॥ हे सोम ते तव शुष्मासः शुष्मा वेगा
उदीरते उद्गच्छंति। तत्र दृष्टांतः॥ सिंधोः समुद्रस्य ऊर्मेरिव यथा तरंगा अनो ध्वनिरुद्गच्छति तद्वत्॥ सर्ववाणस्य विध्वस्य ना
दस्य सततंत्रीकस्य वीणाविशेषस्य पविं वाद्यनामैतच्छब्दं चोदय प्रेरय। वेगेन स्यंदमानस्त्वं विसर्गवारणशब्दसदृशं शब्दं १२४
कुर्वित्यर्थः॥ ॥अथ द्वितीया॥ प्रसवे त उदीरते तिस्रो वाचो मखस्युवः॥ यदव्य एषि सानवीति॥ हे सोम ते तव प्रसावसति
मखस्युवो यज्ञमिच्छतो यजमानस्य तिस्रो वाचः ऋग्यजुः सामात्मकानि त्रीणि वाक्यानि उदीरते उद्गच्छंति। कदेत्युत आह य

दा सामविष्ठे ते अथो अविमये पवित्रे एषि लंगच्छसि॥ ॥अथ तृतीया॥ अव्यो वारे परिप्रियं हरिं हिन्वंत्यद्रिभिः॥ पवमानं मधु
श्चुतमिति॥ प्रियं देवानां प्रीतिकरं हरिं हरितवर्णं आद्रिभिर्ग्रावभिरभिषुतं मधुश्चुतं मधुनो रसस्य च्यावयितारं पवमानं सोमं
अव्यात्मावर्णे इरे वालैः परि हिन्वंति ऋत्विजः परिप्रेरयंति॥ ॥अथ चतुर्थी॥ आ पवस्व मदिंतम पवित्रं धारया कवे। अर्कस्य
योनिमासदमिति॥ हे मदिंतम मादयितृतम कवे क्रांतकर्मन सोम अर्कस्य अर्चनीयस्य प्रस्य योनिं मुद्गरभृतं स्थानं आसदं प्राप्तुं
पवित्रमतीत्य धारया संपातेन पवस्व आभिमुख्येन क्षर॥ ॥अथ पंचमी॥ स पवस्व मदिंतम गोभिरंजानो अक्तुभिः॥ इंद्रस्य जठ
रं विशेति॥ हे मदिंतम मादयितृतम सोम अक्तुभिः अंजनसाधनभूतैर्णातिर्गोविकारैः पयोभिः रंजानो व्यमानः संस्क्रियमा
णः स त्वं पवस्व क्षरतनोनंतरं इंद्रस्य जठरमुदरं आविश प्रविश। एवं इंद्रस्य जठरं विश इंद्राविंद्राय पीतये इति पाठो॥ ॥इति न
वमोध्यायस्य चतुर्थः खंडः॥ अथ पंचमखंडे अयावीतीति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अया वीती परिस्रव यस्तं इं

479/1973

मदेषा॥ भवाहं नवतीर्नवा इति। हे इंद्र सोम अया अनेन रसेन पीतो वाधिर् इंद्रस्य भक्षणाय परिस्रव परिक्षर। कीदृश नरसेन घत
१२५ आह॥ ते तवयोरसोम दर्णं संग्रामेणु नवतीनीवतीन् वनवतीसंख्याकाश्च शत्रुपुरीः आवहन् जघान। इमं सोमरसं पीत्वा मत्तः
मंत्रेंद्रः ऽकसंख्याकाः शत्रुपुरीर्जघानेति कृत्वा रसो जघानेत्युपचारः॥ ॥अथद्वितीया॥ पुरः सद्य इत्थाधियोदिवोदासाय शं
बरं॥ अधत्यं तुर्वशं यदुमिति॥ स घ एकस्मिन्नेव वाह्निपुरः शत्रूणां पुराणि सोमरसो नाहन इत्थाधिये सत्यकर्मणे दिवोदासाय
राज्ञे शंबरं शत्रुपुराणां स्वामिनं अधात्यांनं तं रेत्यं तं तुर्वशं तुर्वशनामकं राजानं दिवोदासं शत्रुं यदुनामकं च राजानं वशमा
नयस्व। अत्रापि सोमरसं पीत्वा मत्तः सन्निंद्रः सर्वमेतत्कार्षीदिति। सोमरसे कर्तृत्वमुपचर्यते॥ ॥अथतृतीया॥ प १२६
रिणो अश्वमश्वविद्गोमदिंदो हिरण्यवत्॥ क्षरा सहस्रिणीरिषः इति॥ हे सोम अश्वविद् अश्वस्य लंभक त्वं मोऽस्माकं अश्वं गो
मद्गो हिरण्यवत्। क्षरा सहस्रिणीः हिरण्योपेतं पश्वादि धनं च परिक्षर। अपि च सहस्रिणीर्बहुनीर्षान्नानि क्षर। संहि

तायां परिनः परिण इति पाठो॥ ॥अथ ऋग्वात्मके द्वितीयसूक्ते प्रथमा॥ अप घ्नन्पवते मृधोप सोमो अराव्णः॥ गच्छन्निंद्रस्य निष्कृ
तमिति। सोमो मृधो हिंसकान् शत्रून् अप घ्नन् मारयन्। अराव्णः शत्रोः मस्तो धनानाम् दातॄन् अपघ्नन् इंद्रस्य निष्कृतं स्थानं
गच्छन् आप्नुवन् पवते धारयाक्षरति॥ ॥अथद्वितीया॥ महो नो राय आ भर पवमान जही मृधः॥ रास्वेंदो वीरवद्यश इति। हे पवमा
नेंद्रो सोम नो अस्माकं महो महांति रायो धनानि आ भर आहर मृधो हिंसकान् शत्रूंश्च जहि मारय॥ वीरवत्पुत्राद्युपेतं यशः कीर्तिं वा रा
स्व अस्मभ्यं देहि॥ ॥अथतृतीया॥ न त्वा शतं चन ह्रुतो राधो दित्संतमामिनन्॥ यत्पुनानो मखस्यस इति॥ हे सोम राधो धनं दि
त्संतं आदातुमिच्छंतं त्वा त्वां शतं चन बहवोऽपि ह्रुतो हिंसकाः शत्रवः नामिनन् न हिंसंति। कदेत्यत्राह यत् यदा पुनानः पूयमानस्त्वं
मखस्यसे धनं दातुमिच्छसि॥ ॥अथ ऋग्वात्मके तृतीयसूक्ते प्रथमा॥ अया पवस्व धारया यया सूर्यमरोचयः॥ हिन्वानो मानुषी
रप इति॥ हे सोम मानुषीः मनुष्याणां हितान्यप उदकानि हिन्वानः प्रेरयंस्त्वं यया धारया सूर्यमरोचयः प्राकाशयस्त्व

481
1923

या। नयाधारयापवस्वश्वर॥ ॥अथद्वितीया॥ अयुक्तसूरएतशंपवमानोमनावधि॥ अंतरिक्षेणयातवइति॥ पवमानःपूयमा
१२६ नःसोमोमनावधिमनुर्मनुष्यस्तस्मिन्मनुष्यइत्यर्थः। अंतरिक्षेणयातवेगंतुंसूरःप्रेरकस्यादित्यस्यएतदर्थं॥ अश्वनामैतत्
अश्वंअयुक्तयुंक्ते॥ ॥अथतृतीया॥ उतत्याहरितोरथेसूरोअयुक्तयातवे॥ इंदुरिंद्रइतिब्रुवन्इति॥ उतापिचइंदुःसोमोइंद्रइ
तिब्रुवन्त्यास्ताःहरितोहरितवर्णानश्वान्सूरस्यःसूर्यसारथेयातवेगंतुंअयुक्तयुनक्ति। रथेदशेतिपाठो॥ ॥इतिनवमोध्या
यपंचमःखंडः॥ ५॥ अथषष्ठखंडेअग्निंवइतितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ अग्निंवोदेवमग्निभिःसजोषायजिष्ठंदूतं
मध्वरेकृणुध्वं॥ योमर्त्येषुनिध्रुविर्ऋतावातपुर्मूर्धाघृतान्नःपावकइति॥ हेदेवावोयूयंदेवंद्योतमानमग्निंअध्वरेकौटिल्यरहि
तेयागेदूतंकृणुध्वंकुरुत॥ कीदृशंअग्निभिःअन्यैःसजोषासजोषसंद्वितीयार्थेप्रथमा॥ यजिष्ठंयष्टृतमंयागं॥ ईदृशंवापि १२६
सन्मर्त्येषुमनुष्येषुनिध्रुविर्नितरांवर्तमानः। कीदृशःऋतावायज्ञवान्सत्यवान्वातपुर्मूर्धातापकतेजाःघृतान्नःपावकःशोधकश्चभवति।

नमग्निंदूतंकृणुध्वमितियोजना॥ ॥अथद्वितीया॥ प्रोथदश्वोनयवसेविष्यन्यदामहःसंवरणाद्व्यस्थात्॥ आदस्यवातोअनुवाति 483
शोचिरधस्मतेव्रजनंकृष्णमस्तीति॥ यवसेघासेअविष्यन्भक्षयन्प्रोथत्शब्दंकुर्वन्संचरन्वा अश्वोनअश्वइवमहोमहतःसंव 1973
रणान्निरोधनाद्यावरूपोग्निर्यदाव्यवस्थात्संततेषुवृक्षेषुवितिष्ठते। आतनंतरंअस्याग्नेःशोचिरर्चिरनुवातोवाति। अथप्रत्य
क्षस्तुतिः। अथानंतरंहेअग्नेतेतवव्रजनंवर्त्मकृष्णमस्तिभवतिस्मेतिपूरणः॥ ॥अथतृतीया॥ उद्यस्यतेनवजातस्यवृष्णो
ग्नेचरंत्यजराइधानाः॥ अच्छाद्यामरुषोधूमएषिसंदूतोअग्नईयसेहिदेवानिति॥ हेअग्नेनवजातस्यनूतनप्रादुर्भूतस्यवृष्णोवर्षि
तुर्यस्यतेतवअजराजरारहिताज्वालाःइधानाःसमिध्यमानायाःउच्चरंतिउत्तिष्ठंति। हेअग्नेअरुषःआरोचमानःधूमोधूम
युक्तःदूतस्त्वंद्यामच्छद्युलोकंप्रतिसमेषिगच्छसि॥ पश्चात्तत्रस्थान्देवान्इंद्रादीन्ईयसेहिसंप्राप्नोषिखलु॥ यद्वाहेअग्नेत्वदी
योयोधूमःद्युलोकंप्रतिगच्छति। पुरोगएषिपततीतिपाठो॥ ॥अथतमिंद्रमितितृचात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ तमिंद्रंवा

जयामसि महे वृत्राय हंतवे ॥ स वृषा वृषभो भुवदिति ॥ यजमान हे ओतं पूर्वोक्तलक्षणमिंद्रं वाजयामसि वाजयामः ॥ सोमैः स्तुतिभिर्वा
३२७ अवंतं बलवंतं कुर्मः ॥ किमर्थं महे महांतं वृत्राय । अपामावरकं वृत्रासुरं हंतवे च हंतुं । सोमपानेन मत्तः स्तुतिभिर्वा स्तुतः स
इन्द्रो वृत्रं हंतवे था । जयामसि वाजयं अलंकरोतीत्यर्थे तत्करोति । मिणि च । णाविष्ठवदिति नियमे इष्ठवद्भावात् टेरिति टिलोपः ॥ विन्मतोर्लु
गिति मतुपो लुक् । वृषा धनानां सेक्ता दाता स इंद्रः वृषभः अस्माकं स्तोतॄणां सोमस्य दातॄणां धनादि सेचको दाता तु भवतु ।
॥ ॥ अथ द्वितीया ॥ इंद्रः स दामने कृतः ओजिष्ठः स बले हितः ॥ द्युम्नी श्लोकी स सोम्य इति ॥ स इंद्रः दामने स्तोतृभ्यो धनादि दाना
य बलकृतः प्रजापतिना सृष्टः । किंच स ओजिष्ठः ओजिष्ठितमः ॥ स एवेंद्रः बले बलवति सोम प्रजापतिना सृष्टिलोके निहितः सोमपाना ३२७
र्थं चातिनिहित इत्यर्थः द्युम्नी द्युम्नं द्योततेर्यशोवान्नं वेति यास्केनोक्तत्वात् । यशस्वी अन्नवान् ॥ अपि च श्लोकी श्लोकः स्तुति
स्तद्वान् स इंद्रः सोम्यः सोमार्हो भवति । वाल प्र इइ निपातो ॥ ॥ अथ तृतीया ॥ गिरा वज्रो न संभृतः सबलो अनपच्युतः ॥

ववक्ष उग्रो अस्तृत इति ॥ गिरा स्तुतिलक्षणया वाचा स्तोतृभिः संभृतः उत्पादितः स्वीकृतः ॥ तत्र दृष्टांतः ॥ वज्रो न यथा वज्र आ 485/1973
युधं त्वष्टृभिः निशितधारं यथा भवतीति क्रियते तद्वत् ॥ स्तोतृभिः स्तुत्या संभृतः ॥ अत एव सबलो बलसहितस्तस्मादनप
च्युतः परैरप्रच्युतः ॥ अनभिगत इत्यर्थः ॥ तादृशः उग्रो महान् अस्तृतः युद्धे शत्रुभिरहिंसित इंद्रः ववक्षे स्तोतृभ्यो धनादिकं
वोढुमिच्छति ॥ उपक्रम इति पाठो ॥ ॥ इति नवमाध्यायस्य षष्ठः खंडः ॥ अथ सप्तमखंडे अध्वर्यो अद्रिभिरिति ऋचात्मकं सूक्तं तत्र प्र
थमा ॥ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आनय ॥ पुनाहींद्राय पातव इति ॥ हे अध्वर्यो अद्रिभिः ग्रावभिः सुतमभिषुतं ।
सोमं पवित्रे अनय प्रापय एतदेव दर्शयति । इंद्राय इंद्रस्य पातवे पानाय पुनाय पुनीहि पावय ॥ आनय अस्य अनेति पाठो ॥ पुना
हि पुनीहीति च ॥ ॥ अथ द्वितीया ॥ तव त्य इंद्रो अंधसो देवा मधोर्व्यश्नते ॥ पवमानस्य मरुत इति ॥ हे इंदो सोम तव त्ये अंधसो
नेमधो मदकरस्य पवमानस्य पूयमानस्य धाराः तत्र कर्मणि षष्ठी ॥ त्ये ते इमे देवा इंद्रादयो मरुतश्च एवंभूतमन्नं व्या

शतस्यानुवर्तीत्यर्थः॥ याशातस्यश्रुतइतिपाठो॥ ॥अथतृतीया॥ दिवःपीयूषमुत्तमंसोममिंद्रायवज्रिणे॥ पुनानामधुमत्तममिति॥
३२८ हेअध्वर्यवोयूयंमधुमत्तमंअतिशयेनमाधुर्योपेतंदिवोद्युलोकस्यपीयूषममृतभूतंउत्तमंश्रेष्ठंसोमंवज्रिणेयज्ञवतइंद्रायसु
नोताभिषुणुत॥ धर्तादिवइतितृचात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ ॥धर्तादिवःपवतेकृत्व्योरसोदक्षोदेवानामनुमाद्योनृ
भिः॥ हरिःसृजानोअत्योनसत्वभिर्वृथापाजांसिकृणुतेनदीष्वेति॥ धर्तासर्वस्यधारकःसोमःदिवोंतरिक्षात्अंतरिक्षस्थिता
द्दशापवित्रात्पवतेक्षूयते॥ कृत्व्यःसोमःशक्त्यःकर्तव्यःशोध्यतइत्यर्थः॥ रसोरसात्मकःदेवानांदक्षःबलप्रदःयद्वा
दक्षःप्रवर्तनीयोदेवानामर्थाय॥ तथानृभिर्नेतृभिर्ऋत्विग्भिःरनुमाद्यः॥ अनुमादनीयःस्तुत्योवाशेषःप्रत्यक्षकृ ३२८
ताः हरिर्हरितवर्णःसत्वभिःप्राणिभिःसादिभिःसृजानःसृज्यमानःअत्योनअश्वइवसयथाशिक्षितोरथाअनाया
सेनगच्छति॥ तद्वत्वृथाअप्रयत्नेनपाजांसिबलानिस्त्रियानवेगानुकृणुषकुरुषोकिंच॥ नदीषुवसतीवरीषुताभि

रित्यर्थः॥ आसिक्तइतिशेषः॥ अश्वमभिषेवसमयाभिप्रायः॥ कृणुषेकृणुतेइतिपाठो॥ ॥अथद्वितीया॥ शूरोनधत्तआयु
धागभस्त्योःस्वःसिषासन्रथिरोगविष्टिषु॥ इंद्रस्यशुष्ममीरयन्नपस्युभिरिंदुर्हिन्वानोअज्यतेमनीषिभिरिति॥ अयं 487/1973
सोमोगभस्त्योर्हस्तयोरायुधाआयुधानिशूरोनशूरइवधत्तेधारयति॥ सस्वर्गंमुखसाधनंयज्ञंवासिषासन्संयुक्तमि
च्छन्रथिनोरथवान्॥ रथ्यादिरत्ययः॥ गविष्टिषुयजमानस्यगवामेषणेषुसत्सुयजमानार्थंगोसंभजनासुरथवा
नित्यर्थः॥ इंद्रस्यशुष्मंबलंईरयन्प्रेरयन्निंदुःसोमोदेवःअपस्युभिःकर्मेच्छुभिःमनीषिभिर्मेधाविभिर्ऋत्विग्भिःहिन्वा
नः॥ प्रेर्यमाणःआज्यतेगोभिः॥ ॥अथतृतीया॥ इंद्रस्यसोमपवमानऊर्मिणातविष्यमाणोजठरेष्वाविश॥ प्रणःपि
न्वविद्युदभ्रेवरोदसीधियानोवाजांउपमासिशश्वतइति॥ हेसोमपवमानःपूयमानःत्वंतविष्यमाणोवर्द्धमानःसन्
इंद्रस्यजठरेषुऊर्मिणाप्रभूतयाधारयाआविश॥ जठरप्रदेशस्यबाहुल्याद्बहुवचनम्॥ नोस्मादर्थंविद्युदभ्रेवअ

१२९ भ्याणी वसा यथा भ्याणि। दोग्धीत घर्म्यपिन्वक्षरोदसी द्यावापृथिव्यौ किंच। धिया कर्मणा नो अस्मभ्य इष्थलः। बहूनामेतत्। बहून्नवाज्ञा
नन्धानिङ्पसमीपे माहिन्निर्माहि। माहिमासीति पाठो नान्तेत्ति च पाठः॥ ॥ अथ प्रगाथरूपे तृतीयसूक्ते प्रथमा॥ यदिंद्र प्रागपागु
दङ् न्यग्वा हूयसे नृभिः॥ सिमा पुरू नृषूतो अस्यानवेसि प्रशर्ध तुर्वशे॥ इति। हे इंद्र यद्यदि प्राक् प्राच्यां दिशि वर्तमानैः समस्यंतादिक्
प्राक्दर्श्वहूहितस्याम्नालेरं च लुंगति लुक्। यद्दिवा अपाक् प्रतीच्यां दिशि वर्तमानैः यद्दिवा उदक् समस्यंतादिकृशाल्मसादिहितस्यान्ने
तिरं च लुंगति लुक्॥ यद्दिवा अपाक् प्रतीच्यां दिशि वर्तमानैः यद्दिवा उदक् उदीच्यां दिशि वर्तमानैः यद्वा न्यक् नीच्यां दिशि धस्ता
द्वर्तमानैः न्यधोचोतनैः प्रकृतिस्वरत्वं। उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। एवं भूतैर्नृभिः स्तोतृभिस्त्वं ३२९
हूयसे स्वस्वकार्याय आहूयसे। हूसिमा श्वेद्ंद्रसिम इति वश्चे प्रमाच्वक्ष्त इति वाजसनेयकं। यद्यप्येवं हूभिराहूयसे तथा
पि आनवे मनुनामराज्ञा तस्य अत्रेरनापौ पुरुबहुलं नृषूतः नृभिस्तदार्ये। स्तोतृभिः प्रेरितोसि भवति। राज्ञो हितकरणे

स्त्वां त्वां स्तोतारः प्रेरयंतीत्यर्थः। पृ प्रेरणे अस्मात्कर्मणि निष्ठा तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अपि च हे प्रशर्ध प्रशर्ध
प्रकर्षेण दर्शयितरभिः। भवितारं इ पूर्वेशे एतत्संज्ञके राजनि नृषूतोसि नृभिः प्रेरितोसि भवसि॥ ॥ अथ द्वितीया॥ यद्वा रुमे रु
शमे श्यावके कृप इंद्र मादयसे सचा॥ कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इंद्रा यच्छंत्या गहीति॥ यद्वा यद्यपि रुमे रुशमादिषु वृत्
पु राजसु हे इंद्र त्वं सचा सह मादयसे माद्यसि। तथापि ब्रह्मवाहसः ब्रह्मणां स्तोत्राणां वोढारः। अथवा ब्राह्मणानां अन्नानां वोढारः
कण्वासः कण्वगोत्राः ऋषयः स्तोमेभिः स्तोत्रैः स्तोत्रसमूहैः सह हे इंद्र त्वा आयच्छंति। आयमयंति। अतस्त्वं मा गहि नी
घ्रमागच्छ। गमेर्लोटि छांदसः शपो लुक्। स्तोमेभिर्ब्रह्मवाहसः (सदहद हैद्र त्वा) ब्रह्मभिः स्तोमवाहस इति पाठो॥ ॥ अथ प्रगा
थरूपे चतुर्थसूक्ते प्रथमा॥ उभयं शृणवच्च न इंद्रो अर्वागिदं वचः॥ सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत्॥
इति उभयं स्तोत्रात्मकं शस्त्रात्मकं वा उभयविधमिदं वचो अर्वाग् अस्मदभिमुखः इंद्रः शृणवत् शृणोतु॥ श्रुत्वा च मघवान् ध

489
1973

नानिंद्रः सत्राच्या अस्माकं सह अवन्या धिया युक्तः सन्। शविष्ठोतिशयेन बलवान्निंद्रः सोमपीतये अस्माकं संबंधिसोमस्य
३३० पानाआगमदागच्छतु। यद्वा मघवान् धनवानिंद्रः शविष्ठोतिशयेन बलवान् सत्राच्या अस्मान्सह अचंत्याधिया युक्तः सन्सो
मपीतये सोमस्य पानाय आगमदागच्छतु॥ ॥अथद्वितीया॥ तं हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः॥ उतोपमा
नां प्रथमो नि षीदसि सोमकामं हि ते मन इति॥ तं हि तं खल्विंद्रं स्वराजं स्वयमेव राजमानं धिषणे द्यावापृथिव्यौ वृषभं जग
दुपकारकं वृष्टेर्वर्षकं ओजसा बलेन निष्टतक्षतुः॥ संचस्कुरतुः उत अपि यस्मादेवं तस्मात् हे इंद्र उपमानां उपमानभूताना
मन्येषां देवानां मध्ये प्रथमो मुख्यः सन्निषीदसि वर्धासे सोमकामं हि खलु ते मनः ओजसा ओजसेति पाठो॥ इति नवमः ३३०
ध्याये सप्तमखंडः॥ ॥अथाष्टमखंडे तृचात्मके प्रथमे सूक्ते प्रथमा॥ पवस्व देववायुषगिंद्रं गच्छतु ते मदः॥ वायुमारोह ध
र्मणेति। हे सोम देव द्योतमान त्वं पवस्व धारया क्षर। अपिच। तव मदो मदकरो रसः वायुषाकमिंद्रं प्रतिगच्छतु॥

अपिच। त्वं वायुं धर्मणा धारकेण रसेन आरोह प्राप्नुहि देवो देवेति पाठो॥ ॥अथद्वितीया॥ पवमान नि तोशसे रयिं सोम श्रवाय्यं। ४९१/1973
इंद्रो समुद्रमा विशेति॥ हे पवमान इंदो सोम त्वं श्रवाय्यं श्रवणीयं रयिं शत्रूणां धनं नितोशसे। नितरां पीडयसि। सत्वं समुद्रं द्रो
णकलशं आविश प्रविश इंद्रो प्रिय इति पाठो॥ अपघ्नन् पवसे मृधः इति तृतीयायाः कृचः प्रतीकमिदं साच छंदस्या रम्नाता व्याख्या
ता च॥ अथ द्वितीया तृचात्मके सूक्ते॥ ॥अभि नो वाजसातममिति प्रतीकं साम्न्याम्नाता व्याख्याता च॥ ॥अथ द्वितीया॥ वयं ते अ
स्य राधसो वसोर्वसो पुरुस्पृहः॥ नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो इति॥ हे वसो वासयितः सोम अस्य एतादृशस्य ते। त
व राधसो धनस्य पुरुस्पृहः बहुभिः स्पृहणीयस्य वसो र्धामकस्य त्वया दीयमानस्य च वयं नितरां नेदिष्ठतमा अन्यंतमंतिकत
मा स्याम॥ अथ तृतीया॥ परि ष्य स्वानो अक्षरदिंदुरव्यमदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुरिति। गव्य
युर्गोकामः य इंदुः क्षीरादिकामयमानः ऊर्ध्वः समुच्छ्रितः सर्वेषां मुख्यो यः सोमः भ्राजाना यथा भ्राजमानया दीप्त्या अंतरिक्षे

गच्छतितदुक्तं।द्रोणसद्म अध्वरे यज्ञे धारासुतःकाश्यया धारयाभ्यातिगच्छति। स्वानः क्वानः अभिषूयमाणः सइंदुः सोमः मरुत्सु

३३१ तः मदार्थं देवैः प्रेरितः सन् अघे आविभवे पवित्रे पर्यक्षरन् परितः क्षरति। अक्षरत्। अक्षाः इति पाठो॥ ॥अथ तृतीय सूक्ते

तच्चात्मके प्रथमा॥ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धामेति॥ हे सोम महान् देवेभ्यो दीयमानत्वेन महत्वयुक्तः समुद्रः स

मुंदनः यस्मात्समुद्रवंति रसस्त्वादृशः पिता सर्वेषां पालयिता त्वं देवानां विश्वा विश्वानि सर्वाणि धाम धामानि शरीराणि अभिलक्ष्य

पवस्व क्षर॥ अथ द्वितीया॥ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्य इति॥ हे सोम शुक्रो दीप्तस्त्वं देवेभ्यो देवार्थं

पवस्व क्षर। किंच। दिवे पृथिव्यै च द्यावापृथिवीभ्यां च ततः प्र० द्यावापृथिवी० जाभ्यश्च शं सुखं च कुरु॥ प्रजाभ्यः प्रजार्थे इति पा

ठो॥ ॥अथ तृतीया॥ दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्वेति। हे शुक्रो दीप्तः पीयूषः पातव्यस्त्वं दिवो द्युलो ३३१

कस्य धर्ता धारकोसि वाजी बलवान् सन् सत्ये सत्यभूते विधर्मन् विधर्मणि विविधः कर्मणि कर्तव्ये यस्मिन् यज्ञे विविधं सो

मादि हविषां धारके यस्मिन् यज्ञे पवस्व क्षर॥ इति नवमेध्याये अष्टमः खंडः॥ अथ नवमखंडे प्रेष्ठं व इति तृचात्मकं प्रथमं सूक्तं तत्र प्र 493

थमा॥ ॥प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं॥ अग्ने रथं न वेद्यमिति॥ हे अग्ने वस्त्वां प्रजार्थं बहुवचनं स्तुषे स्तौमि॥ आहमुशनेति 1973

याप्यः कीदृशं प्रेष्ठं अस्माकं स्तोतॄणां धनदानेन प्रियतमं॥ अतिथिं सर्वैरतिथिवत्पूज्यं यद्वा अतसातत्यगमने। कर्तव्यं जीत्यादिना

आतेरथिन् सततं देवानां हविः प्रदातुं गच्छंतं मित्रमिव सखायमिव प्रियं स्तोतुः प्रीणनकरं॥ रथं न रथमिव वेद्यं वेदो धनं रथं न रथ

मिव यथा रथं यथास्वामिमल्लाभायाश्रयं तेतद्वत्। स्तोतारो धनलाभायाश्रयंते॥ धनलाभहेतुं तादृशं धनलाभकारणं हे अग्ने

तस्मै हितं वेद्यं चाकर्मसिध्यर्थं अहं स्तोता स्तौमि। तिसंबंधः॥ अग्ने अग्निमिति पाठो॥ ॥अथ द्वितीया॥ कविमिव प्रशंस्यं यं दे

वासो अधद्विता। निमर्त्येष्वादधुरिति। हे देवासो देवाः इंद्रादयः यमग्निं मर्त्येषु मनुष्येषु इति वक्ष्यमाण प्रकारेण द्वितां द्विधा न्या

दधुर्गार्हपत्याहवनीयात्मके न द्विधा निहितं वतः। तत्र दृष्टांतः कविमिव प्रशंस्यं प्रशंसनार्हं कालकर्माणं पुरस्तां यथा द्विधा

कार्यद्वये अन्योन्यं योजयति॥ तदुक्तं। यद्वा दिवि पृथिव्यां च निहितवंतः। अग्नौ तु हविराहरणार्थं दिवि तु हविःप्रदानार्थमिति। इंधन्वभिः धा
३३२ नं कुर्वन् इत्यर्थः॥ तमग्निं स्तुष इति पूर्वेण संबंधः॥ प्रशंस्यं प्रचेतसमिति पाठौ॥ इति अधीतिच॥ ॥अथ तृतीया॥ त्वं यविष्ठ दा
शुषो नॄः पाहि शृणुधी गिरः। रक्षा तोकमुत त्मना इति॥ हे यविष्ठ युवतम यद्वा यो तेस्तत्तस्य दृष्टनिरूपं देवानां हविःप्रदं विश्वापि
यत्रमें इत्व दृशुषो हविर्दत्तवतो नॄन् कर्मणां नेतॄन् यजमानान्पाहि धनादिदानेन रक्ष नॄंः पाहि यत्र संहितायां नॄन्य इति नकारस्य
रुत्वं अत्रानुनासिक इति पूर्वस्यानुनासिका। किंच। गिरस्मद्विषयाः स्तुतीः शृणुहि अवहितः सन् शृणु उतापिच त्मना आत्मने
च नोस्माकं मस्मदीयं तनयं पुत्रं रक्ष पालय। त्मने ति सर्वत्र संबध्यते। आत्मना स्वयमेव रक्ष त्वदन्यं पालयितारं त्वाविं दामः।
त्वमेवास्मदीयं स्तोत्रं शृणु शृणुहि शृधीति पाठौ॥ ॥अथ त्वात्मके द्वितीयसूक्ते प्रथमा॥ एंद्र नो गधि प्रिय सत्राजिदगो ३३२
ह्यः गिरिर्न विश्वतः पृथुः पतिर्दिव इति॥ हे प्रिय स्तोतृणां प्रीणनकरः सत्राजित महतां शत्रूणां जेतः हे अगोह्य केनापि

गोहितुमशक्य एवंभूतं इन्द्र गिरिर्न पर्वत इव विश्वतः सर्वतः पृथुः पृथुतमो दिवः स्वर्गस्य पतिरीश्वरस्त्वं नोस्मानागधि आगच्छ। प्रि 495/1923
यसत्राजिदगोह्य प्रियः सत्राजिदगोह्य इति पाठौ। विश्वतः पृथुर्विश्वतः पृथुरिति च॥ ॥अथ द्वितीया॥ अभि हि सत्य सोमपा उभे
बभूथ रोदसी॥ इंद्रासि सुन्वतो वृधः पतिर्दिवः॥ इति हे सत्य सोमपाः सोमस्य पातरिंद्र यस्त्वं उभे रोदसी द्यावापृथिव्यौ अभिब
भूथ। हि सामर्थ्येनाभिभवसि खलु। स त्वं सत्यतः सोमाभिषवं कुर्वतो यजमानस्य वृधो वर्धकोसि। दिवः पतिः स्वर्गस्यापि ईश्व
रोसि॥ ॥अथ तृतीया॥ त्वं हि शश्वतीनामिंद्र दर्ता पुरामसि॥ हंता दस्योर्मनोर्वृधः पतिर्दिव इति॥ हे इंद्र त्वं शश्वतीनां बहूनां पु
रां शत्रुनगराणां दर्तासि हि दारयिता भवसि खलु। किंच। दस्योरुपक्षयकालस्योपक्षेपयितुरसुरस्य हंतासि घातको भवसि। म
नोर्मनुष्यस्य यागादिकं कुर्वतो वृधो वर्धकश्चासि दिवः स्वर्गस्यापि पतिरीश्वरोसि॥ ॥अथ त्वात्मके तृतीयसूक्ते प्रथमा॥ ॥
पुरां भिंदुर्युवा कविरमितौजा अजायत। इंद्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः॥ इति। अयमिंद्रः उच्यमानगुणयुक्तो जा

यत्न। संपन्नः। कीदृशगुणोऽइति। तदुच्यते। पुराममसुरपुराणां भिंदुर्भेत्ता। युवा कदाचिदपि वलीपलितादिवर्धकरहितः। कविर्मेधावी।
३३३ अमितौजा अप्रभृतबलः। विश्वस्य कर्मणः कृत्स्नस्य ज्योतिष्टोमादेर्धर्ता पोषकः। वज्री यजमानरक्षणार्थं सर्वदा वज्रयुक्तः। पुरुष्टुतः ब
हुविधेन तत्तत्कर्मणि स्तुतः। भिंदुः। भिदिर् विदारणे। उरित्यनुवृत्तौ। शृभिदिभ्यामिन्धिधिधृषिदृशिभ्य इति उप्रत्ययः। तस्य छंदस्युभयथे
ति सार्वधातुकसंज्ञायां रुधादिभ्यः श्नम्। मित्वादचः परो भवति। श्नसोरल्लोपः। अनुस्वारपरसवर्णौ। अचः परस्मिन् पूर्ववि
धाविति प्राप्तस्य स्थानिवद्भावस्य न पदांतेत्यादिना निषेधः। युवा यु मिश्रणामिश्रणयोः। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति
कनिन्। नित्वादाद्युदात्तः। कविः कुङ् शब्दे अच इः इति इप्रत्ययस्वरः। अमितशब्दस्याव्ययपूर्वपदप्रकृतिस्वरत्वं बहुव्रीहौ पूर्वपद
प्रकृतिस्वरत्वेन तदेव शिष्यते। विश्वस्य अशूप्रुष्यादिना क्वन्। नित्वादाद्युदात्तः। कर्मणः अन्येभ्योपि दृश्यंत इति मनिन्। नित्स्वरः। ३३३
धर्ता तृन्। नित्वादाद्युदात्तः। वज्री मत्वर्थीय इनिः प्रत्ययस्वरः। पुरुष्टुतः स्तुतः स्तोमयोश्छंदसीति षत्वं। बहुलग्रहणेषु। स्तुतः।

थाथघञ्क्ताजबित्रकाणामित्यंतोदात्तत्वं। तृतीयासमासे हि थाथादिस्वरापवादः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वात्॥ ॥
अथ द्वितीया॥ त्वं वलस्य गोमतोऽपावरद्रिवो बिलं॥ त्वां देवा अबिभ्युषस्तुज्यमानास आविषुरिति। वलनामकः कश्चिदसुरो स्वसंबं
धिनीर्गा अपहृत्य बिले स्थित। वले गोपितवान्। तदानीमिंद्रेण हूला स्वसैन्येन समागत्य तस्माद्बिलाद्गा निःसारयामास। तदे
तदुपाख्यानमिंद्रो वलस्य बिलमपोर्णोदित्यादिषु ब्राह्मणेषु मंत्रांतरेषु च प्रसिद्धं। तदेतद्धृदि निधाय मंत्रः प्रवर्तते। हे अद्रि
वः वज्रयुक्तेंद्र त्वं गोमतो वलस्य गोभिर्युक्तस्य वलनामकस्यासुरस्य संबंधि बिलं अपावः स्वसैन्यमुखेनापावृतवानसि। तदानीं
तुज्यमानासो वलेन हिंस्यमाना देवा अबिभ्युषः त्वदीययारक्षया वलाद्भीताः संतः त्वामाविषुः प्राप्नुवंतः। अपेत्यस्य निपातत्वा
दाद्युदात्तत्वं। अवः। वृञ् वरणे। लङ्। तिप्। इतश्च लोपः। स्वादिभ्यः श्नुः तस्य बहुलं छंदसीति लुक्। गुणो रपरत्वं हल्ङ्यादिलोपः।
विसर्जनीयः। अडागमः। अद्रिवः अद्रिरस्यास्तीति मतुप्। छंदसीर इति वत्वं। संबोधने। उगिदचामिति नुम्। हल्ङ्यां संयोगांतलोप।

497/1973

मतुप्। मारुतः। संबुध्योर्द्धैरसीतिरुत्वं। विलं। नाविषयस्यानिसंतस्येत्याद्युदात्तत्वं। आ बिभ्युषः। ञिभी भये लिट्। द्विर्भावः। अभ्यासस्य ह्
१३५ स्वजास्वं। क्वसुश्चेति लिटः क्वसुरादेशः। क्रादिनियमात्। प्राप्तइट्। वस्वेकाजाद्घसामिति नियमान्निवर्तते॥ जसि सर्वनामस्थाने
पिव्यत्ययेन भत्वात् वसोः संप्रसारणं। परपूर्वत्वं। शासिवसिघसीनां चेति षत्वं। आविश्याधाभ्वित्यादिना प्राप्तनियमात्। इट् वाधित्वाप
रत्वेकाच इति यणादेशः। नञ्समासः। अव्ययपूर्वप्रकृतिस्वरत्वं। तुञ्जमानासः। तुजि हिंसार्थः। अस्य कर्मणि लटः। स्थाने शानच्। सार्व
धातुकेयगिति यक्। तस्मात् उपरि श्यातउत्तरस्य च सार्वधातुकस्यानुदात्तत्वं। यक एव प्रत्ययस्वरो शिष्यते। आ अघिषुः। अवरक्षणा
दिषु अस्माल्लगत्यर्थो॥ लुङि रिजस्य सिजभ्यस्तविदिभ्यश्चेति जुस्। सिचइडागमः। आङ्गागादीनामित्याडागमः॥ आद्युदात्तप्रत्य १३५
योरितिषत्वं॥ ॥अथ तृतीया॥ इंद्रमीशानमोजसाभिस्तोमैरनूषत॥ सहस्रं यस्य रातय उत वा संति भूयसीः॥ इति। स्तोतारः
ओजसा बलेन ईशानं जगतो नियामकम् इंद्रं स्तोमैस्त्रिवृदादिभिरभ्यनूषत। सर्वत्र स्तुतवंतः। यस्येंद्रस्य रातयो धनदानानि

सहस्रं सहस्रसंख्योपेतानि संति। उत वा अथवा भूयसीः। सहस्रसंख्याका अप्यधिकाः संति। तमिंद्रमिति पूर्वान्वयः। स्तोमैः स्तो
मा इति पाठो॥ इंद्रं कर्जेंद्रोत्यादिना रन्। निवाद्याद्युदात्तः। ईशान्तं ईश ऐश्वर्ये। लटः शानच्। अदिप्रभृतिभ्यः शप इति शपो लुक्। धातो
रनुदात्तेत्त्वात् तास्यनुदात्तेदित्यादिना शानचो नुदात्तत्वम्॥ ओजसा नड्विषयत्वादाद्युदात्तः। स्तोमैः। अर्तिस्तुसुहु इत्यादिना म
न्प्रत्ययः। नित्वादाद्युदात्तः। अनूषत णु स्तुतौ। णो नः। लङ्व्यत्ययेन लङः। तस्य अद्यादेशः। च्लेः सिच्। अस्य धातोः कुटादित्वेन
सिचो ङित्वात् गुणाभावः। उवङ्भावश्छांदसः। अडागमः। सहस्रं कर्तृमाशीनां चेति द्वितीयाक्षरमुदात्तं॥ रातयः। मंत्रे वृषेषपच्या
दिनाक्तिन्। उदात्तः। उत प्रातिपदिकस्वरः। वाचादिरनुदात्तः। संति प्रत्ययाद्युदात्तत्वं। तिङ्ङतिङ इति निघातो न भवति यद्
वृत्तान्नित्यमिति प्रतिषेधात्॥ संहेयव्यवहितेपि भवतीत्युक्तं॥ भूयसीः सहस्रादतिशयेन बह्व्यः। भूयस्य। भवा विभक्तस्य
स्य सहस्रस्य संनिधिवशात् उपपदत्वप्रतीतौ दुर्वचन निविभज्योपपदे तरबीयसुनौ विति। बहुशब्दादीयसुन बहोर्लोपो

499/1923

भ्रूचवद्भूरितिउकारलोपः। अव्रतेर्भूरित्यादेशश्च। ईयसुनोनिलादाघुरादत्तत्वं। उगितिश्चेतिङीप्॥ ॥इतिनवमेध्यायेनवमः
३३५ खंडः॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ इतिश्रीमद्राजाधिराजपरमे
श्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्त
राग्रंथेनवमोध्यायः॥ ॥७॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ॥अथद
शमोध्यायआरभ्यते॥ तत्रप्रथमखंडेअक्रांत्समुद्रइतित्र्यात्मकंप्रथमंसूक्तं। तत्रप्रथमा॥ अक्रांत्समुद्रः प्रथमेवि
धर्मन्जनयन्प्रजाभुवनस्यगोपाः॥ वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेस्वानोअद्रिरिति॥ समुद्रः यस्माद्रापः
संद्रवंतिससमुद्रः अपांवर्षकः गोपाः स्वामित्वेनसर्वस्यरक्षकः सोमः प्रथमेभुवनस्यउदकस्यविधर्मन्विधारकेंतरि ३३५
क्षेप्रजाः जनयन्नुत्पादयन् अक्रान् सर्वमतिक्रामति॥ क्रमतेर्लुङिनिपीडभावेश्छंदसीत्युक्तायांसिचलोपमकारस्यमानाः
धातोरिति। नकाररूपं। वृषाकामानांवर्षिताखानोभिषूयमाणः। अद्रिरादरणशीलः। स्यात्मामः। अधिअधिकंसानौसमु
च्छ्रितअविभवेपवित्रेवृहत्। प्रभूतंवरधेवर्धते। गोपाः राजेतिपाठो॥ अद्रिरंदुर्नोस्वि॥ ॥अथद्वितीया॥ मत्सिवायुमिष्ट
यराधसेचनोमत्सिमि। त्रावरुणापूयमानः॥ मत्सिशर्धोमारुतंमत्सिदेवान्मत्सिद्यावापृथिवीदेवसोमेति॥ हेसोमत्वंवायुं
मत्सिमादयकिमर्थंनोस्माकंइष्टयेएषणीयाय्रायराधसेधनायच। तथापवित्रेणपूयमानस्त्वंमित्रावरुणामित्रावरुणौ
चमत्सितर्पयसि। किंच। मारुतंमरुतांसंभूतंशर्धोबलंचमत्सि। तथादेवानिंद्रादीन्मत्सिहर्षय। हेदेवस्तोतव्यहेसोमद्या
वापृथिव्यौवमत्सिमादय॥ एतान्हर्षयुक्तान्कृत्वाअस्मभ्यंधनंप्रयच्छेत्यर्थः॥ राधसेनाराधसेचेतिपाठो॥ ॥अथतृती
या॥ महत्तत्सोमोमहिषश्चकारापांयद्गर्भोवृणीतदेवान्॥ अदधादिंद्रेपवमानओजोजनयत्सूर्येज्योतिरिंदुरिति॥ म
हिषोमहान्पूज्योवासोमः॥ महत्प्रभूतंतत्कर्मचकारकरोत्। किंतत्कर्म अपांगर्भः उदकानांगर्भभूतः जयत्त्वाज्ज

501
1923

न्यत्वात्तु स सोमः। देवानरुणा नसमभज्जतेतियत्तत्तदुक्तं यानितानि किंच पवमानः पूयमानः सोमः ओजस्तत्यानेन तज्ज न्यबलं इंद्रे अदधाः
न्यदधात। तथेंदुः सोमः सूर्यं ज्योतिस्तेजो जनयत॥ ॥अथैषदेवइतिदशर्चं द्वितीयं सूक्तं तत्र प्रथमा। एष देवो अमर्त्यः पर्णवीरिव
१३६ दीयति॥ अभि द्रोणान्यासदमिति॥ देवो द्योतमानः अमर्त्यो मरणरहितः एषः सोमः द्रोणानि द्रोणकलशानभि अभिलक्ष्यासदम
सदनार्थं पर्णवीरिव। यथा पक्षी तथा वेगेन दीयतेगच्छति। दीयते दीयनीतिपाठो॥ ॥अथद्वितीया। एषविप्रैरभिष्टुतोपोदे
वो विगाहते। दधद्रत्नानि दाशुषइति। विप्रैर्मेधाविभिः स्तोतृभिरभिष्टुतः आभिमुख्येन स्तुतः देवो द्योतमानः एषः सोमः दाशु
षे हविः प्रदात्रे यजमानाय रत्नानि रमणीयानि धनानि दधत् धारयन् प्रयच्छन्। अपो वसतीवरीः विगाहते प्रविशति॥ ॥
अथतृतीया। एषविश्वानिवार्याशूरोयन्निवसत्वभिः पवमानः सिषासतीति। इति। पवमानः पूयमानः शूरो वीरः एषसोमः १३६
विश्वानि सर्वाणि वार्याणि वरणीयानि धनानि सत्वभिः र्बलैर्यन्निव गच्छन्निव सिषासति अस्मदर्थं संभक्तुमिच्छति॥ ॥अथच०

एषदेवोरथर्यतिपवमानोदशस्यति। आविष्कृणोतिवग्वनुमिति॥ पवमानः क्षरन्नेवसोमो देवो दर्थयति अस्मदीयं यागं प्रत्यागम
नायरथं कामयते दशस्यति। आगत्य चास्मभ्यं अभिलषितं धनं प्रयच्छति वाग्वनुं शब्दं आविष्कृणोति। अभिषवकाले प्र
कटयति दशस्यति दशस्यतीति पाठो॥ ॥अथपंचमी। एषदेवो विपन्युभिः पवमान ऋतायुभिः॥ हरिर्वाजाय मृज्यतइति। प 503/1973
वमानः क्षरन्नेषसोमो देवो विपन्युभिः स्तोतृभिः ऋतायुभिर्यज्ञकामैः सत्यकामैर्वा हरितश्वइव वाजाय संग्रामार्थं मृज्यते स्तुति
भिरलंक्रियते॥ ॥अथषष्ठी॥ एषदेवो विपाकृतोतिह्वरांसि धावति। पवमानो अदाभ्य इति। विपा अंगुलिनामैतत्। अंगुल्याकृतो
भिषुतएषसोमो देवः पवमानः क्षरन् अदाभ्यः केनाप्यहिंसितश्चसन् ह्वरांसि द्वात्रूनतिधावति हंतुमभिगच्छति॥ ॥सप्तमी॥ ए
षदिवंविधावतितिरोरजांसि धारया॥ पवमानः कनिक्रददिति॥ धारया पवमानः क्षरन्नेषसोमः कनिक्रदत् भृशं पूयमाणः श
ब्दं कुर्वन् रजांसि लोकानां तिरस्तिरस्कुर्वन्नयज्ञादिवं स्वर्गं प्रतिधावति॥ ॥अथअष्टमी॥ एषदिवंव्यासरत्तिरो रजांस्यस्पृतः। पवमा

नस्वध्वरोति। पवमानः क्षरन्नेष सोमः स्वध्वरः सुयज्ञः अस्तृतः केनाप्यहिंसितः अभ्यसन् रजांसि लोकांस्तिरस्तिरस्कुर्वन् यज्ञादिवं प्रति
३३७ व्यासरन् विसरति गच्छति॥ ॥अथ नवमी॥ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः॥ हरिः पवित्रे अर्षतीति॥ हरिर्हरितवर्णः देवो द्योत
मानः एष सोमः प्रत्नेन पुराणेन जन्मना जननेन देवेभ्यो देवार्थं सुतोऽभिषुतः सन् पवित्रे स्थातुं अर्षति गच्छति॥ ॥अथ दशमी॥
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः॥ धारया पवते सुतः इति॥ एष उ स्यः एष एव स सोमः पुरुव्रतो बहुकर्मा जज्ञानो जायमान इ
षः अन्नानि जनयन् उत्पादयन् सुतोऽभिषुतः धारया पवते क्षरति॥ ॥इति दशमेऽध्याये प्रथमः खंडः॥ अथ द्वितीयखंडे एष धिये
त्यष्टर्चस्य सूक्तस्य प्रथमा॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः॥ गच्छन्निन्द्रस्य निष्कृतमिति॥ एष सोमः शूरो विक्रांतः अण्व्या
अंगुल्या अभिषुतः धिया कर्मणा याति गच्छति। कं देशमिति। उच्यते इंद्रस्य निष्कृतं स्थानं संस्कृतं प्रति आशुभिः शीघ्रगाभि ३३७
भिः रथेभिः रथैः गच्छन् इंद्रेण रथे न संस्कृतस्वस्थानं यन् अण्व्यांगुल्या अभिषूयमाणः सन् होमद्वाराग्निं निष्पीडनद्वारा पात्रं वा गच्छती
त्यर्थः।

अथ द्वितीया॥ एष पुरु धियायते बृहते देवतातये॥ यत्रामृतास आसतेति॥ एष सोमः पुरु बहुलं धियायते धियं कर्मेच्छति धीकाम्या
त॥ क्यच्याप्यारोपजनः स्वद्वा द्वितीयार्थे तृतीया॥ छांदसं श्चुत्वं लुक्॥ कस्मै बृहते महते देवतातये यज्ञाय यत्र यस्मिन्यज्ञे अमृतासो
मृता देवा आशत व्याप्नुवंति॥ तदर्थं आशत आसत इति पाठो॥ ॥अथ तृतीया॥ एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः॥ प्रचक्राणं
महीरिषः इति॥ आयवो मनुष्या ऋत्विजः एतं सोमं मर्ज्यं मार्जनीयं उपमृजंति निष्पीडयंतीत्यर्थः॥ कुत्र द्रोणेषु द्रोणकलशेषु कीदृशं
महीरिषः महत्यन्नानि प्रचक्राणं कुर्वाणं। प्रभूतरसस्राविणमित्यर्थः॥ ॥अथ चतुर्थी॥ एष हितो विनीयतेऽन्तः शुभ्रावता प
था॥ यदी तुंजंति भूर्णयः इति। एष सोमः हितो निहितो हविर्धाने विनीयते तस्मात्स्थानात् हवनीयं प्रति। अंतः स्रुचोर्मध्यदेशे शुभ्रा
वता शुभ्रविमता पथा मार्गेण यदि यदा तुंजंति प्रयच्छंति। देवेभ्यः पूरयंत्या भरणशीला अध्वर्य्वादयः तदा विनीयत इति समन्व
यः॥ शुभ्रावता शुभ्रावतेति पाठो॥ ॥अथ पंचमी॥ एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः॥ पतिः सिंधूनां भवन्निति॥

505
1973

३३८ एषसोमो रश्मिभिरित्येतद्व्यं अंशुविशेषणं। तिं धूतांस्यं द्रमाणानां रसानां पत्नीर्भवन्तीयत इति॥ ॥अथ षष्ठी॥ एष शृंगाणि दोधुव
च्छिशीते यूथ्यो वृषा॥ नृम्णा दधान ओजसेति॥ एष सोमः शृंगाणि शृंगवदुन्नतान् अंशून् अभिषवकाले दोधुवन् धुनोति यूथ्याय
थ्यो हों यूथरूलिरूपाय षभो यथा शिशांते तीक्ष्णो शृंगे धुनोति तद्वत्। कीदृशः ओजसा बलेन नृम्णानि धनानि दधानोस्मदर्थं धार
यन्॥ ॥अथ सप्तमी॥ एष वसूनि पिब्दना परुषा ययिवां अति॥ अव शादेषु गच्छतीति॥ वाचः वसूनि आच्छादनानि रक्षांसि पिब्दनः
पारुयंनेष सोमः परुषा पर्वणा अति अतिक्रम्य ययिवान् गच्छन् शादेषु शातनीयेषु रक्षःसु अव अवगच्छति पिब्दनः पिन्नान्येने
तिपाठे॥ ॥अथाष्टमी॥ एतमु त्यं दश क्षिपो हरिं हिन्वंति यातवे॥ स्वायुधं मदिंतममिति॥ हरिं हरितवर्णः स्वं तमेतमु एतमे
व सोमं दशक्षिपः दशसंख्याका अंगुलयः यातवे गमनाय हिन्वंति प्रेरयंति कीदृशा मनं स्वायुध शोभनायुधम मदिंतमं
मादयितृतमं। रक्षो हननसामर्थ्यप्रदर्शनाय स्वायुधमप्याह। अवर्णं हरिं हिन्वंति यातवे मंजंति सप्तधीतय इति पाठे॥ ॥ ३३८

इति पंचमेध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे एष उस्येति षडृचं प्रथमं सूक्तं तत्र प्रथमा॥ ॥एष उस्य वृषा रथोव्यो वारेभिरर्ष
ति॥ गच्छन्वाजं सहस्रिणमिति। उस्यः प्रसिद्धः एषोभिषुतः सोमः वृषा वर्षिता रथो रंहणस्वभावः। अव्यो वारेभिरवेर्वालैर्दशापवि
त्रेण अर्षति द्रोणकलशं प्रतिगच्छति। वाजमन्नं सहस्रिणं सहस्रसंख्याकं यजमानाय प्रदातुं गच्छन्। द्रोणकलशं प्रविशन् घते त्यर्थः।
अव्यवारेभिरव्यत। अव्यो वारेभिरर्षतीति पाठे॥ ॥अथ द्वितीया॥ एतं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः॥ इंदुमिंद्राय पीतय इ
ति॥ एतमिंदुं हरिं हरितवर्णं त्रितस्य एतन्नामकस्य ऋषेर्योषणो अंगुलयः। अद्रिभिरभिषवणपाषाणैर्हिन्वंति प्रेरयंति किमर्थं। इंद्रायेंद्र
स्य पीतये पानाय॥ ॥अथ तृतीया॥ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति॥ गच्छंजारो न योषितमिति॥ स्यः स एष सोमः मानुषी
षु विक्षु प्रजासु श्येनो न श्येन इव द्रुती घ्रमागत्य यजमानरूपासु अनुग्रहेणागत्य सीदति। पुनः कइव योषितं गच्छन् अभिगच्छन् जा
रो न जार इव स यथा संकेतितस्याः काम पूरणाय गृहेगच्छति तद्वदित्यर्थः॥ ॥अथ चतुर्थी॥ एष स्य मद्यो रसोव चष्टे दिवः शिशुः।

507
1973

य इंदुर्वारमाविशदिति। स्यः स एष मद्यो मदनिमित्तो रसो यच्च प्रसर्वमव पश्यति। दिवः शिशुः द्युलोकस्य पुत्र स्तत्रोत्पन्नः। पुत्रत्व
३३९ मस्य इंदुः दीप्तः सोमो वारं दशापवित्रं आविशत् आविशति। स एष इति॥ ॥अथ पंचमी॥ एष स्य पीतये सुतो हरिरर्षति धर्णसिः॥
क्रंदन्योनिमभिप्रियमिति॥ एष स्यः स सोमः पीतये पानाय सुतोऽभिषुतो हरिः हरितवर्णः धर्णसिर्धारकः प्रियं स्वप्रियभूतं यो
निं स्थानं द्रोणकलशं क्रंदन् शब्दयन् अभ्यर्षति अभिगच्छति। ॥अथ षष्ठी॥ एतं त्यं हरितो दश मर्मृज्यंते अपस्युवः॥ याभिर्मदाय
शुंभत इति॥ एतं त्यं सोमं अध्वर्योर्दश हरितो हरणस्वभावा अंगुल्यः अपस्युवः कर्मेच्छवः सत्यो मर्मृज्यंते शोधयंति याभि
रंगुलिभिरिंद्रस्य मदाय शुंभते दीप्यते शोध्यत इत्यर्थः। तमेतमिति संबंधः॥ ॥इति दशमेऽध्याये तृतीयखंडः॥ अथ चतु
र्थखंडे एष वाजी इति षड्चं सूक्तं तत्र प्रथमा। एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः॥ अव्यो वारं वि धावतीति॥ एष सोमः वा ३३९
जी गमनशीलः हितोऽध्वर्युणा पात्रे निहितः धृतः विश्ववित् सर्ववित् मनसः स्तोत्रस्य पतिः स्वामी॥ अथ वा सोमस्य मनोऽभिमानि

त्वान्मनसः स्वामित्वं। चंद्रमा मनो भूत्वा हृदयं प्राविशदिति। श्रुतेः तादृशः सो अव्यं वारं अविसंबंधिनं दशापवित्रं विधावति विविधं
गच्छति। अव्यमव्य इति पाठो॥ ॥अथ द्वितीया॥ एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः॥ विश्वा धामान्याविशन्निति॥ एष सोमः देवेभ्यो
देवार्थं सुतोऽभिषुतः सन् पवित्रे अक्षरमस्रवति। विश्वा सर्वाणि धामानि देवशरीराणि आविशन् प्रविशन् प्रवेष्टुमित्यर्थः॥ ॥अथ 509/1973
तृतीया॥ एष देवः शुभायतेऽधि योनावमर्त्यः॥ वृत्रहा देववीतमः। इति। एष सोमो देवः शुभायते शोभने अत्र अधियोनौ स्वीये
स्थाने कीदृश एषः अमर्त्यो अमरणधर्मा। वृत्रहा शत्रुहंता। देववीतमो इति शब्देन देवानां कामयिता॥ ॥अथ चतुर्थी॥ एष वृ
षा कनिक्रदद्दशभिर्जामिभिर्यतः॥ अभि द्रोणानि धावतीति॥ वृषा कामानां वर्षिता यः सोमः अनिक्रदत् शब्दं कुर्वन् दशभिर्जामिभिर्य
तः। अंगुलीभिर्यतो धृतः द्रोणानि द्रुममयानि पात्राणि अभिधावन्ति अभिगच्छति॥ ॥अथ पंचमी॥ एष सूर्यमरोचयत्पवमानो
अधि द्यवि॥ पवित्रे मत्सरो मद इति॥ पवमानः पूयमानः एष सोमः अधि द्यवि द्युलोके स्थितं सूर्यं मरोचयत् रोचयति। कीदृशो

३५० पवित्रंस्वयंदशापवित्रेस्थितः॥ मत्सरोमदहेतुंप्राप्तः॥ मदोदुहः॥ अधियाविपवित्रेमत्सरोमदः॥ विचर्षणिर्विश्वाधामानिविश्वविदितिपाठो॥
॥ ॥अथषष्ठी॥ एषसूर्येणहासतेपवमानोविवस्वत॥ पतिंवाचोअदाभ्यइति॥ एषसोमःसंवसानःसर्वमप्याच्छादयन्॥ विवस्वनादी
प्तिमनासूर्येणहासतुपरित्यज्यते। पवित्रइतिशेषः॥ कीदृशः वाचःस्तोतिलक्षणयाःपतिःपालकः स्वामीवाअदाभ्यःकेनाप्यहिंस्यः
॥ ॥इतिदशमेध्यायेचतुर्थःखंडः॥ अथपंचमखंडएषकविरितिषट्टृचंप्रथमंसूक्तंतत्रप्रथमा॥ एषकविरभिष्टुतःपवित्रेअ
धितोशते। पुनानोघ्नन्नपद्विषइति॥ एषसोमःकविर्मेधावीअभिष्टुतोभितस्तुतःपवित्रेअधिदशापवित्रमतीत्यक्रोशते। यद्यपि
तोशतिर्वधकर्मातथापिहननेगतिसद्भावादितिगतिमात्रेवर्तते। गच्छतीत्यर्थः॥ अथवापवित्रेअधिकृत्माक्षेतोशतेहन्यतेपीडय १५०
तइत्यर्थः॥ किंकुर्वन्पुनानःपूयमानः॥ द्विषःशत्रून्अपघ्नन्अपगमयन्॥ द्विषःस्त्रिधइतिपाठो॥ ॥अथद्वितीया॥ एषइंद्रायवा
यवेस्वर्जित्परिषिच्यते॥ पवित्रेदक्षसाधनोति॥ एषसोमःस्वर्जित्स्वर्गस्यसर्वस्यवाजेता॥ इंद्रायवायवेचपवित्रेपरिषिच्यते॥

परिष्याते। कीदृशःएषःदक्षसाधनोबलकारी॥ ॥अथतृतीया॥ एषनृभिर्विनीयतेदिवोमूर्धावृषासुतः॥ सोमोवनेषुविश्ववित्
इति। एषसोमोनृभिःकर्मनेतृभिर्ऋत्विग्भिर्विनीयते। कीदृशःएषःदिवोद्युलोकस्यमूर्धाशिरोवत्प्रधानभूतः॥ वृषाभिमतवर्षतः
सुताभिषुतः॥ कुत्रनीयते। कीदृशःएषःदिवोद्युलोकस्यमूर्धाशिरोवत्प्रधानभूतः॥ वृषाभिमतवर्षकः॥ सुताभिषुतः॥ कुत्रनी
यतेवनेषुवननीयेषुपात्रेषुवनसंभूतद्रुमविकारेषुवापात्रेषुविश्ववित्सर्ववित्एषइतिसमन्वयः॥ ॥अथचतुर्थी॥ एषगव्युर
चिक्रदत्पवमानोहिरण्ययुः॥ इंदुःसत्राजिदस्तृतःइति। एषसोमःपवमानःपूयमानःअचिक्रदत्शब्दंकरोतिकथंभूतःसन्गव्यु
रस्मान्गाइच्छन्हिरण्ययुर्धनमिच्छन्इंदुर्दीप्तःसन्सत्राजितमहतःशत्रोरसकृज्जेताअस्तृतःस्वयंअन्यैरहिंस्यश्चसन्॥ ॥
अथपंचमी॥ एषशुष्म्यसिष्यददंतरिक्षेवृषाहरिः॥ पुनानइंदुरिंद्रमाइति॥ एषशुष्मीबलवान्सोमःअंतरिक्षेदशापवित्रेअ
सिष्यदत्स्यंदते कीदृशःएषःवृषावर्षकःहरिर्हरितवर्णःपुनानःपूयमानःइंदुर्दीप्तःसएवंद्रमा। इंद्रंवाभिगच्छतीतिशेषः॥ आ

521/1973

इतिचार्थे॥ ॥अथषष्ठी॥ एषशुष्म्यदाभ्यःसोमःपुनानोअर्षति॥ देवावीरघशंसहेति॥ एषसोमःशुष्मीबलवान् अदाभ्योदंभनीयः
१४१ अहिंसनीयःपुनानःपूयमानः॥ अर्षतिगच्छतिदेवावीर्देवानामविताअघशंसहाअघानशंसत्यघशंसाः॥ तेषांहंता॥ ॥
इतिदशमेध्यायेपंचमःखंडः॥ अथषष्ठखंडेससुतइतिषडृचंसूक्तंतत्रप्रथमा॥ ससुतःपीतयेवृषासोमःपवित्रेअर्षति॥ विघ्नन्
रक्षांसिदेवयुरिति॥ ससोमःपीतयेइंद्रादिपानायसुतोभिषुतःवृषावर्षकःसन्पवित्रेअर्षतिगच्छति॥ किंकुर्वन्। रक्षांसिविघ्नन्॥
देवयुर्देवकामोयःसइत्यन्वयः॥ ॥अथद्वितीया॥ सपवित्रेविचक्षणोहरिरर्षतिधर्णसिः॥ अभियोनिंकनिक्रददिति॥ ससो
मोविचक्षणःपश्यतिकर्मैतत्सर्वस्यप्रद्रष्टाहरिर्हरितवर्णः। सोमःधर्णसिःसर्वस्यधारकःपवित्रेअर्षतिगच्छति। पश्चात्कनि
क्रदत्शब्दंकुर्वन्योनिंस्थानंद्रोणकलशमभिगच्छति॥ ॥अथतृतीया॥ सवाजीरोचनादिवःपवमानोविधावति। रक्षो १४१
हावारमव्ययमिति। सवाजीवेगवान्अश्वस्थानीयोवादिवोरोचनंरोचकःपवमानःपूयमानोविधावतिकीदृशः॥ र

क्षसांहंता। अव्ययंवारंदशापवित्रंअतीत्यवधावतिविविधंगच्छति। रोचनंरोचनेतिपाठो॥ ॥अथचतुर्थी॥ सत्रितस्याधि
सानविपवमानोअरोचयत्॥ जामिभिःसूर्यंसहेति॥ ससोमःत्रितस्यमहर्षेरधिसानौसमुच्छ्रितेयज्ञेअधीतिसप्तम्या
र्थानुवादीपवमानःपूयमानोजामिभिःप्रवृद्धैर्बंधुभूतैःपालितेजोभिःसहसहितःसन्सूर्यमरोचयत्॥ प्रकाशितवा
न्॥ ॥अथपंचमी॥ सवृत्रहावृषासुतोवरिवोविददाभ्यः॥ सोमोवाजमिवासरदिति॥ ससोमोवृत्रहाशत्रूणांहंतावृषा
वर्षकःसुतोभिषुतोवरिवोवित्धनस्यलंभकःअदाभ्योन्यैरदंभनीयःएवंगुणःसन्वाजमिवसंग्राममश्वइवास
रद्गच्छतिकलशान्॥ ॥अथषष्ठी॥ सदेवःकविनेषितोभिद्रोणानिधावति॥ इंदुरिंद्रायमंहनेति॥ ससोमोदेवःइंदुःक्लि
द्यमानःकविनाक्रांतप्रज्ञेनाध्वर्युणेषितःप्रेरितः। सन्द्रोणानिद्रोणकलशान्अतिक्रम्याभिगच्छति। किंकुर्वन्। इंद्रायेंद्रं
मंहयन्स्वकीयेनरसेनपूजयन्मंहयन्। मंहनेतिपाठो॥ ॥इतिदशमेध्यायेषष्ठखंडः॥ अथसप्तमेखंडेयःपावमानी

513
1973

रितिषकृचं सूक्तं तत्र प्रथमा ॥ यः पावमानीरध्येत्यृषिभिः संभृतं रसं ॥ सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ इति ॥ यो यजमानः
३४२ पावमानीः पवमानदेवताकाः सर्वा ऋचस्तद्रूपं कृषिभिः सूक्तदृष्टृभिः मधुच्छंदः प्रभृतिभिः संभृतं संपादितं रसं वेदसारभूतं
पावमानं सूक्तसंघं योध्येति ॥ अधीते स जनः सर्वं भोज्यमानं पूतं परिशुद्धमेवाश्नाति ॥ परिपूतं पापरहितमन्नं भक्षयति
। कथमस्य पूतत्वं तत्राह ॥ स्वदितं स्वास्वादनात । प्रागेव मातरिश्वना मातरि अंतरिक्षे श्वसीतीति मातरिश्वा वायुः स च पवित्रमेव ॥
पवित्रेण वायुनास्वादितं स्वादूकृतं परिपूतमेवान्नं पश्चात ॥ सनारत्नाति ॥ ॥ अथ द्वितीया ॥ पावमानीर्यो अध्येत्यृषिभिः संभृ
तं रसं ॥ तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं ॥ इति ॥ यो ब्राह्मणः पावमानीः पवमानदेवताकाः ऋचः तदात्मकं कृषिभि ३४२
र्मधुच्छंदः प्रभृतिभिर्मंत्रदृष्टृभिः संभृतं रसं वेदसारं सूक्तसंघं अध्येति । अधीते च तस्मै सवमानाध्ययनं कुर्वते जनाय
सरस्वती सर्वत्र सरणवती सर्वत्र सरणवती वाग्देवता क्षीरं यज्ञसाधनं पयः ॥ सर्पिस्ताद्दृशं घृतं मधु मरकरंदं उदकं सो

मं दुहे स्वयमेव दुग्धे । तं नरं यागादिपरं वेदशास्त्रविदं करोतीत्यर्थः ॥ दुह प्रपूरणे कर्मकर्तरिन दुहस्नुनमी यत् किणावातियकः प्रतिषेधः ते
पस्य । आत्मनेपदेष्विति तलोपः ॥ ॥ अथ तृतीया ॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः ॥ ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हि 515/1973
तमिति ॥ याः पवमान्य ऋचः ताः स्वस्त्ययनीः क्षेमप्रापिकाः सुदुघाः सुष्ठु फलं दुहानाः घृतश्चुतः घृतं श्चोतंति क्षारयंतीति घृतश्चुतः
ईदृ‍शदुःभृताः अस्माननुगृह्णंत्विति शेषः ऋषिभिर्मंत्रदर्शिभिर्मुनिभिः रसः फलसारः संभृतो स्मायुसंपादितः ॥ ब्राह्मणेषु ब्राह्म
णी मंत्रा । तन्यावकाब्राह्मणाः तेषु स्मासु अमृतमविनाशि बलं हितं संपादितं ॥ ॥ अथ चतुर्थी ॥ पावमानीर्दिशंतु न इमं लोकम
थो अमुं ॥ कामांत्समर्धयंतु नो देवीर्देवैः समाहृताः ॥ इति देवैरिंद्रादिभिः सामाहृताः संपादिताः पावमानीर्देवीः पवमानमंत्रा
भिमानिन्यो देव्यः नोस्माकं इमममीदृगभूतं भूर्लोकं अथोपि च अमुं स्वर्गलोकं दर्धंतु प्रयच्छंतु । तत्रत्यात कामांश्च नोस्मदर्थं समर्ध
यंतु । समृध्यात ॥ कुर्वंतु ॥ ॥ अथ पंचमी ॥ येन देवाः पवित्रेणात्मानं पुनते सदा ॥ तेन सहस्रधारेण पावमान्यः पुनंतु मामिति ॥

देवांइंद्रादयाः येन पवित्रेण शुद्धिसाधनेन सदा आत्मानं स्वदेहं पुनते शोधयंति॥ सहस्रधारेण सहस्रावांतरभेदयुक्तेन तेन साधनेन
१५३ पावमान्यऋचः नोस्मान् पुनंतु॥ ॥अथ षष्ठी॥ पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नांदनं॥ पुण्यांश्च भक्षान्भक्षयत्यमृतत्वं च
गच्छति॥ पावमानीः पवमानः पावकः पूयमानो वा सोमः तत्संबंधिन्यस्तद्देवताका ऋचः पावमान्यस्ताः स्वस्त्ययनीः स्वस्त्ययन्यः
स्वस्तीत्यविनाशनाम। तथाविधफलस्य प्रापयित्र्यः ताभिरेतल्लक्षणाभिः पावमानीभिस्तत्पाठेनाध्यानां नांदनं दयति। नंद
तिन इति नंदनः स्वयं स एव नांदनः स्वार्थिकस्तद्धितः प्रत्ययः तं गच्छति प्राप्नोति किंच इहलोके पुण्यान् फलं संपादितान् भक्ष्यान्
भक्षणीयान् भोगान्वा नपामादिलक्षणांश्च भक्षयति। किंचामृतत्वं च गच्छति अमृतत्वं नाम मोक्षं तं च प्राप्नोति॥ ॥इति दशमे
ध्याये सप्तमः खंडः॥ ॥अथाष्टमखंडे अगन्मेति त्रिचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्ध १५३
स्वे दुरोणे। चित्रभानुं रोदसी अंतरुर्वी स्वाहुतं विश्वतः प्रत्यंचं॥ इति॥ योग्निः स्वे दुरोणे आह्वनीयाख्ये स्वस्थाने समिद्धः काष्ठैः

सम्यग्दीप्तः सन् दीदाय दीप्यते। तमिमं यविष्ठं युवतमं उर्व्योर्विस्तीर्णयो रोदसी रोदस्योर्द्यावापृथिव्योरंतरमध्ये नरिक्षोचित्रभा
नुं चित्रदीप्तं स्वाहुतं सुष्ठु आहुतिभिर्हुतं सर्वतां विश्वतः सर्वतः प्रत्यंचं प्रतिगच्छंतमग्निं महा महता नमसा नमस्कारेणागन्म वयमुपग 517/1973
छामः॥ ॥अथ द्वितीया॥ स मह्ना विश्वा दुरितानि साह्वानग्निष्टवे दम आ जातवेदाः। स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत
नो मघोनः॥ इति॥ यो अग्निः मह्ना महत्त्वेन विश्वा विश्वानि दुरिता दुरितानि साह्वान् अभिभवन् जातवेदाः जातधनो जातप्रज्ञो वा
दमे यज्ञगृहे स्तवे स्माभिः स्तूयते॥ सोग्निर्गृणतः स्तुवतः नोस्मान् दुरितात् पापात्॥ अवद्यान्निंदितात् कर्मणा रक्षिषत् रक्षतु॥
उत अपि च मघोनः हविष्मतो नोस्मान् रक्षतु॥ ॥अथ तृतीया॥ त्वं वरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वसिष्ठाः॥ त्वे वसु सुष
णनानि संतु यूयं पात स्वस्तिभिः सदा नः॥ इति। हे अग्ने त्वं वरुणोसि पापानां निवारको भवसि। उत अपि च मित्रोसि पुण्यप्रा
पणे सखा भवसि। वसिष्ठाः एतं नामकाः ऋषयः। हे अग्ने त्वां मतिभिः स्तुतिभिर्वर्धंति वर्धयंति। त्वे त्वयि विद्यमानानि वसूनि

निक्रमणनानिक्रसंभजनानिसंतु। हे अग्ने पूर्यंतु राधाः सर्वे देवाः स्वस्तिभिः क्षेमैः नोस्मान सदा सर्वदा पातपातरक्षत॥ ॥अ
३४४ थतृचात्मके द्वितीयसूक्ते प्रथमा॥ महांइंद्रोय ओजसापर्जन्योवृष्टिमांइव॥ स्तोमैर्वत्सस्यवावृधेइति॥ यः इंद्रः ओजसाबलेन
महान सर्वेभ्योधिकः॥ कइव। वृष्टिमानिव। यथावृष्ट्यायुक्तः पर्जन्यः रसानांप्रार्थयितादेवो महान सइवेत्यर्थः॥ सइंद्रः वत्सस्यपुत्रस्य
नीयस्यस्तोतुः वत्सनाम्नएववा ऋषेः स्तोमैः स्तोत्रैः वावृधे वर्धतिं॥ ॥अथद्वितीया॥ कण्वाइंद्रंयदक्रत स्तोमैर्यज्ञस्यसाधनं॥ जा
मिब्रुवतआयुधेति॥ कण्वाइंद्रं स्तोमैः स्तोत्रैः यज्ञस्ययागस्यसाधनंसाधयितारनिष्पादकं। यद्यदा अक्रत अकुर्वत। करोतेर्लु
ङि मंत्रे घसेतिच्लेर्लुक्। तदानीं आयुधान्यत्रूणांहिंसकानिबाणादीनिजामिअतिरेकमाहुरेतत॥ अतिरिक्तं अधिकंप्रयोजनरहितं ३४४
ब्रुवते कथयंति। आयुधसाध्यस्यसर्वस्यकार्यस्येंद्रेणकृतत्वात। आयुधानिनिष्प्रयोजनानीत्यर्थः॥ यद्वा आयुधाआयुध
मायोधनशीलमिंद्रंजामिजामिंभ्रातरंब्रुवते॥ वदंति। सर्वकार्येषुभ्रातृत्ववर्धतेतदृत्यर्थः॥ आयुधाआयुधमितिपाठौ॥ ॥●

अथतृतीया॥ प्रजामृतस्यपिप्रतः प्रयद्भरंतवन्हयः॥ विप्राऋतस्यवाहसेति॥ ऋतस्ययज्ञस्यसत्यस्यवाप्रजांप्रकर्षेणतरंतिवहंतितदावि
प्रामेधाविनः स्तोतारऋतस्ययज्ञस्यवाहसाप्रापकेण स्तोत्रेण तमिंद्रंस्तुवंतीतिशेषः॥ ॥इतिदशमेध्यायेष्टमखंडः॥ अथनवम
खंडेपवमानस्येतितृचात्मकंप्रथमंसूक्तं तत्रप्रथमा॥ पवमानस्यजिघ्नतो हरेश्चंद्राअसृक्षत॥ जीराअजिरशोचिषइति॥ जिघ्नतः 579/1973
पुनःपुनः रक्षांसिविनाशयतः हरिर्हरितवर्णस्यअजिरशोचिषः सर्वत्रगमनशीलतेजसः पवमानस्यसोमस्यचंद्राः॥ चदिआल्हा
दे। देवानामाल्हादयित्र्यःजीराः क्षिप्रंक्षरणशीलाधाराः असृक्षतसृज्यंते। पवित्रात्तिगच्छतीत्यर्थः॥ जिघ्नतः जघ्नतइतिपाठौ।
अथद्वितीया॥ पवमानोरथीतमः शुभ्रेभिः शुभ्रशस्तमः॥ हरिश्चंद्रोमरुद्गणइति। पवमानोदेवः रथीतमः अतिशयेनरथवा
न। ईद्रथीनइतिकारः॥ तथाशुभ्रेभिः शोभायुक्तेभ्यस्तेजोभ्योपिशुभ्रशस्तमः॥ अत्यंतदीप्यमानश्च। यद्वानिर्मलतमयशो
युक्तः। हरिश्चंद्रः। हरिवर्णचंद्राल्हादकरपदेमंत्र इतिसाहतिकः ककृ। हरितवर्णदीप्तः॥ हरितधारायुक्तोवामरुद्गणः॥ मरुतोयस्यगणः

१४५ सहायभूताः सतथोक्तः तादृशः सोमः सर्वान्स्वरश्मिभिर्व्याप्तोऽस्त्वित्यध्याहारेणसंबंधः॥ ॥अथतृतीया॥ पवमानोव्यश्नवद्रश्मिभिर्वाजसात
मः॥ दधत्स्तोत्रेसुवीर्यमिति॥ हेपवमानसोमत्वंरश्मिभिःस्वरश्मिभिर्व्यश्नुहिसर्वंजगद्व्याप्नुहि॥ कीदृशस्त्वंवाजसातमः अतिशयेनान्नस्य
दाताबलस्यसंभक्तावातथा॥ स्तोत्रेपवमानंस्तोत्रंकुर्वतेजनायस्तोत्रेसुवीर्यंशोभनवीर्योपेतं। पुत्रंधनंवाधनंविदधत्प्रयच्छन्व्याः
प्नुहि। पवमानव्यश्नुहिपवमानोव्यश्नवदितिपाठो॥ ॥अथतृचात्मकेद्वितीयसूक्तेप्रथमा॥ परीतोषिंचतासुतंसोमोयउत्तमंहः
विः॥ दधन्वाँयोनर्योअप्स्वंतरासुषावसोममद्रिभिरिति॥ हेऋत्विजः सुतमभिषुतंसोमंइतः अस्मात्कर्मणऊर्ध्वंअथवाअस्मा
त्प्रदेशादूर्ध्वंपरिषिंचतवसतीवरीभिः इतोषिंचतेत्यत्रसंहितायांछांदसंरोरुत्वं॥ आदेशप्रत्यययोरितिषत्वं। यःसोमःदेवा
नामुत्तमंप्रशस्यंहविर्भवति। आअपिचनर्योमनुष्येभ्योहितःसचसोमः अप्सुवसतीवरीषुअंतरिक्षेवा। तदींधन्वान्गच्छन् १४५
तितंसोमंअद्रिभिर्ग्रावभिरध्वर्युःसुषावअभिषुतंचकार॥ तंपरिषिंचतेतिसमन्वयः॥ ॥अथद्वितीया॥ नूनंपुनानोविः

भिःपरिस्रवादब्धःसुरभिंतरः॥ सुतेचित्त्वाप्सुमदामोअंधसाश्रीणंतोगोभिरुत्तरमिति॥ हेसोमः अदब्धः केनाप्यहिंसितः
सुरभिंतरः अत्यंतसुगंधिः त्वंनूनंनिश्चितंपुनानःपूयमानःसन्। अविभिरविपालवलैःपवित्रैःपरिस्रवपरितःक्षर। सुतेचित् 521/1973
अभिषुतेएवअंधसाऽन्नेनगोभिर्गोविकारैःक्षीरादिभिःश्रीणंतःमिश्रयंतोवयंउत्तरमुत्कृष्टतरंअप्सुवसतीवरी
षुस्थितंत्वांमदामःमंदामहृष्यामः॥ ॥अथअध्यास्योरुपालतृतीया॥ परिसुवानश्चक्षसेदेवमादनःक्रतुरिंदुर्विचक्षणः॥ इति। स्वा
नःसुवानोऽभिषूयमाणःसोमःचक्षसेसर्वेषांदर्शनायपरिस्रवति॥ कीदृशः देवमादनः देवानांतर्पयिता। क्रतुःकर्ताइंदुःपात्रेषु
क्षरणशीलः विचक्षणःसर्वस्यविद्रष्टा॥ ॥अथतृचात्मकेतृतीयसूक्तेप्रथमा॥ असाविसोमोअरुषोवृषाहरीराजेवद
स्मोअभिगाअचिक्रदत्॥ पुनानोवारमत्येष्यव्ययंश्येनोनयोनिंघृतवंतमासददिति॥ सोमोसावि अभिषुतोऽभूत्। कीदृशःसोमः
अरुषआरोचमानः वृषावर्षकोहरिर्हरितवर्णः सचराजेवदस्मोदर्शनीयः सन्गाः उदकान्यभिलक्ष्यअचिक्रदत्। शब्दंकरो

१५६ ति। स्वरसानिर्मोकसमये पश्चात् पुनानः पूयमानः अव्ययमविमयं वारं वालं दशापवित्रमत्येषि हे सोम अतिक्रम्य गच्छसि। ततः श्येनो
न श्येन इव योनिं स्वीयं स्थानं घृतवंतं उदकवंतं असदत् प्राविशत्। अन्वोविपर्येतिपिपाठो। आसदन् आसदन्मितिच॥ ॥अथ तृती
या॥ पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे॥ स्वसार आपो अभि गा उतासरंत्सं ग्रावभिर्नसते वीते अध्व
रे॥ इति। यस्य महिषस्य महतः पर्णिनः पर्णवतः पतनवतो वा सोमस्य पर्जन्यः पिता जनकः स सोमः पृथिव्या नाभा नाभौ ना
भिस्थाने यज्ञे हविर्धाने गिरिषु गिरिसंबंधिषु ग्रावसु क्षयं निवासं दधे धारयति अभिषवसमये तथा स्वसारो अंगुलयः आपो
वसनं वर्ये गोः आज्यार्थाः कृतयो वा अभि आभिमुख्येन उतासरन् उद्गच्छंति। सं च नसते संगच्छंते॥ ग्रावभिः साकं क्रतावीते का
ते॥ अध्वरे यज्ञे उतासरन् उतारे सन्निति पाठो॥ वीते चाध्वर इति च पाठो॥ ॥अथ तृतीया॥ कविर्वेधस्या पर्येषि माहिनमत्यो
न मृष्टो अभि वाजमर्षसि॥ अपसेधं दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजं इति॥ ते सोम कविः क्रांतदर्शी सन्
वेधस्या यागविधाने छया माहिनं महनीयं पवित्रं पर्येषि परिगच्छति॥ पश्चात् मृष्टः प्रक्षालितः अत्यो न अश्व इव वाजं संग्रामं अभ्य
र्षसि हे सोम दुरिता अस्मदीयानि दुरितानि अपसेधन् परिहरन् नो अस्मान् मृळय सुखय। स त्वं घृतं उदकानि वसानः आच्छादयन् परियासि
सि अभिगच्छसि। किं निर्णिजं निर्णेजकं पवित्रं सोम नो मृड घृता सोम मृडय घृतमिति पाठो॥ ॥इति दशमेध्याये नवमः खंडः॥ 523
अथ दशमखंडे प्रगाथात्मके प्रथमसूक्ते प्रथमा॥ अयंत इव सूर्यं विश्वेदिंद्रस्य भक्षत। वसूनि जातो जनिमान्योजसा प्रति भा 1473
गं न दीधिमः इति॥ हे अस्मदीया जनाः अयंत इव सूर्यं यथा समाश्रिता रश्मयः सूर्यं भजंते। तद्वदिंद्रस्य विश्वेत् विश्वान्येव धना
नि भक्षत भजत। स च जातः प्रादुर्भूत इंद्रमो व्योनि वसूनि धनानि ओजसा बलेन जनिमानि जनिष्यमाणानि करोति। अतो न भा
गं न पित्र्यं भागमिव तानि धनानि प्रति दीधिम प्रतिधारयेम॥ जाते जनमाने जातो जनिमानिति पाठो॥ ॥अथ द्वितीया॥
अनर्शरातिं वसुदामुप स्तुहि भद्रा इंद्रस्य रातयः॥ यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् इति॥ हे स्तोतः अ

ऌर्षिरातिं अपापकदानं। अपां पित्तस्य दातारमित्यर्थः॥ अऌर्षिपर समानार्थमनंश्रीपदं यास्केन व्याख्यातं। अनर्शरातिं मनश्लील
१४७ दानमश्लीलं पापकमिति। वसुदां धनस्य दातारमिंद्रं सपर्यत उपस्कहियत इंद्रस्य गतयो दानानि भद्राः कल्याणानि महदैश्वर्यकारीणीत्यर्थः
॥ ॥अथ तृतीया॥ इंद्रः स्वकीयं मनः दानाय भीषप्रदानाय चोदयन॥ प्रेरयन विधतः॥ परिचरतोस्य स्तोतुः काममिच्छन्वरो
पतिन हि निस्तितमिंद्रमुपस्कृहीति संबंधः॥ अऌर्षिरातिमिति रुद्रयोगाः पठंति। अनर्शरातिमिति बहृचाः॥ यो अस्य सो अस्ये
ति अप्रगाथात्मकं द्वितीयसूक्ते प्रथमा॥ यत इंद्र भयामहे ततो नो अभयं कृधि॥ मघवंछग्धि तव तन्न ऊतये विद्विषो विमृ
धो जहीति। हे इंद्र यतो हि सचान भयामहे वयं ततो नोस्मभ्यं अभयं कृधि कुरु। हे मघवन धनवन्निंद्र नोस्मानुद्दिश्य तत्तस्मै तव
ऊतये त्वत्कर्तृकायै रक्षायै शग्धि शक्तो भव। किंच विद्विषः अस्मद्वेष्टॄन्। वि जहि मृधः अस्मद्धिंसकान् विजहि॥ ऊतय ऊती १४७
भिरिति पाठो। ॥अथ द्वितीया॥ त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधतः॥ तं त्वा वयं मघवन्निंद्र गिर्वणः सुता

वंतो हवामहे इति॥ हे राधसस्पते धनस्य स्वामिन। त्वं हि त्वं खलु। महो महतो राधसो धनस्य क्षयस्य। गृहस्य च विधर्तासि हि भ
स्मभ्यं दानुधारको भवसि। खलु। हे गिर्वणो गीर्भिर्वननीय मघवन धनवन्निंद्र तं तादृशं त्वां तां च सकेयेन वंतः अभिषुतसोमाः
हवामहे आह्वयामः॥ राधसस्पते राधस्पत इति पाठो। विधर्ताविध इति च॥ ॥इति दशमेध्यायो उत्तराग्रंथे दशमः खंडः॥ अथै
का दशखंडे त्वं सोमेति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ त्वं सोमासि धारयुर्मंद्र ओजिष्ठो अध्वरे॥ पवस्व मंहयद्रयिरिति। हे
सोम अभिषूयमाण पवमान मंद्रो मादयितृतमः। ओजिष्ठः ओजस्वतमः। त्वं अध्वरे हिंसारहिते अस्मदीये यज्ञे धारयुर्भिषवे
ण धाराकामोसि भवसि स्थितस्त्वं तं मंहयद्रयिः स्तोतृभ्यः प्रदीयमानधनः सन पवस्व द्रोणकलशेग्रहादिषु दशापवित्रेण पू
तो भव। यद्वा धारयुस्त इदर्थे भाष्यत इति। मत्वर्थी। यास्तुः स हे सोम त्वं धारावानसि ततः पवस्वेति संबंधः॥ ॥अथ द्वि
तीया॥ त्वं सुतो मदिंतमो दधन्वान्मत्सरिंतमः॥ इंदुः सत्राजिदस्तृतः॥ इति हे सोम सुतोभिषुतस्त्वं मदिंतमः अतिश

525/1923

१४८ येनमदयुक्तोसि। कीदृशस्त्वं। दधन्वान् यः तस्य धारकः। मत्सरिंतमः अतिशयेन मदकारी। इंदुरसि सः सत्राजित् बहूनां जेता। अस्तृतः
केनाप्यहिंसितः मदिंतमः। मादन इति पाठो। इंदुः सत्राजिदस्तृतः इंद्रायसरिंधसेतिच॥ ॥अथ तृतीया॥ त्वं कवाणो आद्रिभि
रभ्यर्षकनिक्रदत्॥ द्युमंतंशुष्ममाभरेति। हे पवमान सोम अद्रिभिर्ग्रावभिः सुषाण सुन्वानः अभिषूयमाणस्त्वं कनिक्रदत्॥
भृशं शब्दं कुर्वन्। अभ्यर्ष कलशं पात्राणि वा अभिगच्छ किंच। द्युमंतं दीप्तियुक्तं शुष्मं शत्रूणां शोधकं बलं चाभर आहरास्मभ्यं धारय
वा। आभर इत्यमिति पाठो॥ ॥अथ तृचात्मके द्वितीयसूक्ते प्रथमा॥ पवस्व देववीतय इंदो धाराभिरोजसा॥ आकलशं म
धुमान् सोम नः सद इति। हे इंदो सोम देववीतये देवानां भक्षणाय ओजसा बलेन धाराभिरात्मीयाभिः पवस्व क्षर। हे सो
म मधुमान् मदकररसवांस्त्वं नोस्मदीयं कलशं द्रोणाभिधानं आसदः आसीद सदेर्लुङि रूपं॥ ॥अथ द्वितीया॥ तव द्रप्सा उ १४८
दप्रुत इंद्रं मदाय वावृधुः॥ त्वां देवासो अमृताय कं पपुः॥ इति। उदप्रुतः वसतीवर्याख्यमुदकं प्रतिगच्छंतः। यद्वा उदकस्य निर्गमयिता
रः। तव संभृता द्रप्साः द्रुतगामिनो रसाः मदाय मदार्थं इंद्रं वावृधुः वर्धयंति। तथा देवासो देवा इंद्रादयः कं सुखकरं त्वां

अमृताय अमरणार्थं पपुः पिबंति॥ ॥अथ तृतीया॥ आ नः सुतास इंदवः पुनाना धावता रयिं॥ वृष्टिद्यावो रीत्यापः स्वर्विद इति। हे सुता
सः अभिषूयमाणा हे इंदवः दीप्तपात्रे प्रक्षरंतो वा रीत्यापः पृथिवीं प्रति स्रवणशीला आपः कृताः। तादृशा हे सोमाः पुनानाः पूयमा 527/1973
नाः यूयं नोस्मभ्यं रयिमाधावत आगमयत। कीदृशाः वृष्टिद्यावः वृष्टिमभि द्यौर्यैः क्रियते॥ वृष्ट्यभिमुखद्युलोककृतः॥ स्वर्विदः स
र्वस्य लंभकाः॥ ॥अथ तृचात्मके तृतीयसूक्ते प्रथमा॥ परि त्यं हर्यतं हरिं बभ्रुं पुनंति वारेण॥ यो देवान्विश्वाँ इत्परि मदेन सह गच्छतीः
ति। हर्यतं सर्वैः स्पृहणीयं हरिं हरितवर्णं बभ्रुं बभ्रुवर्णं त्यं तं सोमं वारेण वालेन पवित्रेण परिपुनंति परिशोधयंति। यः सोमो वि
श्वानि सर्वानिंद्रादीन् देवान् मदेन मादकेन रसेन सह परिगच्छति॥ ॥अथ द्वितीया॥ द्विर्यं पंच स्वयशसं सखायो अद्रिसंहतं॥
प्रियमिंद्रस्य काम्यं प्रस्नापयंत ऊर्मयः इति। द्विः पंच दशसंख्याकाः सखायः समानख्याना अंगुलयः स्वयशसं स्वभूतयशस्कं अ १
द्रिसंहतं ग्रावभिरभिषुतं इंद्रस्य प्रियं काम्यं सर्वैः काम्यं यमानं ऊर्मयः द्वितीयैकवचने प्रथमा। बहुवचने ऊर्मिं प्रभृतरसं यं

सोमं प्रश्नापयंते वसतेवरीभिः प्रकर्षेणसेचयंति। यद्वाऽऊर्मयउत्सं गुवोर्मणमितिच॥ ॥अथतृतीया॥ इंद्रायसोमपातवेसत्र घ्रे परिषि
३४० च्यसे॥ नरेच दक्षिणावते वीराय सदनासद इति॥ हे सोम त्वं घ्रेरत्न स्यहं त्वे इंद्रायरक्षार्थे चतुर्थद्व॥ इंद्रस्य पातवे पानार्थं परिषिच्य
से परितः पात्रेषु सिच्यसे वसतीवरीभिर्या॥ किंच दक्षिणावते। ऋत्विग्भ्यो दक्षिणादानेन दत्तावीराय विक्रांताय इंद्रस्य यज्ञं निषीदा
तुं सदनसदे यज्ञगृहे सीदते नरे मनुष्याय यजमानाय तस्मै फलप्रदानार्थं परिषिच्यसे। वीरायदेवायेति पाठो॥ ॥अथतृचात्म
केचतुर्थसूक्ते प्रथमा॥ पवस्वसोम महेदक्षायाश्वोनक्तोवाजीधनायेति॥ हे सोम अश्वोन अश्वइव निक्तो वसतीवरीभिरभिषि
निर्णिक्तः वाजी वेगवांस्त्वं महे महते दक्षाय बलाय धनाय धनार्थं च पवस्व क्षर। महे कृत उ इति पाठौ॥ ॥अथद्वितीया॥ प्रतेसो ३४०
तारोरसं मदायपुनंति सोमंमहे द्युम्नायेति। सोतारः अभिषोतार ऋत्विजः हे सोम ते तव स्वभूतं रसं मदाय मदार्थं पुनंति।
तद्वोच्यते महे महते द्युम्नाय द्युम्नं। यातते यशो वान्नं वेति यास्कः॥ अन्नाय यशसे वा पुनंति सोमं शोधयंति। यद्वा सोम

मभिषूयमाणं रसं पुनीतेति॥ एकवाक्यतया योजनीयं। प्रतेतं उ इति पाठो॥ ॥अथतृतीया॥ शिशुंजज्ञानं हरिंमृजंति पवित्रेसोमं दे
वेभ्य इंदुमिति॥ शिशुमपांपुत्रभूतं जज्ञानं जायमानं हरिं हरितवर्णं इंदुं दीप्तं॥ सोमं देवेभ्यो देवार्थं पवित्रे मृजंति ऋत्विजो मार्जयंति॥ ॥
अथतृचात्मके पंचमसूक्ते प्रथमा॥ उपोषुजातमप्तुरं गोभिर्भंगं परिष्कृतं॥ इंदुं देवा अयासिषुरिति॥ जातं सम्यक्प्रादुर्भूतं अप्सु
रं वसतीवरीभिः प्रेरितं भगं भंक्तॄणां भंजकं गोभिर्गोविकारैः पयोभिः परिष्कृतमलंकृतं संस्कृत इंदुं सोमं देवा इंद्रादयः उपा
यासिषुः उपागच्छंति॥ ॥अथद्वितीया॥ तमिद्वर्धंतुनोगिरो वत्संसंशिश्वरीरिव॥ यइंद्रस्य हृदंसनिरिति॥ यः सोमः इंद्रस्य हृदं
सनिः हृदयस्पर्शं भक्ता भवति॥ तमित्तं एव सोमं नोस्माकं गिरः स्तुतिरूपा वाचः संवर्धंतु॥ सम्यग्वर्धयंतु। तत्र दृष्टांतः॥ वत्सं
वालं शिश्वरीरिव॥ यथा शिश्वर्यो वर्धपयस्का मातरो वत्सं सम्यक् वर्धयंति तद्वदित्यर्थः॥ ॥अथतृतीया॥ अर्षाणः सोमशं
गवे धुक्षस्व पिप्युषीमिषं॥ वर्धा समुद्रमुक्थ्यंमिति॥ हे सोम त्वं नोस्माकं गवे शं सुखं अर्ष क्षर। अपि च पिप्युषीं प्रवृद्धा

529/1973

मिषमंनं धुक्षस्व प्रपूरय। विंत्व॥ हेऽस्मत्प्रशस्य समुद्रमुदकं वर्धय वर्धय॥ अर्षानिः अर्षाणइतिपाठो॥ उक्थ्यउक्थ्यमितिच॥ ॥इति
३५० दशमेध्याये उत्तरार्धे एकादशः खंडः॥ अथद्वादशखंडे आघायेअग्निमितितृचात्मकं प्रथमंसूक्तं तत्र प्रथमा॥ ॥आघायेअ
ग्निमिंधते स्तृणंति बर्हिरानुषक्॥ येषामिंद्रो युवासखेति॥ येऋषयः आघआभिमुख्येन खलु अग्निमिंधते दीपयंति॥ येषांच
युवानित्यतरुणः इंद्रः सखाभवति ते आनुषगानुपूर्व्येण बर्हिस्तृणंति॥ ॥अथद्वितीया॥ बृहन्निदिध्मएषांभूरिशस्त्रंपृथुःस्व
रुः॥ येषामिंद्रोयुवासखेति॥ येषामृषीणां इध्मात् बृहन्नितमहान्खलु भूरिबहुशस्त्रं स्तोत्रं स्वरुश्च पृथुर्महान्॥ सिध्मन्यत॥ ॥
अथतृतीया॥ अयुद्धइद्युधावृतंशूरआजतिसत्वभिः॥ येषामिंद्रोयुवासखेति॥ युवेंद्रः येषांसखातेषांतंभर्तकश्चिदद्रहृत ३५०
॥ यागयोद्धुं विसन। युधावृतं योद्धृभिर्भरैरावृतं शत्रुं सत्वभिरात्मीयैर्बलैः शूरः सन। आजति नमयति॥ ॥अथयएकइति
तृचात्मंद्वितीयंसूक्तं तत्र प्रथमा॥ यएकइद्विदयते वसुमर्ताय दाशुषे॥ ईशानोअप्रतिष्कुतइंद्रोअंगेति॥ यइंद्रःएकइत्ए

कएववदाशुषे। हविर्दत्तवते मर्ताय मनुष्याय यजमानायच वसुधनं विदयते विशेषेण ददाति॥ अंगेति क्षिप्रनाम। अप्रतिष्कुतः प
रैरप्रतिशब्दितः। प्रतिकूलशब्दरहित इत्यर्थः। एवंभूतः। स इंद्रः क्षिप्रं ईशानः सर्वस्यजगतः स्वामीभवति॥ ॥अथद्वितीया॥ य 531/1473
श्चिद्धिल्वावहुभ्यआसतावांआविवासति॥ उग्रंतत्पत्यतेशवइंद्रोअंगेति॥ बहुभ्योमनुष्येभ्यः सकाशात् यः कश्चिद्धिल्वावखलु॥ य
जमानः सत्वावान्। अभिषुतसोमयुक्तः सन्हे इंद्र त्वां आविवासति परिचरति। विवासतिः परिचरणकर्मा तत्तस्मैयजमानाः
य उग्रमुद्गूर्णं शवोबलं इंद्रः अंगक्षिप्रं पत्यते पतयति प्रापयति॥ ॥अथतृतीया॥ कदामर्तमराधसंपदाक्षुंपमिवस्फुरत्
॥ कदानः शुश्रवद्गिरइंद्रोअंगेति॥ अराधसं हविर्लक्षणेन राधसाधनेन रहितं अयष्टारमित्यर्थः। एवंविधमर्तं मनुष्यं इं
द्रः पदा पादेन क्षुंपमिव अहिछत्रकमिव कदा स्फुरत् स्फुरिष्यति वधिष्यति यथा अहिछत्रं मंदलाकारेण शयानं कश्चिदना
यासेन हंति। एवमिंद्रोपि कदास्मच्छत्रून् हनिष्यतीत्यर्थः। स्फुरतिर्वधकर्मा स्फुरत् स्फुरतीतिवधकर्मसु पठितत्वात्। नो

स्माकं घृणां गिरः स्तुतिलक्षणा वाचः इंद्रः कदा कस्मिन् काले अंग क्षिप्रं शुश्रवत ॥ श्रोष्यतीति वितर्क्यते ॥ अत्र निरुक्तं ॥ क्षुंपमहि
३५१ छत्रकं भवति यत्क्षुभ्यते ॥ कदा मर्तमनाराधयंतं पादेन क्षुंपमिव स्फुरिष्यति कदा नः ॥ श्रोष्यति गिरं इंद्रो अंगेति क्षिप्रनामेति
॥ ॥ अथ गायंतीति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ ॐ गायंति त्वा गायत्रिणोर्चंत्यर्कमर्किणः ॥ ब्रह्माणस्त्वा शतक्रत उद्वंश
मिव येमिरे ॥ हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा त्वां गायत्रिणः उद्गातारो गायंति स्तुवंति अर्किणोर्चनहेतुमंत्रयुक्ता होतारः
अर्कमर्चनीयमिंद्रं अर्चंति शास्त्रगतैर्मंत्रैः प्रशंसंति ब्रह्माणो ब्रह्मप्रभृतय इतरे ब्राह्मणास्त्वामुद्येमिरे उन्नतिं प्रापयंति ।
तत्र दृष्टांतः ॥ वंशमिव यथा वंशाग्रे नृत्यंतः ॥ शिल्पिनः प्रौढं वंशमुन्नतं कुर्वंति । यथा वा सन्मार्गवर्तिनः ॥ स्वकीयं कुलमुन्नतं कुर्वं
ति तद्वत् । एतामृचं यास्क एवं व्याचष्टे गायंति त्वा गायत्रिणः प्रार्चंति ते र्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव वंशो ३५२
वनशयो भवति वननाच्छ्रूयत इति वा । अर्कशब्दं च बहुधा व्याचष्टे अर्को देवो भवति यदेनमर्चंत्यर्को मंत्रो भवति । वननाच्छ्रू

यत इति । वेति । अर्कमर्किणो ब्राह्मणस्त्वा शतक्रतु ॥ यदेनेनार्चंत्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति । संवृतः कटुकिम्ने
तीति ॥ ॥ अथ द्वितीया ॥ यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं ॥ तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजतीति ॥ यद्यदा सानोः सा
नु यजमानः सानोः सानुं सोमवल्लीसमिदाद्याहरणाय एकस्मात्पर्वतस्य प्रदेशादपरं । पर्वतप्रदेशं आरुहत् आरूढवान् । तथा
भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपं अस्पष्ट अस्पष्टवान् ॥ उपक्रांतवानित्यर्थः ॥ तत्तदानीं इंद्रः अर्थं यजमानस्य प्रयोजनं चेतति
जानाति । ज्ञात्वा च वृष्णिः कामानां वर्षिता सन् यूथेन मरुद्गणेन सह एजति कंपते स्वस्थानात् यज्ञभूमिभागं तुं ढौकेदित्यर्थः ॥
सानोः सान्वारुहाः सानोः सानुमारुहदिति पाठौ ॥ ॥ अथ तृतीया ॥ युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ॥ अथा न इंद्र सो
मपा गिरामुपश्रुतिं चर इति । हे सोमपाः सोमपान युक्तेंद्र हरी त्वदीयावश्वौ युक्ष्व हि । सर्वथा संयोजय । अथानंतरं नोस्मदी
यानां गिरां स्तुतीनां उपश्रुतिं समीपश्रवणमुद्दिश्य चर तत्प्रदेशं गच्छ केशिना हरी ॥ केशिनौ स्कंधप्रदेशे लंबमानकेश ।

533
1473

युक्तौ। वृषणा सेचनसमर्थौ युवानौ वृक्षाश्वा अश्वस्योदरबंधनरज्जुः यस्य तस्य पूरकौ। पुष्टांगावित्यर्थः। युक्त्वायुक्त्वाचेति पाठे। युक्त्वासः
३५२ तिङ्श्चत्वेन प्रत्ययस्वरः श्रूयते। छंदसोवलच्लिङ् इति संहितायां दीर्घत्वं केशिना प्रशस्ताः केशाः अनयोः संतीति मत्वर्थीयः। पद्विनिः प्रत्यय
स्वरः सर्वांकलुगित्यादि द्विवचनस्याकारादेशः। वृषणा घृषुपृषुमृधुसेचने कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन। ञित्वा
दिर्नित्यमित्याद्युदात्तत्वं वाषपूर्वस्य निगम इति उपधायाः पक्षे दीर्घाभावः पूर्ववदाकारः। कक्ष्यप्रा। कक्ष्याया भवं कक्ष्यं सर्वत्र तत्प्रान्तः
पूरयतः पुष्टत्वादिति कक्ष्याप्रौ। प्रा पूरणे। अतोनुपसर्गे क इति कप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं। आकारः पूर्ववत्।
अथ निपातस्य चेति संहितायां दीर्घः। अनुदात्तं सर्वमपादादावित्यनुदात्तो बहुवचनस्य वस्नसौ इति नसादेशो नुदात्तः। इंद्र सोम इंद्र ३५२
सोमपा उत्कः भो आमंत्रितस्य चेति सर्वानुदात्तो गिरां सावेकाचः तृतीयादिर्विभक्तिरिति विभक्तिरुदात्त उपशब्दो निपातत्वादाद्यु
दात्तः अत उपदेन प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तादौ च निति कृत्यतौ इति उवर्जितताद्दिपरत्वात् गतेः प्रकृतिः

स्वरः चरनिघातः॥ ॥इति दशमेध्याये द्वादशः खंडः॥ १॥ वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थ
महेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते मा
धवीये सामवेदार्थप्रकाशे उत्तराग्रंथे दशमोध्यायः॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं 535/483
॥१॥ अथैकादशोध्याय आरभ्यते॥ तत्र प्रथमखंडे सुषमिद्ध इति चतुर्ऋचं प्रथमं सूक्तं तत्र प्रथमा॥ सुषमिद्धो न आवह देवाँ
अग्ने हविष्मते॥ होतः पावक यक्षि चेति॥ हे अग्ने सुसमिद्धः त्वं नोस्मदीयाय हविष्मते यजमानाय तदनुग्रहार्थं देवानाव
ह। हे पावक शोधक होतर्होमनिष्पादकाग्ने यक्षि च। यज च। सुषमिद्धः सु समः क्रियाविशेषणत्वेन गतिसंज्ञत्वात् प्रादिसमासः।
शोभनवाचिनः सुशब्दस्य तु विशेषणं विशेष्येण बहुलमिति समिद्धपदेन कर्मधारयः समासः सुशब्दः प्रातिपदिकस्वरेणांतो
दात्तः कर्मधारये निष्ठेति पूर्वपदप्रकृतिस्वरत्वं क्रियाविशेषणत्वाद्धि सुशब्दस्य तिलात प्रादिसमासे गतिरनंतर इति समीयद्युत्तर

त्वं न देवः उत्तरपदप्रकृतिस्वरत्वेन स्थास्यतीति मकारोनुदात्तः स्यात्। देवाँ अग्ने इति समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः
३५३ पूर्वस्य तु वा। अतोटि नित्यमित्यनुनासिकः। हविष्मते हविरस्यास्तीति मतुप्। तसौ मत्वर्थ इति भत्वेन पदत्वस्य बाधितत्वान्न रुत्वं। होतः
पावक एतच्छब्दयोरामंत्रितयोः पृथक् पृथगेव क्रियान्वायि परस्परमसामर्थ्यात्। परांगवद्भावाभावान्न तन्निबंधनमेकस्वर्यं। नैव
द्वितीयस्यामंत्रितस्याष्टमिकनिघाते नैकस्वर्यं। आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानत्वेन पदादपरत्वात् पादादित्वाच्च
परस्परसामानाधिकरण्येपि होतरित्यस्य विशेषणत्वे समानमेवाविद्यमानवत्त्वं। अत एवाविद्यमानवत्त्वात् सामर्थ्येपि न परांगव
द्भाव इति नैकस्वर्यसिद्धिः। अतो होतरिति विशेष्यं। अतः पुनातीति पावकः इत्यवयवप्रसिद्धेः। स्वीकारेणाविशेषणत्वाद्धोतरिति
विशेष्यं। तच्च सामान्यवचनमिति नामंत्रिते समानाधिकरण इत्याविद्यमानवत्त्वप्रतिषेधात्। पदात्परत्वादपादादित्वाच्च द्वितीया ३५३
मंत्रितस्याष्टमिकनिघाते न वा परांगवद्भावे सति शेषनिघातेन वा सर्वानुदात्तत्वसिद्धिः। यक्षि यजतेर्लोट्। सिपि बहुलं छंदसी

ति शपो लुक्। व्रश्चादिना षत्वं। षढोः कः सीति कत्वं। साहितादेशः। छंदसत्वान्न भवति सिपः पित्वेनानुदात्तत्वानुस्वरः वक्ष्यते। न
च तिङ्ङतिङ इति निघातः। पूर्वस्य पावकेत्यामंत्रितस्याविद्यमानवत्त्वेन पदादपरत्वात्। अत एव तस्या यच्च धायकत्वेन होतरित्य
पेक्ष्य निघातः स्यादिति चेत्। न यक्षिपदात्पूर्वस्य होतरित्यस्यापि पूर्वत्वेनाविद्यमानवत्त्वात्। ननु नामंत्रिते सामानाधिकरण इ 539/1923
ति तस्य निषिद्धमविद्यमानवत्त्वं न च पावकपदस्याविद्यमानवत्त्वेन समानाधिकरणपरत्वाभावः। यक्षिपदस्यैव हि कार्यं प्रति
पावकपदं पूर्वत्वादविद्यमानवत्। होतः परकार्यमविद्यमानवत्त्वप्रतिषेधं। प्रति उपरत्वाद्विद्यमानवदेवेति भवत्येव होतरि
त्यस्याविद्यमानत्वप्रतिषेधं प्रति उपरत्वाद्विद्यमानवदेवेति भवत्येव होतरित्यस्याविद्यमानत्वप्रतिषेधः। अतस्तस्याविद्य
मानत्वात्तदपेक्षया यक्षीत्यस्य निघातः प्राप्नोत्येव। सत्यं अत्र यक्षीत्यस्य चशब्दपरत्वाच्चादिषु चेति। निघातप्रतिषेधो भ
विष्यतीत्यदोषः॥ ॥अथ द्वितीया॥ मधुमंतं तनूनपाद्यज्ञं देवेषु नः कवे॥ अद्या कृणुहि वीतये इति॥ हे कवे मेधाविन्नग्ने तनून

पादेत्तंनामकस्त्वंअद्यास्मिन्दिनेनोस्मदीयंमधुमंतंरसवंतंयज्ञंयज्ञनीयंहविर्देवेषुकृणुहिकुरु।प्रापयेत्यर्थः।कमर्थंउतयेअस्मद्
३५४ क्षणायउतयेवीतयइतिपाठौ॥ ॥अथतृतीया॥नराशंसमिहप्रियमस्मिन्यज्ञउपह्वये॥मधुजिह्वंहविष्कृतमिति॥इहदेवयज्ञ
मानदेशेअस्मिन्वर्तमानेयज्ञेनराशंसमेतन्नामकमग्निंउपह्वयेआह्वयामि।कीदृशं।प्रियंदेवानांप्रीतिहेतुंमधुजिह्वंमधुरभाषि
जिह्वोपेतंमाधुर्यरसास्वादकजिह्वोपेतंवाहविष्कृतंहविषोनिष्पादकं॥ ॥अथचतुर्थी॥अग्नेसुखतमेरथेदेवांईळितआवह॥
असिहोतामनुर्हितइति।इनशब्दाभिधेयहेअग्नेईळितःस्तुतिभिःस्तुतःसन्सुखतमेअतिशयेनसुखहेतौकस्मिंश्चिद्रथेदेवा
न्स्थापयित्वाकर्मभूमावावहइदंशब्दाभिधेयत्वमत्रस्तुत्यस्थापितुर्मीडितइतिविशेषणंमनुर्हितामनुनामंत्रेणमनुष्येणवायजमाना ३५४
दिरूपेणहितोऽत्रस्थापितस्त्वंहोतादेवानांमाह्वातासि।अथयजुर्घ्यानितित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ ॥यदद्यसूरउदितेः
नागामित्रोअर्यमा।सुवातिसविताभगइति॥यद्गूनमस्माकमपेक्षितंतद्यास्मिन्कालेसूरउदितेसतिप्रातःसमयेअनागाःपा

पहंता।मित्रोअर्यमासविताभगश्चैतेप्रत्येकंसुवातिप्रेरयेत।अथवाअनागाःमित्रोअर्यमादाताभवतु।वरीप्सितधनंभगो
भजनीयःसवितासुवातिप्रेरयतु॥ ॥अथद्वितीया॥सुप्रावीरस्तुसक्षयःप्रनुयामन्सुदानवः॥येनोअंहोतिपिप्रतीति॥सक्षयः
सनिवासःसुप्रावीरस्तुसुष्ठुप्रकर्षेणरक्षितास्तुयेशब्दआदरार्थः।प्रकर्षेणकुक्षिप्रंभवतीतिशेषः।कइतिउच्यते।हेसुदा
नवःसुदानाःयुष्माकंयामन्यामनिगमनेसति।कीदृशानांगमने।येपूर्यमागत्यनोस्माकंअंहःपापंअतिपिप्रतिअतिपारयथ 561/1973
तेषांगमनइति।अथतृतीया॥ ॥उतस्वराजेअदितिरदब्धस्यव्रतस्यये॥महोराजानईशतइति।उतापिचयेमित्रादयःस्वयःस्व
राजःसर्वस्यस्वामिनःअदितिःतेषांचमातासंति।तेअदब्धस्याहिंसितस्यरक्षकस्यमहोमहतोव्रतस्यास्यकर्मणः।राजानःस्वामि
नःतदीशतेसमर्थाभवंति।अभिमतंदातुमितिशेषः।अथवैवंयोज्यं।येमित्रादयोदितिश्चअदब्धस्यव्रतस्यस्वराजईश्वरास्ते
महोमहतास्यदभिमतमधनस्यराजानःस्वामिनःसंतःईशते।अस्मभ्यंतद्दातुं॥ ॥उत्वेतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥

उत्वा मदंतु स्तोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहीति॥ हे इंद्र त्वा त्वां सोमाः यतउत्कृष्टं मंदंतु मादयंतु। हे अद्रिवः वज्रिन्निंद्र त्वं
३५५ राधो धनं कृणुष्व। अस्मभ्यं देहि किंच। ब्रह्मद्विषो ब्रह्मणो द्वेष्टॄन् अवजहि। सोमाः स्तोमा इति पाठौ॥ ॥अथ द्वितीया॥ पदा पणींरराधसो
निबाधस्व महां असि॥ नहि त्वा कश्चन प्रतीति। पणीन् लुब्धान् अराधसो यष्टव्य धन रहितान् केवलं धनानं पादाघातेनाभिक्रः
म्यनितरां बाधस्व। हे इंद्र त्वं महान् असि त्वालया प्रतिप्रतिनिधिः सदृशः कश्चन कश्चिदपि देवो मनुष्यो वा नहि नास्ति खलु। पः
णीन् राधसः पणीन् राधस इति पाठौ॥ ॥अथ तृतीया॥ त्वमीशिषे सुतानामिंद्र त्वमसुतानां। त्वं राजा जनानामिति॥ हे इंद्र त्वं सु
तानामभिषुतानां सोमानामीशिषे ईश्वरो भवसि। तथा त्वं असुतानां बलात्कारेण वर्तमानानां चेशिष्ये किंच। त्वं सर्वेषां जना ३५५
नां राजा भवसि॥ ॥इत्येकादशाध्याये प्रथमः खंडः॥ अथ द्वितीयः खंडे आजागृविरिति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ ॥
आ जागृविर्विप्र ऋतं मतीनां सोमः पुनानो असदच्चमूषु॥ सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ता इति॥

जागृविर्जागरणशीलः ऋतं ऋतानां सत्यभूतानां मतीनां विप्रो मेधावी सोमः पुनानः पूयमानः सन् चमूषु चमसेषु आसदत आसी
दति। मिथुनासः परस्परं संगताः निकामाः नितरां कामयमानाः रथिरासः यज्ञनेतारः सुहस्ताः कल्याणपाणयः अध्वर्यवः पवित्रे
णायं सोमं सपंति स्पृशंति सपसमवाये सपतिः स्पृशति कर्मैवि नेरुक्ताः ऋतं ऋतेति पाठौ॥ ॥अथ द्वितीया॥ स पुनान उप सूरे
दधान ओभे अप्रा रोदसी वि ष आवः॥ प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसदिति॥ पुनानः पूयमानः दधा
नः यज्ञादिकर्मधारकः स सोमः सूरे प्रेरके इंद्रे उपगच्छति। किंच। उभे रोदसी द्यावापृथिव्यौ अप्राः स्वमहिम्ना आपूरयति तत
आसो अवः स्वतेजसा तमांसि विवृणोति वृणोति मात्रः यसोति। चूर्णैः छंदस्य पिदृश्यत इत्यडागमः। पूर्वपदादिति सत्वस्य सांहिति
कं षत्वं। प्रिया चिद्या आकारः। प्रियस्य यस्य सतो विधमानस्य सोमस्य यद्वा प्रियाः प्रियाणि प्रयच्छतः सोमस्य प्रियसामः अत्यंतं प्रि
यतमा॥ राधाः ऊती ऊत्यै रक्षणा भवंति। स सोमः क्षिप्रमस्मभ्यं धनं प्रयंसत् प्रयच्छंतु॥ यच्छतोर्लेट्यडागमः॥ तत्र दृष्टांतः।

543
1973

कारिणं न यथा कारिणं भरतं कार्यं भर्तिं प्रयच्छति तद्वत्। उपसरे स्थानः। उभे उपसरे। न धातो भेद इति पाठः। सतो धनं सत् धनमिति च।
१५६ ॥ ॥अथ तृतीया॥ स वर्धिता वर्धनः सोमो मीढ्वां अभि नो ज्योतिषावीत्॥ येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन्निति।
वर्धिता देवानां स्वकला प्रदानेन वर्धयिता वर्धनः स्वयं वर्धमानः पवित्रेण पूयमानः मीढ्वान् कामानां सेक्ता स सोमः नो अस्मान् ज्यो-
तिषा स्वतेजसा अभ्यावीत् अभिरक्षतु। यत्र यस्मिन् सोमे प्रसाति पदज्ञाः पणिभिरपहृतानां गवां पदानि जानंतः स्वर्विदः सर्व-
ज्ञाः सर्वज्ञानं तो वा नो अस्माकं पूर्वे चिरंतना पितरो अंगिरसः गाः पश्चन् लब्धुं अद्रिं शैलाच्चयमभिलक्ष्य गंतुं उष्णन् ऐच्छन्। येन नः।
येना न इति पाठो। उष्णन् मुष्णन्निति च॥ ॥अथ मा चिदन्यदिति च प्रगाथात्मकं द्वितीयसूक्ते प्रथमा॥ मा चिदन्यद्वि शंसत सखायो १५६
मा रिषण्यत। इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत इति॥ हे सखायः समानख्याताः स्तोतारः इंद्रस्तोत्रादन्यत्स्तोत्रं मा चिद्वि शं-
सत न सर्वथा उच्चारयत मा रिषण्यत मा हिंसिता भवत। अन्यदीयस्तोत्रोच्चारणेन यथा पक्षीणा मा भवत। सुते अभिषुते सोमे वृषणं

कामानां वर्षितारमिंद्रमित् इंद्रमेव हे प्रस्तोत्राः स्तुध्वं सचा सह संधीभूय स्तोत स्तुत। हे प्रशस्ता स्य उक्था च उक्थानि शस्त्राणि च इंद्रविषया-
णि मुहुः मुहुः पुनः पुनः शंसत॥ ॥अथ द्वितीया॥ अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहं। विद्वेषणं संवननं उभयंकरं मंहिष्ठमु-
भयाविनमिति। वृषभं यथा वृषभमिव अवक्रक्षिणं अवकर्षणशीलं शत्रूणां हिंसितारं जुरं जीर्णप्रकारेण गां गामिनं वृषमिवा वर्ष-
णीसहं मनुष्याणां शत्रूभूतानामभिभवितारं विद्वेषणं विद्वेष्टारं शत्रूणां संवननं संभजनीयं स्तोतृभिः उभयंकरं निग्रहा-
नुग्रहयोरुभयोः कर्तारं मंहिष्ठं दातृतमं उभयाविनं दिव्यपार्थिवलक्षणेन उभयविधधानेनोपेतं तद्वा स्थावरजंगमरूपेण द्वि-
प्रकारेण रक्षितव्येनोपेतं॥ अथवा उभयाविधैः स्तोतृभिर्यज्वभिश्चोपेतं। एवं विधामिंद्रमित् स्तोतेति पूर्वेणान्वयः। जुरं अजु-
रमिति पाठो। ॥संवननं संवननेति च। अथ उदु त्य इति प्रगाथात्मकं तृतीयसूक्ते तत्र प्रथमा॥ उदु त्ये मधुमत्तमा गिरः स्तोमास
ईरते॥ सत्राजितो धनसा अक्षितोतयो वाजयंतो रथा इवेति। त्ये ते प्रसिद्धाः मधुमत्तमाः अतिशयेन मधुराः गिरः स्तुतीः

545/1973

स्पवोच्चः स्तोमासः स्थिरत्वादिस्तोमाश्च उदीरते इंद्रं इंद्रनामुद्दिश्याप्नुवंतितिउर्ध्वं प्रसरंति। उरगतो आदादिकः॥ तत्र दृष्टांतः॥ सत्राजितःस
१५७ हे यज्ञा ऋन जयंतः॥ अतएव धनसाः धनानि संभजंतः॥ वन षण संभक्तौ जनसनखनक्रमगमो विट्॥ विड्वनोरनुनासिकस्यादित्या
त्वं। अक्षितोतयः अक्षिताः क्षयरहिताः ऊतयो रक्षा येषां ते तथोक्ताः॥ क्षियो भावे क्तिनि ध्याख्यानिष्ठायामस्य दीर्घ इति पर्युदासादीर्घा
भावः। अत एव क्षियो दीर्घादिति निष्ठानत्वाभावश्च। वाजयंतः॥ वाजं संनामिच्छंतः॥ किंचिन छंदस्य पुत्रस्येति ईत्वदीर्घायः प्रतिषेधः
एवंगुणविशिष्टा रथा इव। ते यथा विविधमितस्ततः इत्विरं। तद्वदुदीरत इत्यर्थः॥ ॥अथ द्वितीया॥ कण्वा इव भृगवः सूर्या
इव विश्वमिद्धीतमाशत॥ इंद्रं स्तोमेभिर्महयंत आयवः प्रियमेधासो अस्वरन्॥ स्तोतृनामैतत्। स्तोतारः कण्वगोत्राः। कण्वा इ
व कण्वगोत्रोत्पन्ना ऋषय इव स्तुवंतो भृगवः। भृगुगोत्रोत्पन्ना ऋषयः धीनामाध्यतं विश्वमित व्याप्तं। तमेवेंद्रं आशत अनेषि १५०
रे। सूर्या इव यथा सूर्यरश्मयः सर्वं जगद्व्याप्नुवंति। तद्वत्। अपि वा प्रियमेधासः प्रिययज्ञाः एतन्नामकाः अयवो मनुष्याः

तमेवेंद्रं महयंतः पूजयंतः स्तोमेभिः स्तोत्रैः रस्वरन् अस्तुवन्। स्वृ शब्दोपतापयोः भौवादिकः आशत आप्नुवन्नश्नुरिति पाठो॥
॥ ॥अथ पर्यू षितितृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः॥ द्विषस्तरध्या ऋण
या न ईयसे॥ति॥ हे सोम सुत्वं वाजसातये अस्मभ्यं अन्नदानार्थं न परि प्रधन्व परितः प्रगच्छ॥ यद्वा वाजसातये अन्नस्य लाभा
य संग्रामं प्रगच्छ। किंच। साक्षणिः सहनशीलस्त्वं वृत्राणि शत्रून् परिगच्छ तो देवो च्यते। नोऽस्माकं ऋणयाः ऋणानां याप
यिता विनाशयिता त्वं द्विषः शत्रून् तरध्ये तरीतुं तर्तुं ईरसे परिगच्छसि ईरसे ईयसे इति पाठो॥ ॥अथ द्वितीया॥ अजीज
नो हि पवमान सूर्यं विधारे शक्मना पयः॥ गोजीरया रंहमाणः पुरंध्येति॥ हे पवमान सोम त्वं पयः पयस उदकस्य विधा
रे विधारके तरिक्षे शक्मना सामर्थ्येन बलेन सूर्यं अजीजनो हि उत्पादितवानभवसि खलु। कीदृशः॥ गोजीरया स्तोतृ
भ्यो गवांण्णत्वं सूर्यमजीजनः। अथ अनु हि त्वा सुतं सोम मदामसीति। तृतीया याऋच प्रतीकमिदं सा चान्यत्र व्याख्या
ता॥

567/1973

अथ परिप्र धन्वेति तृचात्मकं पंचमं सूक्तं तत्र प्रथमाया ऋचः परिप्र धन्वेति प्रतीकमिदं सा चान्यत्र व्याख्याता॥ ॥अथ द्वितीया॥
१५८ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूष इति॥ हे सोम शुक्रो दीप्तः दिव्यो दिवि भवः पीयूषः देवैः पातव्यः स त्वं
अमृताय अमरणाय महे महते क्षयाय निवासाय च॥ एवा अर्ष एवं पवस्व क्षर॥ ॥अथ तृतीया॥ इंद्रस्ते सोम सुतस्य पेयाः
क्रत्वे दक्षाय विश्वे च देवा इति॥ हे सोम सुतस्याभिषुतस्य ते तव स्वभृतं रसमिति शेषः। इंद्रः पेयात् पिबतु। पातेराशी
र्लिङि रूपं। किमर्थं क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलाय च। किंच। अमी विश्वे सर्वे देवाश्च तदीयं रसं पिबंतु। पेयात् पेयाः
इति पाठौ॥ ॥इत्येकादशाध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे सूर्यस्येवेति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ ॥ १५८
सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते। तंतुं ततं परि सर्गास आशवो नेंद्रादृते पवते धाम किंचन
ति॥ सूर्यस्य सर्वस्य प्रेरकस्य सुवीर्यस्यादित्यस्य रश्मय इव सर्वतो व्यापकाः किरणा इव। द्रावयित्नवः सर्वत्र वर्णशी

ला: मत्सरासो मदकराः। प्रसुतः प्रकर्षेण सुता अभिषुताः एकवचनं छांदसं। अत्रांवोय्य हे पुत्र मसे पुत्र व्याप्ताः संग्रामः
सृज्यमानाः सोमा न तं विस्तृतं ततं तुं तनुभिः। सृतवस्त्रं दशापवित्रं साकं सह युगपत् परि ईरते परितो गच्छंति। ते सोमाः इंद्रा
दृते इंद्रं वर्जयित्वा अन्यत्र। किंचन धाम देवशरीरं लक्षीकृत्य न पवते न गच्छंति॥ एकवचनं छांदसं। किंतु इंद्रस्यैव धाम प्रति ५७/1973
गच्छंति। इंद्रस्य धाम्नो व्यवस्थित्यलं च अस्यां लिंद्रस्य प्रिया धामानि विमंत्रवर्णादवगम्यते॥ ॥अथ द्वितीया॥ उपो मतिः पृच्यते
सिच्यते मधु मंद्राजनी चोदते अंतरासनि। पवमानः संतनिः सुन्वतामिव मधुमान् द्रप्सः परि वारमर्षतीति॥ अस्मि
न्पवमानरूपा स्तोत्रे इंद्रे मतिः स्तुतिरूपा मतिरूपो पृच्यते। उपपृच्यते स्तोतृभिः संयोज्यते। पृची संपर्के। तथा मधुम
दकरः सोमाः इंद्रार्थं सिच्यते अद्रिर्यवसत्तुभिश्चासिक्तो भवति ततः मंद्राजनी अन्नगातिक्षिपणया त्रिस्य स्युदिङीप
रूपं॥ मदकरस्य रसस्य प्रेरयित्री सोमधारा। तस्य इंद्रस्य आसनि आस्ये तर्मध्ये चोदयते यत्तृभिः प्रेर्यते। आस्य च्ला

शब्दस्य पक्षतो मासस्याश्विना आसंनित्यादेशः॥ किंच। संतनिपद्दादिपु सम्यग्विसृतः कन्वतां अभिषुतवतां यजमानानां संबंधी
३५९ पवमानः पूयमानः सोमः द्रप्सः द्रुतगमनशीलः सनुवारं अविवात्मयं पवित्रं परिपारितो षति आगच्छति। इयेति पूरणः सु
न्वतामिव प्रघ्नतामिव प्रघ्नतामियेति पाठो॥ ॥अथ तृतीया॥ उक्षा मिमेति प्रति यंति धेनवो देवस्य देवीरुप यंति निष्कृतं॥ अ
त्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत॥ उक्षा रेतसः सेक्ता वृषभः पुरतो मिमेति शब्दयते। माङ् माने
शब्दे च॥ तं वृषभं धेनवो गावः प्रतियंति अनुगच्छंति। तथा देवस्य द्योतमानस्य निष्कृतं संस्कृतं स्थानं देवी देव्यः स्तुतय उप
यंति उपगच्छंति। अनेनार्थेन सोमः स्तुतिश्चाभिधीयते। सोमो हि द्रोणकलशाभिमुखं गमनकाले शब्दं करोति तमंतमनुधेन ३५९
वः प्रीणयित्र्यः स्तुतयः परियंति। देवस्य स्थानं स्तुतयोभिगच्छंति। तथा सोयं सोमः अर्जुनं श्वेतवर्णं आव्ययमवि
मयं आविस्वभृतं वारं वालं पवित्रं अत्यक्रमीत। अतिक्रामति। अतिक्रम्य पात्राणि गच्छतीत्यर्थः॥ किंच। सोमः अत्कं न।

आत्मीयं कवचमिव निक्तमुज्ज्वलं अवणं द्रव्यं पर्यव्यत परितः संवृणोति मिमेति मंमतीति पाठो॥ ॥ अग्निं नर इति त्र्यृचात्मकं द्वि
तीयं सूक्तं तत्र प्रथमा॥ अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयंत प्रशस्तं॥ दूरेदृशं गृहपतिमथर्युं॥ हे ने
तारो नेतार ऋत्विजो यूयं प्रशस्तं प्रकर्षेण स्तुतं दूरेदृशं दूरे दृश्यमानं परेण पश्यंतं वा गृहपतिं गृहाणां पालकमथर्युं अग
म्युं अतनवंतं वा अग्निमरण्योः सकाशाद्धस्तच्युतं हस्तगतं दीधितिभिरंगुलिभिर्जनयत उत्पादयत। हस्तच्युतं जनय 551/1973
त। हस्तच्युती जनयंतेति पाठो॥ ॥ अथर्व्यमथर्युमिति च॥ ॥अथ द्वितीया॥ तमग्निमस्ते वसवो न्यृण्वन्सुप्रतिचक्षम
वसे कुतश्चित॥ दक्षाय्यो यो दम आस नित्यः॥ यो अग्निर्दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा नित्यो
जस्रः आस बभूव। तं सुप्रतिचक्षं सुप्रतिदर्शनमग्निं कुतश्चित सर्वस्मादपि भयहेतोः अवसे रक्षणाय वसवो वा
सकाः वसिष्ठाः स्तोतारः अस्ते गृहे न्यृण्वन्न्यदधुः॥ ॥अथ तृतीया॥ प्रेद्धो अग्ने दीदिहि पुरो नो अजस्रया सू

र्म्यायविष्ठ॥ त्वां शश्वंत उपयंति वाजाः इति। हे यविष्ठ युवतमाग्ने प्रेद्धः प्रकर्षेण समिद्धस्त्वं अजस्रया असरणशीलया सूर्म्या ज्वालयाभो
 स्मदर्थं पुरस्तादाहवनीयायतने दीदेथ दीप्यस्व। त्वां शश्वंतो बहवो वाजाः अन्नानि हवींषि उपयंति उपगच्छंति॥ ॥आयं गौरिति त्र
चात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयंत्स्वः इति॥ गौर्गमनशीलः पृश्निः नानाव
र्णव्याप्ततेजाः अयं सूर्यः। अक्रमीत् आक्रांतवान्। उदयाचलं प्राप्तवानित्यर्थः। आक्रम्य च पुरः पुरस्तात्। पूर्वस्यां दिशि मातरं स
र्वस्य भूतजातस्य निर्मात्रीं भूमिं आसदत् आसीदति प्राप्नोति। सदेश्छांदसो लुङ् लिङ् इदित्वात्॥ च्लेरङादेशः। ततः पितरं पा
लकं द्युलोकं च अंतरिक्षं च प्रयन् प्रकर्षेण गच्छन् स्वः सुअरणः शोभनगमनो भवति। यद्वा पितरं स्वर्गं द्युलोकं प्र
न्वर्तते॥ ॥अथ द्वितीया॥ अंतश्चरति रोचनास्य प्राणादपानती॥ व्यख्यन्महिषो दिवं॥ इति। अस्य सूर्यस्य रोचना रोचमा
ना दीप्तिः शरीरमध्ये मुख्यप्राणात्मना चरति वर्तते। किं कुर्वती। प्राणादपानती॥ अपाननं नाडीभिरधोमुखं नयनं त

कुर्वती अपपूर्वादनितेः लटः शतृ अदादित्वात् शपो लुक्। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। यद्वा अंतः द्यावापृथि
व्योर्मध्ये अस्य सूर्यस्य रोचना रोचमाना दीप्तिश्चरति गच्छति। रुचेर्दीप्तौ। अनुदात्तेतश्च हलादेरिति युच्। किं कुर्वती प्राणात्प्रा
णनादुदयानंतरं अपानती सायं समाप्तिं गच्छति। ईदृश्या दीप्त्या युक्तः अत एव महिषो महान् सूर्यः दिवमंतरिक्षं उदया 563/1973
स्तमययोर्मध्ये व्यख्यत् विचष्टे प्रकाशयति। महेरविमह्योष्टिषजित्यौणादिकष्टिषच्प्रत्ययः। चक्षिङः ख्याञ्। छांदसे लु
ङि अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः॥ ॥अथ तृतीया॥ त्रिंशद्धाम वि राजति वाक् पतंगाय धीयते। प्रति वस्तोरह द्युभिः॥ इति॥
त्रिंशत् धामानि स्थानानि वचनव्यत्ययः। वस्तोः वासरस्याहोरात्रस्यावयवभूतानि। अहरहरेव धारणा द्युभिः सूर्यस्य दीप्तिभिरेव वि
राजति विराजंते विशेषेण दीप्यंते। व्यत्ययेनैकवचनं। मुहूर्तात्मकत्रिंशद्धामान्युच्यंते। पंचदश रात्रेः पंचदशाह्नः। पतंगाय पतति
गच्छतीति पतंगः सूर्यः तस्मै सूर्याय स्तुतिरूपा वाक् प्रतिधीयते प्रति मुति मुखं स्तोतृभिः धीयते क्रियते। यद्वा वस्तोरहनि त्रिं

त्राध्यामानि घटिकाभिप्रायमेतत् त्रिंशत् घटिकाः प्रत्यंत संयोगे द्वितीया। एतावंतं कालं सुभिर्दशभिः आसोसर्योविराजतिविशे
१६१ षेण दीप्यते। तस्मिंश्च समये वायुत्रयीरूपाय पतंगाय प्रतिधीयते प्रतिसंबध्यते तं सर्यं सेवत इत्यर्थः। श्रूयते हि। ऋग्भिः पू
र्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः इत्यादि॥ ॥इत्येकादशेऽध्याये तृतीयः खंडः॥ वेदार्थस्य प्रकाशेन तमोहार्दं
निवारयेत्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभू
पालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे छंदआर्चिकग्रंथे एकादशोऽध्यायः॥ ११॥ यस्यनि
श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ अथ द्वादशोऽध्याय आरभ्यते॥ तत्र प्रथमखंडे
उपप्रयंत इति चतुर्ऋचं प्रथमं सूक्तं तत्र प्रथमा॥ उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये॥ आरे अस्मे च शृण्वते इति॥ अध्वरं हिं १६१
साप्रत्यवायरहितं अग्निष्टोमादियज्ञं उपप्रयंतः उपेत्य प्रकर्षेण यंतो गच्छंतः प्राप्ता वित्वेदेन सम्यगनुतिष्ठंत इत्यर्थः। तादृ

शावयं अग्नये अंगनादिगुणयुक्ताय देवाय मंत्रं मननसाधनं एतत्सूक्तरूपं स्तोत्रं वोचेम वक्तारो भूयास्मेत्याशास्यते। कीदृशायाग्न
ये आरे अस्मे च शृण्वते। नशब्दार्थस्य आरे शब्दः स्तरोद्भव्यः। आरे च दूरेपि स्थित्वास्माकं स्तुतीः शृण्वते अस्मास्कप्रीत्यतिशयेन
सर्वत्र वर्तमानोग्निः अस्मदीयमेव स्तोत्रं शृणोतीति भावः। वोचेम नु वोचेम। ब्रुवो वचिः। लिङ्याशिष्यङ्। वच उमित्युमागमः।
शृण्वते स्मदीयमेव स्तोत्रं शृणोतीति भावः। वोचेम नु वोच इत्च्विः। लिङ्याशिष्यङ्॥ वच उमित्युमागमः। शृण्वते श्रुवः श्नुः इ
तिविभक्तेरुदात्तत्वं॥ ॥अथ द्वितीया॥ यः स्नीहितिषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयमिति॥ पूर्व्यः चिरंतनो यो
ग्निः स्नीहितिषु वधकारिणीषु कृष्टिषु शत्रुभूतासु प्रजासु संजग्मानासु संगतासु दाशुषे हवींषि दत्तवते यजमानाय गयं धनं अ
रक्षत् रक्षति तस्मै मंत्रं वोचेमेति पूर्वेण संबंधः। स्नीहितिः स्निह हिंसायां स्निह्यतीति वधकसमपवित्तं। स्नेहांतहिंस्यंते
प्रजा आभिरिति स्निहितयः। करणे क्तिन्। तितुत्रेषसंग्रहादिनामिति वचनान्निगर्हीतिनिपातितिरितिवादिडागमः।

565/1973

प्रत्ययेन येकारस्य इकारः। क्लिनोर्दीर्घश्चेति दीर्घः छांदसत्वं। संज्ञापूर्वकत्वा गमनात्। समो गम्यृच्छ्यादिभ्य इत्यात्मनेपदं। लिङः कानच्। गमहनेत्यादिनोप
१६२ धालोपः। अक्षरत। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्॥ ॥अथ तृतीया॥ स नो वेदो अमात्यमग्नी रक्षतु शंतमः॥ उतास्मान्पात्वं
हसः॥ इति। सोग्निर्नोस्माकं वेदो धनं अमात्यं अंतिके भवं सहभूतं वा रक्षतु। शत्रोः सकाशात्पालयतु॥ कीदृशः। शंतमः सुखतमः।
उतापि च अमात्यं अंतिके भवं सहभूतं वा रक्षतु शत्रोः सकाशात्पालयस्मान्युतिष्ठान् अंहसः पापात्पातु रक्षतु॥ शंतम इति
पाठे॥ ॥अथ चतुर्थी॥ उत ब्रुवंतु जंतव उदग्निर्वृत्रहाजनि। धनंजयो रणेरणे इति। अग्निरदजनि अरण्योः सकाशादुत्पन्नः
तानंतरं तं जंतवो जाताः सर्वे कृत्विजो ब्रुवंतु। तमग्निं स्तुवंतु। कीदृशोग्निर्वृत्रहा वृत्राणामावरकाणां शत्रूणां हंता रणे रणे सर्वेषु १६२
संग्रामेषु धनंजयः शत्रुधनानां जेता। संज्ञायां भृतॄवृजिधारिसहितपिदमः। अस्मिन्नुर्दात्तं तस्येति मुम्। नित्यस्वरेणांतोदात्तत्वं। कृत्
रणेरणे। रणरणार्थः। रणंति शब्दं कुर्वंति योद्धारोस्मिन्निति रणः संग्रामः। वेशिरण्योरुपसंख्यानमित्यप्। नित्यवीप्सयोरिति द्विर्वचनं। आ

म्रेडितानुदात्तत्वं॥ अथाग्ने युक्ष्वा हिती तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ ॥अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः॥ अरं वहंत्याश
व इति। हे देव द्योतमानाग्ने तान्श्वान् युक्ष्व। आत्मीये रथे योजय। ये तव त्वदीयाः साधवः साधकाः कर्मणां वा अश्वासो अश्वाः आश
वः शीघ्रगामिनः संतः अरमलं पर्याप्तं त्वदीयं रथं वहंति हि खलु। तानश्वान् रथे युक्ष्वेत्यर्थः। युंक्ष्व युक्ष्वेति पाठे॥ आशवो मन्य
ति च॥ ॥अथ द्वितीया॥ अच्छा नो याह्या वहाभि प्रयांसि वीतये॥ आ देवान्सोमपीतय इति। हे अग्ने नोस्मानच्छाभिमुख्येन याहि आग
च्छ। तथा प्रयांसि हवींषि लक्षणान्यन्नान्यभिलक्ष्य देवानावहा। किमर्थं। वीतये तेषां हविर्भक्षणार्थं। तथा सोमपीतये सोमपा
नार्थं च तान् देवानावह॥ ॥अथ तृतीया॥ उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजरेति। हे भारत हविषां भर्तः
अग्ने उच्छोच उद्दीप्यस्व। ततो विरचयित्वा दीप्यस्व। तदेव विवृणोति। हे अजर जरारहिताग्ने दविद्युतत् द्योतमानस्त्वं द्युमत् द्युमत् दीप्तिमत्। कथं
सत् इति तृतीयायाः लुक्। अजस्रेणाविच्छेदेन तेजसा विभाहि विशेषेण प्रकाशयस्व। यद्वा भाति रंतर्णीतण्यर्थस्त्वं प्रथममुः

567/1973

१६३ दीप्यस्व। पश्चाद्धर्मायेनतेन्नसासर्वेन्नगत्प्रकाशयेतियोजनीयं॥ ॥अथप्रसुन्वानायेतिदशर्चात्मकंदशतीयंसूक्तंतत्रप्रथमा॥प्रसुन्वाना
यांधसोमर्तोनवष्टतद्वचः॥अपश्वानमराधसंहतामखंनभृगवः॥इति। सुन्वानायसुन्वानस्याभिषूयमाणस्यअंधसोअदनीय
स्यसोमस्यतत्प्रसिद्धंवचोवचनं। घोषंमर्तोमारकः कर्मविघ्नकारीश्वानवत्स्वशब्दकांतावितिधातुः नकामयतांनशृणोत्वितिया
वत्तथाहोतारोराधसंसंसाधककर्मरहितंश्वानंअपहत। तत्रदृष्टांतः। मखंनयथापुराअपराइमखंएतंनामानंभृगवापह
तवंतः तथाअपहतेत्यर्थः। सुन्वानायसुन्वानस्येतिपाठो॥ यस्यदृढनेतिच॥ ॥अथद्वितीया॥ आजामिरत्केअव्यतभुजेनपुत्र
ओण्योः॥ सरज्जारोनयोषणांवरोनयोनिमासदं॥ इति॥ जामिर्बंधुभूतोदेवानांसोमोत्केअध्वर्युःएकेपवित्रेअव्यतआवृणोतिसर्वं
तोभवति। तत्रदृष्टांतः। भुजेनयथाओण्योःरक्षकायोर्मातापित्रोःभुजेपुत्रंआवृणोतितद्वत्। ततःसोयंसोमोयोनिंस्वस्थान १६३
भूतंकलशमासदमाशत्रुंसरत्शरति। तत्रदृष्टांतद्वयं। जारोनयथाजारोयोषणामसतींस्त्रियंप्राप्तुंसरति। यथावावरःक

न्यानांप्राप्तुंगच्छतितद्वत्॥ ॥अथतृतीया॥ सवीरोदक्षसाधनोवियस्तस्तंभरोदसी॥ हरिःपवित्रेअव्यतवेधानयोनिमास
दिति। दक्षसाधनोबलसाधनःससोमःवीरःसमर्थोभवति। यःसोमःरोदसीद्यावापृथिव्यौवियस्तस्तंभस्वतेजसाव्यस्त
भ्नात्। आच्छादयदित्यर्थः। किंचहरिर्हरितवर्णसोमःवेधात्। यथाविधातायज्ञमानःस्वगृहमासीदति। तद्वत्योनिंस्वः ५६४ / 1973
स्थानंकलशंआसदमाशुंपवित्रेअव्यत। आवृणोतिसर्वतोभवति॥ ॥इतिद्वादशोध्यायेप्रथमःखंडः॥ ॥अथद्वितीयःखं
डः अभ्रातृव्यइतिप्रगाथात्मकंप्रथमंसूक्तंतत्रप्रथमा॥७॥ अभ्रातृव्योअनात्वमनापिरिंद्रजनुषासनादसि॥ युधेदापि
त्वमिच्छसे॥ इति। हेइंद्रत्वंजनुषाजन्मनैवअभ्रातृव्यः। व्यत्संपन्नइतिव्यत्ययस्यः। सपत्नरहितइत्यर्थः। अनाअनेतृकः। कृतघ्न
दसीतिकृपःप्रतिषेधः। अनपेक्षितइत्यर्थः। अनापिर्बंधुवर्जितश्च। सनादसीचिरादेवअभ्रातृव्यादिगुणवर्जितोसियत्रत्वया
अपित्वंबांधवमिच्छइच्छसि। तत्रयुधेत। युद्धेनैवयुध्यंकुर्वन्नेवस्तोतॄणांसखाभवसीति॥ ॥अथद्वितीया॥ नकीरेवंतं

सख्याय विंदसे पीयंति ते सुराश्वः॥ यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे इति॥ हे इंद्र रेवंतं केवलधनवंतं यागादिरहि-
१६४ तमयष्टारं माघमन्यमानं सख्याय सखिभावाय नकिर्विंदसे न लभसे नाश्रयसीत्यर्थः॥ अयष्टारो जनाः किं संतीत्यत आ-
ह॥ सुराश्वः दुनुश्चिगतिरश्वाः सुरया वृद्धाः तद्वंतमतानास्तिकाः ते त्वां पीयंति पीयतिर्हिंसाकर्मा॥ हिंसंति त्वन्नाश्रयसीः
त्यर्थः॥ यदा त्वं नदनुं। नद अव्यक्तशब्दे यं स्तोतारं कृणोषि मद्दायायमिति यदा भावयसि तदानीं समूहसि धनादिकं तस्मै
वहसि। आदिदनंतरमेव तेन लब्धधनेन स्तोता पितेव पालयिता जनक इव हूयसे। स्तुतिभिराहूयसे स्तूयस इत्यर्थः॥ आ त्वा
सहस्रमिति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ ॥आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये। ब्रह्मयुजो हरय इंद्र केशि- १६४
नो वहंतु सोमपीतये इति॥ हे इंद्र त्वां सहस्रसंख्याकाः हरयस्त्वदीया अश्वाः आ वहंतु आनयंतु अस्मद्यज्ञं। तथा शतश-
तसंख्याकाश्च भवदीया अश्वाः त्वामावहंतु। यद्यपि द्वावेवास्य हरी तथापि तद्विभूतयोत्यपि बहवोश्वाः संति। ननु

युगपदनेकैरश्वैः कथं यातुं शक्नोतीत्यत आह। युक्ता इति। हिरण्यये हिरण्मये स्वर्णविकारे हिरण्यशब्दादुक्तार्थे विहितस्य म-
यटः ऋत्व्यवास्त्वेत्यादौ मलोपो निपात्यते। तादृशे रथे युक्ताः संबंधाः बहूनामश्वानां युगमनानीय रथे नियुक्तत्वाद्युग-
पादनेकैरश्वैर्गंतुं शक्यत इति भावः॥ कीदृशा हरयः ब्रह्मणा परिवृढेनेंद्रेण युक्ताः यद्वा ब्रह्मणास्मदीयेन स्तोत्रेण अस्मा- 561/1923
भिर्दत्तेन हविषा वा युक्ताः केशिनः केशाः सटास्तैर्युक्ताः किमर्थमिंद्रस्य वहनं तत्राह। सोमपीतये सोमस्य पानाय। यथा-
स्मदीयं सोमं पिबेत्। तथा वहंत्वित्यर्थः॥ ॥अथ द्वितीया॥ आ त्वा रथे हिरण्यये हरी मयूरशेप्या। शितिपृष्ठा वहतां म-
ध्वो अंधसो विवक्षणस्य पीतये इति॥ पूर्वं हर्योर्विभूतिरूपाः अश्वाः इंद्रमावहंत्विति प्रार्थिताः। अधुना त्विंद्रमाव-
हतामिति प्रार्थ्यते। हिरण्यये हिरण्मये रथे युक्तौ मयूरशेप्या मयूरशेपौ मयूरवर्णशेपौ ययोस्तौ सुपां सुलुगिति वि-
भक्तेर्यादेशः। शितिपृष्ठा श्वेतपृष्ठौ। एवंभूतौ हरी अश्वौ। हे इंद्र त्वा मावहतां किमर्थं। मध्वो मधुररसस्य विवक्ष-

णास्य वक्तुमिष्टस्य सूक्तस्य यद्वा वोढव्यस्य प्राप्तस्यास्य अंधसोन्नस्य सोमरूपस्य पीतये पानार्थं॥ ॥अथ तृतीया॥ पिबा
१६५ त्वस्य गिर्वणः सुतस्य पूर्वपा इव॥ परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते इति॥ हे गिर्वणः गीर्भिः वननीयस्तु
तिभिः संभजनीयेंद्र सुतस्याभिषुतस्यास्य सोमस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी
। इममभिषुतं। सोमं तु क्षिप्रं पिब॥ तत्र दृष्टांतः॥ पूर्वपा इव। पूर्वः सर्वेभ्यो देवेभ्यः प्रथमभावी सन् पिबतीति पूर्वः
पा वायुः॥ स हि इंद्रवायवमुख्यग्रहः सर्वेभ्यो देवेभ्यः पूर्वं पिबति। यस्य देव दधिषे पूर्वपेयमिति निगमांतरं। तादृशो वा
युरिव त्वमपि सर्वेभ्यो देवेभ्यः पूर्वं पिबेत्यर्थः॥ कीदृशस्यास्य सोमस्य॥ परिष्कृतस्य अभिषवादिभिः संस्कृतस्य। संपर्युपे
भ्य इति। करोते भूषणे सुट्॥ परिनिविभ्य इति सुटः षत्वं॥ रसिनो रसवतः॥ अपि च। इयमासुतिः॥ अयमासवो मद १६५
करश्चारुः शोभनः सोमरसः मदाय। हर्षायेंद्रहर्षजननाय पत्यते संपद्यते। पतिर्गतौ। यद्वा पत्यतिरैश्वर्यकर्मा। म

दाय मदस्य पत्यते ईष्टे। मदहेतुत्वादनेन शक्त इत्यर्थः॥ ॥अथ आसोतेति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ आसोता पार
षिंचताश्वं न स्तोममप्तुरं रजस्तुरं॥ वनक्रक्षमुदप्रुतमिति॥ हे ऋत्विजः आसोत सोममभिषुणुत॥ षुञ् अभिषवे लोटि छां
दसो विकरणस्य लुक्। तप्तनप्तनथनाश्चेति। तस्य तबादेशः॥ किंच। परिषिंचत परितस्तं वसतीवर्यादिभिः सिंचत। कीदृ 563/1923
शं अश्वं न अश्वमिव वेगिनं स्तोमं स्तोतव्यं। अप्तुरं अंतरिक्षस्थितानामुदकानां प्रेरकं। रजस्तुरं तेजसां प्रेरकं। वनप्रक्षं उ
दकं उदकवत्। क्षरणशीलं उदप्रुतं उदके गच्छंतं प्लवमानं। सोममभिषुणुत। अभिषिंचत च। वनप्रक्षं वनक्रक्षमिति पाठौ
॥ ॥अथ द्वितीया॥ सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने॥ ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् इति।
सहस्रधारं बहुधारोपेतं वृषभं कामानां वर्षकं पयोदुहं क्षीरवत्सारभूतं रसं सिंचतीति प्रियं प्रीणयितारं सोमं देवाय देवसं
बंधिने जन्मने देवेभ्यस्तदर्थं अभिषुतस्य॥ ऋतजात उदकाज्जातो यो राजा सोमः ऋतेन वसतीवर्याख्येनोदकेन विवा

रंध्रांविशेषेणवर्धते। कीदृशः। देवोद्योतमानः। स्तोतव्योवा। ऋतंसत्यभूतः। बृहन्महांतंतमास्कनुतेतिपूर्वेणसमन्वयः। प
३६६ योर्दुहंपयोरथमितिपाठो॥ ॥इतिद्वादशोध्यायेद्वितीयःखंडः॥ अथतृतीयखंडे अग्निर्वृत्राणीति तृचात्मकंप्रथमंसूक्तंतत्र
प्रथमा॥ अग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया। समिद्धःशुक्र आहुतः इति। विपन्यया स्तुत्यास्तूयमानाद्द्रविणस्युर्द्र
विणंधनंस्तोतॄणामिच्छन्। यद्वा हविर्लक्षणंधनमात्मनइच्छन्नग्निर्वृत्राण्यावरकाणिरक्षःप्रभृतीनितमांसिवाजंघनत्
भृशंहंतु। कीदृशोग्निः समिद्धःसम्यक्दीप्तः अतएवशुक्रःशुक्लवर्णःआहुतः हविर्भिरभिहुतः॥ ॥अथद्वितीया॥ गर्भे
मातुःपितुःपिताविदिद्युतानोअक्षरे। सीदन्नृतस्ययोनिमेति। अत्रमातापितृशब्दाभ्यांभूद्यावावभिधीयेते। द्यौःपिता ३६६
पृथिवीमातेतिश्रुतेः। मातुर्भूम्याःगर्भेगर्भस्थानमध्ये अक्षरेक्षरणरहितेवेद्याख्येस्थानेविदिद्युतानः विशेषेणदीप्य
मानः पितुःपिता स्वर्लोकस्यपालयिता हविषांप्रदानेन। एवंभूतोग्निः ऋतस्ययज्ञस्ययोनिमुत्तरवेद्याख्यंधिष्ण्यंस

म्यगर्थोद्वितीया। आसीदन्नुत्तरवेद्यामुपविशन्। अग्निर्वृत्राणिजंघनदित्यन्वयः॥ ॥अथतृतीया॥ ब्रह्मप्रजावदाभरजातवेदोविचर्षणे
॥अग्नेयद्दीदयद्दिवीति॥ हेजातवेदः जातानांवेदितः विचर्षणे विश्वरूपेणद्रष्टरग्ने प्रजावत्पुत्रपौत्रसहितंब्रह्मान्नं आभराहर। यद्दिवि
स्वर्लोकेदीदयद्दीप्यते। देवेषुयत्प्रशस्तमन्नंराजतेतदाहरेत्यर्थः॥ ॥अथास्यप्रेषेतितृचात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ अस्यप्रेषा 565/1933
हेमनापूयमानोदेवोदेवेभिःसमपृक्तरसं॥ सुतःपवित्रंपर्येतिरेभन्मितेवसद्मपशुमंतिहोतेति॥ अस्यसोमस्यप्रेषाप्रेषतिर्गत्य
र्थः। क्षिप्रस्वं। सावेकाचइतिविभक्तेरुदात्तत्वं। प्रेषाप्रेरकेण। हेमनाहिरण्येनपूयमानः हिरण्यपाणिरभिषुणातीतिहिरण्य
संबंधः। तादृशः देवोदीप्यमानःसोमःरसमात्मीयंदेवेभिर्देवैःसहसमपृक्तसंपर्चयतिसंयोजयतिपृचीसंपर्केततःसुतोभि
षुतःसोमःरेभन्शब्दायमानःसन्। पवित्रंदशापवित्रंपर्येतिपरिगच्छति। कथमिव। होतादेवानामाह्वाताऋत्विक्मितेव।
निर्मितानिपशुमंतिपशुमन्तिसद्मसदनानियथापर्येतितद्वत्॥ ॥अथतृतीया॥ भद्रावस्त्रासमन्यावसानोम

१६७ हानकृशिर्नवचनानि शंसन्। आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ। इति॥ भद्राणि कल्याणानि मन्यासमनामितिसं
यामनामैतत्साधुरिति यत्संग्रामयोग्यानि वस्त्राणि आच्छादकानि तेजांसि वसान आच्छादयन् महान् कविः क्रांतदर्शी अत एव वनि
वचनानि नितरां वक्तव्यानि स्तोत्राणि शंसन् विचक्षणः विशेषेण सर्वस्य द्रष्टा जागृविर्जागरणशीलः। हे सोम एवंभूतस्त्वं देववीतौ देवानां वी
तिर्भक्षणं यस्मिन्स देववीतिर्यज्ञः तस्मिन् चम्वोरधिषवणफलकयोरावच्यस्य पात्राण्यविशायेचिर्गत्यर्थः। व्यत्ययेन रवन्॥ ॥अथ तृती
या॥ समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे। अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः इति॥ यशसां य
शस्विनां मध्ये यशस्तरः। अतिशयेन यशस्वी क्षैतः क्षिणो भव। प्रियः प्रीणयिता सोमः सानौ समुच्छ्रिते अव्ये अविमये पवित्रे अस्मे
अस्मदर्थं संमृज्यते ऋत्विग्भिः परिशोध्यते। उ अव धारण पूयमानस्त्वं धन्व अथ नरक्षे अभिस्वर अभितः शब्दय पूयं। पृज्ञायां बहु १६७
वचनं। हे सोम त्वं नोस्मान् स्वस्तिभिः कल्याणनमोपालनैः सदा सर्वदा पात रक्षत पालयेत्यर्थः॥ ॥अथ तोन्विंद्र इति तृचात्मकं तृ

तीयं सूक्तं तत्र प्रथमा। एतो न्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्विति॥ अत्रेतिहासमाचक्षते।
पुरा किलेंद्रो यत्यादिकान् भक्षकान् हत्वा अश्लीलहत्यादिदोषेणात्मानः मपरिशुद्धमित्यमन्यत॥ अतस्तद्दोषपरिहाराय इंद्र ऋषीनवो
चत। अपूतं मा यूयं पावित। येन साम्ना शुद्धं कुरुतेति। ततस्ते च शुद्धसादकेन साम्ना शस्त्रैश्च परिशुद्धमकार्षुः। पश्चात् स्तुतायेंद्रा
य यागादिकर्माणि सोमादीनि हवींषि प्रादुरिति। एषोर्थः। शाट्यायनकब्राह्मणे प्रतिपादितः। इंद्रो वा करान् हत्वा पूत इवामेध्योम
न्यत सोकामयत शुद्धमेव मासन्नं शुद्धेन साम्नाभिष्टुयुरिति। तदृषीनब्रवीत् स्तुत मेति त एवमृषयः साम्नापश्यंस्तेनास्तुवंस्ते नो
न्विंद्र इति। ततो वा इंद्रः पूतः शुद्धो मेध्योभवदिति। अथ चास्यास्त्वचायमर्थः। ऋषयः परस्परं ब्रुवंति। कुत्सिप्र एतो आगच्छतेव
आगत्य च शुद्धेन शुद्ध्युत्पादकेन साम्ना तथा शुद्धैः॥ शुद्धिहेतुभिरुक्थैः शास्त्रैश्चेंद्रं शुद्धमपापिनं कृत्वा स्तवाम स्तवयाम। तत
स्मामशस्त्रैश्च वावृध्वांसं पापराहित्येन वर्धमानं तमिममिंद्रं शुद्धैः शुद्ध्युत्पादकैर्गव्यादिभिराशीर्वान् आश्रयणवान्। छंद

567/1973

१६८ सीरं इतिमनुपोबलं। तादृशः सोमः ममश्रुतमिदं मादृयतु मोघनेः छांदसश्रुः श्रुश्रेराशीर्वानिश्रुक्ष आज्ञीर्वानितिपाठो। ॥अथद्विती
या॥ इंद्रश्रुधोनआगहिश्रुक्ष ःश्रुक्षाभिरूतिभिः॥ श्रुक्षोरयींनिधारयश्रुक्षोममक्षिसोम्यः इति॥ हे इंद्र श्रुद्धः। असमर्दीयैः सामभिः
गास्त्रैश्च परिश्रुक्षस्त्वं नोस्मानागत्यागछ॥ श्रुक्षाभिरूतिभिः॥ श्रुक्षोरयींन्नि धारयंश्रुक्षोममक्षिसोम्येति। हे इंद्र श्रुक्षः असमदीयैः
सामभिः गास्त्रैश्चपरिश्रुक्षस्त्वंनोस्मनागत्यागछ॥ श्रुक्षाभिरूतिभिः रूतयो मरुतः अवंतिसर्वत्र गछतीतिवा। तेपिसामभिः
गास्त्रैश्चपरिपूताः तैर्मरुद्भिः सहश्रुक्षः पापरहितस्त्वं आगहि आगत्य च श्रुक्षस्त्वं रयिं धनं अस्मासु निधारयतितरांस्थापय। किं
च। हे सोम्य सोमाहं ऋक्षस्त्वं ममक्षिसोमेन माद्यमहां हर्षकारिबहुलं छंदसीतिलोपः श्रुः ममक्षिसोम्यममद्धि सोमइतिपाठो
॥ ॥अथतृतीया॥ इंद्र श्रुक्षोहिनोरयिंश्रुक्षोरत्नानि दाशुषे॥ श्रुक्षोरत्नाणि जिघ्नसे श्रुक्षो वाजं सिषासति॥ हे इंद्र श्रुक्षः हि १६८
रवधारणे श्रुक्ष एव त्वं नोस्मभ्यं रयिं धनं। इंद्र एव त्वं नोस्मभ्यं रयिं धनं प्रयछ। तथा श्रुक्षस्त्वं दाशुषे हविर्दत्तवते यजमानाय

रत्नानिरमणीयानि कनकगवादीनि देहि। ततः श्रुद्धः पापरहितं त्वं रत्नाणि अपामावरकान कर्मविघ्नकारिणः शत्रून्यापा
नि वा जिघ्नसे हंसि॥ ततः श्रुद्धः शत्रुहननदोषपरिहाराय असमदीयैः सामभिः गास्त्रैश्चपरिश्रुक्षस्त्वं वाजं मंनमस्मभ्यं सि
षासति। प्रदातुमिछसि। यद्वा यदा शत्रून हत्वं तदा तदा। श्रुश्रुत्यादेकैः सामभिः गास्त्रैश्चपूतं मां परिश्रुक्षं कुरुतेति। मम
स्मभ्यं धनमंनं दातुमिछसीत्यर्थः॥ ॥ इति द्वादशाध्याये तृतीयः खंडः॥ अथ चतुर्थखंडे अग्नेस्तोमिमितितत्रात्मकं प्रथ
मं सूक्तं तत्रप्रथमा॥ अग्नेः स्तोमंमनामहे ध्रमद्यदिविस्पृशः॥ देवस्य द्रविणस्यवइतिहे द्रविणस्यवः द्रविणं धनमिछंतो
व यं दिविस्पृधः सूर्यरूपेण आकाशं आप्नुवतो देवस्य द्योतमानस्याग्नेः सिक्षं पुण्याणां साधकं स्तोमं स्तोत्रं अद्यास्मिन्नह
नि मनामहे ब्रूमः॥ ॥अथद्वितीया॥ अग्निर्जुषतनोगिरो होतायो मानुषेष्वा॥ सयक्षद्दैव्यं जनमिति॥ होता देवानामाह्वाता
होमनिष्पादको वा योग्निः मानुषेषु आवसतो। सोग्निर्नोस्माकं गिरः स्तुतीर्जुषतां सेवतां सोग्निर्दैव्यं जनं देवसंबंधिनं जनं

569/1993

यज्ञस्तनुतु॥ ॥अथ तृतीया॥ त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः॥ त्वया यज्ञं वितन्वत इति॥ हे अग्ने जुष्टः सर्वदा प्रीतः वरेण्यः सर्वै
१६० र्वरणीयः होता त्वं सप्रथाः असि सर्वतः पृथुर्भवसि। तथा ह यास्कः सप्रथाः सर्वतः पृथुरिति। किंच। सर्वे यजमानाः त्वया साधनेन यज्ञं
वितन्वते॥ ॥अथाभि त्रिपृष्ठमिति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ अभि त्रिपृष्ठं वृषणं वयोधामंगोषिण॥ ॥सवनानि वा यस्य सन्ति
थोक्तं त्रिपृष्ठं वृषणं वर्षकं वयोधां अन्नस्य दातारं। अंगोषिणं अघोषवंतं सोममभिलक्ष्य वाणीः स्तोतृणां वाचः अवावशंत शब्दयंतो वनाव
नानि उदकानि वसान आच्छादयन् वरुणो न। वरुणो यथा सिंधून् आच्छादयति तद्वत्। सिंधुः स्यंदनशीलः रत्नधा रत्नानां दाता सोमो वार्या
णि धनानि दयते प्रयच्छति। स्तोतृभ्यः अंगोषिणं आंगूषाणामिति पाठौ॥ सिंधूः सिंधूनिति च॥ ॥अथ द्वितीया॥ शूरग्रामः सर्ववी
रः सहावान् जेता पवस्व सनिता धनानि तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान् पृतनासु शत्रूनिति॥ हे सोम त्वं पवस्व। कीदृ १६०
शस्त्वं। शूरग्रामः शूराणां ग्रामः संघो यस्य सः सर्ववीरः सर्वे वीरा यस्य स तथोक्तः सहवान् सहावान् जेता जयशीलः सनिता

संभक्ता धनानि तिग्मायुधः तीक्ष्णप्रहरणसाधनः क्षिप्रधन्वा क्षिप्रसहनशीलधन्वा समत्सु संग्रामेषु अषाळ्हः असोढा साह्वानभि
भवन्। कुत्र। पृतनासु शत्रु। सेनासु का न। शत्रून्॥ ॥अथ तृतीया॥ उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी॥ अपः सि
षासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजानिति॥ हे सोम उरुगव्यूतिः विस्तीर्णमार्गस्त्वं अभयानि स्तोतृभ्यः कृण्वन् कुर्वन् पुरं
धी उरुं धा नाना पृथिव्यौ नाम ते समीचीने संगते कुर्वन् आ पवस्व अक्षर। अपः उषसः स्वरादित्यं गाः रश्मींश्च सिषासन् संभक्तुमिच्छन्
।संचिक्रदः संक्रंद सोम महो महतः महांति वाजान्यन्नानि अस्मभ्यं दातुमिति शेषः। अथ त्वमिंद्रेति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा 571/1923
॥ ॥त्वमिंद्र यशा अस्यृजीषी शवसस्पते॥ त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिरिति॥ हे इंद्र शवसस्पते शवसोन्नस्य
बलस्य वा पालयिता। ऋजीषी ऋजीषेणाभिषुतः सोमः तद्वांस्त्वं यशा असि यशस्वी भवसि॥ कथमस्य यशस्त्वमिति चेत्तदाह॥ अप्रती
नि व।लभिरपि अप्रतिगतानि वृत्राणि रक्षांसि अनुत्ता अन्यैर्नेतुमशक्ताः॥ त्वमेक इत् असहाय एव चर्षणीधृतिः रक्षकत्वेन

यजमानादिमनुष्याणांधारकः। पुरुषहूतंयथाभवसितथाहंसिसप्रहरसि। अतएवास्ययशस्वित्वं। ऊवसस्पतिःऊवसस्पते इतिपाठौ।
१७० इत्यर्वनुजश्चर्षणीधृतिः। एकइद्दमुताच्चर्षणीधृताइतिच। ॥अथद्वितीया॥ तमुत्वानूनमसुरप्रचेतसंराधोभागमिवेमहे। महीवकृ
त्तिःशरणातइंद्रप्रतेसुम्नानोअश्नवन्निति। हेअसुरबलवन्प्राणवन्‌हेइंद्रयउक्तगुणोसितंप्रचेतसंप्रकृष्टज्ञानंत्वा। उइत्यवधारणोपि
तवस्तोषकंत्वमेवराधधर्माहिंसाधनंनूनमिदानींमीमहेयाचामहे॥ तत्रदृष्टांतः। भागमिवयथाकश्चित्पितृतोभागभूर्धनंयाचते
तद्वतइंद्रोयजमानेभ्यस्तोतृभ्यश्चधनंप्रयच्छत्येवातस्मातभागंभूतंधनंयस्माद्रोचयंयाचामहे॥ किंच। इंद्रमहीविकृतिःकृतिर्यशो
वान्नंवा। कृतीछेदनेकारणेक्तिन्। कृंतत्यनेननेति। ईदृशीकृत्तिरिव॥ तेतवशरणाशरणंगृहंअंतरिक्षेद्युलोकेमहद्वर्तते। अन्वयास्तुः
।कृतिःकृंततेयशोन्नंवा। महीवकृत्तिःशरणातइंद्रसुमहतइंद्रशरणमंतरिक्षेकृत्तिरिवेति। किंच। तेतवस्वभूतानिसुम्नासुम्नानि १७०
पुत्रादिविषयसुखानिचनोस्मान्प्राश्नवत॥ प्रकर्षेणाश्नुवनां व्याप्नुवंतु॥ अश्नोतेर्लङ्यडागमः॥ यज्ञिष्ठंत्वेतिनगाथात्मकंचतुर्थंसूक्तं

सूक्तेप्रथमा॥ ॥यज्ञिष्ठंत्वाववृमहेदेवंदेवत्राहोतारममर्त्यं॥ अस्ययज्ञस्यसुक्रतुमिति॥ हेअग्नेयज्ञिष्ठंयष्टृतमंत्वांववृमहेवृणीमहे
संभजामहे॥ कीदृशंत्वांदेवत्रादेवेषुमध्येदेवंअतिशयेनदानादिगुणकंहोतारंदेवानामाह्वातारंअमर्त्यमविनाशनंअस्ययज्ञस्ययाग
स्यसुक्रतुंसुष्ठुकर्तारं॥ ॥अथद्वितीया॥ अपांनपातंसुभगंसुदीदितिमग्निमुश्रेष्ठशोचिषं॥ सनोमित्रस्यवरुणस्यसोअपामासुम्नं
यक्षतेदिवीति। ऊर्जोन्नस्यनपातंनपातितारं। यद्वानप्तारंचतुर्थंहविर्लक्षणेनानेनआपोजायंतेअद्भ्योयभिवनस्पतयःतेभ्यएवाज्ञा
यतइतिचतुर्थत्वंनभ्रात्मनपादितिनयःप्रकृतिभावः॥ सुभगंशोभनधनंसुदीदितिंसुष्ठुदीप्यंतंअग्निंश्रेष्ठशोचिषंप्रशस्यतमंतेज
स्कंअग्निंस्तोमातिशेषः॥ सतादृशोग्निर्नोस्मदर्थंदिविद्योतमानेदेवयजने द्युलोकेवामित्रस्यदेवस्यवरुणस्यचसुम्नंसुखंअभि
लक्ष्ययक्षतेयजतु। तथासोग्निरपामाद्भवतानांचसुम्नमभियजतु॥ ॥इतिद्वादशाध्यायेचतुर्थःखंडः॥ अथपंचमखंडेयमग्न
इतिव्वतृचात्मकंप्रथमंसूक्तं तत्रप्रथमा॥ ॥यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः॥ संयताशश्वतीरिषइति। हेअग्नेपृत्सुसंग्रा

573 / 1923

२०१ मेषु यं मर्त्यं यजमानं अवाः अव सीरक्षसि। यं पुरुषं संग्रामेषु जुनाः प्रेरयसि। स नरो यजमानः शश्वतीरिषः नित्यान्यन्नानि यंता नियंतुं समर्थो
भवति। एतत्कपदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति एतनाशब्दस्य पृदादेशः सावेकाच इति विभक्तेरुदात्तत्वं। अवाः अव हः अकारोकारयोर्वि
पर्ययः। यडाले घडागमः॥ इतश्चेति सिप इकारस्य लोपः। जुनाः जु इति गत्यर्थः। सौत्रो धातुः। छंदसि पक्रियाभ्यः श्नाय हलं छंदस्यमा
ङ्योगेपि स्याद्भावः। यद्वृत्तयोगादनिघातः। यंता कृनोमित्याद्युदात्तत्वं। शश्वतीः इगितश्चेति ङीप्॥ ॥अथ द्वितीया॥ नकारस्य स हस्य पर्ये
ता कृ यस्य चित्। वाजो अस्ति श्रवाय्यः इति हे सहस्य शत्रूणामभिभवनशील अग्ने अस्य त्वद्भक्तस्य यजमानस्य कस्यचित्। कस्यापि पर्ये
ता नकिः आक्रमिता नास्ति। किंचास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजोस्ति बलं विशेषास्ति॥ ॥अथ तृतीया॥ स वाजं विश्वच
र्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनितेति। विश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः सोऽग्निरर्वद्भिरश्वैः वाजं संग्रामं तरुता तारयितास्तु २०१
विप्रेभिर्मेधाविभिर्ऋत्विग्भिः सहितः सोऽग्निः सनिता फलस्य दाता सः। विश्वचर्षणिः विश्वे चर्षणयो यस्य। बहुव्रीहौ विश्वं संज्ञा

यामिति पूर्वपदांतोदात्तत्वं। अर्वद्भिः कृतेति। अन्येभ्योपि दृश्यंत इति वनिप् भिसि। अर्वणस्त्रसावनञ इति नकारस्य तृ इत्ययमादेशः॥
तरुता। तॄ प्लवनतरणयोः। असमानस्यातिनर्क्राभिनेत्यादौ। तृन्नंतो निपातितः। निपातनादेवकारस्योत्वं॥ ॥अथ साकमुक्ष इति तृचा
त्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ साकंमुक्षो मर्जयंत स्वसारो दश धीरस्य धीतयो धनुत्रीः॥ हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो 575/1473
न वाजी॥ इति॥ साकमुक्षः सहयुगपत्सिंचंत्यः। उक्ष सेचने क्विपि रूपं। तादृश्यः स्वसारः कर्मकरणार्थं इतस्ततः सरणशीला अंगुलयः
मर्जयंतः। सोमं शोधयंति मृजू शौचालंकारयोः। तथा दश दशसंख्याकाः धीतयोंगुलिनामैतत् अंगुलयः धीरस्य समर्थस्य प्राज्ञ
स्य वा देवे ज्ञातव्यस्य काम्यमानस्य वा सोमस्य धनुत्रीः प्रेरयित्र्यो भवंति ततः हरिः हरितवर्णः सोमः सूर्यस्य जाः प्रादुर्भूता जाया
दिशः ताः पर्यद्रवत्। परितो गच्छति। सूर्यस्य तेजसा हि आविर्भवंतीति दिशां तस्य जायात्वं अस्यः अतनशीलो वाजी न अश्व इ
व रहितः सोमः द्रोणकलशं ननक्षे व्याप्नोति। नक्षतिर्व्याप्तिकर्मा॥ ॥अथ द्वितीया॥ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरु

१७२ धारो अद्भिः॥ मर्यो न योषामभि निष्कृतं यन् संगच्छते कलश उस्रियाभिरिति॥ वावृधानः देवान् कामयमानः यद्वा कामानां वर्षकः अत एव
पुरुवारः बहुभिर्वरणीयः सोमः अद्भिर्मातृभूताभिर्वसतीवरीभिः संदधन्वे संधार्यते॥ तत्र दृष्टांतः॥ मातृभिर्न शिशुः कामयमानः पुत्रो
यथा मातृभिः पयःप्रदानेन संधार्यते। धान्विर्गत्यर्थः॥ कर्मणि लिटि रूपं मर्यो न। मनुष्यो यथा योषां युवतिं गच्छति तद्वत्। निष्कृतं सं
स्कृतं स्वस्थानमभियन् अभिगच्छन् कलशे द्रोणाभिधाने उस्रियाभिरद्भिर्गोविकारैः क्षीरादिभिर्वा संगच्छते। गमेरकर्मकात्समो
गम्यृच्छिभ्यामिति पदं॥ ॥अथ तृतीया॥ उत प्र पिप्य ऊधरघ्न्याया इंदुर्धाराभिः सचते सुमेधाः॥ मूर्धानं गावः पयसा चमूष्वभि श्रीणंति
वसुभिर्न निक्तैः॥ उत अपि च अघ्न्यायाः अघ्न्येति गोनाम। अहंतव्यायाः गोरूधः पयःस्थानं सोमः प्रपिप्ये ओषध्यादिषु सोमः
प्रविश्य प्रकर्षेणाप्याययसि। प्यायतेर्लिटि लिड्यङोश्चेति पीभावः॥ सुमेधाः शोभनप्रज्ञः सोयमिंदुः सोमो धाराभिः सचते समवै १७२
ति संगच्छते॥ ततो गावः चमूषु चमंति भक्षयंत्यत्र सोममिति चम्वो ग्रहाद्यः तेषु स्थितं मूर्धानं समुच्छ्रितमिमं सोमं पयसाश्रीते

न अभिश्रीणंति अभित आच्छादयंति। तत्र दृष्टांतः। निक्तैः प्रक्षालितैः वसुभिर्न वस्त्रैः यथा आच्छादयंति तद्वत्॥ ॥अथ पिबा सुत
स्येति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा। पिबा सुतस्य रसिनो मत्स्वा न इंद्र गोमतः॥ आपिर्नो बोधि सधमाद्यो वृधे स्माँ अवं
तु ते धियः इति॥ हे इंद्र रसिनो रसवतः गोमतो गोविकारैः पयःप्रभृतिभिः श्रयणद्रव्यैर्युक्तस्य नोऽस्मदीयस्य सुतस्याभिषु
तस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। ईदृशं सोमं पिब। पीत्वा च मत्स्व तृप्तो भव। अपि च त्वं सध
माद्यः सह मादयितव्यः सहितैरस्माभिस्तर्पयितव्यः सोमे आपिः प्राप्तः बंधुः स त्वं नोऽस्माकं वृधे वर्धनाय बोधि बुध्यस्वानेत
धीयाधि यो बुध्यस्व यः अनुग्रहात्मिकाः अस्मान् स्तोतॄन् वंतु रक्षंतु सधमा घेसधमाघ इति पाठौ। ॥अथ तृतीया॥ भूयाम ते
सुमतौ वाजिनो वयं मा न स्तरभिमातये॥ अस्माँ चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय इति। हे इंद्र सुमतौ शो
भनायां बुद्धौ अनुग्रहे। बुद्धौ वाजिनो हविष्मंतो वयं भूयाम वर्तमाना भवाम। अभिमातये। अभिमन्यत इ

577/1983

त्यभिमातिः। शत्रुस्तस्मै तदर्थं नोस्मान् मास्मः मा हिंसीः। स्मृ हिंसायां। माङि लुङि छांदसः च्लेर्लुक्। अपितु अभिष्टिभिरभ्येषणीया
३७३ भिः। प्रार्थनीयाभिश्चित्राभिश्चायनीयाभिर्बहुविधाभिर्वा त्वदीयाभिरूतिभिः रक्षणैरस्मानवतात्। अव रक्ष॥ तथा नोस्मान् सुम्ने
षु सुखेषु आयामय आयतान् कुरु। सर्वदा सुखिन एव कुरु॥ ॥अथ त्रिरस्मै सप्तेति त्र्यृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ त्रि
रस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं परमे व्योमनि। चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत॥ अस्मै प
वमानाय परमे उत्कृष्टे व्योमनि विविधमोम अवनं गमनं देवानामत्रेति व्योम यज्ञः तस्मिन्नवस्थिताय। यद्वा परमे व्योमनि अं
तरिक्षे वर्तमानाय त्रिः सप्त एकविंशतिसंख्याकाः नवः प्रीणयित्र्यो गावः सत्यां यथार्थभूतां आशिरं आश्रयणसाधनं क्षीरादि
दुदुह्रे दुहंति। यद्वा त्रिः सप्त द्वादश मासाः पंचर्तवः त्रय इमे लोका असावादित्य एकविंश इति। एतैः सर्वैः सह गोषु पय उः ३७३
त्पाद्यते। तत्पयो दुहंतीति। किंचायं सोमः अन्या अन्यानि चत्वारि भुवनानि उदकानि च सतीवरीश्चित्रस्तवे कधाना इति।

तानि चतुःसंख्यानि कानि चारूणि कल्याणानि उदकानि निर्णिजे निर्णेजनाय परिशोधनाय। चक्रे तदा करोति। यद्यदाय
मृतैर्यज्ञैरवर्धिष्ट वर्धितवान्। तदा करोति। दुदुह्रे परमे व्योमनि दुदुह्रे पूर्व्ये व्योमनीति पाठौ॥ ॥अथ द्वितीया॥ स भिक्षमाणो अ
मृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे। तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः॥ स पवमानः
चारुणः कल्याणस्य अमृतस्योदकस्योदकस्य क्रियाग्रहणं कर्मणः संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी॥ चारुदकं
भिक्षमाणः उकारलोपश्छांदसः भिक्षमाणो यज्ञैर्याच्यमानः सन् उभे द्यावा द्यावादेशस्य द्वंद्वे इति विहितत्वादत्र उत्तरपदाभा
वेपि द्वंद्वः प्रतीयते उभे द्यावापृथिव्यौ काव्येन कविकर्मणा विशश्रथे विरते करोति। यज्ञेन निमित्तेन प्रत्नेनोदकेन सप्र
यतीत्यर्थः॥ किंच। तेजिष्ठा अतिशयेन दीप्तानि अप उदकानि मंहना महत्वेन परिव्यत। वर्णार्थितदा परित आच्छादय
ति यदि यदा ऋत्विजो देवस्य द्योतमानस्य सोमस्य सदः स्थानं श्रवसा हविषा युक्ताः संतः विदुर्यागार्थं जानंति लभंते

579 / 1973

तदापरित आवृणोतीति॥ विद्धत्तानेसिजभ्यस्तेति॥ ईर्जसादेश्रः भक्षमाणोभिक्षमाणइतिपाठो॥ ॥अथतृतीया॥ तेअस्यसंतु
१७४ केतवोमत्यवोदाभ्यासोजनुषीउभेअनु॥ येभिर्नृम्णाचदेव्याचपुनतआदिद्राजानंमननाअगृभ्णततेति॥ अस्येतादृशस्य
सोमस्यकेतवःप्रज्ञापकाःसर्वैश्चायनीयारश्मयःकीदृशाःअमर्त्यवामरणधर्मरहिताःअतएवअदाभ्यासःदंभेश्चेतिव
कव्यमितिण्यत। परैरहिंस्यास्तेतादृशाअस्यरश्मयः। उभेजनुषीजन्मनीस्थावरजंगमात्मके। हेअनुलक्ष्मीकृत्यसंतुरक्षंतु।
ओषधीनामग्रेसोमोरेतोनिषिंचति। यद्वाःमनुष्याणांचधाराःअवंतिरक्षंतु॥ सोयंयेभिर्यैःकेतुभिर्नृम्णानृम्णानिबला
निदेव्यादेवार्हाणिचान्नानिपुनतेप्रेरयतिआदित्भिषयानंतरमेवराजानंसोमंमननामननीयाःस्तुतयःअगृभ्णतपरि
गृभ्णंति। प्रानुवंतीत्यर्थः। दुर्ग्रहोरितिछांदसोभकारः॥ ॥इतियुदशाध्यायेउत्तराग्रंथेपंचमखंडः॥ अथषष्ठखंडेअ १७५
भिवायुमितितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ अभिवायुंवीत्यर्षागृणानोभिमित्रावरुणापूयमानः॥ अभीनरंधीज

वनंरथेष्ठामभींद्रंवृषणंवज्रबाहुमिति। हेसोमगृणानःपूयमानस्त्वंवीतिसकपांसकृदुगीतिचतुर्थ्याःपूर्वसवर्णदीर्घः॥ वीत्ये
पानायवायुमभ्यर्ष अभिगच्छ। तथापवित्रेणपूयमानस्त्वंमित्रावरुणामित्रावरुणौचपानायाभिगच्छ। किंच। नरंसर्वस्यने
तारंधीजवनं। बुध्यासमंवेगंकुर्वाणंरथेष्ठांरथेतिष्ठतंअनाश्विनावभिधीयते। एकवचननुंप्रत्येकंविवक्षयासमुदाय
विवक्षयावा। एतादृशावश्विनौवाभिगच्छंतथावृषणंकामानांवर्षकंवज्रबाहुंवज्रयुक्तंहस्तंइंद्रंचत्वंपानायाभिगच्छ॥ ॥
अथद्वितीया॥ अभिवस्त्रासुवसनान्यर्षाभिधेनूःसुदुघाःपूयमाना॥ अभिचंद्राभर्तवेनोहिरण्याभ्यश्वान्रथिनोदेव
सोम॥ हेसोमास्माकंसुवसनानिसुपरिधानानिवस्त्राणिअभ्यर्षअभिगमय॥ यद्वासुवसुमनानिगोधनवस्त्रासहिता
निवस्त्राण्याच्छादकानिधनान्यभिगमय॥ किंचपूयमानःपवित्रेणत्वंसुदुघाःसुष्ठुपयसोसदोग्ध्रीधेनूर्नवप्रसूतिः
कागावःअभिप्रापय्या अपिचचंद्राणिअन्ह्योदकानिहिरण्यानिभर्तवेअरणाम्योयणागणास्माकमभिगमयतु॥

581/1973

तथा हे देवस्तो। तस्य हे सोम रश्विनो रथवनो श्वान् अस्माकमभिप्रापय॥ ॥ अथ तृतीया॥ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थि
१७५ वा पूयमानः॥ अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः॥ हे सोम पवित्रेण पूयमानस्त्वं दिव्या दिव्यानि दिवि भवानि
वसूनि धनानि नोस्माकमभ्यर्ष अभिगमय। तथा पार्थिवा पार्थिवानि पृथिव्यां भवानि विश्वा सर्वाणि धनाभिगमय। तथा येन त्व
द्दत्तेन सामर्थ्येन द्रविणं धनं वयमश्नवाम अभ्याप्नुयाम। तत्सामर्थ्यमभिगमय। किंच आर्षेयं ऋषीणं ऋषिपुत्राणां योग्यं
धनं जमदग्निवत् जमदग्नेर्यथा लब्धं प्रापयः एवं नोस्माकं तादृशं मंत्रे स्वादुतम कुर्विति। अपि अभ्यर्ष। यद्वा आर्षेय आर्षेयाणां
णां योग्यं मंत्रं जमदग्निस्त्वं भृतं मंत्रं यथा स्वादुततमम कार्षीः एवमस्माकं तादृशं मंत्रे स्वादुतम कुर्विति। मंत्रदृशाम्नो नाकुसो १७५
नां मकृषिः प्रार्थ्यते॥ ॥ अथ यज्जायथा इति त्र्यात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ यज्जायथा अपूर्व्य मघवन्वृत्रहत्या
य॥ तत्पृथिवीमप्रथयस्तदस्तभ्ना उत द्यामिति॥ हे अपूर्व्य न त्वत्तोन्यतिरिक्तं तेन पूर्व्येण वर्तितं हे मघवन्मंहनीयधनवंवि

द्वृत्रहत्याय वृत्रहननाय यद्यदा त्वं जायथा उत्पन्नः प्रादुर्भूतोसि। तं तदानीमेव पृथिवीं प्रथमानां भूमिं अप्रथयः प्रथितां दृढामकरोः उ
ताः पि च तत तदानीं न वद्दिवं घ्युलोकं अंतरिक्षे या अस्तभ्ना निरालाम्बकार्षीः एतादृशं वीर्यं त्वद्न्यस्य न संभवतीत्यर्थः॥ द्योतयितुम पृ
र्योति पदं। उतो द्दिवं उत द्यामिति पाठो॥ ॥ अथ द्वितीया॥ ततस्ते यज्ञो अजायत तदर्क उत हस्कृतिः॥ तद्विश्वमभिभूरसि यज्जातं यच्च
जंत्वं॥ हे इंद्र यघ्नदा त्वमजायथाः तदानीं ते तव यज्ञो याति यामादिभ जायत सोमपानार्थमभूत्। उतापि च तदानीं हस्कृतिः
। हास हसनहासकरी प्रीत्यर्थं। रूपमाणो हर्षस्य सस्तको अर्कोर्चनीयो मंत्रोपि अजायत किंच। तदा यज्जातं भूतजातं यच्च जंत
त्वं। रुत्वार्थे त्वप्रत्ययः। जनितव्यं विश्वमस्ति तत्सर्वं अभिभूरसि स्वमहिम्ना अभिभवतवानसि। ॥ अथ तृतीया॥ आमासु पक्वमैरय
आ सूर्यं रोहयो दिवि॥ घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत्॥ हे इंद्र आमासु पक्वासु गोषु पक्वं पयः ऐरयः प्रेरयः त
था च मंत्रः। आमासु निदधिषे पक्वमन्तरिति किंच दिवि द्युलोके सूर्यं आरोहयस्त्वं पूर्वं पणयो नानाकरा अंगिरसां गा त्रपह

583
1973

त्यां धकारावृते कस्मिंश्चित्। पर्वतेतारक्षापितवंतः ततोंगिरसः इंद्रस्तुताः पुनरस्ममाहरेतिनेरक्त इंद्रोगवांस्थानं तमसावृतं दृष्ट्वात
१७६ न्गोदर्शना द्युलोकेसर्वप्रकाशकंसूर्यमारोहितवानरक्षापितवानसिवादितोपोविभावेति पूर्वस्यपरेयद्रुत्यस्यानलिघातः॥ अथ
परोक्षकृतोर्धर्चः॥ हेस्तोतारः सत्याभिः शोभनाभिः स्तुतिभिः तपतइंद्रंतीक्ष्णीकुरुत। इंद्रंस्तुतिभिः प्रवर्धयतेत्यर्थः॥ तत्रदृष्टां
तः॥ घर्मन्नयथा घर्मंदीपनशीलंप्रवर्ग्यंसामत। कर्पास्तलुगितिलृतीयायालुक्॥ सामभिर्यथातपंतितद्वत्। ततोगिर्वणसेगीर्भि
र्वननीयायेंद्रायजुष्टंप्रीतिकरंपर्याप्तंवाबृहन्महत्बृहदाख्यंवासामगायत॥ ॥अथमत्स्यपायितिलृचात्मकंतृतीयंसूक्तं तत्र
प्रथमा॥ मत्स्यपायितेमहः पात्रस्येवहरिवोमत्सरोमदः॥ वृषातेवृष्णइंदुर्वाजीसहस्रसातमः इति। हेहरिवः हरिभ्यांतद्वनिंद्र १७६
महामहान्प्रकृष्टोयंसोमः पात्रस्येवपात्रेणेवासोमपात्रेणयथाधार्यतेसामस्तास्तदृशेनतृयातृतीयार्थेषष्ठी। यद्वापात्रस्थ
तेतवस्वभूतोमहोमहान्। सोमइतियावोच्छना। अपायिपीतः आशंसायाविवक्षितत्वात्। सूत्रोर्थप्रयोगः यतःपिबअतोम

त्सिमाद्यसिमादयस्वेत्यर्थः। पात्रेयथासोमःवर्तते तथाप्यधिकंपिब। पीत्वाचमादयसेत्यर्थः॥ किंचा रक्षमते अभिमतवर्षेतुभ्यं
चतुर्थ्यर्थेषष्ठी। मत्सरोमदसाधनः मदस्तर्पयिता वृषणावर्षितइंदुः क्लेदयिता अल्हादकारीत्यर्थः वाजीवाअंनवानअंनकाः 585/1973
व्यताप्तिसद्भावादन्नवानित्युच्यते। सहस्रसातमः अपरिमितदातृतमः सहस्रपुरुषसंभजनपर्याप्तइत्यतिशयोवा। एवंमहा
नुभावः सोमः संपादितस्तंपिबेत्यर्थः॥ ॥अथद्वितीया॥ आनस्तेगंतुमत्सरोवृषामदोवरेण्यः॥ सहावांइंद्रसानसिः पृतनाषा
कमर्त्यः॥ इति। हेइंद्रतेत्वांमत्सरोमर्षणसाधनः॥ सोमः आगंतुआगच्छतुः कीदृशोयं वृषावर्षकः मदस्तर्पयिता वरेण्योवरणी
यः सहावानसहायवानअस्मद्दत्तेनसोमेनसहायवान सनसानसिरस्माभिभजनीया। पृतनाषाट् शत्रुसेनायोअभिभवि
ता॥ अमर्त्यश्चभवेति॥ ॥अथतृतीया॥ त्वंहिशूरः सनिताचोदयोमनुषोरथं॥ सहावांदस्युमव्रतमोषः पात्रंनशोचिषेति॥
हेइंद्रत्वंखलुशूरः शौर्यवान् सनितादातासि। अतोमनुषोमनुष्यस्यमेरथंरंहणंस्यंदनंमनोरथंवास्वर्गगमनसाधनंयज्ञा

१७७ स्वंरथंवाचोदयः प्रेरय। किंच। त्वंसमहान्सोमसहस्वान्भूत्वादस्युमुपक्षिपयितारं। अव्रतंअकर्मणोमननुष्ठायिनंतुंपदह। क्षाम
व। शोचिषादीप्त्याद्युलक्ष्याअग्निः पात्रंनरवाधारंपात्रविशेषमिव। यागाधिकारीमनुष्योनयजतेतद्दहइत्यर्थः॥ ॥इतिद्वादशेध्या
येषष्ठःखंडः॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ७॥ इतिश्रीमद्राजाधिराजपर
मेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधुरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तरा
ग्रंथेद्वादशोध्यायः॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ७॥ अथत्रयोदशोध्या
यआरभ्यते॥ तत्रप्रथमखंडेपवस्ववृष्टिमितिपंचर्चंप्रथमंसूक्तंतत्रप्रथमा॥ पवस्ववृष्टिमासुनोपामूर्मिंदिवस्परि॥ अय
क्ष्मावृहतीरिषइति॥ हेसोमत्वंदिवोद्युलोकात्। वृष्टिंवर्षंनोस्माकंमकसुआआपवस्वसमंतात्क्षर। एतदेवदर्शयति। अ १७७
पामुदकानामूर्मिंतरंगंदिवःपर्यापवस्व। अपिचअयक्ष्मायक्ष्मरहितानिअनामयानिवृहतीर्महांतीषांनानिआपवस्व॥ ॥

अथद्वितीया॥ तयापवस्वधारयाययागावइहागमन्॥ जन्यासउपनोगृहमिति॥ हेसोमत्वंतयातादृश्या। धारयापवस्वक्षर। कीदृश्ये
त्यत्राह। ययादृश्यात्वदीययाधारयाजन्यासोजन्याःशत्रुजनपरभवाःगावइहास्मिन्लोकेनोस्माकंसंबंधिगृहमुपागमन्। नुपाग
च्छंति॥ ॥अथतृतीया॥ घृतंपवस्वधारयायज्ञेषुदेववीतमः॥ अस्मभ्यंवृष्टिमापवस्वेति। हेसोमयज्ञेषुदेववीतमोत्यंतंदेवका
मस्त्वंअस्मभ्यंस्तोतृभ्योघृतमुदकं। धारयापवस्वक्षर। वृष्टिंवर्षंचापवआपवस्व॥ ॥अथचतुर्थी॥ सनऊर्जेव्यव्ययंपवित्रंधा
वधारया॥ देवासःशृणवन्हिकमिति। हेसोमसत्वंनोस्माकंऊर्जेअन्नायअव्ययंअविमयंपवित्रंधारयासंपातेनाभिधाव
प्राप्नुहि। देवासोदेवाअपिहिकंशृणवनगमनवेलायामुत्यंनस्त्वदीयंशब्दंशृण्वंतु॥ ॥अथपंचमी॥ पवमानोअसिष्यदद्रक्षां
स्यपजंघनत्। प्रत्नवद्रोचयन्रुचइति। रक्षांसिराक्षसानअपजंघनत्अपघ्नन्वृहदात्मीयादीप्तिःप्रत्नवत्पुराणवद्रो
चयन्दीप्यन्पवमानःसोमोसिष्यदितिस्यंदते॥ ॥अथप्रत्यस्माइतिचतुर्ऋचंद्वितीयंसूक्तंतत्रप्रथमा॥ प्रत्यस्मैपिपीष

587
1973

तेविश्वानिविदुषेभर॥ अरंगमाय जग्मये पश्चाद्दध्वने नरः इति। हे अध्वर्यो नरो नेता यज्ञानां त्वं अस्मा इंद्राय प्रतिभर अभिभर॥
१७८ सोमं प्रयच्छेत्यर्थः॥ कीदृशायेंद्राय पपीषते पातुमिच्छते। विश्वानि सर्वाणि वेद्यानि विदुषे जानते। अरंगमाय पर्याप्तगमनाय जग्मये यज्ञ
गमनाय यज्ञेषु गमनशीलाय। अपश्चाद्दध्वने। दधिर्गतिकर्मा। अपश्चान्नमनाय सर्वमग्रगामिनो नरो नर इति पाठो॥ ॥अथ द्विती
या॥ एमेनं प्रत्येतन सोमेभिः सोमपातमं। अमत्रेभिर्ऋजीषिणमिंद्रं सुतेभिरिंदुभिरिति। हे अध्वर्यवः सोमेभिः सोमैः
करणभूतैः सोमपातमं अतिशयेन सोमस्य पातारं। एनमिंद्रं आ आभिमुख्येन प्रत्येतन प्रतिगच्छत। ईमिति निपातोऽनर्थकः। की
दृशमिंद्रं अमत्रेभिः अमत्रैः सोमपात्रैः ग्रहचमसादिभिः ऋजीषिणं ऋजीषं शुष्कसुपार्जकं बलं। तथा च यद्धा ऋजीषिणमित्यु
तरत्रसंबंधिनायं। सुतेभिरभिषुतैरिंदुभिः सोमैः ऋजीषिणं गतसारः सोमः ऋजीषः तद्वंतं। अथवा अमत्रैरमात्रैरपरिमि १७८
तैरभिषुतैः सोमैः ऋजीषिणं ऋजीषं गत्यर्थाद्व्याप्यसाधन ऋजीषशब्दः ततो मत्वर्थीय इनिः। संगतमित्यर्थः॥ एवंविधमिंद्रं प्रतिगच्छ

तेति॥ ॥अथ तृतीया॥ यदी सुतेभिरिंदुभिः सोमेभिः प्रतिभूषथ॥ वेदा विश्वस्य मेधिरो धृषत्तंतमीषतेति। हे अध्वर्यवः सुतेभिर
भिषुतैः इंदुभिरुंदनशीलैर्दीप्तैर्वा सोमेभिः सोमैर्यदि प्रतिभूषथ इंद्रं यद्यलंकुरुथ प्रतिगच्छथ। भूष अलंकार इत्यस्यैतद्रूपं। वेदामे 589/1973
धिरो मेधावी मेधो यज्ञस्तद्वान्वा स इंद्रः विश्वस्य विश्वं सर्वं संभवदायकामं वेदा वेत्ति जानाति ज्ञात्वा च धृषत् शत्रूणां धर्षकः।
सन् तं तमित् तं तं काममेव एषते प्रापयति॥ ॥अथ चतुर्थी॥ अस्मा अस्मा इदंधसोऽध्वर्यो प्रभरा सुतं॥ कुवित्समस्य जेन्यस्य श
र्धतोऽभिशस्तेरवस्वरादिति॥ अस्मा अस्मा इत् अस्मा एवेंद्राय तान्यस्मै हे अध्वर्यो त्वं अंधसः सोमलक्षणस्यान्नस्य सुतमभि
षुतं रसं प्रभर प्रहर प्रयच्छेति यावत्। स चेंद्रः समस्य सर्वस्य जेन्यस्य जेतव्यस्य शर्धतः उत्सहमानस्य शत्रोः अभिशस्तेः अभि
शंसनात् तत्कृताद्धिंसनात् कुवित् बहुशः अवस्वरत् अस्मान्पालयत्वित्यर्थः॥ अवस्वरत अवस्वरादिति पाठो॥ ॥इति त्रयोदशोऽध्या
ये प्रथमः खंडः॥ ॥अथ द्वितीयखंडे बाभ्रवेति षडृचं प्रथमं सूक्तं तत्र प्रथमा॥ बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सो

मायगाथमर्चतेति। हे स्तोतारो बभ्रवे बभ्रुवर्णाय स्वतवसे स्वबलाय अरुणाय कदाचिदरुणवर्णाय दिविस्पृशे दिवंस्पृशते सोमाय गाथं
१०९ स्तुतिरूपां वाचं अर्च तोत्रास्यतेत्यर्थः॥ ॥अथ द्वितीया॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन॥ मधावा धावता मधु इति। हे ऋ
त्विजो हस्तच्युतेभिः हस्तच्युतैरद्रिभिरभिषवग्रावभिः सुतमभिषुतं सोमं पुनीतन पवित्रे पावयत। अपि च। मधौ मधुरे सोमे
मधु गव्यं पयः अधावत प्रक्षिपत॥ ॥अथ तृतीया। नमसेदुप सीदत दध्नेदभि श्रीणीतन॥ इन्दुमिन्द्रे दधातनेति। हे ऋत्विजो नम
सेन नमस्कारेणैवोपसीदत सोममुपगच्छत। दध्नेत दध्नैवाभि श्रीणीतन सोमं माभिश्रीणीतेति च। इन्द्रे इन्दुं सोमं दधातन धत्त च॥ ॥
अथ चतुर्थी॥ अमित्रहा विचर्षणिः पवस्व सोम शं गवे॥ देवेभ्यो अनुकामकृदिति। हे सोम अमित्रहा अमित्राणां शत्रूणां हं
ता। विचर्षणिर्विद्रष्टा। देवेभ्यो अनुकामकृत् अभीष्टकर्ता त्वं गवे अस्माकं पशवे शं सुखं पवस्व क्षर॥ ॥अथ पंचमी॥ इन्द्राय सो १०९
म पातवे मदाय परि षिच्यसे॥ मनश्चिन्मनसस्पतिरिति॥ हे सोम मनश्चित् मनसो ज्ञाता मनसः स्पतिः मनस ईश्वरस्त्वं इन्द्रायेन्द्रस्य

पानाय पानाय मदाय च परि षिच्यसे। परितः पात्रेषु सिच्यसे॥ ॥अथ षष्ठी॥ पवमान सुवीर्यं रयिं सोम रिरीहि नः॥ इन्दविन्द्रेण
नो युजेति। हे इन्दो क्लिद्यमान पवमान सोम त्वं सुवीर्यं शोभनवीर्योपेतं रयिं धनं नः अस्माकं संबन्धिनं इन्द्रेण युजा सहायेन नोऽस्मभ्यं 591/1973
रिरीहि देहि॥ ॥अथो ये द्वे भीतितितच्चात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ उद्घेदभि श्रुतामघं वृषभं नर्यापसं॥ अस्तारमेषि
सूर्येति। हे सूर्य द्वादश सु भानुषु इन्द्रोऽपि सूर्यात्मना पातितः तस्मात्सूर्यात्मकः सवीर्य हे इन्द्र श्रुतमघं सर्वदा देयत्वेन विख्यात
धनं। अत एव वृषभं याचमानानां धनस्य वर्षितारं। नर्यापसं नरहितं नर्यं नरहितकर्माणं। अस्तारं दानशौंडं ओदार्यवंतं। ए
तादृशं स्तोतारमभिलक्ष्य उदेषि। उदय धारणे त्वमेव तस्य यागस्य सूर्यात्मना उद्गतासि धेतिप्रसिद्धौ॥ ॥अथ द्वितीया॥ नव यो न
वतिं पुरो बिभेद बाह्वोजसा॥ अहिं च वृत्रहावधीदिति। य इन्द्रः नवतिं नवतिसंख्याकाः ततो नवसंख्याकाः एकोनशतसंख्याकाः
शंबरस्य पुरः पुरीर्बाह्वोजसा स्वबाहुव्यनेनाबिभेद दिवोदासायाभिनंतितस्मात् थाच मंत्रांतरे दिवोदासाय नवतिं च नवेन्द्रः पु

तेध्येरचं वरस्येति। सयत्र हा रत्रा सत्ररस्य हंता स इंद्रः अहिं च केनाप्य हंत व्यंसं घ्यंसं पापा मरकं वृत्रासुरं वा अवधीत ॥ स इंद्रो स्माकं
१८० धनं ददात्वित्युत्तरेण संबंधः ॥ ॥ अथ तृतीया ॥ स न इंद्रः शिवः सखाश्वावद्गोमद्यवमत् ॥ उरुधारेव दोहत इति ॥ सः पूर्वोक्तिगुणाव
शिवः शिवः कल्याणतमः ॥ सखायष्टुध स्तव्यस्तोत्स्तुल्यलक्षणेन संबंधेनानोस्माकं मित्रभूतः एतादृश इंद्रः अश्ववत् अश्व
युक्तं गोमत्यश्वादिसहितं यवमत् अयवादिभ्य इति प्रतिषेधान्मतुपो वत्वाभावः ॥ यवपानिधान्याविशेषः ॥ धान्ययुक्तं धनं नोः
स्मभ्यं दोहते दोग्धु ददातु। तत्र दृष्टांतः ॥ उरुधारेव दोहनकाले प्रसृतपयोधारा यद्वाय हूनां पोषयित्री गौः यथा वत्सस्य पयो दो
ग्धी तथा प्रभूतं धनं अस्माकं दोग्धु ददातु। दुहेर्लेट्यडागमः ॥ ॥ इति वत्रयोदशेध्यायो द्वितीयः खंडः ॥ अथ तृतीय खंड विभ्रा
डिति तस्यात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपताववि ह्रुतं ॥ वातजूतो यो अभिरक्षति त्म १८०
ना प्रजाः पुपोष पुरुधा विराजति इति ॥ विभ्राड् विभ्राजमानः विशेषेण दीप्यमानः सूर्यः बृहत् परिवृढं सोम्यं सोममयं

मधु पिबतु किं कुर्वन्। यज्ञपतौ यजमाने अविह्रुतं। अकुटिलं अकंटकं आयुर्दधत् कुर्वन् यः सूर्यो वातजूतः वातेन मरुत्वायुना प्रेर्यमा
णः सन् त्मना आत्मना स्वयमेव अभिरक्षति सर्वं जगदभिपश्यन् पालयति। ग्रहचक्रस्य वायुप्रेर्यत्वात्। सूर्यस्यापि तत्प्रेर्यत्वं स सू 593/1973
र्यः प्रजाः पिपर्ति। रश्म्यादिप्रदानेन पालयति बहुधा पुरुधा विराजति विशेषेण दीप्यते वा पिपर्ति बहुधा पुपोष पुरुधेति पाठे ॥ अथ
तृतीया ॥ विभ्राड् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितं ॥ अमित्रहा वृत्रहा दस्युहंतमं ज्योतिर्जज्ञे असुरहा सपत्नहे
ति ॥ विभ्राड् विभ्राजमानं बृहत्प्रौढं सुभृतं सुपुष्टं वाजसातमं वाजस्यान्नस्य बलस्य वा हृतमं धर्मन् धर्मणि वायुवायुना धारयितरि दिवो दिवो
द्युलोकस्य धरुणे धारके सूर्यमंडले अर्पितं निक्षिप्तं सत्यं अनश्वरं। अमित्रहा अमित्राणां अप्रियाणां हंता वृत्रहा वृत्राणामावरकाणां
हंता दस्युहंतमं दस्यूनामुपक्षपयितॄणां हंतृतमं अयं। असुरहा असुराणां क्षिप्रूणां घातकं। सपत्नहा सपत्नानां सहजशत्रू
णामपि घातकं। ईदृग्भूतं ज्योतिः सौरं तेजः जज्ञे प्रादुर्भवति ॥ ॥ अथ तृतीया ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्य

३८१ तेऽरहत ॥ विभ्राड्भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतमिति ॥ इदं सौरं तेजः श्रेष्ठं प्रशस्यतमं ज्योतिषामन्येषां ग्रह
नक्षत्रादीनामपि ज्योतिः प्रकाशकं । अत एवोत्तमं । उत्कृष्टं विश्वजित् विश्वस्य सर्वस्य जेतृ धनजित् धनस्य च जेतृ बृहत् प्रभूतं उच्य
ते । एवं गुणविशिष्टमिति सर्वैरभिधीयते ॥ अपि च विभ्राड्विश्वस्य प्रकाशयिता भ्राजो भ्राजमानः महि महान् । सूर्यः दृशे
दर्शनाय उरु विस्तीर्णं सहः तमसोऽभिभवितृ अच्युतं । च्युतिरहितं आविनाशं ओजस्तेजोरूपं बलं पप्रथे विस्तारयति ॥ अथ
इंद्र क्रतुमिति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा ॥ ॥ इंद्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा णो अस्मिन्पुरुहूत यामनि
जीवा ज्योतिरशीमहि ॥ हे इंद्र नोऽस्मभ्यं क्रतुं कर्म प्रदानं वा आभराहर अपि च । यथा पिता पुत्रेभ्यो धनं प्रयच्छति तथा नोऽस्मभ्यं
शिक्ष धनं देहि । हे पुरुहूत बहुभिराहूत यामनि यज्ञे जीवा वयं ज्योतिः सूर्यमशीमहि प्रतिदिनं प्राप्नुयाम ॥ ॥ अथ द्वितीया ॥ ३८३
मा नो अज्ञाता वृजना दुराध्यो माशिवासो अव क्रमुः । त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसीति ॥ हे इंद्र अज्ञाना अज्ञानगम

नाः वृजना हिंसकाः दुराध्यो दुष्टाभिसंधयो नोऽस्मान् मावक्रमुः मावचक्रमुः ॥ हे शूर त्वया वयं त्वोतारः प्रवतः प्रणवकाः संतः शश्वतीर्ब
ह्वीः अपोऽतितरामसि अतितराम ॥ ॥ अथाघा घेति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ अघा घा श्वश्व इंद्र त्रास्व परे च नः । 595/1973
विश्वा च नो जरितॄन्सत्पते अहा दिवा नक्तं च रक्षिषः ॥ इति । अघा यद् अघ शब्दवाच्यं महरस्ति तत्र सर्वत्र हे इंद्र श्वश्वः शब्दवा
च्यं च यत्तत्र सर्वत्र तं त्रास्व अस्मान् रक्ष । तथा परे च परस्मिं स्थाने हि हानिचत्रास्व हे सत्पते सतां पालक । विश्वा सर्वाण्यपि अहा अ
हानि सर्वेष्वप्यहःसु नोऽस्मान् जरितॄन् रक्षिषः रक्षसि । तथा दिवा नक्तं च रक्षिषः रक्ष ॥ ॥ अथ द्वितीया ॥ प्रभंगी शूरो म
घवा तुवीमघः संमिश्लो वीर्याय कं । उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुरिति । अयं मघवा धनवान् प्रभं
गी प्रभंजनशीलः शूरः विक्रांतः तुवीमघः प्रभूतधनः संमिश्लः सस्पदृष्टमिश्रयिता । किमर्थं वीर्याय वीर्यकरणाय कामि
ति पदपूरणः एवं महानुभावो भवति । अपरोऽर्धर्चः प्रत्यक्षकृतः हे शतक्रतो बहुविधकर्मन् इंद्र ते तव यौ उभा उ

भोबाहूरूषणोकामानांवर्षकोयायोबाहूनन्नमायुधान्नामिमिक्षतु॥ परिगृण्हीतः॥ ॥इतित्रयोदशोध्यायेतृतीयःखंडः॥१३॥अथ
३८२ चतुर्थखंडेजनीयंतइत्येकर्चंप्रथमंसूक्तंसेषोच्यते॥जनीयंतोन्वग्रवःपुत्रीयंतःसुदानवः॥सरस्वंतंहवामहइति॥जनीयंता
जायंतःआत्मपत्नीरितिजनयोजायाःताइच्छंतः॥पुत्रीयंतःपुत्रान्कामयमानाः॥सुदानवः॥शोभनदानाःअग्नवःउपगं
तारोवयंतुअस्यसरस्वंतंदेवंमध्यमस्थानंहवामहेस्तुमहेआह्वयामहेवा॥ ॥उतनइत्येकर्चंद्वितीयंसूक्तंसेषोच्यते॥उतनः
प्रियाप्रियासुसप्तस्वसासुजुष्टा॥सरस्वतीस्तोम्याभूदिति॥उतापिचनोस्माकंप्रियासुप्रियाणांमध्येप्रियाप्रियतमासप्तस्वसा
गायत्र्यादीनिसप्तछंदांसिस्वसारोयस्यास्तादृशीनदीरूपयास्तुल्यागंगाद्याःसप्तनद्यःस्वसारःसुजुष्टासुष्टुपुरातनैरृषि
भिःसेविताएवंभूतासरस्वतीदेवीस्तोम्याभूत्स्तोतव्याभवतु॥ ॥अथतत्सवितुर्वरेण्यमितितृतीयसूक्तंसैषारूपा॥तत्सवि ३८२
तुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्इति॥यःसवितादेवःनोस्माकंधियःकर्माणिधर्मादिविषयावा

सूप्रचोदयात्प्रेरयेत्॥तत्तस्यदेवस्यद्योतमानस्यसवितुःसर्वांतर्यामितयाप्रेरकस्यजगत्स्रष्टुःपरमेश्वरस्यवरेण्यंस
र्वैरुपास्यतयाज्ञेयतयाचसंभजनीयंगर्भःअविद्यातत्कार्ययोर्भर्जनाद्भर्गःस्वयंज्योतिस्तेजःपरब्रह्मात्मकंतेजःधीमहि
वयंध्यायामः॥तद्वातादृशितिगर्भोविशेषणंसवितुर्देवस्यतत्तादृशंगर्भंधीमहीतिकिंनदित्यपेक्षायामाह॥इतिलिंगव्यत्ययः॥
यद्वार्गोधियःप्रचोदयतितस्यायामेतिसमन्वयःयद्वायःसवितासूर्यःधियःकर्माणिप्रचोदयात्।प्रेरयति।तत्सवितुःसर्व
स्यप्रसवितुर्देवस्यद्योतमानस्यसूर्यस्यतत्सर्वैर्दृश्यतयाप्रसिद्धंवरेण्यंसर्वैःसंभजनीयंगर्भःपापानांतापकंतेजोमंडलं
धीमहीध्येयतयामधारयाम॥यद्वागर्भःशब्देनान्नमभिधीयतेयःसवितादेवोधियःप्रचोदयतितस्यदेवस्यप्रसा
दात्तद्भर्गोन्नादिलक्षणंफलंधीमहिधारयामःतस्यधारभूताभवेमेत्यर्थः॥भर्गःशब्दस्यान्नपरत्वेचआथर्वणं॥वेदाश्छं
दांसिसवितुर्वरेण्यंभर्गोदेवस्यकवयोन्नमाहुः॥कर्माणिधियस्तदुतेप्रब्रवीमितिप्रचोदयात्सवितायाभिरेतीति।भर्गः

5967/1973

१०३ भ्रस्जपाके। अस्तानस्य जोरोपधयोरन्यतरस्यामिति रोपधयोर्लोपः परमागमः। न्यंकादिपाठात्कुत्वं। धीमहि। ध्यायतेर्लिङि
बहुलं छंदसीति संप्रसारणं। व्यत्ययेनात्मनेपदं। यद्वा धीङ्। आधारे लिङि बहुलं छंदसीति विकरणस्य लुक्। प्रचोदयात्। चो
दयतेर्लेटि आडागमः। यद्वृत्तयोगान्निघातः आगमस्यानुदात्तत्वे णिचः स्वरः॥ ॥अथ सोमानं स्वरणमिति। अग्न आयूंषि
पवसेति। चतुर्थपंचमसूक्तात्मकयोर्द्वितीयाऋचाः प्रतीके। नवान्यत्राम्नाते॥ ॥अथ तानः ऊर्कमिति त्र्यात्मकं षष्ठं सूक्तं
तत्र। तानः ऊर्कं पार्थिवस्येति प्रथमायाऋचः प्रतीकमिदं सर्वोन्यत्राम्नाता॥ ॥अथ द्वितीया॥ ऋतमृतेन सपंता इषिरं दक्षमा
शाते॥ अद्रुहा देवौ वर्धेते इति। ऋतेनोदकेन निमित्तभूतेन ऋतं यज्ञं सपंता स्पृशंतौ इषिरं एषणवंतं दक्षः प्रवृद्धं यजमानं द्यावी वा आशाते
व्याप्नुतः। अद्रुहः अद्रोग्धारौ देवौ द्योतमानौ मित्रावरुणौ वर्धेते प्रवृद्धौ भवतः॥ ॥अथ तृतीया॥ वृष्टिद्यावा रीत्यापेषस्पते दानुमत्योः॥ ३०३
बृहंतं गर्तमाशाते इति। वृष्टिद्यावा वृष्ट्यर्थायोः स्थाने प्रयोः स्तौ वृष्टिद्यावा। अथ राज्ञः ईर्षस्य घोरं तरिक्षं याभ्यां तौ वा हे शौरीत्यापः

रीगतिरेषणयोः रीतिः प्राप्तिः सैव आप्तिरभिमतप्राप्तिर्ययोस्तौ ता हे गोरेषणंस्य पनी स्वामिनौ वृष्टिप्रदत्वात्तत्स्वामित्वं। दानुमत्याः दान
वत्याः दातुमुचिताया इत्यर्थः॥ एतद्विशेषणं। एवं महानुभावौ मित्रावरुणौ बृहंतं महांतं गर्तं रथं आशाते व्याप्नुतः। अधिष्ठितवंतावित्य
र्थः॥ ॥अथ युंजंतीति त्र्यात्मकं सप्तमं सूक्तं तत्र प्रथमा॥ युंजंति ब्रध्नमरुषं चरंतं परितस्थुषः॥ रोचंते रोचना दिवीति॥ इंद्रो हि परमै
श्वर्यः युक्तः परमैश्वर्य अग्निवाय्वादित्यनक्षत्ररूपेण सर्वतः प्रसरंतमिंद्रं परितस्थुषः परितो वस्थिता लोकत्रयवर्तिनः प्राणिनो युंजंति
स्वकार्ये कर्मणि देवतात्वेन संबंधि कुर्वंति तस्यैवेंद्रस्य मूर्तिविशेषरोचनानक्षत्राणि दिवि द्युलोके लोलंते प्रकाशंते अस्य मंत्रस्य कार्थ
परत्वं ब्राह्मणांतरे व्याख्यातं युंजंति ब्रध्नमित्याह॥ असौ वा आदित्यो ब्रध्नः आदित्यमेवास्मै युनक्ति परितस्थुष इति युनक्ति॥ अरुषमित्या
ह। अग्निर्वा अरुषः अग्निमेवास्मै युनक्ति चरंतमित्याह वायुर्वै चरन् वायुमेवास्मै युनक्ति परितस्थुष इत्याह इमे वै लोकाः परितस्थुषः
इमानेवास्मै लोकान् युनक्ति रोचंते रोचना दिवीत्याह। नक्षत्राणि वै रोचना दिवि नक्षत्राण्येवास्मै रोचयतीति॥ ॥अथ द्वितीया॥

599/1973

युंजंत्यस्य काम्या हरी विपक्षसा रथे॥ शोणा धृष्णू नृवाहसेति। अस्य च आदित्यशब्दप्रतिपाद्यस्यादित्यादिमूर्तिभिस्तत्र तत्रावस्थितस्येंद्र
१८४ स्य रथे हरी एतन्नामानौ द्वावश्वौ सारथयो युंजंति। इंद्रसंबंधिनो रथस्य योग्यौ हरिनामकौ हरी। इंद्रस्य रोहिताग्नेरिति पठितत्वात्। कीदृशौ हरी का
म्या कामयितव्यौ विपक्षसा विविधपक्षसा रथस्य पार्श्वौ ययो रथयोस्तौ विपक्षसौ रथस्य द्वयोः पार्श्वयोर्योजिताविति अर्थः शो
णा रक्तवर्णौ धृष्णू प्रगल्भौ नृवाहसा पुरुषाणामिंद्रतत्सारथिप्रमुखाणां वाहकौ॥ ॥अथ तृतीया॥ केतुं कृण्वन्नकेतवे पेशो
मर्या अपेशसे॥ समुषद्भिरजायथाः इति॥ हे मर्या मनुष्याः इदमाश्चर्यं पश्यत इत्यध्याहारः। किमाश्चर्यमिति तदुच्यते। आदित्यरूपो
यमिंद्रः उषद्भिर्दाहकैरश्मिभिः प्रतिदिनमुदयः काले वा संभूयाजायथा उदपद्यत॥ अथ वास्य सूर्यस्येवास्तमये मरणमुपचर्य व्यत्यये
नव हृदयवचनं कृत्वा संबोधनं क्रियते। हे मर्य प्रतिदिनं त्वं अजायथा इति। योऽयं किं कुर्वन्। अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहि १८४
ताय प्राणिने केतुं कृण्वन् प्रातः प्रज्ञानं कुर्वन्। अपेशसे रात्रावंधकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहिताय पदार्थाय प्रातरंधकार

निवारणेन पेशः रूपं नाम तत्। रूपमभिव्यज्यमानं कुर्वन् अकेतवे पेशस इति चतुर्थी षष्ठ्यर्थे द्रष्टव्या॥ ॥इति त्रयोदशोऽध्याये चतुर्थ
खंडः॥ ॥अथ पंचमखंडे अयं सोम इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अयं सोम इंद्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि। त्वं ह यं
चकृषे त्वं ववृष इंदुं मदाय युज्याय सोमं मिति॥ हे इंद्रायं सोमः तुभ्यं तदर्थं सुन्वे सूयते सुनोते कर्मार्थे। छांदसो लोपस्त आत्मनेपदे
ष्विति तलोपः तुभ्यं त्वदर्थमेव पवने पूयते। त्वं चास्यानुपानं पिब। त्वं हयमिंदुं सोमं चकृषे करोषि। त्वं ववृषे वृतवानसि॥
किमर्थं। मदाय मदार्थं। युज्याय सहायाय सोमं इंद्राय पिबकरत्वात्। सहाय इति प्रसिद्धं। यमेवं करोषि तं तं पाहीति समन्व
यः॥ ॥अथ द्वितीया॥ स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि॥ आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवंत
ति॥ स ईं सोऽयं भुरिषाट् भूरिभारस्य वोढा रथो न। रथ इव भुरिषाट् प्रभूतस्य भारस्य सोढा। अयोजि युज्यते कैः ऋत्विग्भिः स तु महा
महान्। किमर्थम् अयोजि पुरूणि बहूनि वसूनि धनानि सातये अस्मभ्यं दातुं। आत् ईं योगानंतरं विश्वा विश्वानि कर्माणि नहुष्या

601/1923

णि नृचक्षसो मनुष्याः तेषां संबंधीनि ज्ञाताज्ञातानि अस्माद्द्रोधीनि दुर्ध्वांसि स्वानि च नेवनमीये स्वर्षातौ स्वर्षातौ संग्रामनामैतत् स्वर्गलाभ

१८५ प्तुके संग्रामे नयं तरगच्छंतु। नवातिर्गतिकर्मा। यद्वा सोमं संग्रामे युध्यार्थिनः संगच्छंति॥ ॥अथ तृतीया॥ शुष्मी शर्धो न मारुतं पवस्वाभिशस्ता

दिव्या यथा विट्॥ आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः॥ इति॥ हे सोम शुष्मी बलवांस्त्वं मरुतां बलमिव पवस्व त

थ हृत्वांतः। मे चस्य च यति। यथा दिव्या विट् प्रजा अनभिशस्ता अभिशापो निंदा। अनिंदिता पवते मरुतो वै देवानां विश इति हि ब्राह्मणं।

किंच। आपो न उदकानीव मक्षु क्षिप्रं पवमानस्त्वं सुमतिभिर्भव नोस्माकं। किंच। सहस्राप्साः अप्स इति रूपनाम। बहुरूपस्त्वं पृतनाषा

ट्। पृतनानामभिसवितेंद्र इव यज्ञो यष्टव्यो भवसीति॥ ॥अथ त्वमग्न इति त्र्यात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ त्वमग्ने यज्ञानां होता वि

श्वेषां हितः॥ देवेभिर्मानुषे जने॥ इति॥ हे अग्ने त्वं विश्वेषां सर्वेषां समस्तरूपेण भिन्नानां यज्ञानां होता होमनिष्पादकोसि। यद्वा यज्ञा १८५

नां संबंधी देवानामाह्वाता भवसि। ईतदुच्यत आह। यस्मात्त्वं मानुषे मनोः संबंधिनी मनुष्ये जने यजमाने देवेभिर्देवैर्हितः॥ होतृत्वे

नानिहितोसि तस्मादित्यर्थः॥ ॥अथ द्वितीया॥ स नो मंद्राभिरध्वरे जिह्वाभिर्यजा महः॥ आ देवान्वक्षि यक्षि च॥ इति॥ हे अग्ने स त्वं नोस्मा

कं अध्वरे यज्ञे मंद्राभिर्मदकराभिः। स्तुत्याभिर्वा जिह्वाभिर्ज्वालाभिर्महो महतो देवान्यजा ज्वालाभिस्तर्पय। कथं तर्पितव्यत इत्युच्यते। देवा

न्वक्ष्यानि ग्राहेन आवक्षि आवह। ततोपक्षि च यज च हवींषि तेभ्यो देहीत्यर्थः॥ ॥अथ तृतीया॥ वेत्था हि वेधो अध्वनः पथश्च दे 603/1973

वांजसा॥ अग्ने यज्ञेषु सुक्रतो॥ इति॥ हे वेधो विधातः सुक्रतो शोभनकर्मन देवदानादिगुणयुक्ताग्ने त्वं यज्ञेषु दर्शपूर्णमासादियागेषु

अध्वनो महामार्गान् पथश्च यज्ञमार्गांश्च अंजसा वेन वेत्थ जानासि। हि यस्मादेवं तस्मादेवं न स्मात्। यज्ञमार्गाद्भ्रष्टं यजमानं पुनस्त

मार्गं प्रापयेत्यर्थः॥ ॥अथ होता देव इति त्र्यात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ होता देवो अमर्त्यः पुरस्तादेति मायया॥ विदथानि प्र

चोदयन्निति॥ होता होममनुष्यादकः अमर्त्यो मरणधर्मरहितः देवो द्योतमानः विदथानि वेदितव्यानि कर्माणि चोदयन् प्रकर्षेणात्प्रे

रयन्॥ सोग्निर्मायया कर्मविषया भिज्ञानेन युक्तः सन् पुरस्तात्कर्मप्रारंभकाल एव एति अस्मायागच्छति॥ ॥अथ द्वितीया॥ ॥

वाजी वाजेषु धीयते ध्वरेषु प्रणीयते ॥ विप्रो यज्ञस्य साधन इति ॥ वाजी बलवानग्निर्वाजेषु युद्धेषु धीयते देवैः शत्रुहननार्थं निधीयते किं
३९६ च । अध्वरेष्वग्निहोत्रादिषु प्रणीयते अध्वर्य्वादिभिः प्रकर्षेण हवनीयादिस्थाने षु प्रक्षिप्यते । अत एव विशेषो मेधावी सन्नग्निः यज्ञः
स्याग्निहोत्रादेः साधनः साधको भवति ॥ ॥अथ तृतीया ॥ धियाचक्रे वरेण्यो भूतानां गर्भमादधे ॥ दक्षस्य पितरं तनेति ॥ योग्निर्धिया
आधानयजमानेच्छिरूपेण कर्मणा चक्रे । आहवनीयरूपतया कृतो भूत् । अत एव वरेण्यः सर्वैर्यजमानैः कर्मांगत्वेन वरणीयाश्च
श्चाग्निर्भूतानां स्थावरजंगमात्मकानां अंतर्गर्भं स्वात्मानमेव गर्भरूपतया आदधे सर्वत्र दधार । पितरं सर्वस्य जगतः पालकम् ॥
तमिममग्निं दक्षस्य दक्षं प्रजापतेः तनातनया वेदिरूपा भूमिर्दर्शपूर्णमासाग्निहोत्रादिकर्मसिध्यर्थं धारयति । भूमेर्दक्षपुत्रि
त्वे मंत्रवर्णः ॥ अदितिर्ह्यजनिष्ट दक्षया दुहिता तवेति ॥ ॥इति त्रयोदशेऽध्याये पंचमः खंडः ॥ अथ षष्ठे खंडे आ कलेषु सिंचत मिति त्वाष्ट्र ३९६
कं प्रथमं सूक्तं तत्र प्रथमा ॥ आ कलेषु सिंच । तश्रियं रोदस्योरभिश्रियः ॥ रसा दधीत वृषभमिति ॥ कलेति दुग्धे गोपयसि श्रियं श्रयणम आ

ज्ये पयो आसिंचत ॥ अध्वर्यवः । कीदृशमा अंगिरे रोदस्योः कर्मणि पक्षे षा । द्यावापृथिव्योरभिश्रियमभिश्रियं तं अग्निं संयोगात्तावत्सर्वतं
प्रवृद्धमित्यर्थः ॥ अथवा तत्कालात्मश्विनौ द्यावापृथिव्यावित्येके इति यास्केनोक्तत्वादश्विनोरभिश्रियमित्यर्थः ॥ सचनानंतरं रसा रसे आ
ज्ये पयसि वृषभं वर्षकमग्निं दधीत धारयेत ॥ अज्ञाया अग्नेर्याज्याश्चारस्याप्यग्निसंयोजितनुमुन्चितं । आग्नेयी वा एषा यदजा इति ब्रा
ह्मणं ॥ ॥अथ द्वितीया ॥ तेज्ञानतस्य मोक्षं संवत्सासोन मातृभिः ॥ मिथोन संज्ञामिभिरिति ॥ ततागावोऽज्ञानतज्ञात्वा वत्सः ॥ अथवा सा
मान्यकारेण तद्गतिं पुनर्निर्दिशः किं संधत्स्वकाया । ओक्यं निवासं महावीरं तत्रादीगंधुमगमन्नित्यर्थः । तदेवाह वाश्रासो न यथा वत्सा मा
तृभिर्जननीभिः सह तथा संगच्छंते जामिभिर्बंधुभिः सहिता गावो मिथः प्रत्येकं सं नसंत संगच्छते महावीरं ॥ ॥अथ तृतीया ॥ उप
स्रक्केषु बप्सतः कृण्वते धरुणं दिवि ॥ इंद्रे अग्ना नमः स्वरिति । महावीरस्य स्रक्केषु बप्सतो ज्वालया भक्षयतोग्नेः अंनं धरुणं इंद्रे अ
ग्नौ च ध्यमाणत्वादिंद्राग्न्योर्द्धारकमंनं दिवि अंतरिक्षे उपकृण्वते उपकुर्वते ॥ ऋत्विजः यदाग्निः महावीरं दहद् इति । तदा तदा ॥

605/1973

त स्योपर्युभयविधं शरीरं आसेचयंतीत्यर्थः॥ एवं महावीरे आसिच्यं दे अग्ना अग्नीवत्सः सर्वैगं गव्यमाज्यं च। नामान्नं अथवा स्वः अंत
३८७ रिक्षे यो ऽयं संयतो यज्ञ उग्रस्तेषन्मणाः॥ सधीयंतीति शेषः॥ ॥अथ तदिदमस इतिसक्तात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ तदिदास भुव
नेषु ज्येष्ठं यतो यज्ञ उग्रस्त्वेषन्मणाः॥ सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदंत्यूमाः॥ इति॥ तज्जगत्कारणत्वेन सर्वैः संतप्रसि
द्धं॥ इदंब्रह्मैव धारणे भुवनेषु। भूसत्तायां। सत्कारण पृथिव्यादिषु लोकेषु मध्ये तज्जगत्कारणं ब्रह्मैव ज्येष्ठं प्रशस्यतमं आस बभूव॥
तस्य परमार्थसत्वात् तद्व्यतिरिक्तानां व्यावहारिकसत्वात्॥ यद्वा ज्येष्ठं वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं बभूव। अस्ते
र्लिटि छंदस्युभयथेति सार्वधातुकत्वाद् अस्तेर्भूरिति भूभावाभावः॥ यद्वा तदुक्तं देवब्रह्मस्वप्रकाशतया आसदीदीपे। आसगतिदीप्त्यादानेषु अस्मात् लिटि रूपं॥ यतः उपादानभूतान्यस्मात् ब्रह्मणः उग्रः उद्गूर्णः त्वेषन्मणः प्रदीप्तबलः सूर्यात्मकं इदं तेजः जातो बभूव। श्रूयते हि। चक्षोः सूर्यो अजायतेति सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति च। जनिकर्तुः प्रकृतिरिति प्र ३८६

कृतेरपादानसंज्ञायां यत इति पंचमी॥ यज्ञ इति लिटि गमहनेत्यादिना उपधालोपः। द्विर्वचनेऽचीति तस्य स्थानिवद्भावाद् द्विर्वचनादिय इत्वाः
न्नित्यमिति नित्यप्रतिषेधः। स च जज्ञानो जायमान एव सद्यः शीघ्रं शत्रून् शातयितृन् मंदेहादीन् राक्षसान् निरिणाति निहंति। य
द्वा उपासकानां पापरूपान् शत्रून् निहंति। तथा च ब्राह्मणं। सद्यो हि एष जातः पाप्मानमहन्तेति जज्ञान इति लिटः कानच् छंदसि मतत्। रिणाति। रीगतौ। रत्वणयोः क्र्यादिकः प्वादीनां ह्रस्व इति ह्रस्वत्वं विश्वे सर्वे ऊमाः अवंतिरक्षंतीत्यूमाः प्राणिनः। अवतेरणादिको मन्प्रत्य
यः ज्वरत्वरेत्यादिना वकारोपधायोः स्थाने ऊठ सर्वे प्राणिनो यं सूर्यात्मकं स्थंतमिंद्रमनुलक्ष्य मदर्थमुदगात् मदर्थमुदगादिति यदं
तिरक्ष्यंति मदी हर्षे व्यत्ययेन शप्। तथा च ब्राह्मणी भूतानि वै विश्व ऊमास्त एनमनु मदंति उदगात् उदगादिति॥ तैत्तिरीयके च। त
स्मात् सर्वप्रवमन्यते मां प्रत्युदगादिति॥ यद्वा यं स्तुत्यादिभिर्मा यंतं मनुप्रजात सर्वे प्राणिनः अभीष्टप्राप्त्या हर्षयंति॥ अनुर्ल
क्षण इति॥ अनोः कर्मप्रवचनीयत्वात् कर्मप्रवचनीययुक्त इति॥ सद्यो यज्ञ इत्यन्वयः॥ ॥अथ द्वितीया॥ यातुधानः राक्षसा

607/1973

भूर्योजाः शत्रुर्दासायाभियसं दधाति। अव्यनच्च व्यनच्च सस्नि सं तेन वंत प्रभृता मदेष्विति। ग्रावर सा बलेन वाय धानो वर्धमानः अत एव भू
१०८ र्योजाः बहुबलः शत्रुः शातयिता। इंद्रः दासाय उपक्षयकारिणे शत्रवे भियसं भीतिं दधाति विदधाति करोति अव्यनत् अविविधमानीतिश्व
सितीति व्यनत्प्राणकं जंगमं। तदुभयलक्षणमव्यनच्च स्थावरं तदुभयमपि सस्नि संस्नातं इंद्रेण सम्यक् शोधितं भवति॥ स्नातेः आदृगमहन
इति व्यत्ययेन कर्मणि किनु प्रत्ययः यद्वा अंतर्भावितण्यर्थात् कर्तरि वा किन् ऋष्यादिना सम्यक् स्नापयिता शोधयिता भवति। नलोकाव्यये
ति कर्मणि षष्ठ्याः प्रतिषेधः॥ शिष्टः पादः प्रत्यक्षकृतः हे इंद्र ते तव मदेषु हर्षेषु हविर्विषाख्यात्येच भक्तेषु सत्सु प्रभृता प्रभृतानि प्रकर्षेण ध
तानि पोषितानि वा सर्वाणि भूतजातानि वा सं नवंत संगच्छंते स्तोतुं हवींषि च दातुं समृद्धीभवंतीत्यर्थः॥ नवतिर्गतिकर्मा॥ प्रपूर्वात् बिभ १०८
र्तिकर्मणि निष्ठायां उदित्वादिडभावः सिवद्रुलभितशेलोपिः॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ ॥अथ तृतीया॥ त्वे क्रतुमपि वृंजंति विश्वे द्विर्यदेते
त्रिर्भवंत्यूमाः॥ स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीरिति॥ हे इंद्र त्वे त्वयि सप्तम्याः सुलुगिति सप्तम्येकवचनस्य।

रो आदेशः विश्वे सर्वे यजमानाः क्रतुमनुष्ठेयं कर्म त्वे वृंजंति समापयंति॥ अपि वाध्वे ब्राह्मणोक्तः सर्वभूतानां सर्वमनसां समुच्चया
र्थः सर्वाणि पृथिव्यादीनि भूतानि सर्वेषां प्राणिनां मनांसि सर्वे यज्ञक्रतवश्च व्याप्नुवत्याव्य वयजमानैः परिसमाप्यंत इत्यर्थः॥ तथा
च ब्राह्मणं त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सार्वक्रतवोऽपि रंजतीत्येव तदाहेति। यद्यस्मादेते त्वत्र मास्तर्पकाः॥ अव
तस्तर्पणार्थात्सौत्राद्धिंको मन्प्रत्ययः॥ ज्वरत्वरेत्यादिना वकारोपधयोरूठ्। इंद्रः शाय यजमानाः पूर्वमेकाकिनः संतः पश्चाद्विः॥
म द्विवारं स्त्रीरूपेण पुंरूपेण च जाताः संतः पुनरपत्येन सार्धं त्रिः त्रिवारं जन्मभाजो भवंति एक एव आत्मा स्त्रीपुंसरूपेण जायंत
। अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः पुत्रोऽप्यात्मैव। आत्मा वै पुत्रनामासीति श्रुतेः॥ यत एवमेते त्रिभिरूमा भवंति। ततो वागम्य
ते त्वय्येव अनुष्ठितं सर्वं कर्म परिसमापयंतीति। तथा च ब्राह्मणं। द्वौ द्वौ संतौ मिथुनौ प्रजायेते प्राजापत्या इति। हे इंद्र वस्वादोः प्रिया
द्रूह धनाद्रपि स्वादीयः स्वादुत्तरं प्रियतरं अपत्यं स्वादुना देभ्ते न मिथुनेन मातापित्रात्मनेन संमधु मधुरं मधुना मधुहेतुना

609/1973

मिथुनांतरेणपोत्रेणवासुष्टु अभियोधीः अभियोधियअभितः क्रीउयथाकृनामनेकार्थत्वात्। युध्यतिरत्रक्रीडार्थेवर्ततेमिथुनंवै
१८९ स्वादुषत्रजास्त्वादित्यादिब्राह्मणमंत्रानुसंधेयं॥ ॥अथत्रिकद्रुकेष्वितिषड्चात्मकंतृतीयंसूक्तंतत्रप्रथमा॥ त्रिकद्रुकेषुमहिषोयवाशि
रंतुविशुष्मस्तृपत्सोममपिबद्विष्णुनासुतंयथावशत्॥ सईंममादमहिकर्मकर्तवेमहामुरुंसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइं
दुःरिति॥ महिषोमहान्पूज्योवातुविशुष्मोबहुबलः तृंपंस्तृप्तःप्रीणनेनतुदाहिः॥ त्रयोनिंद्रः त्रिकद्रुकेषुज्योतिर्गौरायुरित्येतन्नामकेः
षु अभिप्लवकेषु अहःसु सुकृत्तमभिषुतम्॥ यवाशिरंयवमयैःसक्तुभिर्मिश्रितंत्र्यादुःपूर्वस्यश्रीणातेःक्विपि अपस्पृधेथामित्याः
दिनाशिरादेशः॥ तंसोमंविष्णुनासपिबत्॥ यथावशंअवशत् यथेयथातंसोमममकामयततथापिबेत्॥ वशकांतौबहु १८९
लंछंदसीतिशपोलुगभावः॥ पानुःससोमः महांमहांतमुरुं। तेजसाविस्तीर्णंइमेनमिंद्रंममादअमादयत्॥ किमर्थंमहिमद
तःशत्रुहननादिलक्षणंकर्मकर्तवेकर्तुं। सत्यइंदुः स्तवन्नदेवादीप्यमानः ससोमः सत्यंयथार्थभूतंदेवंसोमंकामयमा

नमीमेनमिंद्रंसश्चत्॥ सश्चतिर्व्याप्तिकर्माव्याप्नोतुतंपतत्पश्चितपाठो॥ सत्यइंदुःसत्यमिंद्रंसत्यमिंद्रंसत्यइंदुरिति॥ अस्मिन्न्त्वेप्र
त्येकमृगावसानेत्यत्रेनपाठो॥ ॥अथद्वितीया॥ साकंजातःक्रतुनासाकमोजसाववक्षिथसाकंवृद्धोवीर्यैः सासहिर्मृधोविचर्ष
णिः॥ दाताराधःस्तुवतेकाम्यंवसुप्रचेतनंसैनंसश्चद्देवोदेवंसत्यइंदुःसत्यमिंद्रमितिहेइंद्रत्वंक्रतुनाकर्मणाप्रज्ञयावासाकंस
हजातःसाकमोजसाबलेनचववक्षिथविश्वंवोढुमिच्छसि॥ वद्देःसनंतस्यलिटिमंत्रत्वादिभवति॥ किंच हेप्रचेमप्रक्षंज्ञानेंद्रं
वीर्यैःशत्रुहननादिलक्षणैःपराक्रमैःसाकंवृद्धःप्रवृद्धःमृधोहिंसकान्संग्रामान्वासासहिः॥ नलोकाव्ययेतिषष्ठीप्रतिषेधः
तेषामभिभविता॥ विचर्षणिःपुण्यकृतोपुण्यकृतेश्चविशेषेणद्रष्टा॥ स्तुवतेस्तोत्रंकुर्वाणाययजमानायराधःसाकंकाम्यंप्रार्थनीयं
वसुधनंदातासनंचववक्षिथेतिसमन्वयःसेनमितिपरोक्षानिर्देशः॥ सिद्धार्थश्चप्रचेतनेतिछंदोगानांविशेषेणपाठः॥ ॥अथतृ
तीया॥ अथात्विषीमांअभ्योजसाक्रिविंयुधाभवदारोदसीअपृणदस्यमज्मनाप्रवावृधे॥ अधत्तान्यंजठरेप्रेमरिच्यतप्रचेत

611/1973

ससेनं सश्वं ददृवो देवं सत्यं इंद्रः सत्यामिंद्रमिति॥ अधा धाथ सोमपानानंतरं त्विषिमान् दीप्तिमान् इंद्र ओजसा बलेन क्रिविं नामासुरं
१९० युधा युधेन अभ्यभवत् अभिभूतवान्॥ किंच। स इंद्रः रोदसी द्यावापृथिव्यौ प्रकर्षेण वर्धते। यद्वा अस्य क्रिवेः असुरस्य म
ज्मना सारेण रोदसी अपृणयत। स इंद्रः सोमं द्विधा विभज्य अन्यं भागं स्वकार्ये धारयत् अधत्त स्य धत्त॥ ईमेनमपरं भागं देवेभ्यः प्रा
रिच्यत प्रारेचयत्। एतेनार्थमिंद्राय अर्धमन्येभ्योऽपि देवेभ्य इत्युक्तं भवति। तथा च तैत्तिरीयकं यत्स्य वेषामर्धमिंद्रः प्रचित
स्मादृद्धिं देवतानां भूयिष्ठभाक्तम इति। हे इंद्र त्वं प्रचेतय। एवंभूतं सोमं देवांश्च सम्यक्। ज्ञापय प्रापयेत्यर्थः। अन्यत् पूर्वव
त्। प्रचेतयेति विशेषपाठः॥ ॥७॥ इति त्रयोदशाध्याये षष्ठखंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतु १९०
रो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे त्रयोदशोध्यायः समाप्तः॥ ७, ७, ७॥ ७॥ ७॥॥७॥ ॥

श्री॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ अथ चतुर्दशोध्याय आरभ्यते। तत्र प
थमखंडे अभिप्रगोपतिमिति त्र्यृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अभिप्रगोपतिं गिरेंद्रमर्च यथा विदे॥ सूनुं सत्यस्य सत्पतिमि
ति॥ हे स्तोतः गोपतिं गवां स्वामिनं इंद्रं अभिप्रार्च प्रकर्षेण पूजय गिरा स्तुत्या यथा विदे। स यथा स्वात्मानं स्तुत प्रकारं जानाति।
यथा वा यागं प्रतिगंतव्यमिति जानाति। तथार्चेति। कीदृशमिंद्रं सत्यस्य यज्ञस्य सत्यस्य वा तं पुत्रं तत्रानुरक्तत्वात्। सूनुरित्युपच
र्यते॥ सत्पतिं सतां पालकं॥ ॥अथ द्वितीया॥ आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि॥ यत्राभि संनवामहे॥ इति॥ हरयो हरि
तवर्णाः अरुषाः अरुषीः रोचमानाः अधि बर्हिषि अधीति सप्तम्यर्थानुवादी। बर्हिषा स्तते आससृज्रिरे आसृजंतु। यत्र य
स्मिन् बर्हिषि स्थितमिंद्रमभिसंनवामहे अभिसंस्तुमः॥॥ अथ तृतीया॥ इंद्राय गाव आशिरं दुदुह्रे वज्रिणे मधु॥ यत्सीमुप
ह्वरे विदत्॥ इति॥ इंद्राय गावः आशिरमाश्रयण साधनं पय आदिकं मधु मदकरं दुदुह्रे दुदुहते॥ कीदृशाय वज्रिणे वज्र 613/1973

युक्तायेंद्राय। यद्यदा उपव्हरे समीपे वर्तमानं मधु सोमरसं सोर्वनतो विंदत लभते तदा॥ ॥अथा नो विश्वास्विति प्रगाथात्मकं द्वि
१९३ तीयं सूक्तं तत्र प्रथमा॥ आ नो विश्वासु हव्यमिंद्रं समत्सु भूषत॥ उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषमेति॥ हे ऋत्विजो
विश्वासु सर्वासु समत्सु असकरसु युद्धेषु हव्यं सर्वैर्देवैरात्मरक्षणार्थमाव्हातव्यमिंद्रमुद्दिश्य नोस्माकं यज्ञे ब्रह्माणि हवीरूपा
ण्यन्नानि वा। तथा सवनानि प्रातःसवनादीनि त्रीणि सवनानि च उपाभूषत उपसमीपे सम्यगलंकुरुत॥ हे वृत्रहन् वृत्रस्यासु
रस्य पापस्य वा हंतः परमज्याः युध्येषु शत्रून् हननार्थं परमा अविनश्वरी ज्या मौर्वी यस्य स तथोक्तः॥ यद्वा परमानबलेन प्रकृष्टा
न शत्रून् जिनाति हिनस्तीति परमज्याः॥ हे ऋचीषम स्तुत्या समस्तुभिरभिमुखीकरणीय। एवं संस्तुतें द्र त्वं अस्मदभिलषितानि प्र
यच्छेति शेषः॥ हव्यमिंद्रं समत्सु भूषत हव्य इंद्रः समत्सु भूषतु इति पाठौ॥ वृत्रहन् परमज्या ऋचीषम। वृत्रहा परमज्या ऋ १९३
चीषम इति च पाठौ॥ ॥अथ द्वितीया॥ त्वं दाता प्रथमो राधसामस्यसि सान ईशानकृत॥ तुविद्युम्नस्य युज्यावृणीमहे पु

त्रस्य शवसो महइति॥ हे इंद्र प्रथमः सर्वेषां मुख्यस्त्वं राधसां धनानां दातासि। यद्वा। धनदातॄणां मध्ये त्वं प्रथम आद्यो भवसि। त
था ईशानकृत। नरस्तोतॄन् ईशानान् ऐश्वर्ययुक्तान् कुर्वन्। त्वं सत्यः सत्यकर्मासि। यथार्थकर्मा भवसीत्यर्थः। यस्मादेवं तस्मात् वयं तु 615/1973
विद्युम्नस्य बहुधनवतो बहून्नस्य वा शवसो बलस्य पुत्रस्य शत्रुवधार्थं बलकारणत्वेनोत्पन्नत्वात् बलपुत्रस्य अत एव महो मह
तस्तव युज्या योग्यानि धनानि आवृणीमहे संभजामहे॥ ॥अथ प्रत्नं पीयूषमिति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ प्रत्नं पी
यूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत॥ इंद्रमभि जायमानं समस्वरन्निति॥ दिवो द्युलोकात् तत्र स्थितैर्देवैः पीयूषं पात
व्यं प्रत्नं पुराणं यत्सोमरूपमन्नं उदकं उक्थ्यं प्रशस्यमस्ति। पूर्व्यं पुरातनं तत्सोमरूपमन्नं महो महत गाहात्। गाः हननात् द्युलोका
न्निरधुक्षत आभिमुख्येन निर्दुहंति। ननोदुग्धं मित्रमिंद्रमभिलक्ष्य जायमानं तं सोमं समस्वरन् स्तोतारः संस्तुवंति प्रत्नं दि
व इति पाठौ॥ ॥अथ द्वितीया॥ आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत॥ दिवो न वारं सविता व्यूर्णुत इति।

१९२ आदनंतरं पश्यमानासः एवं पश्यंतो दिव्या दिविभवाः वसुरुचो नाम केचिदार्ष्यं वं धुषु साधु ईमेनं सोमं अभ्यनूषत अभ्यस्तुवन् कस्मादनंतरमक्षि
।उच्यते। हिवो रेचः द्योतमानः सविता सर्वस्य प्रेरकः सूर्यः अपारमावरकमंधकारं न प्रूषुते नोपगमयति। तएनमस्तुवन् सूर्योदयात्प्रागेव
हि सोमं स्तुवंति खलु। दिवो न वारं न देव इति पाठौ॥ ॥अथ तृतीया॥ अधयादिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना॥ यूथे
न निष्ठा वृषभो विराजसि॥ हे पवमान सोम अथानंतरं यद्यथा इमे रोदसी द्यावापृथिव्यौ इमा इमानि विश्वा विश्वानि भुवना भूतजाता
नि च मज्मना बलेन विराजसि विशेषेण राजयसि। स त्वं तथा कुर्वन् भुवने षु वर्तिष्व स इति शेषः। तत्र दृष्टांतः। यूथेन यथा कश्चिद् वृषभः
यूथे गवां समूहे निष्ठा निष्ठितः सन् सर्वा गा अलंकुरुते तद्वत्। विराजसि वर्तिषस इति पाठौ॥ ॥इमम् षु इति त्र्यात्मकं चतुर्थं सूक्तं तत्र प्र
थमा॥ इमम् षु त्वमस्माकं सनिं गायत्रं नव्यांसं॥ अग्ने देवेषु प्रवोच इति॥ हे अग्ने त्वमस्माकमस्मत्संबंधिनं इमम् षु पुरोदेशे अनुष्ठीय १९२
मानमपि सनिं हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपं वचोपि देवेषु देवानामग्ने प्रवोचः प्रकर्षेण ब्रूहि॥ ॥अथ द्वितीया॥ ॥

विभक्तासि चित्रभानो सिंधोरूर्मा उपाक आ॥ सद्यो दाशुषे क्षरसि॥ हे चित्रभानो विचित्ररश्मयुक्ताग्ने विभक्तासि विभाजयिता धनस्य प्राप
यिता अभिभवसि। तत्र दृष्टांत उच्यते। अकार उपमार्थः। यथा सिंधोर्नद्या उपाके समीपे ऊर्मौ ऊर्मितरंगा पलक्षितं कुल्यादिरूपं प्रवा
हं विभजंति। तद्वत् दाशुषे हविर्दत्तवते यजमानाय सद्यः तदानीमेव क्षरसि। कर्मफलं क्षरतां दातृत्वं करोषि॥ ॥अथ तृतीया॥ आ नो भ
ज परमेष्वा वाजेषु मध्यमेषु॥ शिक्षा वस्वो अंतमस्य॥ हे अग्ने परमेषूत्कृष्टेषु द्युलोकेषु वर्तिषु वाजेषु अन्नेषु नोस्मान् आभज सर्वतो प्रा
पय। मध्यमेष्वंतरिक्षलोकेषु वर्तिषु वाजेष्वाभज। अंतमस्यांतिकतमस्य भूलोकस्य संबंधीनि च रेवा वसूनि शिक्षदेहि॥ ॥अहमि
धीति त्र्यात्मकं पंचमं सूक्तं तत्र प्रथमा॥ अहमिद्धि पितुः परि मेधामृतस्य जग्रह॥ अहं सूर्य इवाजनीति। पितुः पालकस्य ऋतस्य
सत्यस्याग्नेः स्वयं द्रष्टुमेधामनुग्राहात्मिकां बुद्धिं अहमित अहमेव परिजग्रह परिगृहीतवानस्मि नान्यो हि यस्मादेवं तस्मात् अ
हं सूर्य इवाजनि। सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति। तथाजनि प्रादुर्भूतं॥ जग्रह आजग्र इति पाठौ॥ ॥अथ द्वितीया॥ ॥

617/1973

अहं प्रत्नेन जन्मना गिरः शुंभामि कण्ववत्॥ येनेंद्रः शुष्ममिद्दधे इति॥ कण्ववत् कण्व इव अहमपि प्रत्नेन जन्मना गिरः इंद्रविषयाणि स्तो
१९३ त्राणि शुंभामि अलंकरोमि। येन स्तोत्रसमूहेनेंद्रः शुष्मं शत्रूणां शोषकं च बलं दधत्॥ धत्त एव धारयत्येव॥ यत् स्तोत्रमिंद्रे इंद्रे शुष्मं बलमव
श्यं जनयति तत् स्तोत्रमलंकरोतीत्यर्थः॥ जन्मनामन्मनेति पाठे॥ ॥ अथ तृतीया॥ ये त्वामिंद्र न तुष्टुवुरृषयो ये च तुष्टुवुः॥ ममेद्वर्ध
स्व सुष्टुतः इति। हे इंद्र ये जनास्त्वां न तुष्टुवुः न स्तुवंति ये च ऋषयो मंत्राणां द्रष्टारो जनाः तुष्टुवुः त्वां स्तुवंति॥ उभयेषां मध्ये ममेत्तत्॥
ममैव स्तोत्रेण सुष्टुतः शोभनं स्तुतः सन् वर्धस्व वृद्धो भव॥ ॥ इति चतुर्थेऽध्याये प्रथमः खंडः॥ अथ द्वितीयखंडे अग्ने विश्वेभिरिति
तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत॥ ये देवत्रा य आयवस्तेभिर्नो महया गिरः इति॥ हे स
हस्कृत सहसा बलेन कृत उत्पादित हे अग्ने विश्वेभिर्विश्वैः सर्वैर्यैः स्तूयत उक्तैरग्निभिः सह ब्रह्म अस्माभिः क्रियमाणं स्तोत्रं इ १९३
विरूपमन्नं वा जोषि जुषस्व सेवस्व। किंच ये देवत्रा ये अग्नयो देवेषु वर्तंते। देव मनुष्येति सप्तम्यर्थे त्राप्रत्ययः॥ य आयुषु ये चाग्न

यो मनुष्येषु वर्तंते तेभिस्तैः सर्वैरग्निभिः सह नोऽस्माकं गिरः स्तुतिलक्षणा वाचः महय पूजय॥ ॥ अथ द्वितीया॥ प्र स विश्वेभिरग्निभिरग्निः
स यस्य वाजिनः॥ तनये तोके अस्मदा सम्यग्वाजैः परीवृतः इति॥ यस्य वाजिनः यस्याग्नेः वाजिनो हविर्लक्षणान्नवंतः अनेके पुरुषा
रः संति। सोऽग्निर्विश्वेभिर्विश्वैः सर्वैर्यैः स्तूयत उक्तैरग्निभिः सह। एकस्तच्छब्दो नुवादः॥ अस्मत् इति अस्मासु। सुपां सुलुगिति
सप्तम्या लुक्। प्राङो रुपसर्गयोः श्रवणादुचितक्रियाध्याहारः॥ प्रागच्छतु सम्यङ् यथा यज्ञकालानतिक्रमेणेत्यर्थः॥ कथंभूतः वाजैः प
रिवृतः वाजैरस्मभ्यं दातव्यैरन्नैः परिवृतः परिवेष्टितः संहितइत्यर्थः॥ न केवलमस्मास्वेव यज्ञादिसिध्यर्थं अग्नेः परिवृतोऽग्निरा
गच्छतु। किं तर्हि तनाय अस्मत्पुत्रे आगच्छतु॥ न केवलं पुत्रे तोके पुत्रपुत्रेऽपि दातव्यैर्वाजैः परिवृतोऽग्निरागच्छतु॥ इति परोक्षकृ
तोऽग्निः स्तूयते॥ अस्मदंशे वाग्निसाध्यक्रियानुपरमः प्रार्थ्यते॥ ॥ अथ तृतीया॥ त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय॥ त्वं नो देव
तातये रायो दानाय चोदयेति। हे अग्ने त्वं अग्निभिरन्यैर्विभूतिभिर्भूते रन्नैरग्निभिः सार्धं नोऽस्माकं ब्रह्म स्तोत्रं यज्ञं च वर्ध

619
1973

या। यथा त्वं नोस्माकं देवतातये इति। यज्ञनामैतत् यागार्थं राधो धनस्य दानाय प्रदानाय चोदय शत्रून् प्रेरय॥ ॥अथ त्वे सोमेति तृचात्मकं
१०५ तृतीयं सूक्तं तत्र प्रथमा॥ त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः॥ स त्वं नो वीर वीर्याय चोदयेति॥ हे सोम प्रथमाः
पुरातनाः यद्वा यष्टव्येन सर्वेषां जनानां मुख्या वृक्तबर्हिषः वृक्तं छिन्नं बर्हिर्यज्ञार्थं मातिरः वृक्तबर्हिषो यजमाना महे महते वाजाय बलाय श्र
वसे नाय वधियं बुद्धिं त्वत्यिदधुः॥ निहितवंतः॥ तस्मात् हे वीर समर्थ सोम स तादृशस्त्वं नोस्मान् पि संग्रामे वीर्याय सामर्थ्याय चोदय प्रेर
य द्वा वीर्याय वीरेषु पुत्रेषु भवाय सुखाय वास्मान् प्रेरय॥ ॥अथ द्वितीया॥ अभ्यभि हि श्रवसा ततर्दिथोत्सं न कंचिज्जनपानमक्षितं॥ शर्या
भिर्न भरमाणो गभस्त्योः इति। हे सोम त्वं श्रवसा अन्नेन हेतुना अभ्यभिः ततर्दिथ हि पवित्रमभितः सवान् सिंचिन् वानसि। तत्र दृष्टां १०५
तद्वयं। उत्सं न यथा कश्चित् जनपानं अस्मिन् जना उदकं पिबंति तं अक्षितमक्षीणं कंचित् कूपं च न। उत्सं उत्सरणशीलं वाप्यादिकं अभि
तृणंति। यथा वा कश्चित् गभस्त्योर्बाह्वोः शर्याभिरंगुलीभि भरमाण उदकं संभरन् कंचिदभितृणंति। तद्वत्॥ ॥अथ तृतीया॥ अजी

जनो अमृत मर्त्याय कमृतस्य धर्मन्नमृतस्य चारुणः॥ सदासरो वाजमच्छा सनिष्यदतीति॥ हे अमृत मरणधर्मरहित सोम त्वं ऋतस्य सत्य
भूतस्य चारुणः कल्याण अमृतस्योदकस्य धर्मन् धारिके अंतरिक्षे कं सूर्यं मर्त्याय मनुष्यार्थं अजीजनः॥ किंच। सनिष्यदत् संभजन् दे
वान् सत्वं वाजं अन्नं संग्राममभिलक्ष्य सदा असरः सरसि गच्छसि। मर्त्याय कं मर्त्येष्वेति पाठो॥ ॥अथ इंदुमिंद्रायेति तृचात्मकं तृतीयं
सूक्तं तत्र प्रथमा॥ इंदुमिंद्राय सिंचत पिबाति सोम्यं मधु॥ प्रराधांसि चोदयते महित्वनेति॥ हे ऋत्विजः इंदुं स्यंदनशीलं सोमं इंद्राये
द्रार्थमासिंचत आश्रयण द्रव्येण सेचनं कुरुत। अभिषुणुतेत्यर्थः॥ ततः सोम्यं सोममयं मधु मदकरं सोमरसं पिबाति पिबतु पीत्वा
च स इंद्रः महित्वना स्वमहित्वेन चराधांसि धनानि स्तोतृभ्यः प्रचोदयते प्रकर्षेण चोदयते प्रेरयति। प्रराधांसि प्रराधसेति पाठो।
चोदयते चोदयात् इति च॥ ॥अथ द्वितीया॥ उपो हरीणां राधः पंचंतमश्रवं॥ नूनं श्रधि स्तुवतो अश्व्यस्येति। हरीणां हरितवर्णानां
अश्वानां पतिं पालयितारं। राधः धनं पंचंतं। पृची संपर्के स्तोतृषु संयोजयंतं ददतमित्यर्थः॥ एतादृशमिंद्रं उपो अश्रवं अतिशये

621
1923

नाहं स्तोत्रं करवाणि। अश्व्यस्य अश्वो नामर्षिरश्वशब्देनोच्यते तस्य पुत्रस्य स्तुवतः स्तोत्रं कुर्वतो मम संबंधिनीं हे इंद्र त्वं स्तुतिं नूनं संप्र
१९५ तिश्रधि शृणु राधो दक्षमिति पाठः॥ ॥अथ तृतीया॥ नह्यंग पुरा चन जज्ञे वीरतरस्त्वत्॥ नकी राया नैवथा न भंदना॥ हे इंद्र त्वत्त
तः पूर्वा पूर्वो वीरतरः सामर्थ्यवान् कश्चिन्नहि जज्ञे न जातः खलु अंग प्रसिद्धौ त्वमेव सामर्थ्यवान् जात इत्यर्थः किंच त्वत्तो वित्तरो योध
नेन सामर्थ्येनान्यो न कश्चिदस्ति॥ तथा एवं तथा शत्रुपुराणि संग्रामं चाप्रतिगमनेन त्वत्तोधिको न जातः॥ यद्वा एवथा। अवरक्षणा
द्विषु। अकारस्यैकारश्छांदसः। औणादिको थप्रत्ययः शरणागतानां स्तोतॄणां वा अवनेन त्वत्तोधिको नास्ति॥ किंच। भंदना भंदतिः स्तुति
कर्मा। स्तुत्यश्च त्वत्तोधिको न जातः॥ न चान्यस्मदस्त्येः स्तुत्यश्च त्वत्तोन्यो जन्य इति॥ ॥अथ नदं व इति सत्काल्मिकेषा॥ नदं व ओदतीनां १९५
इंद्रो युवतीनां॥ पतिं वो अघ्न्यानां धेनूनामिषुध्यसीति॥ ओदतीनां उदत्य उषसः ओदती भास्वतीति तन्नाम स्तुपाठात्॥ तासां अन्वरे
उत्सादकमित्यर्थः। इंद्रेण ह्युषस उत्साद्यंते। इंद्रस्य सूर्यत्वात्॥ विवस्वानिंद्रः ... इंद्र इति द्वादशादित्यमध्ये इंद्रः पठितस्तादृ

शमिंद्रं हे यजमाना वो युष्मदर्थं आह्वये इत्यर्थः॥ तथा यो युवतीनां सर्वत्र मित्रयंतीनां नदीनां आप्याययितारं वो युष्मदर्थं आह्वयामि।
अघ्न्यानां अहंतव्यानां गवां पतिं आह्वये। अथ प्रत्यक्षकृतः॥ हे यजमान त्वं धेनूनां क्षीरादिना प्रीणयितॄणां गवामिषुध्यस्य न्नमिषु 623/1973
ध्य॥ ॥इति चतुर्दशाध्यायो द्वितीयः खंडः॥ अथ तृतीयखंडे देवो वो द्रविणोदा इति प्रगाथात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ देवो वो द्र
विणोदाः पूर्णां विवष्ट्वासिचं॥ उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहत इति॥ द्रविणोदाः धनानां दाता देवोग्निः वो यु
ष्मदीयां पूर्णां हविषा आसिचं आसिक्तां स्रुचं विवष्टु कामयतां॥ उत उत्सिंचध्वं वा सोमेन पात्रमुपपृणध्वं वा सोमं। वा शब्दौ समुच्च
यार्थौ। किंच यद्वेण होत्रचमसं पूरयत तत् अग्नये सोमं यच्छत चेत्यर्थः॥ आदित् अनंतरमेव देवोग्निर्वो युष्मान् ओहते वहति विवष्टुर्विवष्टी
ति पाठः॥ ॥अथ द्वितीया॥ तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत॥ दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुष इति
॥ देवाः प्रचेतसं प्रकृष्टमतिं संतमग्निं अध्वरस्य यज्ञस्य वह्निं वोढारं होतारं चाकृण्वत अकुर्वन् किमर्थं नित्यत्राह॥ स चाग्निर्विधते

परिचरते दाशुषे हविषां प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति ददातीति॥ ॥अदर्शि गातुरिति त्र्युचात्मकं द्विती
१९६ यं सूक्तं तत्र प्रथमा॥ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः॥ उपो षु जातमार्यस्य वर्धनमग्निं नक्षंतु नो गिरः॥ इति॥ यस्मिन्नग्नौ
व्रतानि कर्माणि आदधुर्यजमानाः आहितवंतः। गातुवित्तमोऽतिशयेन मार्गाणां ज्ञाता। सोऽग्निरदर्शि प्रादुरभूत्। किंच। सुजातं स
म्यक् प्रादुर्भूतं अस्यार्थस्य उत्तमवर्णस्य च वर्धनं वर्धयितारमग्निमस्माकं गिरः स्तुतिरूपा वाचः उपो नक्षंतु उपगच्छंतु। नक्षगता
विति धातुः। नक्षंतु नक्षंतेति पाठः॥ ॥अथ द्वितीया॥ यस्माद्रेजंत कृष्टयः श्चर्कृत्यानि कृण्वतः॥ सहस्रसां मेधसाताविव त्मनाग्निं
धीभिर्नमस्यतेति॥ अस्मात्कारणात् चर्कृत्यानि कर्तव्यानि कर्माणि कृण्वतः। कुर्वाणान्मनुष्यान् कृष्टयः इतरे मनुष्याः रेजंतं कं
पंते। तस्माद्धे इदानीं हे मदीया जना यूयं सहस्रसां गवां धनानां च सहस्रस्य दातारमग्निं मेधसातौ यज्ञे धीभिः कृताभिः कर्मभिः १९६
त्मना आत्मनैव नमस्यत परिचरत॥ नमस्यतसपर्यंतेति पाठः॥ ॥ अथ तृतीया॥ प्र दैवोदासो अग्निर्देवाँ इंद्रो न मज्मना॥ अ

नु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणीति॥ प्र दैवोदासः दिवोदासेनाहूयमानोऽग्निः मातरं सर्वस्य लोकस्य धारणत्वात् पृथि
वीं मातातां पृथिवीं अनु प्रति न प्रविवर्तते। देवान्प्रतिवर्तते। देवान्प्रतिहविर्वोढुं विशेषेण प्रवर्तयति॥ यस्मादेनमग्निं दिवोदासा
मज्मना बलेनाजुहाव। तस्मादयमग्निर्नाकस्य स्वर्गस्य देवो द्योतमान इंद्रः परमैश्वर्ययुक्तः शर्मणि गृहे स्वायतने एव तस्थावति
ष्ठत॥ ॥अथाग्न आयूंषीति त्र्युचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ अग्न आयूंषि पवस इति प्रतीकमिदं सा चान्यत्राम्नाता॥ ॥
अथ द्वितीया॥ अग्निरृषिः पवमानः पांचजन्यः पुरोहितः॥ तमीमहे महागयमिति॥ पांचजन्याः निषाद पंचमाश्चत्वारो व
र्णाः पंचजनाः यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसीत्येते पंचजनाः अथवा देवमनुष्यगंधर्वाप्सरसः सर्पाः पितर इति।
श्रा ह्मणेभिहिताः पंचजनाः गंभीरात्य इत्यत्र बहिर्देवपंचजनेभ्य इति। वक्तव्य इति वचनात्त्र्यः प्रत्ययः॥ तेषां तत्र दभी सप हानेन
स्वभूतः। ऋषिः सर्वस्य द्रष्टा। पवमानः पवमानरूपोऽग्निः पुरोहितः कर्मार्थमृत्विग्भिः पुरतो निहितः तं प्रबोधितरूक्षणम्॥

625/1973

१०७ महागयं महद्भिरपि देवो ऽभिगन्तव्यं महान्ति प्रसूतानि यज्ञगृहाणि यस्य वा स तथोक्तस्तं पवमानगुणविशिष्टं ईमहे धनादीनि
याचामहे॥ ॥अथ तृतीया॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं॥ दधद्रयिं मयि पोषमिति॥ हे अग्ने स्वपाः सोर्मनसी इति उत्त
रपदाद्युदात्तत्वं। शोभनकर्मा त्वं अस्मे अस्मासु सुवीर्यं शोभनवीर्योपेतं वर्चः वर्चो दीप्तिं तेजः पवस्व आगमय। तथा भवान्
रयिं धनं वा पोषं भावे कर्मणि वा घञ्। गवां पुष्टिं यद्वा गवादिकं मयि दधत् दधातु करोत्वित्यर्थः। दधातेर्लेटि अडागमे घोर्लो
पो लेटि। वेत्याकारलोपः॥ ॥अथाग्ने पावकेति तृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ अग्ने पावक रोचिषा मंद्रया देव जिह्वया॥
आ देवान्वक्षि यक्षि चेति॥ हे पावक शोधक रोचिषा स्वदीप्त्या मंद्रया देवानां मादयित्र्या जिह्वया च हे देव द्योतमानाग्ने देवान् आव १०७
क्षि आवह। यक्षि च हवींषि वितान्य यज॥ ॥अथ द्वितीया॥ तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशं॥ देवां आ वीतये वह इति। हे घृत
स्नो घृतस्य प्रेरक यद्वा घृतेन उत्पादित हे चित्रभानो चित्राः नानाविधा भानवो रश्मयो यस्य सो चित्रभानुः तस्य संबोधनं स्वर्दृ

शं सर्वस्य द्रष्टारं तं त्वा ईमहे याचामहे। अतो वीतये हविषां भक्षणाय देवानावह॥ ॥अथ तृतीया॥ वीतिहोत्रं त्वा कवे द्युमंतं
समिधीमहि॥ अग्ने बृहंतमध्वरे इति॥ हे कवे क्रांतदर्शिनाग्ने वीतिहोत्रं कांतं यज्ञं। यद्वा प्रियय यज्ञं द्युमंतं दीप्तिमंतं। बृहंतं महां
तं त्वा त्वां अध्वरे यज्ञे समिधीमहि समिद्भिः संदीपयामः॥ ॥इति चतुर्दशोऽध्याये तृतीयः खंडः॥ अथ चतुर्थे खंडे आ वा नो अग्ने य
इति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि॥ विश्वासु धीषु वंद्येति॥ विश्वासु धीषु सर्वेषु
कर्मसु वंद्य स्तुत्य हे अग्ने गायत्रस्य गायत्रसाम्नः॥ गायत्रीछंदस्कस्य सूक्तस्य वा प्रभर्मणि प्रभरणे संपादने निमित्तभूते सति नो
स्मान् ऊतिभिस्तर्पयेः पालनैरव रक्ष। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं॥ ॥अथ द्वितीया॥ आ नो अग्ने रयिं भर सत्रासाहं व
रेण्यं॥ विश्वासु पृत्सु दुष्टरं इति॥ हे अग्ने रयिं धनं नोऽस्मभ्यमाभर प्रयच्छ। कीदृशं। सत्रासाहं। सत्रा सह युगपद्वैरिकुलस्य ना
शकं वरेण्यं सर्वैर्वरणीयं विश्वासु पृत्सु सर्वेषु संग्रामेषु दुस्तरं शत्रुभिस्तरीतुमशक्यं॥ ॥अथ तृतीया॥ आ नो अग्ने सुचेतुना

627/1973

रयिंविश्वायुपोषसं॥ मार्डीकंधेहिजीवसे इति॥ हे अग्ने नोस्माकं जीवसे जीवनाय सचेतुना शोभनेन युक्तं रयिं धनमा धेहि आस्था
१९८ पय कीदृशं मार्डीकं मृडीकं सुखं तद्धेतुभूतं विश्वायुपोषसं सर्वस्मिन्नायुषि देहस्य पोषकं। यावज्जीवमस्मदुपभोगपर्याप्तमित्य
र्थः॥ अग्निं हिन्वंतीति पंचर्चं द्वितीयं सूक्तं तत्र प्रथमा॥ अग्निं हिन्वंतु नो धियः सप्तिमाशुमिवाजिषु॥ तेन जेष्म धनं धनमिति। नो
स्माकं धियः कर्माणि स्तुतयो वा अग्निं हिन्वंतु॥ प्रेरयंतु। प्रेरयंतु। यागार्थमुद्योजयंतु वर्धयंतु वा। हि गतौ वृद्धौ च। तत्र दृष्टांतः आ
जिषु संग्रामेषु आशुं शीघ्रं यामिनं सप्तिमिव। सर्पणशीलमश्वं यथा योद्धारः प्रेरयंति तद्वत्। तेनाग्निना धनं सर्वं धनं जेष्म वयं
जयेम॥ ॥अथ द्वितीया॥ यया गा आकरामहे सेनयाग्ने तवोत्या॥ तां नो हिन्व मघत्तये इति। हे अग्ने सेनया इनेन सह वर्तमानया से १९८
ना रूपया याचय यानवोत्या रक्षया आकरामहे। आभिमुख्येन करवामहे। लभामहा इत्यर्थः। तामूतिं नोस्मान् हिन्व गमय। किमर्थं
मघत्तये धनस्य दानार्थं अस्माकं धनलाभायेत्यर्थः। करामहे करमहे इति पाठो॥ ॥अथ तृतीया॥ आग्ने स्थूरं रयिं भर पृथुं

गोमंतमश्विनं॥ अङ्धि खं वर्तया पणिमिति॥ हे अग्ने स्थूरं स्थूलं रयिं। पृथुं विस्तीर्णं गोमंतं गोभिर्युक्तं अश्विनं अश्वैरुपेतं आ
भर अस्मभ्यमाहर। प्रयच्छ॥ किंच। खमंतरिक्षं अङ्धि व्यक्तं कुरु सिंच। यद्वा आत्मीयैस्तेजोभिः व्यंजय प्रकाशय। पणिं आयु
ध वर्तय अस्माद्विरोधिषु वर्तय। पणिनिं पणीमिति पाठो॥ ॥अथ चतुर्थी॥ अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि॥ दधज्ज्योति
र्जनेभ्यः इति॥ हे अग्ने नक्षत्रं न क्षत्तीति सततं गच्छतीति नक्षत्रः न क्षि गतौ। अमीनक्षीत्यादिना अत्रन् प्रत्ययः। सततं गंतारं ज
रारहितं सूर्यं सर्वस्य प्रेरकमादित्यं दिव्यंतरिक्षे आरोहयः। उपर्यवस्थापितवानसि। यद्वा नक्षत्रं कृत्तिकादिकं सूर्यं चादित्यमारोह
यः॥ किं कुर्वन् जनेभ्यः सर्वेभ्यः प्राणिभ्यो व्यवहारार्थं ज्योतिः प्रकाशं दधत् कुर्वन् यथा सर्वेषां प्रकाशो भवति तथाऽनंते
देशे सूर्यं प्रागमय इत्यर्थः॥ ॥अथ पंचमी॥ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्॥ बोधा स्तोत्रे वयो दधदिति। हे अग्ने
विशां प्रजानां यजमानानां केतुः केतयिता ज्ञापयिता भवसि। अत एव प्रेष्ठः प्रियतमः श्रेष्ठः प्रशस्यतमश्च भवसि। सर्वं

629/1973

उपस्थसत। उपस्थामेयज्ञगृहेहानषीदत्। बोधअस्मदीयं स्तोत्रमवगच्छ। किंतु र्वनस्तोत्रे स्कथं तेजनायवयोंनरधत पुर्वनप्रयछन्
३९९ ॥ ॥अथाग्निर्मूर्द्धेति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ अग्निर्मूर्धा दिवःककुत्पतिः पृथिव्या अयं। अपां रेतांसि जिन्वती
ति॥ मूर्धा देवानां श्रेष्ठः दिवो द्युलोकस्य ककुत्। उच्छ्रितः पृथिव्याश्च पतिरयमग्निरपां रेतांसि स्थावरजंगमात्मकानि भूतानि जिन्व
ति प्रीणयति॥ ॥अथ द्वितीया॥ ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः। स्तोता स्यां तव शर्मणीति। हे अग्ने स्वःपतिः स्वर्गस्य स्वा
मी त्वं वार्यस्य वरणीयस्य दात्रस्य दातव्यस्य धनस्येशिषे ईश्वरोसि अतस्तव शर्मणि सुखे निमित्ते त्वत्स्तोता स्यां भवेयं॥ ॥अथतृ
तीया॥ उदग्ने शुचयस्तव शुक्रा भ्राजंत ईरते। तव ज्योतींष्यर्चय इति। हे अग्ने ते तव शुचयो निर्मलाः शुक्राः शुक्लवर्णाः
भ्राजंतो दीप्यमानाः अर्चयः प्रभाः तव ज्योतींषि तेजांसि उदीरते प्रेरयंति॥ ॥इति चतुर्दशे ध्याये चतुर्थः खंडः॥ वेदार्थ ३९९
स्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिक

मार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे चतु
र्दशोध्यायः॥ १४॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ १४॥ अथ पंचदशो
ध्याय आरभ्यते॥ तत्र प्रथमखंडे कस्ते जामिर्जनानामिति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ कस्ते जामिर्जनानामग्ने को
दाश्वध्वरः॥ को ह कस्मिन्नसि श्रितः इति॥ हे अग्ने जनानां मनुष्याणां मध्ये ते तव को जामिः को बंधुः त्वं सर्वैर्गुणैरधिकोतस्तवा
नुरूपो बंधुर्नास्तीति भावः को दाश्वध्वरः दाशद्दीता अध्वरो यज्ञो येन स तथोक्तः। त्वां यष्टुमपि समर्थः कोपि नास्तीत्यर्थः।
को ह त्वं कथंभूतः त्वमीदृग्रूप इति सर्वैर्न ज्ञायस इत्यर्थः। कस्मिन्स्थाने श्रित आश्रितोसि भवसि। वनी सत स्थानमपि न के
न विज्ञायते। अतस्त्वमस्माभिर्मांसदृष्टिभिः कथमुपलक्ष्य इत्यग्निः प्रशस्यते॥ ॥अथ द्वितीया॥ त्वं जामिर्जनानामग्ने मि
त्रोअसि प्रियः॥ सखा सखिभ्य ईड्य इति॥ हे अग्ने त्वं उक्तप्रकारेणाचिंत्यरूपोपि अनुगृहीतृतया सर्वेषां जनानां जामिर्बं

LIBRARY OF THE BOMBAY BRANCH ROYAL ASIATIC SOCIETY
631/1973

२०० धुरसि। तया प्रियाः प्रीणयिता त्वं यजमानानां विश्वः मित्रः प्रमीतेस्त्रातासि। ईड्यः स्तुतिभिः स्तुत्यस्त्वं सखिभ्यः समानख्यातेभ्यः ऋत्विग्
भ्यः सखा सखिवत्त्वं तं प्रियोसि॥ ॥अथ तृतीया॥ यजमानो मित्रावरुणौ जाया देवाँ कृतं बृहत॥ अग्ने यच्छिक्षं दममिति। हे अग्ने नो
स्मदर्थं मित्रावरुणा एतत्संज्ञौ देवौ यज्ञहविषा पूजय। तथा देवानन्यान् इन्द्रादीन्पूजय। ऋतं सत्यं यथार्थफलं यज्ञं च यज्ञत्वेव तदर्थं
बृहत्। ओदं स्व सर्वकार्यं दमं यज्ञगृहं यच्छिक्षि यज्ञ संगच्छस्व। त्वयि अंतर्वि घमानोस्मति हे यज्ञगृहं पूज्यते॥ ॥अथ द्वितीयखंडे प्रथमा॥ ई
डेन्यो नमस्यस्तिरस्तमांसि दर्शतः॥ समग्निरिध्यते वृषा॥ ईडेन्यः स्तोतृभिरीड्यः अत एव नमस्याः सर्वैर्नमस्कार्यः तमांसि ति
रः धातानि स्वप्रभाभिस्तिरस्कुर्वन् दर्शतः कमनीयतया सर्वैर्दर्शनीयः। तादृशोग्निः वृषा यजमानस्य कामानां वर्षिता स २००
मिध्यते। आहुतिप्रक्षेपेण प्रज्वाल्यते। उक्तार्थे वाजसनेयकं ईडेन्यो ह्युषनमस्या ह्येषा तिरस्तमांसि दृशे समिध्यत इति॥ ग
अथ द्वितीया॥ वृषो अग्निः समिध्यते श्वो न देववाहनः॥ तं हविष्मंत ईडते॥ इति। वृषा वृषेव कामानां वर्षिता। देववाहनः देवान्

हवींषि वा वहति प्रापयतीति। देववाहनः। तत्र दृष्टांतः अश्वो न यथा। अश्वो राजानं वा वहति स्वपुरं प्रापयतीति वाहनमश्वस्तद्वत्
। वाहनभूतो योग्निः समिध्यते आहुतिप्रदानेन सम्यग्दीप्यते। तं तादृशमग्निं हविष्मंतः संभृतहविष्का यजमाना ईडयते कर्मसिद्ध्य
र्थं स्तुवंति॥ ॥अथ तृतीया॥ वृषणं त्वा वयं वृषन् वृषणः समिधीमहि॥ अग्ने दीद्यतं बृहदिति॥ वृषन् कामानां वर्षित हे
अग्ने वृषणो वृषणः मता घा हुतानां। सेक्तारो वयं वृषणं आहुतिद्वारा उदकस्य सेक्तारं। तथा च स्मृतिः अग्नौ प्रास्ताहुतिः स
म्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। दीद्यतं दीप्यमानं बृहंतं। अत एव महांतं तमिममग्निं
समिधीमहि। सम्यग्दीपयामः॥ ॥अथ तृतीयखंडे प्रथमा॥ उत्ते बृहंतो अर्चयः समिधानस्य दीदिवः॥ अग्ने शुक्रास ई
रते इति॥ हे दीदिवो भाग्ने समिधानस्य समिध्यमानस्य ते तव बृहंतो महांतः शुक्रासो शुक्लाः अर्चयः दीप्तयः उद्गच्छंति।
अथ द्वितीया॥ उप त्वा जुह्वो मम घृताचीर्यंतु हर्यत॥ अग्ने हव्या जुषस्व नः इति। हे हर्यत कामयमानाग्ने मम मदीया घृ

633
1973

तान्वीर्यं तमवं योजुरुः स्त्रुचः त्वान्त्वांमुपयंतु। नो त्वा कं हव्या हव्यानि जुषस्व सेवस्व च॥ ॥अथ तृतीया॥ मंद्रं होतारमृत्विजं चित्रभा
२०१ नुं विभावसुं॥ अग्निमीळे स उ श्रवत् इति। मंद्रं मोदकं होतारं देवानामाह्वातारं ऋत्विजं ऋतौ यष्टव्यं चित्रभानुं विविधदीप्तिं विभा
वसुं दीप्तधनं मग्निं ईळे स्तौमि सोग्निः श्रवत् अस्मदीयां स्तुतिं शृणोत्वेव॥ ॥अथ प्रगाथात्मके चतुर्थसूक्ते प्रथमा॥ पाहि नो अ
ग्न एकया पाह्युत द्वितीयया॥ पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो इति॥ हे अग्ने नोस्मान् एकया ऋचा गिरा पाहि रक्ष
उत अपि च॥ अथ द्वितीया॥ ऋचां पाहि पालय पाहि तिसृभिर्गीर्भिः ऊर्जां मंनानां बलानां पाबते स्वामिन्। तथा पाहि चतसृ
भिर्गीर्भिर्हे वसो वासक अग्ने॥ ॥अथ द्वितीया॥ पाहि विश्वस्मा द्रक्षसो अराव्णः प्रस्म वाजेषु नोव॥ त्वामिद्धि नेदिष्ठं देवता
तय आपिं नक्षामहे वृधे॥ इति। हे अग्ने विश्वस्मात् सर्वस्मात् हे अग्ने : अराव्णः अदातुः कात् शतपाहि रक्ष सोस्मान् वाजेषु २०१
संग्रामेषु प्रावप्रकर्षेण रक्ष। त्वामिति हरणाह्यिय स्मां नेदिष्ठं अंतिकतमं अपिबंधुभूतं अमिं नत्वामेव देवानानयेयज्ञायय

ज्ञसिध्यर्थं वृधे वर्धनायन क्षामहे याचामहे॥ नक्षतिर्याम कर्मा॥ ॥ इति पंचदशे ध्याये प्रथमः खंडः॥ अथ द्वितीय खंडे इनो राजं
नितितृचात्मके प्रथमसूक्ते प्रथमा॥ इनो राजंनरतिः समिद्धो रौद्रो दक्षाय सुषुमां अदर्शि। चिकिद्वि भाति भासा बृहता सिक्नीमे
ती रुशतीमपाजन्निति॥ हे राजन् दीप्यमानाग्ने त्वं इनः ईश्वरः सर्वस्य भवसि। अथ यारादृश आरतिः हविरादाय देवां अतिगं
तः समिद्धः संदीप्तः रौद्रः शत्रूणां भयंकरः सुषुमानुप ध्यात्मनाक्षित रंगुः सुषुसुतदति सुषुः सोमः तेन तद्वान् शोभनप्र
सवो वा सोग्निः दक्षाय यजमानानां धनादिवृध्यर्थं कर्मवृध्यर्थं वा अदर्शिसर्वैर्दृश्यते किंच चिकित्सर्वज्ञनानोग्निर्विभाति वि
शेषदीप्यते। तथा बृहता महता भासा तेजसा ज्वालालक्षणेन असिक्नीं रात्रीं एति। सायं होमसिध्यर्थं एतिगच्छति किंतु रुशंन
रुशतीं श्वेतवर्णां दीप्तिं अपाजन् अपगमयन्। सर्वानाविकुर्वन्। यद्वा रुशतींदीप्तामुषसमपाजन् अपक्षिपन् परित्यजन् रात्रिं
गच्छति सामर्थ्यात् रात्रिं परित्यजन् उषसं प्रातर्होमसिध्यर्थं गच्छतीत्यर्थो लभ्यते॥ ॥अथ द्वितीया॥ कृष्णां यदेनीमभिवर्प

635
1973

साभूज्जनयन्योषांबृहतः पितुर्जां ॥ ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्विभातीति। सोग्निर्यद्यदा कृष्णां कृष्णवर्णां मे
२०२ नीं गच्छतीं रात्रीं पर्यसा आत्मीयेन द्युत्याख्येन लक्षणेन रूपेण अभिभूत् ईं अभिभवतां । किं कुर्वन् । बृहतो महतः पितुः सर्वस्य जगतः
पालयितुः पितृभूतादादित्याज्जायमानां योषामुषसं जनयन् अभिव्यंजयन् रात्रिमभ्यभूत् । तदानीमरतिर्गमनशीलो
ग्निः दिवि द्युलोकस्य वसुभिर्व्यासिभिस्तेजोभिः रात्रौ शनैः संधुक्षणसमर्थैरात्मीयैस्तेजोभिः सूर्यस्य भानुं दीप्तिमूर्ध्वमुपरिष्टात्स्तभा
तृतीयायन स्तंभयन् विभाति विशेषेण दीप्यते ॥ ॥ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ॥ सुप्रकेतैर्द्युभि
रग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभिराममस्थात् ॥ इति । भद्रो भजनीयः कल्याणः भद्रया भजनीयया दीप्त्या उषसा वा सचमानः
सेव्यमानः संगच्छमानो वाग्निः । आगात् । आजगाम गार्हपत्यादाहवनीयमागच्छति । ततः पश्चात् जारो जरयिता शत्रूणां स्तो २०२
ग्निः स्वसारं स्वयं सारिणीं भगिनीं वा आगतामुषसमभ्येति अभिगच्छति यथा सुप्रकेतैः सुप्रज्ञानैर्द्युभिर्दीप्तैस्तेजोभिः स

हवितिष्ठन् सर्वीनावर्तमानः साग्निः रुशद्भिः श्वेतैर्वर्णैर्वारकैरात्मीयैस्तेजोभिरामं कृष्णं शार्वरं तमः अभ्यस्थात् सायं होमकाले
अभिभूय तिष्ठति ॥ ॥ अथ द्वितीयसूक्ते प्रथमा ॥ कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिं ॥ वराय देव मन्यवे इति । हे अंगिरः अं
गिरसां वरिष्ठ यद्वा अंगति सर्वत्र गच्छतीति अंगिराः । तादृश हे ऊर्जो नपात् नपादित्यपत्यनाम अन्नस्य पुत्र हविर्भिर्वर्धमा
नत्वात् यद्वा नपादिति नप्ता हविर्लक्षणस्यान्नस्य नप्ता । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिरिति
वृष्टेरोषधयस्ताभ्य ओषधीभ्योग्निरिति अन्नस्य नप्ता । हे देव द्योतमानाग्ने वराय सर्वैर्वरणीयाय मन्यवे अस्मदभिमन्यमानाय ते तु
भ्यं कया कीदृश्या वाचा उपस्तुतिं उपस्तोत्रं भरेम संभरेयं । त्वं महान्खलु । अहमल्पः इत्थं कथं स्तोतुं शक्नोमीति ऋषिरग्निं प्रति वदति ।
अथ द्वितीया ॥ दाशेम कस्य मनसा यज्ञस्य सहसो यहो ॥ कदु वोच इदं नम इति ॥ ऋषिरग्निं प्रति ब्रूते । हे सहसो यहो यद्वा बलस्य
पत्यनाम बलेन निर्मथ्यमानत्वात् बलस्य पुत्र हे अग्ने कस्य कीदृशस्य यज्ञस्य यज्ञवतो यजनीयस्य देववतो वा यजमानस्य मनसा यु

637/1973

न्नाः संतो हवींषि तुभ्यं वयं दाशेम प्रयच्छेम। प्रजायां बहुवचनं किं वा तुभ्यं इदं नमो हविर्नमस्कारं वा कन्न कद्दा वोचे अहं वदामि। उ इति अ
२०३ ऋषिः कदाय कस्यामि कदा स्तोष्यामीत्यग्निरुच्यते। वोचे ब्रूञो हे आशिष्यलुङ्यात्मनेपदे उत्तमैकवचने रूपं॥ ॥अथ तृतीया॥ अधा त्वं हि नस्क
रो विश्वा अस्मभ्यं सुक्षितीः॥ वाजद्रविणसो गिर इति॥ हे अग्ने अधा अथानंतरं त्वं हि त्वमेव धारणेन त्वमेवास्मभ्यं करः कुरु देहीत्यर्थः
करोतेर्लेटि अडागमः॥ किमित्यपेक्षायामाह नोस्मदीया गिरः स्तुतिरूपा या विश्वाः सर्वाः स्तुतीः स्वं कुरु। यथा सुक्षितीः क्षियंति निव
संत्यत्रेति क्षितयो गृहाः शोभननिवासाः भवंति तथा क्षितयो मनुष्याः कल्याणपुत्रपौत्राद्युपेताः तथा वाजद्रविणसः अन्नयुक्ता धनवती
। अथवा वाजो दीप्तिः सर्वतो दीप्तधनाश्च कुरु। त्वमस्माभिः स्तुतिः सन्नस्मद्गृहपुत्रान् धनानि देहीत्यर्थः॥ ॥अग्न आ याहीति प्र
गाथरूपे तृतीयसूक्ते प्रथमा॥ अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे। आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे इति। २०३
हे अग्ने अग्निभिरन्यैः सह आयाहि आगच्छ तदर्थं होतारं देवानामाह्वातारं त्वा त्वां वृणीमहे। त्वामागतं प्रयता अध्वर्युहस्ताभ्यां

नियता हविष्मती घृतवती यजिष्ठं त्वा बर्हिषि आसदे आसादयितुं अनक्तु सिंचतु॥ ॥अथ द्वितीया॥ अच्छा हि त्वा सहसः सूनो अंगि
रः स्रुचश्चरंत्यध्वरे। ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यमिति॥ हे सहसः सूनो बलस्य पुत्र बलेन मथ्यमानत्वात्। हे अंगि
रसां मध्ये मुख्य अथवा अंगतिर्गतिकर्मा सर्वत्र गंता त्वा त्वां अध्वरे यागे अच्छाभिप्राप्तुं स्रुचश्चरंति गच्छंति। अत ऊर्जो नस्य नपा
तं न पातयितारं रक्षकं बलस्य वा नप्तारं घृतकेशं प्रदीप्तकेशं ज्वालानीयस्मात् पूर्व्यं पुरातनं पूरकं वाग्निं यज्ञेषु अस्मदीये पुर ईमहे
स्तौमि॥ अच्छा न इति प्रगाथात्मके॥ ॥चतुर्थसूक्ते प्रथमा॥ अच्छा नः शीरशोचिषं गिरो यंतु दर्शतं॥ अच्छा यज्ञासो नमसा पुरूवसुं
पुरुप्रशस्तमूतये॥ इति॥ अच्छाभिमुखं यंतु गच्छंतु॥ नोस्माकं गिरः स्तुतयः शीरशोचिषं अशनशीलदीप्तं शयनशीलदीप्तं वाग्निं
दर्शतं सर्वैर्दर्शनीयं तथा यज्ञासो यज्ञाश्च अस्मदीया नमसा हविषा आज्यादिलक्षणेन अच्छाभिमुखं यंतु गच्छंतु। कीदृशं पुरूवसुं
प्रभूतधनं पुरुप्रशस्तं बहुभिः सम्यक् स्तुतं। किमर्थं ऊतये अस्माकं रक्षणाय॥ ॥अथ द्वितीया॥ अग्निं सूनुं सहसो जातवेदसं

639/1973

नाय वार्याणां ॥ ऽद्भुतो यो ऽमृत इस्मत्तो मर्त्येष्वा होता मंद्रतमो विशि इति। अग्निं सहसः सूनुं बलस्य पुत्रं जातवेद संजातधनं वार्याणां वर
२०४ णीयानां गवादिधनानां दानाय नोऽगिरोऽत्र यं क्षियनुवर्तते। योऽग्निरमृतो मरणधर्मादिदेवेषु भवति स मर्त्येष्वाकारस्यार्थे मर्त्येषु म
नुष्येषु वाऽभूद्भवत। इत्येवं द्भुतादि धंभवति। देवेषु अमृतत्वं अस्य प्रसिद्धं मनुष्येषु कादृशोऽभूदिति उच्यते विशि विज्ञयजमानरूपा
सु प्रजासु होता होमनिष्पादकः मंद्रतमा ऽरादयितृन मुख्यभवति तेम ऽत्यंत्विति समन्वयः॥ अथवायः अमृतोऽद्भुतादित्वं द्रधं द्रप्रका
शोभूत॥ कथं मर्त्येषु सामान्येन दाहापाकादिसाधनो भवादित्यमेन प्रसिद्धं विशि यजमानरूपायां तु होता मंद्रतमोऽभ्याभवतितेवं
द्विषं॥ ॥इति पंचदशोऽध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे अदाभ्य इति तृचात्मके प्रथमे सूक्ते प्रथमा॥ अदाभ्यः पुर एता वि २०४
शामग्निर्मानुषीणां॥ तूर्णी रथः सदा नव इति॥ मानुषीणां मनोरपत्यानां विशां प्रजानां पुर एता सन्मार्गदर्शनेनाग्रतो गंता॥
अत एव तूर्णिः। तानः प्रजा वैदिकः कर्मप्रवर्तनेनानुग्रहीतुं त्वरायुक्तः॥ आतस्यरक्षितः रथः हविःषां वहनाद्रथसदृशः॥ सदस्म

र्यदातत्तउर्मिणि नकृन्तनः॥ पुनर्मथनादभिभवः एवंविधोऽग्निः अदाभ्यः अहिंस्यः॥ नकेनापीतिरकार्य इत्यर्थः॥ ॥अथ द्वितीया॥ अ
भि प्रयांसि वाहसा दाश्वां अश्नोति मर्त्यः॥ क्षयं पावकशोचिषः इति। दाश्वान्हविषां दाता मर्त्यो मनुष्यो यजमानः॥ वाहसा हविषां वाह
केनाग्निना प्रयांस्यन्नानि अभ्यश्नोति असितः सर्वतः प्राप्नोति किंच। पावकशोचिषः शोधकदीप्तेः॥ अग्नेः सकाशात् क्षयं गृहं च
श्नोति॥ ॥अथ तृतीया॥ साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः॥ अग्निस्तुविश्रवस्तमः इति। अभियुजः अभियोक्त्री
र्विश्वाः सेनाः साह्वान् सहमानः स्वबलेन तिरस्कुर्वाणः अत एव अमृक्तः शत्रुभिरहिंसितः देवानां क्रतुः कर्ता हविः प्रदाने
न पोषकः॥ एवंभूतोऽग्निस्तुविश्रवस्तमा। तुविशब्दो बहुवाची॥ श्रवः शब्दोऽन्नवाची अतिशयेन बहुविधान्नोपेतो वर्तते। य
स्मादेवं तस्मादस्मानपि बहुविधान्नोपेतान्करोत्विति भावः॥ ॥अथ भद्रो नो अग्निराहुत इति द्वितीयतृचे सैषा प्रथमा॥
भद्रो नो अग्निराहुतो भद्रा रातिः सुभगो भद्रो अध्वरः॥ भद्रा उत प्रशस्तय इति॥ आहुतो हविर्भिस्तर्पितोऽग्निः नोऽस्माकं

641/1973

भद्रः कल्याणो भवतु। हे सुभग शोभा। न धनाग्ने भद्रा कल्याणे रातिर्दानं चास्माकं भवतु। भद्रः कल्याणो ध्वरो यागश्च भवतु।
२०५ उतापि च भद्राः कल्याणाः प्रशस्तयः प्रशंसाः स्तुतयश्च भवंतु॥ ॥अथ द्वितीया॥ भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सा
सहः॥ अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः॥ इति॥ हे अग्ने वृत्रतूर्ये संग्रामे भद्रं शोभनं मनः कृणुष्वास्माकं कुरु
। येन मनसा त्वं समत्सु संग्रामेषु सासहः भृशं शत्रूनभिभवसि। अपि च शर्धतामभिभवितॄणां शत्रूणां भूरि भूरीणि बहूनि
स्थिरा स्थिराणि दृढान्यपि बलानि अव तनुहि पराजितानि कुरु। वयं चाभिष्टिभिरन्वेषणसाधनैर्हविर्भिः स्तोत्रैश्च ते त्वां वने
म संभजेमहि यद्वा ते तव प्रसादादभिष्टिभिरभीष्टैः फलैर्वनेम संगच्छेमहि॥ ॥अथ तृतीयखंडे अग्ने वाजस्येति तृतीयस्य
च प्रथमा॥ अग्ने वाजस्य गोमत ईशानः सहसो यहो॥ अस्मे धेहि जातवेदो महि श्रवः॥ इति॥ हे सहसो यहो बलस्य पुत्राग्ने गोम
तो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य ईशानः ईश्वरस्त्वमसि। अतोस्मे अस्मासु हे जातवेदो जातधनं जातानां वेदितर्वा महि
२०५
643/1973
महि प्रभूतं श्रवोन्नं देहि प्रयच्छ सहसो यहो पुत्र त्वं गव इत्यादावामंत्रितस्य चेति षष्ठ्यामंत्रितस्य सुपां योनिहन्यते। अस्मासु पौस्क
लुगिति सप्तम्याः शेआदेशः॥ ॥अथ द्वितीया॥ स इधानो वसुष्कविरग्निरीळेन्यो गिरा॥ रेवदस्मभ्यं पुर्वणीक दीदिहि॥ इति
। सोग्निरिधानो दीप्यमानः शीलः वसुर्निवासयिता सर्वेषां कविः क्रांतदर्शी नामेधावी वा गिरा स्तोत्ररूपया वाचा ईळेन्यः स्तोत
व्यो भवति। हे पुर्वणीक अनीकं रूपं पुरुभिर्बहुभिरनीकस्थानीयाभिर्ज्वालाभिर्युक्तास्मभ्यं रेवद्धनयुक्तमन्नं यथा भव
ति तथा दीदिहि दीप्यस्व। दीदेतिः छांदसो दीप्तिकर्मा॥ ॥अथ तृतीया॥ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः॥ स
तिग्मजंभ रक्षसो दह॥ इति। हे राजन् राजमानशीलाग्ने क्षपा क्षिपराक्षसादीन् स्वकीयेषु रूपेषु बाधस्व। उतापि च त्मना। नाकेवलमग्नेरेवा आत्मना च तान्बाधस्व। कारत्विति। उच्यते वस्तोः सर्वाण्यहानि उतापि च उषसः उषःकालोपलक्षि
ता रात्रीश्च। अत्यंतसंयोगे द्वितीया। सार्वविभक्तिकस्सर्वासु रात्रिषु चेत्यर्थः। हे तिग्मजंभ तीक्ष्णमुखाग्ने रक्षसो राक्षसा

इत्थंप्रकारेणक्षपउत्वासएवत्वंप्रतिदहंप्रत्येकंप्रातिस्वदहनात्कांचिदुखव्यमित्यध्यासेत्यर्थः॥ ॥इतिपंचदशोध्यायेतृतीय
२०६ खंडः॥ अथचतुर्थखंडेविशोविशोवोअतिथिमितितृचात्मकेप्रथमसूक्तेप्रथमा॥ ७॥ विशोविशोवोअतिथिंवाजयंतः
पुरुप्रियं॥ अग्निंवोदुर्यंवचःस्तुषेशूषस्यमन्मभिः॥ इति॥ हेऋत्विजोयजमानश्चवोयूयंवाजयंतोन्नमिच्छंतःविशोविशः
सर्वस्याःप्रजायाःअतिथिंपूज्यंपुरुप्रियंबहुप्रियमग्निंस्तुत्यापरिचरतेतिशेषः॥ अहंचवोयुष्मदर्थंदुर्यंगृहाहितंअग्निंवा
चानुस्तुषेस्तौमि। शूषस्यसुखस्यलाभायकैःसाधनैःसत्वभिर्मननीयैस्तोत्रैः॥ ॥अथद्वितीया॥ यंजनासोहविष्मंतो
मित्रंनसर्पिरासुतिं॥ प्रशंसंतिप्रशस्तिभिः॥ इति॥ यमग्निंजनासोजनायजमानाहविष्मंतःसंतोमित्रंनमित्रमिवआदित्यमिव
सखायमिववासर्पिरासुतिंसर्पिरासूयतेहूयतेयस्मिंस्तादृशंप्रशंसंतिस्तुवंतिप्रशस्तिभिस्तुतिभिः॥ ॥अथतृतीया॥ २०६
पन्यांसंजातवेदसंयोदेवतात्युद्यता॥ हव्यान्यैरयद्दिवि॥ इति॥ पंन्यासंअतिशयेनस्तोतारंसाधुकृतमितियजमानंस्तुवंतंजा

तवेदसंजातधनंवास्तुमइतिशेषः योग्निर्देवतातिदेवतातायागेउद्यताउद्यतानिहव्यानिहवींषिदिव्यैरयतप्रेरयतिदिविदे
वेभ्यः॥ ॥अथद्वितीयसूक्तेप्रथमा॥ समिधमग्निंसमिधागिरागृणेशुचिंपावकंपुरोअध्वरेध्रुवं॥ विप्रंहोतारंपुरुवारमद्रुहं
कविंसुम्नैरीमहेजातवेदसं॥ इति॥ समिद्धंसम्यग्दीप्तमग्निंसमिधासमिंधनहेतुभूतयागिरास्तुत्यागृणेहंस्तौमियद्वा
समिधासमिद्भिर्वारिभिःसमिद्धंसम्यग्दीप्तंअपिचशुचिंस्वयंशुद्धंपावकंसर्वेषांशोधकंध्रुवंनिश्चलंतमग्निंअध्वरेयज्ञेपुर
स्करोमीतिशेषः॥ तथाविप्रंमेधाविनंहोतारंदेवानामाह्वातारंपुरुवारंबहुभिर्वरणीयंअद्रुहमद्रोग्धारंसर्वेषामनुकूलंकाव
क्रांतदर्शिनंजातवेदसंजातानांवेदितारमग्निंसुम्नैःसुखकारैःस्तोत्रैःईमहेसंभजामहेयद्वाइतितृतीयार्थेतृतीया॥ सुम्नानिधना
निईमहेयाचामहइति॥ ॥अथद्वितीया॥ त्वांदूतमग्नेअमृतंयुगेयुगेहव्यवाहंदधिरेपायुमीड्यं॥ देवासश्चमर्तासश्चजागृविं
विभुंविश्पतिंनमसानिषेदिरे॥ इति॥ अग्नेत्वांदेवासोदेवाश्चमर्त्यासोमनुष्याश्चदूतंदधिरेधारयंतःधृतवंतः॥ कीदृशं

645/1973

त्वाममृतं अमरणं युगेयुगे काले काले तत्तत्कर्मानुष्ठानसमये यो हव्यवाट् हव्यानां हविषां वोढारं पायुं पालयितारमीड्यं स्तुत्यं अपि च
२०७ ते उभयविधाः जागृविं जागरणशीलं विभुं व्याप्तं विश्पतिं विशां प्रजानां पालयितारं तमग्निं नमसा हविर्लक्षणेनान्नेन नमस्कारे
ण वा निषेदिरे उपासादिरे॥ ॥अथ तृतीया॥ विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे। यत्ते धीतिं सुमतिमा
वृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भवेति। हे अग्ने उभयान् उभयविधान् देवान्मनुष्यांश्च विभूषन् विशेषेण भूषयन्
अलंकुर्वन् त्वमनुव्रता व्रतान्यनुव्रतेषु कर्मसु यागेषु देवानां दूतः सन् रजसी द्यावापृथिव्यौ समीयासे संचरसि देवानां घोनं
तु द्युलोकं गच्छसि ह। वीषि च नेतुमिमं लोकं कं च य यस्मात्ते तुभ्यं त्वेदर्थं धीति कर्म सुमतिं शोभनां च स्तुतिं। आवृणीमहे वयं
संभजामहे अध अथ तः कारणात् त्रिवरूथः त्रिस्थानं तं नोऽस्माकं शिवः सुखकरो भव स्मेत्यन्यत्पदपूरणं॥ ॥अथ तृतीये २०७
सूक्ते प्रथमा॥ ॥उपत्वा जामयो गिरो देदिशती हविष्कृतः। वायोरनीके अस्थिरन्निति॥ हे अग्ने हविष्कृतो यजमानार्थं गिरः

स्तुतयः जामयः स्वसारवदे देदिशती हविष्कृतः वायोरनीके अस्थिरन् गुणान् दिशंत्यः ख्यापयन्त्यस्त्वामुपतिष्ठते वायोरनीके समीपे त्वां
सामीप्यंस्यः अस्थिरन् आश्रितवंत्यः॥ ॥अथ द्वितीया॥ यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनं। आपश्चिन्नि दधा पदमिति। तस्या 647/1973
ग्नेस्त्रिधातु त्रिपर्वावृतं च असंदिनं अबद्धं च स्तरणकाले बर्हिः स्वं दर्भं भवति। बर्हिः स्तरणाय सनार्थं तिष्ठति। तस्मिन् यावाप
श्चिदापोपि पदं निदधाति निदधाति। अंतरिक्षस्था माध्यमिका पदं निदधातीत्यर्थः॥ ॥अथ तृतीया॥ पदं देवस्य मीढुषोना
धृष्टाभिरूतिभिः॥ भद्रा सूर्य इवोपदृगिति॥ मीढुषः कामानां सेक्तुर्देवस्य द्योतमानस्याग्नेः पदं स्थानं धृष्टाभिः शत्रुभिर
बाधिताभिः ऊतिभी रक्षाभिर्भजनीयं भजनीयमित्यर्थः। तथैवास्योपदृक् उपद्रष्टिरपि सूर्य इव यथा सूर्यस्तद्वत्॥ भद्रा मनुष्यैर्भ
जनीया भवति॥ ॥१४॥ इति पंचदशोध्याये चतुर्थः खंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्या
तीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण वरस्तितमाध

वीयसामवेदार्थप्रकाशे उत्तराग्रंथे पंचदशोध्यायः॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ अथ
२०८ षोडशोध्याय आरभ्यते॥ ॥तत्र प्रथमखंडे अभि त्वा पूर्वपीतय इति प्रगाथात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अभि त्वा पूर्वपीतय इंद्र स्तो
मेभिरायवः। समीचीनास ऋभवः समस्वरन् रुद्रा गृणंत पूर्व्यमिति। हे इंद्र आयवो मनुष्याः स्तोतारः स्तोमेभिः स्तोत्रैस्त्वामभिष्टुवं
ति किमर्थं पूर्वपीतये सर्वेभ्यो देवेभ्यः पूर्वं प्रथमत एव सोमस्य पीतये पानाय सवनमुखे हि चमसगणेषु इंद्रस्यैव सोमो हूयते। तथा
समीचीनासः संगता ऋभवः प्रथमवाचकेन शब्देन त्रयोप्युपलक्ष्यं। तो ऋभुर्विभ्वा वाज इत्येते च समस्वरन्। त्वामेव सम्यगथ
स्तुवन् स्तुशब्दोप्रतापर्यायः। रुद्रा रुद्रपुत्रा मरुतश्च पूर्व्यं पुरातनं च अंत्यमेव गृणंत् अभ्यस्तुवन्॥ एवं वध मस्माय प्रदर भगवो जहि २०८
वीरत्वयस्खल्ये वं रूपम्या वा चालां सत वंत उत्यर्थः॥ ॥अथ द्वितीया॥ अस्येदिंद्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि॥ अद्या त
मस्य महिमानमायवोनुष्टुवंति पूर्वथेति॥ अस्येत् अस्यैव यजमानस्य वृष्ण्यं वृषत्वं वीर्यं शवो बलं च वर्धयतीत्यर्थः॥ अद्याद्य

काले अस्येंद्रस्य न उक्तगुणं महिमानं महत्वं आयवो मनुष्या अनुष्टुवंति। तस्मानुपूर्वेण स्तुवंति। पूर्वथा पूर्वस्मात् प्रत्नादिवार्थे प्रत्नपूर्व
त्यादिना था प्रत्ययः। यथा पूर्वस्मिन् काले अस्तुवन् एवमिदानीमपि तेनैव क्रमेण स्तुवंतीत्यर्थः। प्र वामर्चंत्युक्थिन इति। ॥अथ द्वि
तीयसूक्ते चतुर्ऋचे सूक्ते प्रथमा। प्र वामर्चंत्युक्थिनो नीथाविदो जरितारः॥ इंद्राग्नी इष आवृणे॥ इति। हे इंद्राग्नी उक्थिनः उक्थं श
स्त्रं तद्वंतः शस्त्रिणो होत्रादयः वां युवां प्रार्चंति उक्थकर्मणि स्तोत्ररूपाभिर्वाग्भिः पूजयंति। तथा नीथाविदः स्तोत्राभिज्ञाः साम
गानकुशला जरितारः स्तोतार उद्गात्रादयः अभिलषितफलावाप्तये युवामर्चंति अहमपि इषोन्नस्य लाभार्थं इंद्राग्नी युवामावृणे
वृणे संभजे पूजयामीत्यर्थः॥ ॥अथ द्वितीया। इंद्राग्नी नवतिं पुरो दासपत्नीरधूनुतं॥ साकमेकेन कर्मणा॥ इति। हे इंद्राग्नी दास
पत्नीः दासयंति उपक्षयंतीति दासा उपक्षयितारः असुराः ते पतयः पालका यासां ता दासपत्नीः नवतिं नवतिसंख्याकाः पुरः एवंवि
धाः शत्रुपुरीः एकेन कर्मणा एकेनैव उद्योगेन युवः। युवां साकं सह युगपत् अधूनुतं अकंपयतं ताविंद्राग्नी आवृण्यामीति शेषः

649/1973

अथ तृतीया॥ इंद्राग्नी अपसस्पर्युप प्रयंति धीतयः॥ ऋतस्य पथ्या अन्विति। हे इंद्राग्नी तयः सोमस्य धातारः पातारो होत्रादयः ऋत
२०१ स्य कर्मफलस्य पथ्याः पथो मार्गाननुलक्षीकृत्य अयं सोमाभिक्रियमाणस्य परितः सर्वतः समीपे प्रपर्युपप्रयंति प्रकर्षेण वर्तते। अ
तः सोमपानार्थं युवामागच्छतमिति भावः यद्वा धीतयः स्तुतयः ऋतस्य यज्ञस्य मार्गाननुलक्षीकृत्य कर्मणः परितः प्रवर्तंते। अत
स्तोतस्य तया युवामागच्छतमिति॥ ॥अथ चतुर्थ्यु॥ इंद्राग्नी तविषाणि वां सधस्थानि प्रयांसि च॥ युवोरप्तूर्यं हितमिति। हे इंद्राग्नी
वां युवयोस्तविषाणि बलानि प्रयांसि अन्नानि वसवस्थानि सह स्थितानि परस्परमवियुक्तानि वर्तते॥ यथा अप्तूर्यं रश्मिद्वारा पांप्रेर
कत्वं युवोर्युवयोरेव स्थितं निहितं निहितं वर्तते। तस्मात्सोमपानप्रभृतिषु सर्वकर्मसु इंद्राग्न्योः साहचर्यं वर्तनामिति भावः सधस्थानि
च्छागतानि रक्तो अतोनुपसर्गेकासथमास्थायोः छंदसीति सहस्य सधादेशः अथ त्वाम्यभिति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथ २०१
मा॥ ॥ त्वामग्ने पुरुशचीपत इंद्र विश्वाभिरूतिभिः॥ भगं न हि त्वा यशसं वसुविदमनु शूर चरामसीति॥ हे शचीपते इंद्र अग्न्येहस्य

भिमतं विश्वाभिः सर्वाभिरूतिभिर्मरुद्भिः सह। हे शूर वीर भगं न भाग्यमिव यशसं यशस्विनं। वसुविदं धनस्य लंभकं त्वा त्वामनुचरा
मसि अनुचरामः परिचरामेत्यर्थः॥ ॥अथ द्वितीया॥ पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः॥ नकिर्हि दानं परिमर्धिषत्वे य
द्यद्यामि तदा भर॥ हे इंद्र त्वं अश्वस्य पौरः पूरयिता भवसि। तथा गवां पुरुकृत् बहुकर्तासि। हे देव हिरण्ययः हिरण्मयः उत्सः
उत्ससदृशोसि हे इंद्र त्वयि वर्तमाने दानमस्मद्विषयं देयं धनं वा नकिर्हि परिमर्धिषत् न कश्चिद्धिनस्ति अतो यद्यद्यामि याचे तत्तदा
भर आहर मघां॥ ॥अथ त्वं ह्येहि चेरव इति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ त्वं ह्येहि चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघ
वन् गविष्टय उदिंद्राश्वमिष्टये॥ इति। हे इंद्र त्वं हि खलु सामर्थ्याद्द्युलोकान्निगम्यते। अत एव आगच्छ। आगत्य चास्मभ्यं भगं भजनीयं ध
नं विदाः लंभस्व दद्स्वेत्यर्थः वसुत्तये अस्माकं दातायः। हे मघवन् गविष्टये गा इच्छते मह्यं उद्वावृषस्व सिंच स्वकाम इति। प्रोषानया
ए इंद्र अश्वमिष्टये अश्वं एषणवते मह्यं अश्वानुद्वावृषस्व सिंच स्व देहि॥ ॥अथ द्वितीया॥ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मं

651/1973

हसे॥ आपुरंदरंचकृमविप्रवचसइंद्रंगायंतोवसे॥ इति। हेइंद्रत्वंपुरूपुरूणिबहूनिसहस्राणिशतानिचपृथागवादिपृथ्यानिदातायज
२३० जमानविषयायमंहसे अनुमन्यसेयद्वादानायदात्रेयजमानायमंहसेप्रयच्छसि। मंहतिर्दानकर्मा। अथपरोक्षेणब्रवीतिपुरंदरंश
त्रुपुराणांदारयितारंइंद्रंअवासरक्षणायतर्पणायवागायंतःस्तुवंतःविप्रवचसःविविधप्रकृष्टवचनावयंआआगंतारंअभिमुखं
वाचकृमकुर्म॥ अथयोविश्वेतिप्रगाथात्मकंपंचमंसूक्तंतत्रप्रथमा॥ योविश्वादयतेवसुहोतामंद्रोजनानां॥ अथोर्नपात्राप्रथ
मान्यस्मैप्रस्तोमायंत्वग्नयेइति॥ होतादेवानामाव्हातामंद्रोमादईनोयोअग्निःविश्वासर्वाणिवसुवसूनिधनानियजमानेभ्यो
दयतेप्रयच्छतितस्माअग्नयेमधोर्नमदकरस्यसोमस्येवप्रथमानिमुख्यानिपात्रापात्राणिस्तोमाःप्रयच्छंतुप्रगच्छंतु॥ ॥अथद्वि॰
अश्वंनगीर्भिरथ्यंसुदानवोमर्मृज्यंतेदेवयवः॥ उभेतोकेतनयेदस्मविश्पतेपर्षिराधोमघोनां॥ इति। हेदस्मदर्शनीयविश्पते २३०
विशांपतेअग्नेयंत्वासुदानवः शोभनदानादेवयवोदेवानात्मनइच्छंतोयजमानारथ्यंरथस्यवोढारंअश्वंनअश्वमिवगीर्भिःस्तुति

भिःमर्मृज्यंतेपरिचरंतित्वमस्माकंयजमानानांतोकेपुत्रेतनयेपौत्रेचोभेउभयस्मिन्मघोनांधनवतांराधोधनंपर्षिप्रयच्छ॥ ॥इतिषो
डशोध्यायेप्रथमःखंडः॥ अथद्वितीयखंडेइमंमेवरुणेत्येकर्चंप्रथमंसूक्तंसारंगेषा॥ इमंमेवरुणश्रुधीहवमद्याचमृळय॥ त्वामव
स्युराचकेइति। हेवरुणमीमदीयमिमंहवमाह्वानंश्रुधिशृणु।श्रुश्रवाण॥ छांदोहेःश्रुणुहश्रवत्यधंदसीति। हेर्द्धिरादेशः। बहुलंछंद
सीति। विकरणस्यलुक्। अन्येषामपिदृश्यतइतिसंहितायांदीर्घः। विंच। अद्यास्मिन्दिनेमृळयअस्मान्सुखयअवस्युःरक्षणेच्छुः। अव
सशब्दात्। क्यप्आत्मनःक्यच्। क्याच्छंदसीत्युप्रत्ययः। एवंविधमहंत्वांवरुणंआआभिमुख्येनचाकेशब्दयामि। केगेशब्दे अस्माल्लिटि
आदेशइत्यात्वंद्विर्भावेतुले। अतोलोपइटिचेत्याकारलोपः। इखंतिङ्तिङइतिनिघातः। स्तोमास्त्यर्थः॥ कयात्वंनऊत्येकर्चंसूक्तंसारंगे
षा॥ कयात्वंनऊत्याभिप्रमंदसेवृषन्। कयास्तोतृभ्यआभरेति। हेवृषनकामानांवर्षितरिंद्रकयाकेनऊत्याअवरक्षणाविपुगत्यर्थेऊ
तीपूतीत्यादिनानिपातितः। केनाभिगमनेननोस्माभिःनःप्रमंदसेप्रकर्षेणमादयसि। अस्मदीयंयज्ञंप्रतिसोमपानार्थमागमनेनवात

653/1973

दीयश्रुतिश्रवणार्थमागमनेन वा कुरस्मान् घमादयसीति। वृंचकयाकेनाभिगमेनास्तोतृभ्योस्मभ्यं धनमाभरविभर्षि। इतींद्रस्तोतार
२३३ स्तस्ति॥ अथेंद्रमिद्देवतातय इति प्रगाथस्य पंक्तिर्लयंस्तंतत्र प्रथमा॥ इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे॥ इंद्रं समीके वनिनो हवामह इंद्रं धनस्य
सातये॥ इति। देवतातये देवैः स्तोतृभिर्यज्ञविस्तार्यत इति देवतातिर्यज्ञस्तदर्थं। इंद्रमिद्देवेषु मध्ये इंद्रमाह्वयामहे। अध्वरे यज्ञे प्र
यति गच्छति। उपक्रांते सति इंद्रं हवामहे तथा समीके सम्यगाते संपूर्णे च यागे वनिनः। संभजमाना वयं इंद्रमेवाह्वयामहे यद्वा समीक
मिति संग्रामनाम। समीके संग्रामे इंद्रमाह्वयामहे धनस्य सातये लाभाय इंद्रमाह्वयामहे अतः स्तोतॄन् अस्माँ इंद्र आगच्छत्वित्यर्थः॥ ॥अथाह्
इंद्रो मह्ना रोदसी पप्रथच्छव इंद्रः सूर्यमरोचयत्। इंद्रे ह विश्वा भुवनानि येमिर इंद्रे सुवानास इंदवः॥ इति। अयमिंद्रः शाकशवसा आत्मी
यस्य बलस्य मह्ना महिम्ना महत्त्वेन रोदसी द्यावापृथिव्यौ पप्रथत् अप्रथयत् विस्तारितवान्। तथा स्वर्भानुना हतं सूर्यं इंद्रः आरोचय २३३
यत् अदीपयत् तस्याः करस्य वा धनप्रकाशितवान्। अपि च इंद्रेण अस्मिन्नेवेंद्रे विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि येमिरे

उपरमंतो इंद्रेण नियम्यंत इत्यर्थः। तथा सुवानासः सुवानाः अभिषूयमाणा इंदवः सोमाश्च अस्मिन्नेवेंद्रे नियम्यंते परमात्मन्यंतर्भवंती
त्यर्थः॥ अथ विश्वकर्मन्नित्येकर्चं चतुर्थं सूक्तं सामकगेणा॥ ॥विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वं स्वा हि ते। मुह्यंत्वन्ये अभि
तो जनास इहास्माकं मघवा सूरिरस्तु॥ विश्वकर्मन् विश्वविषयकर्मवन् एतन्नामक परमेश्वर हविषा हविर्भृते सा विश्वकर्मणा मयादत्ते
न वा हविषा वावृधानो वर्धमानः विश्वकर्मा सर्वाणि भूतानि जुहवांचकार स आत्मानमप्यंतत आजुहवांयकरोति निरुक्तं पूर्वमुदाहृतम
। स्वयमेव तन्वा शरीरेण स्वा हि ते अग्नौ आहुति हविर्यजस्व पूजय। अन्यो मर्त्तोन्ये जनासो जनाः अयष्टारोस्मद्यागविरोधिनो वा मुह्यंतु
मुग्धा भवंतु। अभितः सर्वतः। अथ परोक्षकृतः। इहास्मिन्यागे अस्माकं मघवा अस्मत्प्रासंनहविर्लक्षणेन धनेन धनवान् सूरिः
स्वर्गादिफलस्य प्रेरकोस्तु भवतु। अत्र विश्वकर्मन् हविषा वर्धमान इत्यादि निरुक्तं द्रष्टव्यं। तन्वं स्वाहिते पृथ्वीरूपं द्यामिति पाठः॥ ॥अया
रुचेति द्वृचं पंचमं सूक्तं तत्र प्रथमा॥ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्मिः। धारापृष्ठस्य रोचते पुनानो अरुषो

655/1973

२३२ हरिः विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः॥ इति। पुनानः पूयमानः सोमः। हरिण्या हरितवर्णया अया अनया रुचा रोचमानया
धारया विश्वा सर्वाणि द्वेषांसि द्वेष्टॄणि रक्षांसि सोमतरति विनाशयति। तत्र दृष्टांतः। सूरो न यथा सूर्यः स्वयुग्वभिः सह युक्तैरश्वैरश्मिभिः। न
मांसि हन्ति तद्वत्। स्वयुग्वभिरिति द्विरुक्तिरादरार्था यद्वा धारया युक्तः सोमः युक्तैस्तेजोभिः स रक्षांसि तरति। तस्य रसस्य दशापवित्र
स्योपरि षिक्तस्य एष सेचन इति धातुः सुतस्य धारा रोचते दीप्यते पुनानः पूयमानः हरिर्हरितवर्णः सोमः अरुष आरोचमानो भवति यद्यः
सोमः सप्तास्येभिः रसहरणशीलैः आस्येभिर्ऋक्वभिः स्तुतिमद्भिः ऋक्वभिः स्तोतृभिः विश्वा विश्वानि व्याप्तानि रूपा रूपाणि नक्षत्राणि प
रियाति गच्छति व्याप्नोति एवंस्य कृतस्येति इति प्र॰ पाठो॥ ॥अथ द्वितीया॥ प्राचीमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो र
थो दैव्यो दर्शतो रथः॥ अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्॥ वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता इति॥ चेकितत् ज्ञा २३२
मिनः सोमः प्राचीं पूर्वां प्रदिशं प्रकृष्टां दिशमनुयाति अनुगच्छति किंच दर्शतः सर्वैर्दर्शनीयः दैव्यः देवेऽभवः तव रथः से

यस्य रश्मिभिः संयतते संगच्छते पुनर्दर्शतो रथ इत्यादरार्था ततः पुंस्या पुंस्त्वावगमानि उक्थानि स्तोत्राण्यग्मन् इंद्रं गच्छंति। तथा जै
त्राय जनार्थं तानि स्तोत्राणि इंद्रं हर्षयन् हर्षयंति नयानम्य वज्रश्च तमिंद्रं गच्छतिय यद्दा समत्सु संग्रामेषु अनपच्युता अनप
च्युतौ शत्रुभिरपराजितौ सोमस्त्वं च इंद्रश्च युवां समत्सु संग्रामेषु सह भवथः तदा स्तोत्राण्यगमनार्हाणि भवंति॥ पुनरनपच्यु
तेत्यादरार्था॥ ॥अथ तृतीया॥ त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे॥ परावतो न साम
तद्यत्रा रणंति धीतयः॥ त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे इति॥ हे सोम त्वं त्यत् त्यानि पशुगवादीनि धनानि पणिभि
रपहृतं तद्वास्म कं धनं अविदः अविदः अलभथाः। अभ्रापिन्वा। ऋतस्य यज्ञस्य धीतिभिर्धात्रीभिर्मातृभिर्वसतीवरीतिः स्व आ
त्मीये दमे गृहभूते दमे यज्ञे संमर्जयसि सम्यक् शुद्धो भवसि। परावतो न। दूरस्थाद्देशान्न यथा साम सामध्वनिः श्रूयते तथा तव न
दयामध्वानः सर्वैः श्रूयते। असौ सोमाभिषवास्मि प्रायेणातः यत्र यस्मिन् यज्ञे धीतयः कर्मणां धर्तारो यजमाना रणंति रमंते

657/1923

रोचमानः सोयं सोमः त्रिधातुभिस्त्रयाणां लोकानां धारयित्रीभिः अरुषीः रोचमानाभिर्दुग्धिभिः वयोन्नं दधे स्तोतृभ्यः प्रयच्छति।
२१३ पुनर्वीप्यावधूत्यर्थः॥ ॥इति षोडशोध्यायो द्वितीयः खंडः॥ अथ तृतीयखंडे उत नो गोषणिमित्येकर्कं चं प्रथमं सूक्तं तत्र साऋगेषा॥
उत नो गोषणिं धियमश्वसां वाजसामुत॥ नृवत्कृणुह्यूतये॥ति। उतापि च हे पूषन् गोषणिं गवां सनित्रीं होत्रीं अश्वसां अश्वानां सनि
त्रीं वाजसां यान्नानामन्नानां सनित्रीं। उतापि च नृवत् बलवत् यतीन् रणां वनित्रीं दात्रीं एवं भूतां धियं बुद्धिं कर्म वा नोस्माकं उतये नृम्णेउ
पाभागार्थं कृणुहि कुरु॥ ऊतये वीतये इति पाठः॥ ॥अथ शशमानस्येत्येकर्चं द्वितीयं सूक्तं तत्र सेषाऋक्॥ शशमानस्य वा नरः स्वे
दस्य सत्यशवसः॥ विदा कामस्य वेनत इति। हे सत्यशवसः अवितथबलाः नरो नेतारो मरुतः शशमानस्य शुष्मान् स्तुतिभिः सं
भजमानस्येत्यर्थः॥ स्वेदस्य स्तावकमंत्रोच्चारणजनितेन श्रमेन स्विद्यमानस्य गात्रस्य वेनतः वेनतिः कांतिकर्मा कामयमानस्य
वा शब्दः समुच्चये एवं भूतस्य स्तोतुश्च कामस्य ममभिलाषं विदलं भवत प्रयच्छतेत्यर्थः॥ उप नः सूनव इत्येकमृचं तृतीयं सूक्तं

तत्र सेषाऋक्॥ उप नः सूनवो गिरः शृण्वंत्वमृतस्य ये॥ सुमृळीका भवंतु न इति॥ अमृतस्य मरणरहितस्य प्रजापतेर्ये सूनवः पुत्रा
ते देवाः नोस्माकं गिरः स्तुतीः उपशृण्वंतु॥ नोस्माकं सुमृळीकाः सुखु उयितारः सुखयितारश्च भवंतु संतु। प्रवां महीति त्र्यृचात्मकं चतु 659/1973
र्थं सूक्तं तत्र प्रथमा॥ प्रवां महि द्यवी॥ अभ्युपस्तुतिं भरामहे॥ शुची उप प्रशस्तये॥मिंद्रे॥ति। हे द्यावापृथिव्यौ द्यवी द्योतमाने वां
युवाभ्यां उपस्तुतिं स्तोत्रं महि महत् प्रभृतं अभिप्रभरामहे प्रकर्षेण संपादयामः किं तत् शुची शुचिभ्युं वां प्रशस्तये प्रशंसितुं उप
उपसर्गश्रुतेर्योग्यक्रियाध्याहारः उपगच्छाम इति शेषः॥ ॥अथ द्वितीया॥ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः॥ ऊह्याथे स
नादृतमिति। हे देव्यौ तन्वा स्वीयया मूर्त्या दक्षेण बलेन च मिथः प्रत्येकं पुनाने शोधयंत्यौ यज्ञं यजमानं वा राजथः ईश्वरे भवथः। य
द्वा नत्वा स्वशरीरैकदेशेन मिथः परस्परं पुनाना शोधयंत्यौ द्यौरस्त्रीयेनोधारणभर्तृत्वा स्वित्रथः ईश्वरे भवथः॥ अद्यनत्वा स्वशरी
रैकदेशेनेत्यु यद्वानत्वा स्वशरीरैकदेशेन मिथः परस्परं पुनाने शोधयंत्यौ द्यौरस्त्री येनोसावस्थर्वा येन कार्त्स्न्यमद्रैचं सरिस्थिते

नहियमिमीतेतिविशेषः सनात् सदाकालं कृतं यज्ञं जग्राहेव हे स्थ ॥ ॥अथ तृतीया ॥ मही मित्रस्य साधथ स्तरंती पिप्रती ऋतं । परि यज्ञं निषे
२३५ दथुरिति ॥ मही महत्यौ द्यावापृथिव्यौ मित्रस्य मित्रभूतस्य स्तोतुरभिमतं साधथः साधयथः ऋतं मंत्रं तरंती तारयंतौ तारयंत्यौ पिप्रती
पूरयंत्यौ यज्ञं परिपरितो निषेदथुः आश्रयथः ॥ अयमु ते समतसीति नवर्चात्मकं पंचमं सूक्तं तत्र प्रथमा ॥ अयमु ते समतसि कपोत
इव गर्भधिं । वचस्तच्चिन्न ओहस इति ॥ हे इंद्र अयं सोमः अयमपि दृश्यमानः सोमः ते तव स्वार्थं संपादितः ॥ यं सोमं समतसि सम्यक्
सातत्येन प्राप्नोषि ॥ तत्र दृष्टांतः ॥ कपोत इव । यथा कपोताख्यः पक्षी गर्भधिं गर्भधारिणीं कपोतीं प्राप्नोति तद्वत् । तच्चित्तस्मादे
व कारणान्नोस्मदीयं वचन ओहासे प्राप्नोषि । गर्भो धीयते गर्भो स्यां धीयत इति गर्भधिः कर्मण्यधिकरणे चेति किप्रत्ययः ॥ कृदुत्तर २३४
पदप्रकृतिस्वरत्वं ओहसा ओहिर ऊहिर आर्द्रम इत्यस्य येनात्मनेपदं ॥ ॥अथ द्वितीया ॥ स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । वि
भूतिरस्तु सूनृतेति ॥ हे इंद्र राधानां धनानां पते पालक गिर्वाहो गीर्भिर्वह्यमान वीर शौर्योपेत यस्य ते तव स्तोत्रमीदृशं भव

तिं तस्य तव विभूतिर्लक्ष्मीः सूनृता प्रियसत्यरूपास्तु ॥ ॥अथ तृतीया ॥ ऊर्ध्वस्तिष्ठान ऊतये स्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै
इति । हे शतक्रतो अनंतसंख्याकर्मोपेत अस्मिन्प्रसक्ते । वाजे संग्रामे तोस्माकमूतये रक्षणाय ऊती तृतीयाया दिनाजिन उदात्तत्वं । 661 / 1973
ऊर्ध्व ऊन्नतः अस्मत्कार्ये तिष्ठ भव त्वं वा अहं च मिलित्वा अन्येषु कार्येषु संब्रवावहै । सम्यग्विचारयाव तिघ्नचोतस्तिषु ॥ इति संहितायां
दीर्घः ॥ गाव उपवदावट इति ऋक्चं षष्ठं सूक्तं तत्र प्रथमा ॥ ॥ गाव उपावतावतं मही यज्ञस्य रप्सुदा ॥ उभा कर्णा हिरण्ययेति । हे गा
वो घर्मदुघाः यूयं अवटं महावीरं महावीरं उपवस्तु उपावत वृद्धमव्यत्ययः उपागच्छत यस्माद्यज्ञस्य घर्मयागस्य साधनभूते र
प्सुदा रप्सुदा रभूरेरिस्योः फलप्रदे रश्विनोर्दात्तैवायद्वार पणं शब्दनरूप मंत्रः ॥ तेन सह उदातव्या । अथ वा पृक्षरणे रपामं
त्रेण क्षारणीये द्रोहनीये इत्यर्थः गवाज्ययोः पयसी मही महती बहुले अपेक्षिते अत उपावत । गोशब्दो जाया अपत्य फललक्षकः ।
अजापसोपि महावीरे असेवतीत्यतान ॥ अपि चास्य महावीरस्य उभा उभे कर्णा कर्णस्थानीयौ द्वारौ हिरण्यया हिरण्मयौ सु

वर्णरजतमयाक्त्यर्थः। अवरे अवतमितिपाठो॥ ॥अथद्वितीया॥ अभ्यारमिदद्वयोनिषिक्तंपुष्करेमधु॥ अयतस्यविसर्जनेनेति।
२३७ अद्वयआद्रियमाणाअध्वर्यादयोभ्यारभित॥ अभिगम्येवनिषिक्तमतिरिक्तंमधुपुष्करेवपुष्करेपद्मध्ये उपयसमीपात्रेसिंच
तिअग्निहोत्रार्थंअवरस्यमहावीरस्यविसर्जनसमये होमानंतरंखलुमहावीरमांसंघांआसादयंति॥ अवरस्यावनस्येतिपा
ठो॥ ॥अथतृतीया॥ सिंचंतिनमसावरमुद्धाच्चक्रंपरिज्मानं॥ नीचीनवारमक्षितमिति॥ नमसानमनेनावरंमहावीरंउद्धाच
क्रंउपरिस्थितचक्रंपरिज्मानंपरितोव्याप्तंनीचीनवारंवीचीनद्वारं। अक्षीनमक्षीणंईदृशंक्षीराद्यवशेषमुक्तं। आहवनीयस्यो
परिनमनेनसिंचंतिजुह्वंतिमहावीरेणाहिआहवनीयेहूयते। अवरमवतमितिपाठो॥ ॥इतिषोडशोध्यायेतृतीयःखंडः॥ अथ
चतुर्थखंडेमाभेमेतिप्रगाथात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ १॥ माभेममाश्रमिष्मोग्यस्यसख्येतव॥ महत्तेवृष्णोअभिचक्ष्यंकृतं २३५
पश्येमतुर्वशंयदुंमिति॥ हेइंद्र उग्रस्यापूर्णबलस्यतवसख्येमखिलेसतिवयंमाभेममाभेष्मउताश्चिदपिश्रान्तोनोतामाभूमामाश्र

मिष्मश्रांताःपीडिताश्चमाभूमावृषभःकामानांवर्षितु। स्तेतवसंबंधिमहत्प्राभृतंकृतंरत्नवधादिलक्षणंकर्माभिचक्ष्यंअभितःख्या
पनीयंस्तोतव्यंअतोमहानुभावस्यतवसख्यंप्राप्तानांभातिश्रमोनजायतेइत्यर्थः। तत्कथमवगम्यतइतिचेत। उच्यतेतुर्वशं। एत
न्नामानंराजर्षिं। यदुंएतत्संज्ञकंच। तत्रसाहाय्यकत्वेनजीवंतोपश्यमद्दृष्टवंतःखलुवयं। अतःकारणात्सख्यंप्राप्तस्यभयादिकं
नजायतइत्येतदुपपन्नमित्यर्थः॥ ॥अथद्वितीया॥ सव्यामनुस्फिग्यंवावसेवृषानदानोअस्यरोषति। मध्वासंपृक्ताःसारघेणधे
नवस्तूयमोहिद्रवापिबोति। वृषाकामानांवर्षितेंद्रःसव्यांदक्षिणेतरांस्फिग्यांकटिप्रदेशमनुलक्षीकृत्यार्थेआनोःकर्मप्रवचनीयत्वंस
व्ययास्फिग्याऽशरीरैकदेशेनैववावसेवस्तोसर्वभूतजानमाच्छादयतिस्वयंकृत्स्नंजगदतीत्यवर्ततइत्यर्थः। कुत्रगंतरंचदर्शयति। यदस्य
यास्फिग्याक्षामवस्कादइति। अपिचादानः। अवखंडयिता। दानमवखंडनेपचाद्यच्वसचअस्यइममिंद्रंनरोषति। नहिनस्ति। रुषरिष
हिंसार्थ्यं। इंद्रंहिंसितुंकश्चिदपिशक्तोनास्तीत्यर्थः। यद्वाहेयजमानदानोहविषांदातात्वंअस्येंद्रस्यनरोषतिरोषंनजनयसीति

663/1973

सर्वं दाशद्भिः परिस्रवसीत्यर्थः॥ उत्तरोऽर्धर्चः प्रत्यक्षकृतः॥ सारघेण सरघा मधुमक्षिका तत्संबंधिना मध्वा मधुना लुप्तोपममेतत्।
२३६ मधुनेव रसवता। क्षीरादिनाश्रयणद्रव्येण संपृक्ताः संमृष्टाः। संस्कृता धेनवः धेनुवत्प्रीतिजनकाः। अस्मदीयाः सोमाः यद्वा धिवेः
प्रीणनार्थाद्धेनवः प्रीणयितार इत्यर्थः। अथवा धेट् पाने धेट इच्चेत्यौणादिको नुप्रत्ययः। तत्संनियोगेन इकारांतादेशश्च पान
व्याः सोमा इत्यर्थः। यत एवमतः कारणात् हे इंद्र त्वं क्षिप्रं तूयं अस्मत्समीपमागच्छ। आगत्य च सोमाः यस्मिन्नुत्तरवेदिलक्षणे स्था
ने द्रूयंते तं द्रवणं शीघ्रं गच्छ। द्रु गताविति धातुर्व्यत्ययेनात्मनेपदं तस्मिंल्लुङि इति संहितको दीर्घः। तदनंतरं अध्वर्युणा दत्तं सोमं पिब। तेन सोमेन
सम्यक्। स्वोदरं पूरयेत्यर्थः॥ ॥ इमा नु त्वेति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ इमा उ त्वा पुरुवसो गिरो वर्धंतु या मम। पा
वकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत॥ हे पुरुवसो बहुधन इंद्र मदीया इमा गिरः स्तुतिरूपा वाचः त्वां वर्धंतु। २३६
वर्धयंतु तथा पावकवर्णा अग्निसमानतेजस्काः अत एव शुचयः शुद्धाः विपश्चितो विद्वांसः उद्गातारः स्तोमैः स्तोत्रैर्ब

हिष्पवमानादिभिरभ्यनूषत त्वामभिष्टुवंति। णु स्तुतावित्यादिः॥ ॥अथ द्वितीया॥ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव
पप्रथे॥ सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये इति॥ अयमिंद्रः सहस्रं सहस्रसंख्याकैः ऋषिभिः अतीन्द्रियार्थदर्शि
भिः स्तोतृभिः सहस्कृतः सहसा बलेन युक्तः कृतः स्तुत्या हि। देवताया बलं वर्धते। स च एवं स्तुतः सन् समुद्र इव उदधिरिव पप्र
थे प्रथितो विस्तीर्णो बभूव। अस्य चेंद्रस्य सत्योऽवितथः सः प्रसिद्धो महिमा महत्त्वं शवो बलं यज्ञेषु यागेषु विप्रराज्ये यज्ञः
कर्मराज्ये विप्राणां स्तोतॄणां राज्ये स्तुतशास्त्रसंघे गृणे स्तूयते। अथ यस्यायमिति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः। तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिरिति। यस्य यज्ञः अयं विश्वः
सर्वो लोकः अर्यः प्रभुराधिपो शेवधिपाः निधिपालकः विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मीति॥ मं
त्रातारपवितत्वात्। दासो भृत्य इव अरिः प्राप्तो भवति। स यज्ञः अर्ये स्वामिनी रुशमे नियंतरि पवीरवि ग्रस्तस्याः पि

665/1973

तरिपावीरवीकन्याचिचाप्युः सरस्वतीत्युक्तं। तिरश्चितातिरोभूतापितृभ्येन हे इंद्र तुभ्यमेव राविहविर्लक्षणं धनमुद्दिश्य अन्यते प्रातोभ
२३७ वति। अयमभिप्राप्याविप्रश्नत्वाद्दिकासर्वलोकाबृहस्पतिसवराजसूयादिरूपयस्यपस्य भत्यवबर्धते। सताहशोयन्नो मंत्रो
दृष्टायाः सरस्वत्याः। पितृस्थानीयपरमेश्वररूपेण गृहीतोपि सन्। हे इंद्र त्वदर्थं एवं हविर्दातुं प्रकटो भवति। तथाविधस्त्वमस्मि
ति॥ ॥अथ द्वितीया॥ उरुण्यवो मंतं धनुश्च्युतं विप्रासो अर्कमानृचुः। अस्मे रयिः पप्रथे वृष्ण्यं शवोस्मे सुवानास इंदवः इति॥
उरूण्य वो यागादिकर्मसुरक्षिता विप्रासो मेधाविन ऋत्विजः मधुमंतं मधुक्षीरादया। इति युक्तं घृतश्च्युतं ते घृ माज्यं श्चोतते
रक्षति यस्मिंनाहुतिद्वारेणेति घृतश्च्युतं अर्कमर्चनीयमिंद्रं आनृचुः पूजयंति। किमर्थमिति उच्यते। अस्मे अस्मभ्यं रयिः २३७
प हविर्लक्षणं धनं प्रथे प्रख्यातं भवतु। तथा वृष्ण्यं वर्षणशीलं सोमनिबंधनं उ बावलमिति प्रथतां। तथा अस्मे अस्माक
सुवानासः स्तुवाना अभिषुताः इंदवः सोमाः प्रख्या भवंतु। एवं रूपं फलं कामयमाना ऋत्विजः इंद्रं पूजयंतीत्यर्थः॥ अथ

गोमन्न इंदो इति चतुर्थसूक्तं तत्र प्रथमा॥ ॥गोमन्न इंदो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारयेइति। हे सु 667/1923
दक्ष सुबल हे इंदो सोम सुतोभिः षुतस्त्वं नोस्माकं गोमत्। यज्ञसाधनगोयुक्तं धनं धनिव धन्व वर्णविकारोत्र गमय धावि गत्य
र्थः॥ भ्वादिः॥ ततो हे शुचिर्भूतं दीप्यमानं वर्णं रसं च गोषु गव्येषु क्षीरादिषु अधिधारय अधिधारयामि अयामीत्यर्थः॥
अथ द्वितीया॥ सनो हरीणां पत इंदो देवप्सरस्तमः॥ सखेव सख्ये नर्यो रुचे भव इति॥ हे हरीणां पते अस्मदीयानां
हरितवर्णानां पशूनां स्वामिन् हे इंदो त्वं मदेव प्सरस्तमा अतिशयेन दीप्तरूपोपेतः सन् त्वं नर्यः कर्मनेतृभ्यः ऋत्विग्भ्यो हि
तः सत्वं नो स्माकं रुचे भव दीप्तिकरो भव कामिव सखेव यथा सख्ये मित्राय दीप्तिकारो भवति तद्वत्॥ ॥अथ तृतीया॥ सने
मि त्वमस्मदा अदेवं कंचिदत्रिणं। साह्वां इंदो परिबाधो अप द्वयुमिति। हे सोम त्वं सनेमि पुराणं सख्यं अस्मदस्मासु कुरु
आ अपि च अदेवं अदेवनशीलं कंचिदपि अत्रिणं अदनशीलं राक्षसं अस्मत्। अस्मत्तोपगमय अकिंच। हे इंदो सोम सा

त्तानत्रानुनभिभवन्बाधावाधमानान्परिजहितथाह युंदुपवंनंसत्यात्तत युक्तं वा द्याभ्यांतरमायाद्वायापेतंवाराक्षसंभ
२१८ स्मतोऽगमय। अथाज्ञंतइतिपंचमंसक्तेतचप्रथमा॥ ॥अंजतेव्यंजतेसमंजतेक्रतुंरिहंतिमधुनाभ्यंजते।सिंधोरुच्छ्वासे
पतयंतमुक्षणंहिरण्यपावाःपशुमप्सुगृभ्णतइति। सोमंऋत्विजोंजतेगोभिस्तथाव्यंजतेविविधमंजंतिसमंजतेसम्यगंजंति
स्तुत्यर्थत्वाद्पुनरुक्तिः।तथाक्रतुंबलकर्तारंरिहंतिहंत्यास्वादयंतिदेवाः तथापुनर्मध्वामधुनागव्येनाभ्यंजतेतमेयसो
मंसिंधोरुदकस्यरसस्याधारभूतउच्छ्वासेदेशेपतयंतंगच्छंतं।पतरगतावित्यस्मात्स्वार्थिकेणिवृध्यभावःछांदसः
उक्षणंसेक्तारंहिरण्यपावाहिरण्येनपुनंतःपशुंद्रष्टारं।पशुःपश्यतेरितियास्केनोक्तत्वात्। अप्सुवसतीवरीषुगृभ्णते
गृभ्णाति॥ ॥अथद्वितीया॥विपश्चितेपवमानायगायतमहीनधारात्यंधोअर्षति। अहिर्नजूर्णामतिसर्पतित्वचमत्योन २१९
क्रीडन्नसरद्वृषाहरिः इति।विपश्चितेमेधाविनेपवमानायपूयमानायतस्मैस्तोत्रंउरूत। सचविपश्चित। सोमःमहीनधारा

महतीवर्षधारेवअंधोन्नंरसात्मकमभ्यर्षति।अहिर्नअहिरिवजूर्णांजीर्णांत्वचमतिसर्पतिअतिमुंचतिनद्रुतिसर्पतिधा
राद्रष्टापवित्रात।अभिषवादिकर्मणात्वं चविमुंचतीत्यर्थः।अत्योनअश्वइवक्रीडन्क्रीडमानःअसरत्सरतीद्रोणकलशंग
च्छतिरषावर्षकःकामानांहरिर्हरितवर्णोरसः॥ ॥अथतृतीया॥अग्रेगोराजाप्यविष्यतेविमानोअन्हांभुवनेष्वर्पितः॥हरि
र्घृतस्नुःसुदृशीकोअर्णवोज्योतीरथःपवतेरायओक्यः इति॥अग्रेगःआग्रगंताराजाराजमानाआप्याप्सुसंस्कृतःसोमस्त
विष्यतेश्रूयतेयाज्ञैःअन्हांदिनानांविमानोनिर्माताचंद्रकलाह्रासरक्षाधीनत्वाद्द्दर्शवहारस्यानिर्मातानिर्माताभुवनेषूदकेषुवसती
वसंबंधिष्वर्पितः स्थापितः।सराजाश्रूयते।किंच।हरिर्हरितवर्णः।घृतस्नुःप्रस्नोदकःसुदृशीकःशोभनदर्शनःअर्णव
उदकवानअर्णइत्युदकनामज्योतिर्मयरथः॥रायोधनस्यप्रापयितातुक्यःउदकइतिवासनात॥ तस्यहित॥ ॥४॥इति
षोडशोध्यायेचतुर्थःखंडः॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ७.७.७॥ 669/197

॥ ॥ इतिश्रीमन्महाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते
२३९ माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे षोडशोध्यायः ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे वि
द्यातीर्थमहेश्वरं ॥ ७ ॥ अथ सप्तदशोध्याय आरभ्यते ॥ ॥ तत्र प्रथमखंडे विश्वेभिरग्न इत्येतत्त्र्यचं प्रथमं सूक्तं तत्र प्रथ
मा ॥ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ॥ चनो धाः सहसो यहो इति ॥ हे सहसो यहो बलस्य पुत्र हे देवतारूपाग्ने वि
श्वेभिरग्निभिः सर्वैराहवनीयादिभिर्युक्तः त्वं इमं अस्मदीयं यज्ञं इदं अस्मदीयं वचः स्तोत्रं सेवमानः चनो अन्नं धाः अस्मभ्यं
धेहि ॥ ॥ अथ द्वितीया ॥ यच्चिद्धि शश्वता तना देवं देवं यजामहे । त्वे इद्धूयते हविः ॥ इति ॥ हे अग्ने यच्चिद्धि यद्यपि शश्वता शश्वतेन
नित्येन तना विस्तृतेन हविषा धनादिना देवं देवं अन्यमन्यं वरुणेंद्रादिरूपं नानाविधदेवताविशेषं यजामहे तथापि तद्धविः स २३९
र्वं त्वे इत् त्वय्येव हूयते । अन्यदेवतेतरविषययागाणामपि त्वदीयैवा सर्व इत्यर्थः । तेनातनु विस्तारोक्ष्णोतिक्रीपयवायवाप्र

यद्वा पश्चाद्यच्च । सुपां सुलुगिति तृतीयाया आकारः । देवं देवं नित्यवीप्सयोरिति द्विर्भावः ॥ तस्य परमाम्रेडितमिति उत्तरस्याम्रे
डितसंज्ञायां अनुदात्तं चेति सर्वानुदात्तत्वं यजामहे निपातैर्यद्यदिहंतेति निघातप्रतिषेधः । त्वे युष्मत्तत्सप्तम्येक
वचनस्य सुपां सुलुगिति शे आदेशः । त्वमावेकवचन इति सपर्यंतस्य त्वादेशः ॥ शेषलोपे अतो गुण इति पररूपत्वं शे इति
प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः हूयते । अह्नुत्सार्वधातुकयोरिति दीर्घः ॥ ॥ अथ तृतीया ॥ प्रियो नो अ
स्तु विश्पतिर्होता मंद्रो वरेण्यः ॥ प्रियाः स्वग्नयो वयं ॥ इति ॥ विश्पतिर्विशां प्रजानां पालकः पत्यावैश्वर्य इति पूर्वपदप्रकृति
स्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । होता होमनिष्पादकः मंद्रो हृष्टः वरेण्यो वरणीयः वृङ एण्यः वृषादि
त्वादाद्युदात्तत्वं । एवंविधोऽग्निर्नोऽस्माकं प्रियोऽस्तु भवतु वयमपि स्वग्नयः शोभनाग्नियुक्ताः बहुव्रीहौ नञ्सुभ्यामिति उ
त्तरपदांतोदात्तत्वं । एवंभूताः अतः तव प्रिया भूयास्मेति शेषः ॥ ॥ अथ इंद्र इति त्र्यचं द्वितीयं सूक्तं तत्र प्रथमा ॥ ॥

671/1973

इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥ इति। हे ऋत्विग्यजमाना विश्वतः सर्वेभ्यो जनेभ्यः पर्युपरि अवस्थितं
२२० इंद्रं वो युष्मदर्थं हवामहे आह्वयामः अतः स इंद्रोऽस्माकं केवलोऽसाधारणोऽस्तु इतरेभ्योऽप्याधिकं अनुग्रहं अस्मासु करोत्वित्य
र्थः। इंद्रं रन् प्रत्ययांतो नित्वादाद्युदात्तः॥ ॥अथ द्वितीया॥ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि॥ अस्मभ्यमप्रतिष्कुत इति।
हे सत्रादावन् अस्मदभीष्टफलानां सर्वेषां सह प्रदातः। अतो मामिन्न कनिच्छानिपथ्यश्वाति वनवृष्टिप्रदेंद्र आमंत्रिता
न्नं निघातः। अतः कारणात्। व्रीह्यादिनिष्पत्त्यर्थं हे वृषन् वृष्टिप्रदेंद्र आमंत्रितनिघातः नोऽस्मदर्थं अमुं दृश्यमानं चरुं
मेघं चरतीति चरुः। भृमृशीत्यादिना उ प्रत्ययः प्रत्ययस्वरेणांतोदात्ता अपावृधि उद्घाटय वृञ् वरणे लोटः सिप त २२०
स्य सेर्ह्यपिच्चेति हि स्वादिभ्यः श्नुः। तस्य बहुलं छंदसीति लुक्। श्रुशृणुपॄकृवृभ्यश्छंदसीति। हेर्धिरादेशः। तस्य ङित्त्वात्
पूर्वस्य गुणाभावः। निघातः उद्घाटयेत्यर्थः। तथैवास्मभ्यमस्मच्छब्दात् भ्यसो भ्यम्मिति भ्यमादेशः। शेषे लोप इ

ति दकारलोपः बहुवचने ल्वोरित्येत्वं न भवति। अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्युक्तत्वा प्रातिपदिकस्वरेणास्मेत्यकार
उदात्तः भ्यसोऽभ्यमित्यभ्यमादेशपक्षे शेषे लोप इति स पर्यंतशेषस्यादशब्दस्य लोपः तदा तन्निवृत्तिस्वरेण अभ्यम
आदेरकारस्य उदात्तत्वं अस्मदर्थं अप्रतिष्कुतः अप्रतिशब्दरहितः केनाप्यप्रतिशब्दितः कुङ् शब्दे निष्ठेति कर्मणि
क्तप्रत्ययः प्रातुः प्राक्प्रयोगः कारस्करादेराकृतिगणत्वात्। सकडागमः सुषामादेराकृतिगणत्वात् षत्वं नञ्स
मासे अव्ययपूर्वपदप्रकृतिस्वरत्वं यद्यदस्माभिर्याच्यते तत्तत्सर्वत्र नेति प्रतिशब्दं नोच्चारयति। अतोऽस्माद्विषये कदाप्य
स्खलित एतदेवाभिप्रेत्य यास्क आह अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वेति॥ ॥अथ तृतीया॥ वृषा यूथेव
वंसगः कृष्टीरियर्त्योजसा॥ ईशानो अप्रतिष्कुत इति। वृषा कामानां वर्षितेंद्र ओजसा स्वकीयेन बलेनानुग्रहीतुं कृष्टी
र्मनुष्यानियर्ति प्राप्नोति कीदृश इंद्रः ईशानः समर्थः। अप्रतिष्कुतः प्रतिशब्दरहितः याच्यमानं न परिहरतीत्यर्थः॥

673/1973

इंद्रस्य शरणं न॥ त्वं सगोचननीयमतिरेषभो यूथेव गोयूथानि यथा प्राप्नोति तद्वत् यूथा उ आयुवंती मिश्रीभवंतीति यूथानि। युमिश्रणामि
२२१ श्रणयोः निशीथगृधगृहयूथप्रोथा इति थक्प्रत्ययांतो निपातितः। निपातनाद्दीर्घत्वं प्रत्ययस्वरेण अकार उदात्तः। आश्रुं इसि बहुलमि
ति श्लुकं। इवेन विभक्त्यालोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यमिति समासे पिसएव स्वरः॥ ॥त्वं नश्चित्र इति प्रगाथात्मकं त्वलीयं
सूक्तं तत्र प्रथमा॥ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय। अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः इति। हे वसो वासक अग्ने चि
त्र दर्शनीय त्वं नः ऊत्या रक्षया सह राधांसि धनानि नोस्मभ्यं चोदय प्रेरय। अस्य लोके परिदृश्यमानस्य रायो धनस्य त्वं रथीरसि रं
हिता नेता भवसि। अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः। अपि च नोस्माकं तुचे अपत्यनामैतत् अपत्याय अपतनहे २२१
तुभूताय पुत्राय गाधं प्रतिष्ठां तु क्षिप्रं विदाः लंभय॥ ॥अथ द्वितीया। पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः। अ
ग्ने हेळांसि दैव्या युयोधि नोदेवानि ह्रुतांसि चेति। हे अग्ने त्वं अदब्धैः केनाप्यहिंसितैः अप्रयुत्वभिः अप्रकृभूतैः यानि त्वप

थगभावार्थः संहितः पर्तृभिः पालनसाधनैः तोकं पुत्रं तनयं पौत्रं च पर्षि पालय दैव्या देवसंबंधीनि च हेळांसि क्रोधान नोस्म
त्तो युयोधि पृथक् कुरु। अदेवानि मनुष्यसंबंधीनि च ह्रुतांसि हिंसनानि अस्मत्तः पृथक् कुरु॥ ॥अथ किमित्त इति त्र्यात्मकं चतुर्थं सूक्तं
तत्र प्रथमा। किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथे
ति॥ पुरा खलु विष्णुः स्वरूपं परित्यज्य कृत्रिमं रूपांतरं धारयन् संग्रामे वसिष्ठस्य साहाय्यं चकार। तं जानन् ऋषिः अनया प्र
त्याचष्टे। अत्र निरुक्तं। शिपिविष्टो विष्णुरिति। विष्णोर्द्वे नामनी भवतः। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः। किं ते विष्णो प्र
त्याख्यानमेतत् भवत्य प्रख्यापनीयं यन्नः शेप इव निर्वेष्टितोस्मीत्यप्रतिपन्नरश्मिः अपि वा प्रशंसानामैवाभिप्रेतं स्यात्
किं ते विष्णो प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोस्मीति प्रतिपन्नरश्मिः शिपयोऽत्र रश्मय उच्यंते तैराविष्टो भ
भवति मा वर्पो अस्मदप गूह एतद् वर्प इति रूपनाम वृणोतीति सतो यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिरिति। य

675/1978

तच्च उक्तिलार्थपक्षे योजना। हे विष्णो तेतव तं नाम किं परिचक्षि प्रख्याप्यं भवतीति दोषः। किं शब्दः क्षेपे अप्रख्याप्यमेव तद्भवति। तं ना
२२२ मास्मभ्यं प्रवचः शिपिविष्टो अस्मीति। अंतर्गतोपमानमेतत्। शेपइव निर्वेष्टितः। तेजसा अनाच्छादितो भवामीति अ
श्लीलार्थत्वादिदं नाम न प्रशस्तमित्यर्थः। यद्वा परिचक्षिर्वर्जनार्थः। तं नामकं परिचक्षि परिचक्ष्यं परिवर्जनीयं परित्याज्यं
विरुद्धार्थप्रतिपादकत्वात्। खलु एवं परित्यक्तं हि तत्। शिपिविष्टं समानं पूर्वेण अतः उक्तरूपविलक्षणं यद्वै अस्मदर्थरूपमस्ति एतद्रूपो
रूपं अस्मदस्माकं मा अपगूहः। अपगूहः संवरणं मा कुरु। गूढं संवरणे अपितु तद्रूपं प्रकटय। वैशब्दः स्वरूपस्य गूहनेकाप्र
सिद्धिरिति द्योतनार्थः। यद्यस्मात्त्वं अन्यरूप एव रूपांतरमेव धारयन् समिथे संग्रामे बभूथ अस्माकं सहायो भवसि तस्मात्त्वयेदं गू
हनं न कार्यमिति प्रशंसापक्षे तु। हे विष्णो तेतव तं नामकं परिचक्षि प्रख्यातं भवति न प्रख्यापनीयं स्वत एव प्रख्यातं अप्रख्या २२२
तं प्रख्यापनीयं किं तं नाम शिपिविष्टो रश्मिभिराविष्टोस्मीति यन्नाम प्रवक्षे यतः एव तत्प्रख्यातरूपं धं अतोस्माकमेतद्रूपं सर्वं

रूपं संवृतं मा कार्षीः। इदानीं गूढरूपोपि यद्यस्मात्त्वं समिथे संग्रामे अन्यरूपः कृत्रिमरूपः यदन्यद्वै अस्मदर्थरूपं शौर्यादिलक्षणं ता
दृग्रूप एव बभूथ भवसि। तस्मात्त्वं गूढोपि तादृश एवेत्यर्धमेव तस्य रूपस्य गूहनं अतो बहुतेजस्कं यद्वै अस्मद्वंश रूपं तद्दस्माकं
प्रदर्शयेति तात्पर्यार्थः॥ ॥अथ द्वितीया॥ प्रतत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्॥ तं त्वा गृणामि तवसमत 677/1973
व्यानक्षंतमस्य रजसः पराके॥ति। हे शिपिविष्ट रश्मिभिराविष्ट विष्णो तेतव तत्प्रसिद्धं विष्णुरिति प्रख्यातं नाम अर्यः स्वामी स्तुती
नां हविषां वा। तथा वयुनानि ज्ञातव्यान्यर्थजातानि विद्वान् जानन्। यच्च हव्यं आह्वानयोग्यं नाम अहमद्येदानीं प्रशंसामि
प्रकर्षेण स्तौमि। तव संप्रवृद्धं तं त्वां विष्णुमतव्यानतवी यान् अरक्षतरोहं गृणामि स्तौमि। कीदृशं अस्य रजसो लोकस्य प
राके दूरदेशे क्षयंतं निवसंतं॥ ॥अथ तृतीया॥ वषट्ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं॥ वर्धंतु त्वा सुष्टुत
यो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥ इति। हे विष्णो तुभ्यं आसः आस्यात्। आ अभिमुखं वषट्करोति। वषट्कारो सिव

२२३ वषट्कारेण हविर्हावयामि। हे अग्नेपि विष्टश्चापयो रश्मयः ते तव विश्वेभ्यो नइपइ दृतं। मम मदीयं हव्यं हविर्जुषस्व सेवस्व सुक्रतयः
शोभनस्तुत्यात्मिका गिरो वाचश्च त्वां वर्धंतु वर्धयंतु। हे विश्वेभ्यः यूयं बहुवचनं पूर्वं ग्राथर्थं यस्माद्यं भवथ। यूयं देवाः सर्वे स्वस्ति
भिरविनाशिभिर्नोस्मान् सदा सर्वदा। पात रक्षत॥ ॥इति सप्तदशोध्याये प्रथमः खंडः॥ अथ द्वितीयखंडे वायो शुक्रो अयामी
ति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियु
त्वतेति। हे वायो तुभ्यं शुक्रो व्रतचर्या दिनादीमोहं मध्वम धुरं सोमरसं कर्मणि षष्ठी अग्रं इतरेभ्यः पूर्वं अयामि प्रापयामि
। अयंनिरंतरभावितण्यर्थः॥ किमर्थं दिविष्टिषु दिवो स्वर्लोकस्य एषणेषु सत्सु हे देव वायो स्पार्हः स्पृहणीयस्त्वं नियुत्वता नि
युद्ध्योः प्रति नियुतो निम्नमापो न सधस्थं कु गतिः। हे वायो त्वं इहाश्वेषां गृहीतानां सोमानां पीतिं पानमर्हथः। युवामिंद्रवायू २२३
इंदवः सोमा यंति। प्राप्नुवंति। निम्नं स्थले प्रदेशं आपो न सधस्थं उदकानि। यथा सहैव गच्छंति। तद्वत् सर्वे सोमाः युवां

यंति हि॥ ॥अथ तृतीया॥ वायविंद्रश्च शुष्मिणा सरथं शवसस्पती। नियुत्वंता न ऊतय आ यातं सोमपीतये इति॥ हे वायो त्वमिं 679/1973
द्रश्च शवसः बलस्य पती पालयितारौ अत एव शुष्मिणा बलवंतौ नियुत्वंता नियुत्संज्ञाश्ववंतौ युवां सरथं समानमेव रथमारुह्य
तिशेषः नोस्माकं ऊतये भक्षणाय सोमपीतये सोमपानाय च आयातं आगच्छतं यद्वा सरथमधितिष्ठंतं आरुह्य चायातमिति
च वाक्यद्वयं॥ ॥अथ क्षपेति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहसे। यदी विवस्वतो
धियो हरिं हिन्वंति यातवे इति। क्षपा सुपां सुलुगिति पंचम्या आकारः क्षपाया रात्रेः अथानंतरं प्रातःकाले परिष्कृतः सन्
हे सोम त्वं वाजान् अन्नानि बलानि वा अभिलक्ष्य प्रगाहसे प्रगच्छसि विवस्वतः परिचरणवतो यजमानस्य धियः कर्मसाधनभू
ता अंगुलयः हरिं हरितवर्णं त्वा मंथं पातवे पात्राण्यभिगमनाय यदि हि हिन्वंति प्रेरयंति तर्हि सेवनानि गच्छसीति॥ ॥अथ द्विती
या॥ तमस्य मर्जयामसि मदो य इंद्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं च सूरय इति॥ अस्य सोमस्य तं रसं मर्जयामसी

२२४ मर्जयामः शोधयामः अलंकुर्मश्च ॥ यो मदो मदकरो रसः इंद्रपानमानमा इंद्रेणात्यंतं पातव्यो भवति किंच । गावो गंतारः स्तूरयः
स्तोतारः पुरा च नूनमिदानीं च यं सोमरसं आसभिरास्यैर्दधुर्धारयंति पिबंतीति । यद्वा । यद्वा गावो धेनवो यं सोमं तृणादिषु स्थि
तमासभिरास्यैर्दधुः धारयंति तृणादिरूपेण भक्षयंति ॥ ॥ अथ तृतीया ॥ तं गाथया पुराण्या पुनानमभ्यनूषत ॥ उतो कृपंत धी
तयो देवानां नाम बिभ्रतीरिति ॥ पुनानं पूयमानं तं सोमं पुराण्या पुरातनया गाथया स्तुत्या अभ्यनूषत स्तोतारोभिष्टुवंति नूस्त
वान् उत कृपंत उतो अपि च नामकर्मार्थं ममनां बिभ्रती बिभ्राणा धीतयोंगुलयः देवानां सोमरूपहविःप्रदानाय कृपंत कल्पयं
ति समर्था भवंति ॥ ॥ अश्वं न त्वेति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ अश्वं न त्वा वारवंतं वंदध्या अग्निं नमोभिः ॥ सम्राजंत
मध्वराणामिति । अध्वराणां यज्ञानां सम्राजं तं सम्राड्स्वरूपं स्वामिनमग्निं त्वां नमोभिः स्तुतिभिर्हविर्भिर्वा वंदध्यै वंदितुं २२५
प्रवृत्ता इति शेषः । अत्र दृष्टांतः । वारवंतं वालयुक्तं अश्वं न अश्वमिव अश्वो यथा वालेन बाधिकान्मशकमक्षिकादीन्प

रिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः । वारवंतं मतुपः पित्वादनुदात्तत्वं घञो ञित्वादाद्युदात्तो वारशब्दः
कर्षत्वमत इति अंतोदात्तत्वं व्यत्ययेन न प्रवर्तते ॥ ॥ अथ द्वितीया ॥ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ॥ मीढ्वां अस्माकं ब
भूयादिति ॥ स घः स एवाग्निर्नोस्माकं सुशेवः सुमुख्यो भवतीति शेषः कीदृशः शवसा बलस्य सूनुः पुत्रः विभक्तिव्यत्ययः पृथु
प्रगामा पृथुप्रगमनः प्रकर्षेण गमनं प्रगामः हेलुश्चेति चात्र । पृथुः प्रगामो यस्यासौ पृथुप्रगामः सुपां सुलुगिति पूर्वसवर्ण
आकारः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं च अस्माकं मीढ्वान् मिह सेचने इत्यस्मात् क्वसुप्रत्ययांतो दाश्वान् साह्वान् मीढ्वांश्चेति
निपातितः ॥ कामानां वर्षिता बभूयात् । भवतेश्छांदसस्य लिटः लिङादिरोमबंलीतिलिङ्च हेतुः स्यासुडादिस्थानिवद्भावात्
द्विर्भावः द्विर्वचने भवतेर इत्यपवादः तिङः विडडतिनिघातो भवतीत्यर्थः ॥ ॥ अथ तृतीया ॥ स नो दूराच्चासाच्च नि मर्त्यादघायोः ॥
पाहि सदमिद्विश्वायुरिति ॥ अग्ने विश्वायुः इण् गतौ अस्मादुण्प्रत्ययः एतानि चेत्यादिः विश्वमयनं गमनं यस्येति बहुव्रीहिः ॥ व

681/1973

२२५ दूर्वाहोविश्वसंज्ञायामिति पूर्वपदांतोदात्तत्वं आसगमन इत्यर्थः स त्वं दूराच्च दूरेपि आसाच्च आसंने देशेपि अघायोः कस्य आत्म
नः क्यच्। अभ्यायस्यादिस्यात्। त्वं पाहि पदादित्वान्निघातः। अघं पापमात्मनिषवं कर्तुमिच्छतो मर्त्यात् मनुष्याद्वैरिणो नो अस्मान् सद
मित्सर्वदेव निपाहि नितरां पालय। त्वमिंद्र प्रतूर्तीष्विति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वमिंद्र प्रतूर्तिष्वभि विश्वा अ
सि स्पृधः॥ अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः॥ इति। हे इंद्र त्वं प्रतूर्तिषु संग्रामेषु विश्वाः सर्वाः स्पृधो युद्धकारिणीः
शत्रुसेना अभ्यस्य अभिभवसि। किंच। हे तूर्य शत्रूणां बाधक इंद्र अशस्तिहा देश्यानाम् अशस्तीनां हंतासि। जनिता स्वकरेभ्यो प्रशस्ती
नां जनयिता चासि। अत एव वृत्रतूः सर्वस्य शत्रुवर्गस्य सर्वस्य सर्वप्रकारेण वा हिंसिता चासि। तरुष्यतो बाधकांश्च बाधमा
नोसि॥ ॥अथ द्वितीया॥ अनु ते शुष्मं तुरयंतमीयतुः क्षोणी शिशुं न मातरा विश्वास्ते स्पृधः श्नथयंत मन्यवे वृत्रं यदिंद्र २२५
तूर्वसि। हे इंद्र ते तव शुष्मं बलं तुरयंतं शत्रून् हिंसंतं क्षोणी द्यावापृथिव्यौ मातरा मातरौ शिशुं न शिशुमिवान्वीयतुर

नुगच्छतः। गमनमात्रे दृष्टांतः। किंच। हे इंद्र त्वं यद्यस्माद्वृत्रं वृत्रनामानं शत्रुं तूर्वसि हंसि अतः ते तव मन्यवे क्रोधाय विश्वाः स 683/1973
र्वाः स्पृधः संग्रामकारिण्यः सेनाः श्नथयंत श्नथिताः शिथिला भवंति॥ ॥इति सप्तमे ध्याये द्वितीयः खंडः॥ अथ यज्ञ इंद्र इति तृचं
प्रथमं सूक्तं तत्र प्रथमा॥ यज्ञ इंद्रमवर्धयद्यद्भूमिं व्यवर्तयत्॥ चक्राण ओपशं दिवि॥ इति॥ यज्ञो यजमानैरनुष्ठीयमानो यागः
इंद्रं समवर्धयत्। श्रूयते हि इंद्र इंद्र हविरनुपतावार्धतम महोत्साह्यो कृतेति। स इंद्रो यद्यस्मात् भूमिं पृथिवीं व्यवर्तयत्
वृक्ष्यादिप्रदानेन मा विक्षेपेण वर्तमानामकरोत्। किंतु वर्तनाद्दिव्यंतरिक्षे मेघं उपशं उपेत्य शयानं चक्राणः तूर्वन्। यद्वा आत्मनि
समवेतो वीर्यविशेष उपशानमंतरिक्षे तूर्वन्॥ ॥अथ द्वितीया॥ व्यं१तरिक्षमतिरन्मदे सोमस्य रोचना॥ इंद्रो यदभिनद्वल
मिति। सोमस्य पानेन मदे हर्षे यतिरोचना रोचमानमंतरिक्षं अयमिंद्रो व्यातिरत्। व्यवर्धयत् यत् यस्मात्कारणात् वलमासुरं त्वाखि
तमसुरं मेघं वा अभिनत्। व्यदारयत्॥ ॥अथ तृतीया॥ उद्गा आजदंगिरोभ्य आविष्कृण्वन् गुहा सतीः॥ अर्वांचं नुनुदे वलं।

२२६ इति। अंगिरोभ्य ऋषिभ्यो बलासुवारैः पणिभिरपहृता गाः उदाजत् उदगमयत् किं कुर्वन् गुहा गुहायां बिले सतीर्विद्यमाना यथान
दृश्यंते तथा याभिर्गोभिर्निभृयास्ता गा आविष्कृण्वन् प्रकाशयन् अपि च पणीनामधिपतिं बलमसुरमपि अर्वांचमधोमुखं नु
नुदे प्रेरितवान्॥ ॥अथ तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वामुवः सत्रासाहं विश्वासु गीर्ष्वायतं। आच्यावयस्यूतये इति॥
यजमानः स्तोतारं संबोध्याह स्तोतः सत्रासाहं सत्राशब्दो बवाचीन हूनामभिभवितारं यद्वा शत्रून् स्वबलेन संगत्य जेतारं वा यु
ष्मदीये पुत्रः विश्वासु गीर्षु सर्वेषु स्तोत्रेषु आयतं तावत्स्तं सर्वत्र इन्द्र एव स्तूयते तस्मात्तेषु विततं व्याप्तं तु इत्यवधारणे तमेवं इंद्रं उतये
सा इद्रक्षणाय अन्यावयसि च्युङ् प्लुङ् गतौ लटि स्तोत्रैर्यज्ञं प्रत्याभिमुख्येनागमय॥ ॥अथ द्वितीया॥ युध्मं संत
मनर्वाणं सोमपामनपच्युतं॥ नरमवार्यक्रतुमिति॥ एवंगुणोपेतमिंद्रं आगमयेत्याह। युध्मं शत्रूणां संप्रहारकं संतं अनर् २२६
वाणं अन्यैरप्रत्यृतं अनभिगतं तस्मादनपच्युतं संग्रामेषु शत्रुभिरहिंसितं सोमपां सोमस्य पातारं अस्य सोमस्य भरे

सति अवार्यक्रतुं भर्हे रनिवारणीयकर्मणं नरं सर्वस्य नेतारं एतादृग्गुणोपेतं तमिंद्रं आगमयेति पूर्वेण सह संबंधः॥ ॥अथ तृ०
शिक्षाण इंद्रराय आपुरु विद्वां ऋचीषमः॥ अवा नः पार्ये धने॥ हे ऋचीषम स्तुत्या सम नयद्वा ईषगति हिंसा दर्शनेषु अस्माद्दमः प्रत्ययः
सर्वैर्गंतव्य दर्शनीय वा॥ उक्तगुणोपेत हे इंद्र विद्वान् सर्वविषयज्ञानवांस्त्वं आ उतुल्य भा रुव्य रायो धनानि नोऽस्मभ्यं पुरु बहुवारं
शिक्ष प्रयच्छ आ यद्वा पुरु इति रायो विशेषणं बहूनि धनानि प्रयच्छ। किंच। पार्ये पारः शत्रूणां तत्र भवे धने आजि हीर्षि॥ नेत्रब धनेनो
स्मान् अव रक्ष शत्रून् हत्वा तस्य धनेनास्मान् पालयेत्यर्थः॥ तव त्यदिति तृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥॥ तव त्यदिंद्रियं बृहत्तव शुष्म
मुत क्रतुं॥ वज्रं शिशाति धिषणा वरेण्यमिति॥ हे इंद्र तव त्यत् प्रसिद्धं इंद्रियं इंद्रस्य लिंगं बृहत् प्रभूतं वीर्यं धिषणा स्तुतिः
शिशाति तीक्ष्णयतीति तीक्ष्णी करोति॥ ॥अथ द्वितीया॥ तव द्यौरिंद्र पौंस्यं पृथिवी वर्धति श्रवः॥ त्वामापः पर्वतासश्च हिन्विरे इति॥
हे इंद्र द्यौर्द्युलोकस्तव पौंस्यं बलं वर्धति वर्धयति अवस्त्वदीयं यशः पृथिवी वर्धयति। ऋधेर्ण्यंतात् लटि शपि छंदसत्र भयस्य

685/1973

बाह्यान्वैरेप्रीणयंतित्वामित्येनप्रानुबंनिव॥ ॥अथतृतीया॥त्वांविष्णुर्बृहन्क्षयोमित्रोगृणातिवरुणः॥त्वांशर्धोमदत्यनुमारुतमि
२२७ ति। हे इंद्र हे हन माहान्क्षयोनिवासहेतुर्विष्णुः॥मित्रोवरुणश्चत्वांगृणातिस्तौतितथामारुतंमरुतसंबंधिशर्धोबलमनुवदति
तवमद्मनुलक्ष्यपश्चात्।माद्यतिश्वामनुमादयतुवा॥ ॥नमस्तेअग्नइतितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा।नमस्तेअग्नः
ओजसेगृणंतिदेवकृष्टयः॥अमैरमित्रमर्दय॥इति।देवोद्योतमानहेअग्नेतेतुभ्यंनमोगृणंति।नमस्कारशब्दमुच्चारयंति।किमर्थं
ओजसेबलायकेकृष्टयोमनुष्यायजमानाः अतोहमपिगृणामीत्यर्थः।त्वंयामैर्बलैःअमित्रंशत्रून्मर्दयनाशय॥ ॥अथद्वि
या॥कुवित्सुनोगविष्टयेग्नेसंवेषिषोरयिं॥उरुकृदुरुणस्कृधि॥हेअग्नेत्वंनोस्माकंगाविष्टयेगवामेषणायकुवित्सुबहुरयिंध २२७
नंसंवेषिषःसंप्रापयः।उरुकृत्त्वंनोस्मान्अस्मिन्महाधनेसंग्रामेमापरावर्क्मापरित्याक्षीःभारभृद्यथाभारवाहीयथाभार
मंतेपरित्यजतितद्वत्।सर्वाभ्योशत्रुभ्यःसकाशात्आयमानंरयिंधनंसंजयअस्मदर्थं॥ ॥अथसमस्यमन्यवइतितृचात्मकंद्वितीयं

सूक्तंतत्रप्रथमा॥समस्यमन्यवेविशोविश्वानमंतकृष्टयः॥समुद्रायेवसिंधवः॥इति।विशोविशंत्योविश्वाःसर्वाःकृष्टयःप्रजाअस्यं 682/1923
इंद्रस्यमन्यवेक्रोधाययद्वामन्युर्मननसाधनंस्तोत्रंतदर्थंसन्नमंतसम्यक्प्रह्वतरंप्रह्वीभवंति।उच्चारयंतिवा।तत्रदृष्टांतः॥समुद्रायेव
यथासमुद्रमिवंप्रतिसिंधवःस्यंदनशीलानद्यःस्वयमेवनमंतेतद्वत्॥ ॥अथद्वितीया॥विचिद्वृत्रस्यदोधतःशिरोबिभेदवृष्णि
ना॥वज्रेणशतपर्वणेति॥चिच्छब्दोप्यर्थेसचभिन्नक्रमःवृत्रस्यअपरस्यापिदोधतःअत्यर्थंभृशंवाजगतःकंपयतोसुरस्यशि
रःमूर्धानंशतपर्वणाशतसंख्यापर्वाणिधारायस्यतादृशेनरश्मिनासेवनसमर्थेनाच्छेदनवार्यवतावज्रेणइंद्रोविभेदविचिच्छेद
॥ ॥अथतृतीया॥ओजस्तदस्यतित्विषउभेयत्समवर्त्तयत्॥इंद्रश्चर्मेवरोदसीइति॥अस्यइंद्रस्यतदोजोबलंतित्विषेदीप्यतयो
नोजसाअयमिंद्रउभेरोदसीद्यावापृथिव्यौचर्मेवसमवर्त्तयत्।सम्यग्वर्त्तयति।यथाकश्चिद्वाकुंचितंचर्मकदाचित्विस्तारयतिक
दाचित्संकोचयतिएवंनधीनेअभूतामित्यर्थः॥अथकमन्यायवस्तीरतितृचात्मकंतृतीयंसूक्तंतत्रप्रथमा॥कमन्यायवस्तीरंतीस

२२८ नरीति॥ हेइंद्र त्वं अश्वोकमन्मा शोभनज्ञानो वस्वीधनवती तीतिरंतीरमणीयो सूनरीसुष्ठुनेता रोअत्तः कारकोपात॥ त्वमागहीत्युत्तरे
ण संबंधः॥ यद्वा वस्वीधनवतीरंतीरमणीयास्सूनरीसुष्ठुनेत्रीः कमन्मा शोभनमननीया मरमस्तुतिः॥ प्रयुज्यत इति शेषः॥ अन्यत्समानम्
॥ ॥अथ द्वितीया॥ सुरूपवृषन्नागहीमौ भद्रौ धुर्यावभि॥ ताविमा उपसर्पतः इति॥ हे सुरूप हे वृषन् कामानां वर्षक इंद्र भद्रौ क
ल्याणौ इमौ रथे युज्यमानौ आर्यौ वहनाय योग्यौ वध्वौ अभि आगहि आगच्छ अस्मद्यज्ञं प्रति इमौ धुर्यौ भवंतौ ताविमौ अश्वावुपसर्पतः
त्वां सम्यक् सर्पतः॥ ॥अथ तृतीया॥ नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति॥ शृंगेभिर्दशभिर्दिशन्निति॥ हे ऋत्विक्जनाः मध्ये
रसस्य मध्ये आपस्य इंद्र स्तिष्ठति किं कुर्वन्॥ दशभिर्दश संख्याकैः शृंगेभिः अंगुलिभिर्हस्तायैः उभाभ्यां हस्ताभ्यां दिशन् अस्म २२८
दनीषमर्थं प्रयच्छन् तिष्ठति॥ हे ऋत्विक् जनाः स्तोतारः शीर्षाणि निमृढ्वं यूयं इंद्राग मनाविषय श्रेयांसि शिरसा धारयमित्यर्थः॥
॥ ॥इति सप्तदशे ध्याये तृतीयः खंडः॥ ॥छ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थ

महेश्वरं॥ इति श्रीमद्राजाधिराज परमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते
माधवीये सामवेदार्थप्रकाशे उत्तरग्रंथे सप्तदशोध्यायः॥ ॥अथाष्टादशोध्याय आरभ्यते॥ तत्र प्रथमखंडे पन्यंपन्य
मितित्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ पन्यंपन्यमित्सोतार आधावत मर्त्याय॥ सोमं वीराय शूराय॥ हे सोतारः अभिषोतारो
अध्वर्यवः मघाय मादयितव्याय वीराय विक्रांताय शूराय शौर्यवते इंद्राय पन्यंपन्यमित्सर्वं स्तुत्यमेव सोमं अधावत अभि
गमयत प्रयच्छतेत्यर्थः॥ ॥अथ द्वितीया॥ एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं॥ इंद्रं गीर्भिर्गिर्वणसमिति॥ ब्रह्मयुजा ब्र
ह्मणा मंत्रेण हविषा वा युज्यमानौ शग्मा शग्मौ सुखकरौ इंद्रस्य वाहाविमौ हरी अश्वौ इह अस्मिन्यज्ञे सखायं समानख्यानं मित्रभूतमिं
द्रं आवक्षतः॥ आवहतां कीदृशमिंद्रं गीर्भिः स्तुतिभिः प्रख्यामितमाहात्म्यं गिर्वणं॥ संगिरः संभक्तारं स्तुतिभिः संभजनीयं वा॥
अथ तृतीया॥ पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्॥ नियमते शतमूतिरिति॥ सुतमभिषुतं सोमं पाता पानशीलः ताद्धी

684/1923

लिकृस्तन नलोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः। वृत्रहा वृत्रस्य सकरस्य हंता इंद्र आगमत्। धेत्यव धारणे आगच्छत्येव। अस्मदस्मत
२२९ ः। आरे दूरदेशे मा भवतु। आगत्य च शतमूर्तिर्बहुविधरक्षणः इंद्रः नियमते। अस्मदीयान् शत्रून् नियच्छतु रक्षतु। यद्वा धना
न्यस्मभ्यं नियच्छतु ददातु॥ ॥अथ आ त्वा विशंत्विति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ आ त्वा विशंत्विंदवः समुद्रमिव सिंधवः॥
न त्वामिंद्राति रिच्यते॥ इति। हे इंद्र इंदवः स्रवंतः सोमास्त्वा त्वामाविशंतु॥ सर्वतः प्रविशंतितद्वत्। यत एवं तस्मात्। हे इंद्र त्वां कश्चिद
पि देवो बलेन धनेन चानातिरिच्यते नातिरिक्तो भवति। सामर्थ्यत्वात् त्वत्तोधिको नास्तीत्यर्थः॥ ॥अथ द्वितीया॥ विव्यक्थ महि
ना वृषन् भक्षं सोमस्य जागृवे॥ य इंद्र जठरेषु ते इति॥ हे वृषन् कामानां वर्षितः। हे जागृवे जागरणशीलं प्रवृत्तस्य सोमस्य भक्षं २२९
पानं प्रति महिना त्वं महिम्ना॥ विव्यक्थ सर्वतो व्याप्तवानसि व्येवे लिटि थलि अभ्यासस्योभयेषामिति संप्रसारणं। हे इंद्र यः सो
मस्तेन तव जठरेषु उदरेषु प्रविशति तस्य पानं व्याप्तवानसीति शेषः॥ ॥अथ तृतीया॥ अरं त इंद्र कुक्षये सोमो भवतु वृत्रहन्।

अरं धामभ्य इंदवः इति। हे वृत्रहन् वृत्रस्यापामावरकस्यासुरस्य मेघस्य पापस्य वा हंता हे इंद्र सोमोस्माभिर्दीयमानः। ते तव कु 691/19.73
क्षये अरं अलं पर्याप्तो भवतु किंच इंदवः सर्वतः क्षरणशीलाः सोमाः तव धामभ्यः नानाविधेभ्यः शरीरेभ्यः तत्र तेजोभ्यो वा
अक्षरमलं पर्याप्ता भवंतु॥ अनेन तेजसां हविर्भाक्त्वमस्तीति सूचितं अस्मदीयाः सोमाः एव तव शरीरभूतेभ्यो देवेभ्य इति
पर्याप्ता भवंतु॥ नान्यदीया इति भावः॥ ॥अथ जराबोधेति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ जराबोध तद्विविड्ढि विशेवि
शे यज्ञियाय॥ स्तोमं रुद्राय दृशीकं इति। हे जराबोध जरया स्तुत्या बोध्यमान हे अग्ने विशेविशे तत्र यजमानरूपप्रजानुग्र
हार्थं यज्ञियाय तत्संबंध्यनुष्ठानसिद्ध्यर्थं तदेव यजमानं विविड्ढि प्रविश। यजमानोपि रुद्राय क्रूराय अग्नये तुभ्यं दृशीकं दर्शनीयं
समीचीनं स्तोमं स्तोत्रं करोतीति शेषः। अत्र यास्क एवं व्याख्यातवान् जरा स्तुतिर्जरतेः स्तुतिकर्मणस्तां बोधतया बोधयि
तरिति वा तद्विविड्ढि मनुष्यस्य मनुष्यस्य यज्ञियाय स्तोमं रुद्राय दर्शनीयमिति॥ ॥अथ द्वितीया॥ स नो महाँ अनिमानो

धूमकेतुः पुरुश्चंद्रः। धियेवाजायहिन्विरे इति॥ सोग्निर्नोस्मान् धियेकर्मणेवाजायान्नायचहिन्वंतुप्रीणयतुक्तौ स्वरः महान्
२३० संहितायामन्कारस्य रुत्वानुनासिकाउक्तौ गुणाधिकः॥ अनिमानः॥ नविद्यतेनिमानोस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदां
तोदात्तत्वं। निमानवर्जितः॥ अपरिच्छिन्न इत्यर्थः॥ धूमकेतुः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं धूमेनज्ञाप्यमानः पुरुश्चंद्रः॥ चदिः
आल्हादनेदीप्तौच। अस्मात्स्फायितंचेत्यादिना कर्तरिरक्। पुरुश्चासौचंद्रश्चेतिसमासांतोदात्तत्वं। ह्रस्वाच्चंद्रोत्तरपदेमंत्रइति
सुट्तस्यश्चुत्वेनश्चकारबहुदद्गमिरित्यर्थः॥ धियेसावेकाचइतिचतुर्थ्याउदात्तत्वम् हिन्वंतुहिविः प्रीणनार्थः इदितोनुम्। तोरि
तिनुम्॥ ॥अथतृतीया॥ सरेवांइवविश्पतिर्दैव्यः केतुः शृणोतुनः॥ उक्थैरग्निर्बृहद्भानुः॥ इति॥ सोग्निरुक्थैः स्तोत्रैर्युक्तान्नोस्मा २३०
न्शृणोतु। तत्रदृष्टांतः॥ रेवानिवयथालोकेधनवान्राजाबंदिनांस्तोत्रंशृणोतितद्वत्। एतच्चद्योरितिसोलोपः॥ रय्येर्मतौ
बहुलमितिसंप्रसारणं। परपूर्वत्वं आद्गुणश्छंदसीरइतिमतुपोवत्वं आरशब्दाच्च मतुपउदात्तत्वंवक्तव्यमितिमतुप

उदात्तत्वंच्छांदसः विश्पतिः परादिश्छंदसीबहुलमित्युत्तरपदांतत्वं। प्रजापालकः॥ दैव्यः देवानांसंबंधी। अग्निर्वैदेवानांहोता 693/923
सीश्रुतेंतराल। केतुः पूनचतज्ञापकः॥ अग्निर्वैदेवानांदूतआसीदितिश्रुतेः॥ बृहद्भानुः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वंप्रोद
रश्मिः॥ ॥अथतद्वोगायेतितत्चात्मकंचतुर्थंसूक्तंतत्रप्रथमा॥ तद्वोगायसुतेसचापुरुहूतायसत्वने॥ शंयद्गवेनशाकिन
इति॥ हेस्तोतारोवोयूयंसुतेअभिषुतेसोमेसतिः पुरुहूतायबहुभिर्यजमानैराहूतायसत्वनेशत्रूणांसादयित्रेयद्वाधनानां
वासनित्रेदात्रेइंद्रायतत्स्तोत्रंसवासदृससहूनाभूत्वागायगायतयस्तोत्रंशाकिनेशक्तिमतेइंद्रायशंसुखकरंभवतिगवे
नयथागावयवशंसुखकरंतद्वदित्यर्थः॥ ॥अथद्वितीया॥ नघावसुर्नियमतेदानंवाजस्यगोमतः॥ यत्सीमुपश्रवद्गिरः
इति॥ वसुर्वासइतासइंद्रश्गोमतोबहुभिर्गोभिर्युक्तस्यवाजस्यान्नस्यबलस्यवादानंप्रदानंनघनखलुनियमतेनियच्छति
उपरतंकरोति। यद्यदिसींगिरः अस्मदीयाः स्तुतीः उपश्रवत्। उपशृणुयात्। स्तोत्रश्रवणेसति। सर्वदाददातीत्यर्थः॥ ॥२

॥ ॥अथ तृतीया॥ कुवित्सस्य प्र हि व्रजं गोमंतं दस्युहा गमत्॥ शचीभिरप नो वरत्॥ कुवित्सस्य कुवित् बहु नाम सती हिनस्तीति कु
२३१ वित्सो नाम कश्चित् तस्य स्वभूतं गोमंतं बहुभिर्गोभिर्युक्तं व्रजं गोष्ठं दस्युहा दस्यूनां उपक्षयितॄणां हंतेंद्रः प्रगमत्। प्रकर्षेण गच्छ
ति। हि यस्मादेवं तस्मात् शचीभिरात्मीयैः कर्मभिः प्रज्ञाभिर्वा नोस्माकं ता गाः अपवरत्। निगूढास्ताः अपावृणोत्॥ ॥ इत्येका
दशेध्याये प्रथमः खंडः॥ अथ द्वितीयखंडे अथेदं विष्णुरिति पंचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ ॥इदं विष्णुर्वि चक्रमे त्रे
धा नि दधे पदं॥ समूढमस्य पांसुरे॥ विष्णुस्त्रिविक्रमावतारधारी इदं प्रतीयमानं सर्वं जगत् उद्दिश्य त्रेधा त्रिभिः प्रकारैः प
दं निदधे स्वकीयं पादं प्रक्षिप्तवान्। अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने समूढं सम्यगूढं सर्वं जगत् सम्यगंतर्भूतं। स च या
स्केनैवं व्याख्यातः। विष्णुर्विशतेर्वा व्यश्नोतेर्वा यदिदं किंचिद्धि क्रमते विष्णुस्त्रेधा निधत्ते पदं त्रेधाभावाय पृथिव्यामंतरिक्षे दि २३१
वीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूढमस्य पांसुरे प्यायनेंतरिक्षे पदं। न दृश्यते अपि

वोपमार्थस्यात्पांसुर इव पदं न दृश्यत इति पांसवः पादैः सूयंत इति वा पन्नाः शेरत इति वा पिंशनीया भवंतीति वेति॥ ॥अथ द्वि
तीया॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः॥ अतो धर्माणि धारयन्निति॥ अदाभ्यः दभेः कृत्यो ण्यदिति ण्यत् नञ्समा
सः। अव्ययपूर्वपदप्रकृतिस्वरत्वं केनापि हिंसितुमशक्यः। गोपाः सर्वस्य जगतो रक्षकः सो विष्णुः पृथिव्यादिस्थानेषु अत एते
षु त्रीणि पदानि वि चक्रमे। किं कुर्वन् धर्माण्यग्निहोत्रादीनि धारयन्। शपः पित्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण णिच ए
व स्वरः शिष्यते धारयन्॥ ॥अथ तृतीया॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे॥ इंद्रस्य युज्यः सखेति॥ हे ऋत्विगादया
दयः विष्णोः कर्माणि पालनादीनि पश्यत यतो यैः कर्मभिः व्रतान्यग्निहोत्रादीनि पस्पशे। स सर्वो यजमानः स्पृष्टवान्। स्पश बाध
नस्पर्शनयोः लिटि द्विर्वचने शर्पूर्वाः खय इति पकारः शिष्यते। सकारो लुप्यते यद्वृत्तयोगादनिघातः विष्णोरनुग्रहादनुतिष्ठती
त्यर्थः। तादृशो विष्णुरिंद्रस्य युज्यो योज्यः युजेर्बाहुलकात् क्यप्। कित्वाद्गुणाभावः। क्यपः पित्वादनुदात्तत्वं धातुः स्वरः अनु

695/1973

२३२ कृतः सखा भवति विष्णोरिंद्रानुकूल्यं च तस्माद्धत पुत्रा इत्यनुवाके अथर्वणेः तद्धि विष्णुरित्यादिना बहुना प्रपंचेन तैत्तिरीया आमनं
ति॥ ॥अथ चतुर्थी॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततमिति॥ सूरयो विद्वांसः ऋत्विगादयः। विष्णोः सं
बंधि परममुत्कृष्टं तत्पदं स्वर्गस्थानं शास्त्रदृष्ट्या सदा सर्वकाले पश्यंति प्रत्यक्षयति। सर्वस्य सोन्यतरस्यां दीप्ति सर्वशब्दस्य सभा
वः व्यत्ययेनाद्युदात्तत्वं सर्वदेत्यर्थः। पश्यंतितत्र दृष्टांतः। दिवीव उदिहमित्यादिना भिन्नेउदात्तत्वं इवेन विभक्ते लोपः। पूर्वपदप्रकृति
स्वरत्वं चेति तदेव आश्यते। आकाशे यथा आततं। नेनोनेः कर्मणि क्तः यस्य विभाषेतीट्प्रतिषेधः। अनुदात्तो पदेशेत्यादिना न
लोपः। ऋदुत्तरपद प्रकृतिस्वरत्वं प्रासे गतिरनंतर इति गतेरुदात्तत्वं सर्वतः प्रसृतं चक्षुर्निरोधाभावेन विस्पष्टं पश्यति तद्वत्॥ ॥अथ पं
चमी॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते। विष्णोर्यत्परमं पदमिति। पूर्वोक्तं विष्णोर्यत्परमं पदमस्ति तत्पदं। विप्रासः आ २३२
ज्जसेरसुक्। मेधाविनः समिंधते सम्यग्दीपयंति। कीदृशा विपन्यवः॥ स्तुत्यर्थस्य पनेर्बहुलवचनात् उणादिको युप्रत्ययः। तत्प्रत्य

यस्वरः॥ विशेषेण स्तोतारः जागृवांसः जागरनिद्राक्षयोर्लिटः क्वसुः क्रादिनियमात् प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमा 697/1973
न्निवृत्तिः। शब्दार्थयोः प्रमादराहित्येन जागरूका इत्यर्थः॥ ॥अथ षष्ठी॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे॥ पृथिव्याः स
प्त धामभिरिति। विष्णुः परमेश्वरः यतः पृथिव्याः यस्माद्भूप्रदेशाद्धिसानविसमुत्थिते अधिके देशे स्वर्गादिलोके विचिक्रमे
विविधं पादक्रमणं कृतवान्। विशेषेण वर्तते अस्मात् पृथिवी प्रदेशान्नोस्मान् देवा विष्णुमुखा अवंतु पापाच्छत्रोर्वा रक्षंत्वित्य
र्थः॥ ॥अथ मोषुत्वेति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन्॥ आरात्ताच्चित्सध
मादं न आ गहीह वा सन्नुप श्रुधि इति॥ हे इंद्र त्वया वाघतश्चन ऋत्विजोप्येते अस्मदस्मत्त आरे दूरे मा निरीरमन् नितरां र
मयंतु अतस्त्वं मा राह्यद्दूरेपि वर्तमानो स्मदीयं सधमादं यज्ञमागछ आगच्छ इह वा अत्रापि वा॥ स्नात्वियथ उपमान उपश्रु
ध्य स्मदीयं स्तोत्रमुपशृणु॥ ॥अथ द्वितीया॥ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते॥ इंद्रे कामं जरितारो व

सूयवोरथेनपादमादधुः॥इतिहेइंद्रते त्वदर्थं सुतेभिषुते सोमे अत्र स्तुतः स्तोत्रकृत ऋत्विजः मधोनमधुनीयमक्षामक्षिकाः
233 सचासहआसते उपविशंति।अथपरोक्षस्तुतिः।वसूयवो धनकामाजरितारः स्तोतारः काममिष्टं इंद्रे रथेनपादं रथेपादमिव
आदधुः समर्पयंतीत्यर्थः॥ ॥अथअस्तावीतिप्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥अस्तावि मन्म पूर्व्यं ब्रह्मेंद्राय वोचत॥पू
र्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत॥ सइंद्रः अस्तावि अस्मदीयैः स्तोत्रैर्ऋत्विग्भिर्वासूयते। अस्मा इंद्राय पूर्व्यं अ
नादित्वात्पूर्वस्मिन्भवमन्ममननीयं ब्रह्म स्तोत्रं वेदं वा चोच्चत हे ऋत्विजो यूयं पठत किंच पूर्वीः पूर्वकालीनाः ऋतस्य यज्ञस्य संबंधि
नीः बृहतीर्बृहतीछंदस्का बृहत्सामानिवा अनूषत स्तुवंतु पठंतेत्यर्थः। स्तोतुर्मम मेधा एतीर्वीर्वाधा प्रज्ञा वक्रोषा असृक्षत।
ऋत्विग्भिर्विसृज्यंतां।यद्वा ईश्वरेण॥ ॥अथद्वितीया॥समिंद्रोरायोबृहतीरधूनुत संक्षोणीसमुसूर्यं॥ संशुक्रासः शुचयः संग
वाशिरः सोमाइंद्रममंदिषुरिति॥ स इंद्रः बृहतीर्महांति रायो धनान्यन्नानि वासमधूनुत मां प्रापयत्वित्यर्थः॥धूञ्कंपने धातू

नांअनेकार्थत्वात्॥किंच।क्षोणीर्भूमीः समधूनुत मांसम्यक्प्रापयतु। अपिच सूर्यमु सूर्यं सदृशीं दीप्तिं समधूनुत शुचयो निर्म
लाः शुक्रासः शुक्रग्रहाः इंद्रं समममंदिषुर्हर्षयंतीति किंच।गवाशिरः गोश्रयणाः संहिताः सोमाः इंद्रं सममंदिषुर्हर्षं वत इत्यर्थः॥
अथेंद्रायसोमपातवे उतितृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ ॥इंद्राय सोमपातवे वृत्रघ्ने परिषिच्यसे॥नरेच दक्षिणावते दे
वीरायसदनासदे इति॥ हे सोम वृत्रघ्ने वृत्रस्य हंत्रे इंद्राय षष्ठ्यर्थे चतुर्थी॥इंद्रस्य पातवे पानार्थं परिषिच्यसे परितः पात्रे षुसि
च्यसे वसतीवरीभिर्यो किंच। दक्षिणावते ऋत्विग्भ्यो दक्षिणादानेन तद्वते वीराय वीर्ययुक्ताय इंद्रार्थं हवींषि दातुं सदनसदे
यज्ञगृहे सीदते नरे मनुष्याय यजमानाय तस्मै फलप्रदानार्थं परिषिच्यसे॥ ॥अथद्वितीया॥ तं सखायः पुरूरुचं यूयं वयं च
सूरयः॥अश्याम वाजगंध्यं सनेम वाजपस्त्यमिति॥ हे सखायः स्तोतारः सूरयः प्राज्ञाः यूयं वयं च यजमानाः पुरुर्वं बहुदीप्तं
वाजगंध्यं बलं करं मधु गं धोपेतं तत्र भवं वा सोमं अश्याम अश्नीमपिबेम।किंच।वाजपस्त्यं अन्नयुक्तगृहसाहितं हरिमिती

699/1973

यमस्तु पूर्वमेनव्याख्याता॥ ॥अथकस्तमिंद्रइतिप्रगाथात्मकं पंचमंसूक्तं तत्रप्रथमा॥ कस्तमिंद्रत्वावस॰॥ वामर्त्यइत्यप्रतीकंतस्या
२३५ द्वितीयाव्याख्यातमन्यत्र द्रष्टव्यं॥ ॥अथद्वितीया॥ मघोनस्मवृत्रहत्येषुचोदययेददतिप्रियावसु॥ तवप्रणीतीहर्यश्वसूरिभिर्विश्वा
तरेमदुरितेति॥ हेइंद्रमघोनोधनवतस्त्ववदर्थंप्रियाप्रियाणिवसूवसूनिहविर्लक्षणानिधनानिप्रयच्छंतिता
नज्ञानानवृत्रहत्येषुयज्ञेषुसंग्रामेषुवाचोदयप्रेरय हेहर्यश्वहरिनामकाश्ववंनिंद्रतवप्रणीतीप्रणीत्याप्रणयनेनसूरिभिः
स्तोतृभिःपुत्रादिभिःसार्धंविश्वाविश्वानिदुरितादुरितानितरेमतीर्णाभवेम॥ ॥इत्यष्टमस्याष्टमेद्वितीयःखंडः॥ अथतृती
यखंडेएदुमध्वोरितितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥एदुमध्वोमदिंतरंसिंचाध्वर्योअंधसः॥एवाहिवीरःस्तवतेसदावृधा
इति॥ हेअध्वर्योअध्वर्यस्यनेनःऋत्विगमधोर्मदकरस्यअंधसःसोमलक्षणस्यान्नस्यमदिंतरंअत्यर्थंमादयितृतमंसो २३४
मरसमेवआसिंचउद्रार्थमाभिमुख्येनक्षरइतउइत्यवधारणवीरःसमर्थःसहःवृधःसर्वदाहविर्भिर्वर्धनीयः॥यद्वासर्व

दास्वबलस्यवर्धकःअयमेवंइंद्रस्तवतेहिस्तोत्रऽास्माद्भिःस्तूयतेखलुअतःकारणात्स्तुतायैइंद्रायसोमोदातव्यइतिशेषः॥ 701/1973
तस्मादासिंचेतिपूर्वेणसंबंधः॥ ॥अथद्वितीया॥ इंद्रस्थातर्हरीणांनकिष्टेपूर्व्यस्तुतिं॥ उदानंशशवसानभंदनेति॥ हेहरीणांस्था
तः॥ हरिनामकानामश्वानामधिष्ठातःयद्वाहरिनामकैरश्वैःप्रापयितारिंद्रत्वदीयांपूर्व्यस्तुतिंपूर्वैश्चिरंतनैर्ऋषिभिःकृतास्तु
तिंउपलक्षणंइदानींतनैःक्रियमाणामपिस्तुतिंनाकिर्नकश्चितशवसाबलेनउदानंशव्याप्नोति॥ अश्रुव्याप्तौअस्माल्लिट
अश्नोतेश्चेतिनुट्छांदसोद्वितीयानुडागमः॥ कश्चिन्नातिक्रामतीत्यर्थः॥किंचाभंदनासर्वैःप्रार्थनीयत्वात्पूजनीयेनधनेन
स्तुत्यावाचवदीयांस्तुतिंनकश्चिदतिक्रामति॥त्वत्तोबलवान्धनीस्तुत्यावाअन्योनास्तीत्यर्थः॥ ॥अथतृतीया॥तंवोवाजा
नांपतिमहूमहिश्रवस्यवः॥अप्रायुभिर्यज्ञेभिर्वावृधेन्यमिति॥ अप्रायुभिःकर्मस्वप्रमाद्यद्भिःमनुष्ययुक्तैःअथ
वाअप्रमत्ताःएकत्रस्थितैवकर्मकुर्वंति॥कर्मप्रारभ्यनान्यंदेशंगच्छंतीत्यर्थः॥एवंविधमनुष्ययुक्तैर्यज्ञेभिर्यज्ञैरेतादृश

२३५ मनुष्येभ्यस्तेभ्यश्च वारं धेन्वं च धनीयं वाजावा मन्त्राणां पाति स्वामिनं वा यद्वा यूयं युष्मत्स्वं धनं युष्मदीयं तं तादृशमिदं श्रवस्यवः वयमन्नं
कामाः संतः आ हूमहि आ ह्वयामः ह्वयतेर्लुङि बहुलं छंदसीति संप्रसारणं। अथ तं गूर्धयेति प्रगाथात्मकं द्वितीयं सूक्तं तत्र
प्रथमा॥ ॥तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमोहिषे॥ इति॥ हे स्तोतः तं घासि ह्रुमग्निं गूर्धय स्तुहि गूर
र्धयतिः स्तुतिकर्मा। कीदृशं स्वर्णरं सर्वस्य नेतारं सर्वैर्यजमानैः कर्माद्दीनेतव्यं वा। अथवा स्वर्गं प्रति हविषां नेतारं देवासः
दीव्यंति स्तुवंतीति देवा ऋत्विजः देवं दानादिगुणयुक्तमपरतिमर्यं स्वामिनं यद्वा अभिप्राप्तव्यं द्रव्यं दधन्विरे धन्वितिग
च्छंति स्तुत्याभिः प्राप्नुवंतीत्यर्थः। अथ प्रत्यक्षस्तुतिः। देवत्रा देवेषु मध्ये यद्वा देवे मनुष्येभ्यो देवान् द्वितीयार्थे त्रा २३५
प्रत्ययः। देवानित्यर्थः। हव्यं चरु पुरोडाशादिलक्षणं हविः आ आभिमुख्येन ऊहिषे हे अग्ने अभितो वा प्रापयसि
वहेर्लिटि यजादित्वात्संप्रसारणं। ईहिषे ऊहिरइति पाठे॥ ॥अथ द्वितीया॥ विभूतरातिं विप्र चित्रशोचिषमग्नि

मीळिष्व यंतुरं॥ अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यं॥ यागार्थं इममग्निं प्र ईळिष्व प्रकर्षेण स्तुहि। कीदृशं विभूतरा 703 / 1973
तिं व्याप्तधनं प्रभूतदानं वा चित्रशोचिषं चायनीयतेजस्कं विचित्रदीप्तिकं वा सोम्यस्य सोमसाध्यस्यास्य मेधस्य यज्ञस्य यंतुरं नि
यंतारं पूर्व्यं चिरंतनं मिति॥ ॥अथ आ सोमस्वान इति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ आ सोम स्वानो अद्रिभिस्तिरो वारा
ण्यव्यया॥ जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे॥ इति हे सोम अद्रिभिर्ग्रावभिः स्वानोभिषूयमाणस्त्वं अव्ययाअ
विमयानि वाराणि वालानि दशापवित्राणि तिरस्कुर्वन्स्यवधायकमयन् कुर्वाणः सन् आपवस्व इति शेषः। हरिर्हरितवर्णः स सो
मः चम्वोरधिषवणफलकयोर्विशत् प्रविशति। तत्र दृष्टांतः। जनो न यथा जनः पुरि पुरे प्रविशति। स त्वं वनेषु काष्ठनिर्मितेषु पा
त्रेषु वसतीवरीषु वा सदः स्थानं दधिषे करोषि दधिषे दधिषइति पाठे॥ ॥अथ द्वितीया॥ स मामृजे तिरो अण्वानि मेष्यो मी
ह्ळे सप्तिर्न वाजयुः॥ अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः॥ इति। वाजयुरन्नकामः अण्वान्यणूनि सूक्ष्मा

२३६ निमेष्या मेष्याः अवये रोमाणि पवित्राणि तिरस्कुर्वन् स सोमः परिस्रुतः परिशोध्यते अलंक्रियते वा तत्र दृष्टांतः मीढ्वान् सेचनसम
र्थः सप्तिर्न अश्व इव यथा आजिकार्ये सोऽश्वः संग्रामे अलंक्रियते तद्वत् कीदृशः अनुमाद्यः अनुमोदनीयः सर्वैः पवमानो मनीः
षिभिः ऋत्विग्भिः पूयमानः तथा ऋक्वभिः छंदसां वा निपाधितवानिपतिमद्भिर्विप्रैर्मेधाविभिरभिषुतो स्तूयते। ॥अथ वय
मेनमिदा ह्य इति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ वयमेनमिदा ह्योऽपीपेमेह वज्रिणं॥ तस्मा उ अद्य सवने सुतं भरा नूनं भू
षत श्रुते॥ इति। वयं यजमाना एनमिंद्रं वज्रिणं इदा इदानीं ह्यश्च अतीतेऽन्हि इह अत्र अहर्गणे अपीपेम आप्याययाम सोमेन
तस्मा उ तस्मा एव अद्यात्र सवने संग्रामार्थं सुपां सुलुगित्याकारादेशः आदेशः सुतमभिषुतं सोमं भर आहर। नूनमिदानीं श्रुते स्तो
त्रैः श्रुते सति आ भूषतु आभवतु अध्वर्यादीनागच्छतु॥ ॥अथ द्वितीया॥ वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति॥ से २३६
मं नः स्तोमं जुजुषाण आ गहींद्र प्र चित्रया धियेति। वृकश्चित् स्तेनोऽपि वारणो वारयिता सर्वस्य सन्नपि उरामथिः उत्राणां

मार्गे गच्छतां मथिता सन्नपि अस्येंद्रस्य वयुनेषु मार्गेषु प्रज्ञानेषु आ भूषते आनुकूल्यमेव भजते आनीयवद्हिंस्रोपींद्रस्यानु 705/1973
कूल्यो भवतीत्यर्थः। यद्वा अस्येति कर्मणि षष्ठी। अश्वमिमं इंद्रं स्तुरूपः क्रूरेषु वयुनेषु स्तोत्रेषु आ भूषति। हे इंद्र स त्वमिमं नो
स्मदीयं सोमं स्तोमं स्तोत्रं च जुजुषाणः प्रीयमाणः सेवमानः सन् चित्रया चायनीयया नानाविधफलरूपया धिया युक्तः
सन् प्र आगहि आगच्छ॥ ॥अथेंद्राग्नी रोचनेति तृचात्मकं पंचमं सूक्तं तत्र प्रथमा॥ इंद्राग्नी रोचना दिवः परि वाजेषु भूषथः॥
तद्वां चेति प्र वीर्यमिति। हे इंद्राग्नी दिवो रोचना स्वर्गस्य स्वर्गस्य रोचकौ प्रकाशकौ युवां वाजेषु संग्रामेषु परि भूषथः परितः स
र्वतः अलंकृतौ भवथः शत्रून् पराजित्य सर्वतो विजयमानौ वर्तेथे। वां युवयोर्वीर्यं सामर्थ्यमेव तत्ताद्दृशं संग्रामवि
जयं प्र चेति प्रकर्षेण ज्ञापयति। यद्वा युवां वाजेषु संग्रामेषु परि भूषथः शत्रून् परिभवथः। शेषं पूर्ववत्। अथेंद्राग्नी अ
पसस्परीति द्वितीया॥ इंद्राग्नी तविषाणि वामिति तृतीया॥ तृचौ॥ प्रतीकेन योर्व्याख्यानमन्यत्र द्रष्टव्यं। अथ क

२३७ ईंयो दधीति तच्चात्मकं षष्ठं सूक्तं तत्र प्रथमा ॥ ॥ कईं वेदसुते सचेति ऋचः प्रतीकं तस्या दिनो व्याख्यानमन्यत्र द्रष्टव्यं ॥ ॥अथ
द्वितीया ॥ दाना मृगो न वारणः पुरुत्राचरथं दधे ॥ नकिष्ट्वा नियमदा सुते गमो महांश्चरस्योजसेति । मृगः शत्रूणामन्वेष
को वारणो गजो दाना मदजलानि पुरुत्रा बहुषु यज्ञेषु चरथं चरणशीलं मदं दधे इंद्रो धारयति । अथ प्रत्यक्षस्तुतिः
। हे इंद्र त्वा त्वां न किर्नियमत न कश्चिन्नियच्छति । सुतेऽभिषुते सोमे आगमः आगच्छ । महान्प्रभूतो नस्त्वं तु ओजसा बलेन सर्व
तश्चरसि गच्छसि ॥ ॥अथ तृतीया ॥ य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ॥ यदि स्तोतुर्मघवा शृणवद्धवं नेंद्रो योष
त्यागमदिति । य उग्र उद्गूर्णः ओजस्वी वीर्यवान् सन् भवन् अनिष्टृतः शत्रुभिरनिस्तीर्णः स्थिरश्चलो रणाय युद्धाय संस्कृ २४०
तः ॥ ऋत्विग्भिः रलंकृतः सोमैर्वा संस्कृतः स इंद्रो मघवान् धनवान् यदि स्तोतुर्हवमाह्वानं शृण्वन् शृणोति । तर्हि न यत न यो
षति न गच्छति । किंतु आगमन् तत्रैवागच्छति ॥ ॥इत्यष्टादशाध्याये तृतीयः खंडः ॥ अथ चतुर्थखंडे पवमाना असृक्षते

ति तच्चात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ पवमाना असृक्षत सोमाः शुक्रास इंदवः ॥ अभि विश्वानि काव्येति । शुक्रासः दीप्ता इंद
वो दीप्ताः पवमानाः पूयमानाः सोमा विश्वा विश्वानि काव्या काव्यानि स्तोत्राण्यभ्य शुक्रासः दीप्ता इंदवो दीप्ताः पवमानाः
पूयमानाः सोमाः विश्वा विश्वानि काव्या काव्यानि स्तोत्राण्यभ्यसृक्षत । ऋत्विग्भिरभितः सृज्यंते ॥ ॥अथ द्वितीया ॥ पव
माना दिवस्पर्यंतरिक्षादसृक्षत ॥ पृथिव्या अधि सानवीति । पवमानाः पूयमानाः सोमा दिवो द्युलोकादंतरिक्षाच्च पृथि
व्या भूम्या अधि सानवि समुच्छ्रिते देशे हविर्यज्ञेन पर्यसृक्षत सृज्यंते ॥ ॥अथ तृतीया ॥ पवमानास आशवः शुभ्रा असृ
ग्रमिंदवः ॥ घ्नंतो विश्वा अप द्विषः इति ॥ आशवः शीघ्राः शुभ्राः शोभमानाः पवमानासः पवमानाः इंदवो दीप्ताः सोमा
विश्वाः सर्वान् द्विषो द्वेष्टॄन् शत्रून् अपघ्नंतो मारयंतो असृग्रं सृज्यंते ॥ अथ तोशा वृत्रहणा इति तृचात्मकं द्वितीयं सूक्तं तत्र प्र
थमा ॥ १ तोशा वृत्रहणा हुवे सजित्वाना पराजिता ॥ इंद्राग्नी वाजसातमेति । तोशा शत्रूणां बाधकौ वृत्रहणा वृत्रस्य पा

707
1973
Library of the Bombay Branch Royal Asiatic Society

पस्य द्वंद्वं तारो सत्रजित्वाना समान जेतारो परस्परापेक्षया जयश्रीकौ। अपराजिता हे ताभ्यामपि तिरस्कृतौ वाजसातमा अंनस्याति
२३८ शयेन दातारो इंद्राग्नी युवा हुवे इह कर्मणि सोमपानार्थमह्वमाह्वयामि॥ ॥अथ द्वितीया॥ प्र वामर्चंत्युक्थिनः॰ इंद्राग्नी
नवतिं पुरः॰ इत्येता ऋचाः प्रतीकत्रयोदिता व्याख्यानमन्यत्रापि द्रष्टव्यं॥ अथ उप त्वा रण्वसंदृशमिति त्र्यृचात्मकं तृ
तीयं सूक्तं तत्र प्रथमा॥ ॥उप त्वा रण्वसंदृशं प्रयस्वंतः सहस्कृत। अग्ने ससृज्महे गिरः॥ इति। हे सहस्कृत सहसा बलेनो
त्पन्नाग्ने प्रयस्वंतः हविर्लक्षणान्नवंतो वयं रण्वसंदृशं रमणीयसंदर्शनं स्तोत्यसंदर्शनं वा त्वां उप प्रति गिरः स्तुतीः ससृज्महे
विसृजामः। उच्चारयाम इत्यर्थः॥ ॥अथ द्वितीया॥ उप च्छायामिव घृणेरगन्म शर्म ते वयं। अग्ने हिरण्यसंदृशमिति॥
हे अग्ने हिरण्यसंदृशः हितरमणीयतेजसः हिरवद्रोचमानतेजसो वा घृणेर्दीप्तस्य ते तव शर्म शरणं आश्रयणं सुखं वा २३८
उपागन्म उपागच्छाम॥ तत्र दृष्टांतः। छायामिव यथा संतप्ताश्छायामुपागच्छंति तद्वत्॥ ॥अथ तृतीया॥ य उग्र

इव शर्यहा तिग्मशृंगो न वंसगः॥ अग्ने पुरो रुरोजिथेति॥ योग्निः उग्र इव उद्गूर्णबलो धन्वी बन्वी शर्यहा शर्य्यैर्बाणैः शत्रूणां
हंता तिग्मशृंगो न वंसगः तीक्ष्णशृंगो वननीयगतिर्वृषभ इव। हे अग्ने स त्वं पुरः आसुरीस्तिस्रः पुरीः सा रुरोजिथ भग्नवा
नसि रुद्रो वा एष यदग्निरिति श्रुतेः रुद्रकृतमिति त्रिपुरदहनं अग्निकृतमेवेत्यग्निः स्तूयते यद्वा त्रिपुरदहनसाधनभूते बा
णे अग्नेरनीकत्वेनावस्थानादग्निः पुराणि भग्नवान् इत्युच्यते। देवासुरा वा एषु लोकेषु समयतंत इत्यादिकं ब्राह्मणमत्रानुसं
धेयं। ऋतावानं वैश्वानरमिति त्र्यृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ ॥ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिं। अज
स्रं घर्ममीमहे इति॥ हे अग्ने ऋतावानं यज्ञवंतं सत्यवंतं वा ऋतस्य यज्ञस्य सत्यस्य वा संबंधिनं वैश्वानरं विश्वेषां नराणां
हितकारिणं ज्योतिषस्पतिं ज्योतिषः तेजसः पतिं पालकं अजस्रं अनादित्वादविच्छिन्नं घर्मं दीप्तं वैश्वानराख्यं त्वां ईमहे
अभ्यर्थयामः याचामहे॥ ॥अथ द्वितीया॥ य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन्। ऋतूनुत्सृजते वशी॥ इति। योग्निः इदं जगत्

709/1973

यज्ञस्य अनुष्ठीयमानस्य यागस्य स्वः सर्वं विघ्नं उत्तिरनुत्तारयन्। यद्वा स्वः स्वर्गफलं संबंधि महाफलं उत्तिरनुप्रयच्छन् प्रातिप
२३९ प्रथे सर्वत्र प्रख्यातो भवति। वशी परमात्मतया जगद्वशीकर्ता सोग्निर्विकृतत्वसंतादीनुत्सृज्यते अनुष्ठार्थं सम्यक्कुरु जाति।
तेषु स्वयमाधीयमानः सन् तद्गतया वसंतादीनुत्तमानकुरु इत्यभिप्रायः॥ ॥ अथ तृतीया॥ अग्निः प्रियेषु धामसु
कामो भूतस्य भव्यस्य॥ संम्राडेको विराजतीति॥ भूतस्य अतीतकालीनस्य भूतजातस्य भव्यस्य प्रागामिनः भविष्यत्का
लीनस्य जगतः कामः कामानसूत। तेषु रूपेः सम्राड् संम्यग्राजमानो। यद्वा संम्राड् ईश्वरः यस्य परमात्मस्वरूपस्याग्ने
राज्ञा अनुष्ठानान्यनुशास्तिस सम्राड्॥ एको अद्वितीयात्वेन प्रियेषु आहवनीयादिषु धामसु स्थानेषु यद्वा त्रिषु पृथिव्या
दिशोकेषु विराजति तावित्कीर्षेण दीप्यते॥ ॥इत्यष्टादशेध्याये चतुर्थः खंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ २३९
पुमर्थांश्चतुरो देयाद्विद्यातीर्थ महेश्वरः॥ ४॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपा

लसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे अष्टादशोध्यायः॥ ॥१८॥ यस्य निश्वसि 711/1973
तं वेदा यो वेदेभ्योखिलं जगत्॥ निर्ममे तमहं वंदे यो वेदेभ्योखिलं जगत्॥ ॥१॥ अथ एकोनविंशोध्याय आरभ्यते॥ तत्र प्रथम
खंडे अग्निः प्रत्नेति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अग्निः प्रत्नेन जन्मना शुंभानस्तन्वं स्वां॥ कविर्विप्रेण वावृधे॥ इति हे कवि:
क्रांतः कर्मा अग्निः प्रत्नेन पुराणेन जन्मना जननीयेन स्तोत्रेण स्वां स्वकीयां तन्वं तनुमगंभ्रं भानः शुंभयन् विप्रेण मेधाविना स्तो
त्रा वावृधे प्रवृद्धो भवति॥ ॥अथ द्वितीया॥ ऊर्जो नपातमाहुवेग्निं पावकशोचिषं॥ अस्मिन्यज्ञे स्वध्वरे इति। ऊर्जोन्नस्य नपातं
पुत्रं पावकशोचिषं शोधकदीप्तिमग्निं स्वध्वरे सकरे अस्मिन्यज्ञे आहुवे आह्वयामि॥ ॥अथ तृतीया॥ स नो मित्रमह
स्त्वमग्ने शुक्रेण शोचिषा॥ देवैरासत्सि बर्हिषीति। हे मित्रमहो मित्राणां पूजनीयाग्ने स त्वं शुक्रेण ज्वालावन शोचिषा तेजसा दे
वैः सह बर्हिषि यज्ञे आसत्सि आसीद॥ ॥अथ उत्ते शुष्मास इति तृचं द्वितीयं सूक्तं तत्र प्रथमा॥ उत्ते शुष्मासो अस्थूरक्षो

२४० भिं द्रंतोअद्रिवः॥ नुदस्वया: परिस्पृधः इति॥ हे अद्रिवो ग्रावबनासामा ततवः शुष्मासः शुष्मावेगाः बलानि वा रक्षो राक्षमा
नुभिदंनोद्रियाः परिस्पृधः इति। हे अद्रिवो ग्रावबनासामा ततवः शुष्मासः शुष्मावेगाः बलानि वा रक्षोराक्षसा विदायंतः उ
दस्युः उत्तिष्ठंति। या स्पृधः स्पर्धमाना शत्रुसेना अस्मान् प्रतिबाधंते ताः त्वं नुदस्व प्रेरय बाधस्वेत्यर्थः॥ ॥अथ द्वितीया॥ अ
या निजघ्निरोजसा रथसंगे धने हिते॥ स्तवा अबिभ्युषा हृदा इति॥ हे सोम त्वं अया अनेन प्रकृतेनोजसा बलेन निजघ्निः आ
घ्नन् हंतुशीलवान्। तं च त्वाम् अबिभ्युषा अज्ञीतेन भीतिरहितेन हृदा मनसा युक्तोहं रथसंगे रथानां संगे हिते शत्रुषु निहिते
धने च निमित्ते स्तवै स्तौमि॥ ॥अथ तृतीया॥ अस्य व्रतानि नाधृषे पवमानस्य दूढ्या॥ रुज यस्त्वा पृतन्यतीति॥ हे सोम पव
मानस्य रक्षणीयस्यास्य तव व्रतानि कर्माणि दूढ्या दुर्बुधिना राक्षसेन आधृषे आधर्षयितुम् अशक्यानि स च त्वा लयासहसु २४०
पांसुयुगित्याहिनाततो ये कवयनस्याकारायो बुधिः शत्रुः प्रनिल्यातियोदुमे रुजतितं रुज बाधस्व॥ ॥अथ चतुर्थी॥ तं हिन्वं

तिमदच्युतं हरिं नदीषु वाजिनं॥ इंदुम् इंद्राय मत्सरम् इति॥ मदच्युतं मदस्य च्यावयितारं हरिं हरितवर्णं वाजिनं बलिनं मत्सरं म 713/1972
दकरम् इंदुं तं सोमं नदीषु वसतीवरीषु इंद्राय इंद्रार्थं हिन्वंति ऋत्विजः प्रेरयंति॥ ॥अथ आ मंद्रैरिति तृचात्मकं तृतीयं सूक्तं तत्र
प्रथमा॥ आ मंद्रैर् इंद्र हरिभिर् याहि मयूररोमभिः॥ मा त्वा केचिन्नियमुरिंन पाशिनोसि धन्वेव तां इहीति॥ विश्वामित्रो यज्ञा
र्थम् इंद्रम् आह्वयति॥ हे इंद्र मंद्रैः मदयितृभिः पुरोमभिमरणसोमसदृशरोमयुक्तैः हरिभिरेतत्संज्ञकैरश्वैरुपेतस्त्वम् आयाहि
यज्ञं प्रत्यागच्छ। केचिदपि जनास्त्वां मा नियमुः मा नियच्छंतु। गमनप्रतिबंधं मा कुर्वन्त्वित्यभिप्रायः। प्रतिबंधे दृष्टांतः। पा
शिनो नापाशहस्ता व्याधा यथा पक्षिणं नियच्छंति तद्वत् त्वां मा नियच्छंत्वेवाकिंच। धन्वेव। यथा पांथाः धन्व मरुदेशं शीघ्र
मतिगच्छंति तद्वद् गमनप्रतिबंधकारिणस्तानतीत्य शीघ्रम् आगच्छ॥ ॥अथ द्वितीया॥ वृत्र खादो वलं रुजः पुरां दर्मो
अपाम् अजः॥ स्थाता रथस्य हर्योरभिस्वर इंद्रो दृळ्हा चिदारुजः इति। सोमम् इंद्राय वृत्रखादः। खादिर्भक्षण इत्यस्मात् कर्म

ण्यण। कृदुत्तरपदप्रकृतिस्वरः॥ वृत्रखादतीति वृत्रखादः। बलंरुजः। रुजो भंग। कर्मण्युपपदे मूलविभुजादित्वात्
२४१ । कप्रत्ययः। तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक्। तथा दिस्वरः॥ आरुजतो व्याकाशमिति बलो मेघः। तस्य भंजकः। त
था मंत्रवर्षः॥ बिभेद बलमिति। नतोस्यामजः॥ अजगतिक्षेपणयोरित्यस्मात्। पचाद्यच्। तच्चित्स्वरः। मेघं भेदनद्वारा पांप्रेर
कः। पुरां शत्रुसंबंधिनीनां पुराणां दर्मो दारकः। तथा च्याति। अव ह्रोभिरुद्धस्यार्थो अभिमुखः सन् ह्यो घ्नं गच्छंति। तथा अ
पित्वे बंधुत्वे प्रपित्वे प्राप्ते सति हे इंद्र त्वं नोस्मान् तूयं क्षिप्रं नामेत तत्। ह्यो घ्नमा गम्या गच्छ। आगत्य च कण्वेषु कण्वपुत्रेष्वस्मा
कस दास हेएकया म्नेनैव विघमानं सर्वं सोमं कृत्स्नं पिब॥ ॥अथ द्वितीया॥ मदं तुल्याम घवंन्निंद्र इंद्र वीरवो देयाय सुन्वत।
प्रमुत्रापा सोममपिब्य महेषु नांऽयं छंत द्वधिषे सहदति॥ हे मघवन् धनवन् निंद्र इंद्र वः केदनाः सोमाः त्वां मंदंतु हर्षयंतु। २४१
मंदयंत्स येन परस्मै परं। किमर्थं कृत्स्नमे सोमाभिषवं कुर्वतो यजमानस्य राध्यदेयाय राधसो धनस्य दानार्थं देदातेरचो

यद्वि निभावेतु। इंधतीकोतीरः। यतोनवेद्दल्याघुराप्ततं कृदुत्तरपदप्रकृतिस्वरत्वं। शत्रुरनुमद्दति सुन्वच्छब्दात्यरा विभक्तिरुद
त्ता॥ अपिचत्वं सोमं आदुमुख्य आमोषणं कृत्वा अदत्तमपिबत् लाद्दारुत्य अपिबः पीतवानसि। सख्य यज्ञवेशसंकृताप्रास
ह्रा सोममपिबदिति आतोर्को इत्थं सोमंच मृत्व म्वोरधिषवणफलकयोः सुतमभिषुत। यद्वा च मत्स्यां होतुर्मैत्रावरुणस्य च
संबंधित्वार्थं कृताज्ञिवंसतीवरीभिः कृतमभिषुतं यस्मादेवं तस्मात्कारणात्तुख्यं छंप्रशस्यतं च द्रुतं मंवास हो बलं दधिषे हे इं
द्र त्वं धारयासि। अतो मदीया अपि सोमास्त्वां मादयंत्विति प्राथ्यते। अथ त्वमंग प्रशंसिष अथ प्रगाथात्मकं पंचमं सूक्तं मं
त्रवर्ष्यः॥ इंद्रः पूभिरिति। तथा ह्र्योरश्वयोः अभिस्वर। अस्मदाभिमुख्येन प्रेरणानिमित्ते भूते सति रथस्य स्थाता रथमधि
ष्ठाता। तथा द्रुढाचिद्दृढानामनिबलरुचतां शत्रूणामपि आरुजः। रुजो भंग इत्यस्मादिगुपधलक्षणः। कः। समासेथाथा
दि आसमंतात्तु भंजको भवति॥ ॥अथ तृतीया॥ गंभीराँउदधीँरिव क्रतुं पुष्यसि गा इव॥ प्रसुगोपा यवसं धेनवो य

715
1973

२४२ था ह्रदं कुल्या इवं शनेति॥ हे इंद्र त्वं गंभीरान्मदा वृकाशानुदधीन् समुद्रान् उदकैर्यथा पोषयसि तद्वत् क्रतुं यज्ञस्य कर्ता
रं अनु यजमानमभिमतयुतप्रदानेन पोष्यसि पोषयसि न तृष्णां तः। यथा सुगोपाः। समीचीनो गोपालः यवासेन गाः
पोषयसि तद्वत्। यथा येन यवसतरणादिकं ह्याप्नुवंति तद्वत् सोमाप्राप्नोति। नेच सोम्यामाः कुल्याः कृत्रियसरितो
रः ह्रदं महाजलाशयं यथा प्राप्नुवंति भद्रत्वं। आशनव्याप्नुवंति॥ ॥अथ यथा गौरो अपाकृतमिति प्रगाथात्मकं च
तुर्थं सूक्तं तत्र प्रथमा॥ यथा गौरो अपाकृतं तृष्यन्नेत्यवेरिणं॥ आपित्वे नः प्रपित्वे तूयमागहि कण्वेषु सु सचा पिबेति। गौरो गौर
मृगः तृष्यन्नापिपासन् अपा अहिरुदकैर्थत्ययेनैकवचनं। कृतः इमित्यादिनाविभक्तेरुदात्तत्वं॥ कृतं संपूर्णत्वं कृत इरिणं भित्र
णं॥ तडाकादृशं यथा येन प्रकारेण अवेति अवगच्छति। अवरूढाभिमुखस्यार्थ अभिमुखः सन्सौ प्रगच्छति। तथा। २४२
आपित्वे बंधुत्वे। प्रपित्वे प्राप्ते सति। हे इंद्र त्वं नोस्मान् तूयं क्षिप्रनामैतत्। शीघ्रमागत्या गा आगत्य च कण्वेषु कण्वपुत्रेषु अस्मा

कसदासह एकत्यास्थोनेनैभविष्यमानं सर्वं सोमं सकृदुपिब॥ ॥अथ द्वितीया॥ मंदंतु त्वा मघवन्निंद्रेंदवो राधोदेयाय सुन्व
ते॥ आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः इति॥ हे मघवन् धनवन्निंद्र इंदवः कूदनाः सोमाः चामंदंतु महयं
यंतु। मंदतेर्ण्यंतस्य येन परस्मैपदं। किमर्थं सुन्वते सोमाभिषवं कुर्वते यजमानाय राधोदेयाय राधसो धनस्य दानार्थं द
दातेर्यचो मर्शिति भावे तुं। ई घतीतीकारः। यतोनरद्वत्याद्युदात्तत्वं कृदुत्तरपद प्रकृतिस्वरत्वं। शतुरनुमइति सुन्वच्छ
स्य राविभक्तिरुदात्तत्वं। अपि च त्वं। सोमं आमुष्य आमोषणं कृत्वा अरत्नमपिबलात् हृत्य अपिबः पीतवानसि। स यज्ञ
वेदर्मरुत्वा प्रासहा सोममपिबद्धि निरुक्ते कीदृशं सोमं चमू चम्बोरधिषवणफलकयोः स्थकं तमभिषुतं। यद्वा चमूभ्यां च
मसाभ्यां होतुर्मैत्रावरुणं रूपस्य च संबंधिभ्यां संस्कृताभिर्वसतीवरीभिः कृतमभिषुतं यस्मादेवं तस्मात्कारणात्। ज्येष्ठं
प्रशस्यतमं तद्धनं मंचासहो बलं दधिषे हे चंद्र त्वं धारयसि। अतो मदीया आपि सोमास्त्वां मादयंतु इति प्रार्थ्यते॥ ॥

717
1973

अथ त्वमंग प्रशंसिष इति प्रगाथात्मकं पंचमं सूक्तं तत्र प्रथमा॥ त्वमंग प्रशंसिषो देवः शविष्ठ मर्त्यं॥ न त्वदन्यो मघवन्न
२४३ स्ति मर्डितेंद्र ब्रवीमि ते वचः॥ इति। अंगेत्यभिमुखीकरणे। अंग हे शविष्ठ बलवत्तम हे देव द्योतमान त्वं मर्त्यं मरणधर्माणं त्वां
स्तुवंतं पुरुषं प्रशंसिषः सम्यगानतस्फलमिति प्रशंसा हे मघवन् धनवन्निंद्र त्वदन्यस्त्वत्तोन्यः कश्चिन्मर्डिता सुखयिता नास्ति
अतः कारणात्ते तुभ्यं इदं स्तुतिलक्षणं वचो ब्रवीमि उच्चारयामि। शंसिषः शंस स्तुतौ। लिङि सिप्यडागमः। सिप्बहुलं
लेटीति विकरणः। सिप्यनेस्यार्धधातुकत्वादिडागमः॥ ॥अथ द्वितीया॥ मा ते राधांसि मा त ऊतयो वसोस्मान्कदा चना
दभन्। विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य इति॥ हे वसो निवासयितरिंद्र ते तव संबंधीनि राध्नोत्यनिरि
तिराधांसि भूतानि अस्मान्कदाचन कदाचिदपि मा दभन् मा विनाशयंतु ते त्वदीया ऊतयो गंतारः यद्वा धनस्य इत्यत्र वर्ण २४३
लोपः। धनस्य कंपयितारः ते त्वदीया मारुतश्च मा दभन्। हे मानुष मनुष्यहितेंद्र चर्षणिभ्यः मंत्रद्रष्टाभ्यो नोस्मभ्यं

719/1973

विश्वा विश्वानि वसूनि धनानि च आ उपमिमीहि। सर्वत आहृत्य अस्मत्समीपे उरस सर्वत्र वर्तमानं धनं अस्मभ्यं प्रयच्छेत्य
र्थः। कदाकिंशब्दात् सर्वैकान्यकिंयत्तदः काले दा इति दाप्रत्ययः। किमः क इति कादेशः। व्यत्ययेनाद्युदात्तत्वं। दभन्। दंभुर्दंभने
लोडर्थे छांदसे लङि बहुलं छंदसीति विकरणस्य लुक् न माङ्योग इत्यडागमः। मृळीहि। मा उपमाने च व्यत्ययेन परस्मै
पदं जुहोत्यादिभ्यः श्लुः। भृञामित्यभ्यासस्येत्वं। हेर्दित्वान घमास्थेतीत्वं॥ ॥इत्येकोनविंशोध्याये प्रथमः खंडः॥१॥
अथ द्वितीयखंडे प्रतिष्यासूनरीति सप्तर्चात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ प्रति ष्या सूनरी जनी व्युच्छंती परि स्वसुः॥ दिवो अ
दर्शि दुहितेति। स्या सा प्रस्तूयमाना सूनरी सुष्ठु प्राणिनां नेत्री जनी जनयित्री फलानां स्वसुः स्वसृस्थानीयाया रात्रेः
परि उपरिभागे रात्रिपर्यवसानकाले व्युच्छंती तमो विवासयंती। स्वसा स्वसे ज्याय्यस्मा इत्युक्तं। दिवो द्योतमानस्यादि
त्यस्य दुहिता उषाः प्रत्यदर्शि सर्वैः प्रतिदृश्यते॥ ॥अथ द्वितीया॥ अश्वेव चित्रारुषी माता गवामृतावरी। सखाभूदश्वि

नो रूपाः॥ इति। अश्वेयच्छ्रिया याचनीया अरुषी अरोचमाना गवां रश्मीनां माता निर्मात्री ऋतावरी यज्ञवत्यपाः अश्विनोः
२४८ सखा समानख्याना सयुक्तयमाना भूद्भवति। अश्विनोउषसास हसूयं मातलातसुखिलं परस्परं॥ ॥अथतृतीया॥
उतसखास्यश्विनोरुतमातागवामसि॥ उतोषोवस्वईशिषे॥ इति। उतापिच अश्विनोः सखा उतापिच गवां माता निर्माता
सि उतापिच हेउषः वस्वोधनस्य ईशिषे ईश्वराभवसि॥ ॥अथैषोउषेति ऋचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ ७॥
एषोउषा अपूर्व्या व्युच्छति प्रिया दिवः॥ स्तुषे वामश्विना बृहदिति। एषो एषा एव अस्माभिः परिदृश्यमाना प्रिया सर्वेषां
प्रीतिहेतु अपूर्व्या पूर्वेषु मध्यरात्रिकालेषु विद्यमाना न भवति। किंत्विदानीं तु उषा उषोदेवता दिवो द्युलोकस्य सकाशा २४४
द्गगत्य व्युच्छति तमो वर्जयति। हे अश्विनौ वायुवां महत्प्रभूतं यथा भवति तथा स्तुषे स्तौमि॥ ॥अथ द्वितीया॥ या दस्रासिं
धुमातरा मनोतरा रयीणां। धिया देवा वसुविदा॥ या देवा या वुभा वश्विनौ वक्ष्यमाणगुणयुक्तौ तौ स्तुष इति सर्वत्रान्वयः

721/1973

कीदृशौ दस्रा दर्शनीयौ। सिंधुमातरा समुद्रमातृकौ यद्यपि सूर्याचंद्रमसावेव समुद्रजौ तथाप्यश्विनौ केषांचिन्मतेन तद्रूप
त्वात तथात्वां रयीणां धनानां मनोतरा मनसा चैव समुद्रजौ। तथाप्यश्विनोः केषांचिन्मतेन तद्रूपत्वान तथात्वं रयीणां धनानां
मनोतरा मनसा तारयितारौ धिया कर्मणा वसुविदा निवासस्थानस्य लंभयितारौ मनोतरा मनसा तरत इति मनोतरौ तरतेरंत
र्भावितस्य छर्दिर्दीरविश्यपूर्व पदांतस्य सकारस्य जत्वे सति छांदस घुलं रयीणान्नामन्यतरस्यामिति नाम उदात्तत्वम्। धियासा
धेकाच इति विभक्तेरुदात्तत्वं। वसुविदा वसूनि निवासस्थानानि विंदते इति वसुविदौ क्विप् चेति क्विप्॥ ॥अथतृतीया॥ वच्यंते वां
ककुहासो जूर्णायामधि विष्टपि॥ यद्वां रथो विभिष्पतादिति। हे अश्विनौ वां युवयोः संबंधी रथः जूर्णायात्रानाशनस्तेस्तुतायां अ
धिविष्टपि स्वर्गे नाकाले यद्यदा विभिरश्वैः पतात् पतति गच्छति तदा वां युवयोः ककुहासः स्तुतयः वच्यंते अस्माभिरुच्यंते। अधी
ते यं कृछवां -ं वचिरिति वच्यादेशः। ककुहासः ककुभं शृंगोविदुः प्रधाने चेत्यभिधानात्॥ वचिस्वपीत्यादिना संप्रसारणं।

संप्रसारणाभावश्छेत्यत्र वाच्छंदसीत्यनुवृत्तौ परपूर्वत्वस्य पाक्षिकत्वा यणादेशः। प्रत्ययस्वरः। ककुहासः। ककुभं श्रेष्ठं गोविदुः प्रथा
२४५ न चेभिधानात् प्राधान्याभिधायिना ककुप्शब्देन तत्प्रतिपादिकाः स्तुतयो लक्ष्यंते। हलंछांदसं। आज्जसेरसुगित्यसुक्॥
जूर्णायां हि षु वयो हतो। अत्यन्त सत्यर्थः॥ धातूनामनेकार्थत्वात्। निष्ठायां अकः किलीति इट्प्रतिषेधः। बहुलं छंदसीः
त्वत्वं। हस्त्रिचेतिदीर्घः। रदाभ्यामितिनिष्ठानत्वं। प्रत्ययस्वरः। विभिः। विगत्यादौ। वियतिगच्छंतीति। वयोश्चाः उणादिका ङ
प्रत्ययः। पतात्पदङ्गतो। ऊ स्याडागमः। इलश्चलोपइतीकारलोपः॥ ॥१२॥ अथ उषस्तच्चित्रमाभरास्मभ्यं वाजिनीवती
येन तोकं च तनयं च धामहे इति। हे वाजिनीवति वाजो हविर्लक्षणमन्नं तद्युक्ता क्रिया वाजिनी तया क्रियया युक्ते उषः उषो
देवा तश्चस्मत्यं चित्रं चायनीयं तद्धनं आभर आहर प्रयच्छ। येन धनेन तोकं पुत्रं तनयं तत्पुत्रं च धामहे दध्या हधारयामः २४६
। अत्र निरुक्तं उषस्तच्चित्रं चायनीयं धनमाहरास्मभ्यं नवती येन पुत्रांश्च पौत्रांश्च धीमहीति। धामहे। दधातेर्लिट

ढुलंछंदसी शपोलुक्। प्रत्ययेन धकादात्तत्वं। यद्वालोदि आडुत्तमस्य पिच्चे स्याडागमः। प्रत्ययस्य पिद्वद्भावश्च। अतः प्रत्ययस्य
पित्वादनुदात्तत्वे धातुःस्वरः। ङिष्पतो अभ्यस्य ए तए इति एत्वाभावो व्यत्ययेन द्रष्टव्यः। यद्वृत्तान्नित्यमिति निघातप्रति
षेधः॥ ॥१३॥ अथ द्वितीया॥ उषो अद्येह गोमत्यश्वावति विभावरि॥ रेवदस्मे व्युच्छ सूनृतावतीति॥ हे गोमति अस्मभ्यं दातव्य
गोभिर्युक्ते तथा अश्वावति अश्वैर्युक्ते विभावरि विभिन्नप्रकाशोपेते सूनृतावति प्रियसत्यात्मिकावाक् सूनृता तद्वति श्यावा
चा युक्ते एवङ्गुते हे उषः उषो देवते अद्येदानीं प्रभातसमये इहास्मिन् देशे अस्मे अस्माकं रेवत् रायमिंतो बहुलमिति संप्र
सारणं छंदसीरइति मतुपो वत्वं। रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं धनयुक्तं कर्म यथा भवति तथा व्युच्छ नै
शं तमो निवारय उच्छि विवासो विवासो वर्जना॥ ॥१४॥ अथ तृतीया॥ युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः॥ अथा नो वि
श्वा सौभगान्या वहेति। हे वाजिनीवति हविर्लक्षणान्नयति उषः उषो देवते अरुणान् अरुणवर्णान् अश्वान् अश्वस्थानीया

723/1971

नुगोविशेषानदीर्घादित्समानपादइति संहितायां नकारस्य रुत्वं। आतोटि नित्यमिति सानुनासिक आकारः। एवंभूतान् अ
२५६ घास्मिन्काले युष्माद्दियोजयेव। हिरवधारणे। अथानंतरं रथमारुह्य विश्वा सर्वाणि सौभगानि सुभगानांमंत्र उरुक्रमौ त्राहि
णुपादानं भावकर्मणोरथयोः प्राणभक्षानिवयोवचनोऽज्ञात्राहित्यौज्ञित्यत्र प्रत्ययाद्युदात्तगामि धितं पूर्वपदस्य वेलक्षण्य
पदद्वयौ प्राप्तौ वा सर्वविधीनां छंदसि विकल्पितत्वादत्रोत्तरपदस्य वृद्धिर्न भवतीत्युक्तं। सौभगानि सर्वाणि सौभाग्यानि नोस्म
अमावं वह आनय॥ ॥अथ अश्विनावर्तिरिति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ ॥अश्विनावर्तिरस्मदा गोमद्दस्रा हिर
ण्यवत्॥ अर्वाग्रथं समनसा नियच्छतमिति॥ उपसासाएच यौ दृढ दस्रावश्विनावित्थमादिकेन स्तूयेते॥ हे अश्विनौ अश्ववंतौ
व्यापनशीलौ वा देवौ दस्रौ शत्रूणामुपक्षपयितारौ। अस्मदस्माकं वर्तिर्वर्तनं गृहं गुणवत् हं आ समंताद्गोमत् बहुभिर्गोभि २५६
र्युक्तं हिरण्यवत्। हितरमणीयधनयुक्तं च यथा भवति। यथा समनसा। समानमनस्कौ संतौ युवां युष्मदीयं रथं अर्वा

725/1973

गर्वाचीनमस्मदभिमुखं नियच्छतं अवर्तयतं। अस्मत्कृपां कुलुगिति षष्ठ्या लुक्॥ ॥अथ द्वितीया॥ इहेह देवा मयोभुवा दस्रा
हिरण्यवर्तनी॥ उषर्बुधो वहंतु सोमपीतये इति॥ उषर्बुधः उपासि प्रबुद्धा आ इह यस्मिन्यागे सोमपीतये सोमपानाय द
स्रौ शत्रूणामुपक्षपयितारावश्विनौ आ वहंतु आनयंतु कौ इहेदेवौ देवनशीलौ दानादिगुणयुक्तौ वा मयोभुवा। मय
स आरोग्यस्य सुखस्य भावयितारौ अश्विनौ। खे देवानां भिषजावितिश्रुतेः हिरण्यवर्तनी वर्तते तत्रोत्तरत्वात् वर्तनीति
रथेन रथ उच्यते। सुवर्णमयो वर्तनिर्ययोस्तौ इदंवस्पणिदिपुत्रिद्युस्वपां सुलुगित्याकारः॥ ॥अथ तृतीया॥ यावित्था
श्लोकमादिवो ज्योतिर्जनाय चक्रथुः॥ आ न ऊर्जं वहतमश्विना युवमिति॥ हे अश्विनौ यो युवां दिवो द्युलोकात् श्लोकं उप
श्लोकनीयं प्रशंसनीयं ज्योतिस्तेजः इत्था इत्थमस्माभिरनुभूयमानेन प्रकारेण चक्रथुः कृतवंतौ केषांचिन्मतेन सूर्या
चंद्रमसावश्विनावित्युक्तं यास्केनाप्युक्तं अश्विनौ द्यावापृथिव्यावित्येके अहोरात्रावित्येके सूर्याचंद्रमसावित्ये

कइति। तथान्वप्रकाशकत्वंतयोरस्वरूपं। नोपुवायुवानोसभ्यंअलंवलप्रदमनंआवहतमानयतंप्रयछतं। श्लोकंश्लोः
२५० कसंघातोआयुंस्तत्यार्थोपिकर्माणेघभजित्वादाफदातत्वं॥ ॥इत्येकोनविंशोध्यायेद्वितीयःखंडः॥ ॥अथतृतीयखं
डेअग्निंतंमन्यतइतितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ ॥अग्निंतंमन्येयोवसुरस्तंयंयंतिधेनवः॥अस्तमर्वंतआश
वोस्तंनित्यासोवाजिनइषंस्तोतृभ्यआभरइति। तमग्निंमन्येस्तौमि। योग्निर्वसुर्वासकः। यमस्तंसर्वेषांगृहवधा
दाधअयभूतत्वेनवागावोयंतिगच्छंतिपीणायितु। मस्तमुक्तलक्षणःमर्वंतोरेणवंतःअश्वाःआशवःशीघ्रगामि
नोयंतितथानित्यासोनित्यप्रयत्नयोवाजिनोहविर्लक्षणोनवंतोयजमानाःयमस्तंयंति। तंमन्येइषमन्नंस्तोतृभ्या
स्मभ्यंआभरहेअग्नेआहर॥ ॥अथद्वितीया॥ अग्निर्हिवाजिनंविशेददातिविश्वचर्षणिः॥अग्नीरायेस्वाभुवंसप्री २५७
तोदातिवार्यमिषंस्तोतृभ्यआभरेति॥अग्निर्हिअयमग्निःखलुयेणयजमानायवाजिनमंनवंतंपुत्रमश्वमंनंवाददा

तिप्रयछति विश्वचर्षणिविश्वेचर्षणयोमनुष्याःरक्षणयाअर्चकायस्यसतथोक्तः॥ यद्वापश्यतिकर्मेतत्सर्वस्यद्रष्टाग्निः
राधायधर्मार्थेनअथवाङ्गिरसकार्थेचतुर्थ्यर्थेधर्मस्वाभुवंसकुःसर्वविघोंकः वार्यंसर्वैर्वरणीयंप्रीतःसन्दातिदाम
यतिदातुंचागछति। इषमित्यादिसर्ववत॥ ॥अथतृतीया॥ अग्निर्योवसुर्गृणेसंयमायंतिधेनवः॥ समर्वंतोरघुद्र
वःसंसुजातासःसूरयइषंस्तोतृभ्यआभरेति। सोग्निःस्वास्वत्वाग्नेःयोवसुर्वसिकोगृणस्तूयतेयंधेनवःसमायं
तिहोमार्थंप्रापयंति। त्वर्वीताश्चालघुद्रुवोलघुगमनाःसमायंति। सुजातासः। शोभनप्रादुर्भूताः सूरयोमेधा
विनश्चसमयंति। सखल्वग्निरिति। इषंपूर्ववत॥ ॥अथमहेनोअद्येतितृचंद्वितीयंसूक्तंतत्रप्रथमा॥ ॥महेनोअ
द्यबोधयोषोरायेदिविलती॥ यथाचिंनोअबोधयःसत्यश्रवासिवाय्येसुजातेअश्वसूनृतेइति॥ अद्यास्मिन्याग
दिनेहेउषःउषोदिविदिविलतीदीप्तिमतीत्वं। नोस्मानमहेमहतेरायेधनप्राप्तयेबोधनायप्रज्ञापयप्रकाशय

727
1473

त्यर्थः॥ सति हि प्रकाशे कृत्स्नाद्रव्यस्यार्जयितुं शक्यत्वात्॥ यथा चिद्यथैव पूर्वं नोऽस्मानबोधयः। अतीतेषु दिनेषु यथा बोधि-
२५८ तवती तद्वदद्यापीत्यर्थः। हे सुजाते शोभनप्रादुर्भूते अश्वसूनृते अश्वा व्याप्ता प्रियसत्यात्मिका स्तुतिर्वाग्यस्याः सा। हे ता-
दृशि ह्रियि वाय्ये वय्यपुत्रे सत्यश्रवसि मय्यनुग्रहाणेत्यर्थः॥ ॥अथ द्वितीया॥ या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः।
सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते इति॥ हे दिवो दुहितः दिवः सूर्यस्य पुत्रि उषः या त्वं सुनीथे
एतन्नामके शौचद्रथे शुचद्रथस्यापत्ये पूर्वं व्यौच्छो। अथ वा सरथस्तमासि। सा त्वं सहीयसि अतिशयेन बलवति। वा-
य्ये वय्यपुत्रे सत्यश्रवसि मयि व्युच्छान मो विवासय। उच्छी विवासे। विवासो वर्जनं। शिष्टं समानं। ॥अथ तृतीया॥ सा नो
अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः॥ यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते इति॥ हे दुहितर्दिवः आ- २५८
भरद्वसुः आहृतधना सा प्रसिद्धा त्वं। नोऽस्माकमद्यास्मिन्दिने व्युच्छ तमो विवासय। सहीयसि। यो या। उकारोऽनर्थकः॥

या त्वं पूर्वं व्यौच्छः सा व्युच्छेति। शिष्टं समानं॥ ॥अथ प्रति प्रियमिति दशर्चात्मकं द्वितीयं सूक्तं॥ तत्र प्रथमा॥ प्रति प्रियतमं रथं वृषणं
वसुवाहनं॥ स्तोता वामश्विनावृषिः स्तोमेन प्रतिभूषति माध्वी मम श्रुतं हवमिति॥ हे अश्विनौ एकः प्रतिभूष्वोऽनुवादः। वां युवा-
योः प्रियतमं रथं स्तोता ऋषिः स्तोमेभिः स्तोमैः प्रतिभूषति अलंकरोति। कीदृशं रथं वृषणं वर्षितारं फलानां वसुवाह-
नं धनानां वाहकं। ईदृशं रथमागमनाय स्तौतीत्यर्थः॥ तस्माद्धे माध्वी मधुनो विद्यावेदितारौ मम हवमाह्वानं श्रुतं शृ-
णुतम्॥ ॥अथ द्वितीया॥ अत्यायातमश्विना तिरो विश्वा अहं सना। दस्रा हिरण्यवर्तनी सुषुम्ना सिंधुवाहसा
माध्वी मम श्रुतं हवमिति॥ हे अश्विनाश्विनौ अत्यायातं सर्वान्यजमानानतिक्रम्यागच्छतं। अहमृषिर्यथा वि-
श्वाः सर्वा अस्माद्दूरोधिप्रजाः सना सदा तिरस्करोमि अथ वा अहं तिरः तिरस्सत इति प्रासस्येति निरुक्तं प्रासा
विश्वाः सर्वाः क्रियायुष्मदीया अनुतिष्ठेयमित्यर्थः। सनासनातनौ दस्रौ शत्रूणामुपक्षपयितारौ हिरण्यव-

729/1923

र्तनी। हिरण्यरथो सकुम्भासकथ नोसिंधुवाहसानदीनांप्रवाहिपिसारोवृष्टिप्रेरणेननादृशोयुवामस्यायाभं॥ ।।अथतृती॰
२४० उरानोरत्नानिबिभ्रतावश्विनागछतंयुवं॥ रुद्राहिरण्यवर्तनीजुषाणावाजिनीवसूमाध्वीममश्रुतंहवमिति॥ हेअश्वि
नावश्विनोयुवंयुवांनोस्मभ्यंरत्नानिरमणीयानिधनानिबिभ्रमाबिभ्रतोधारयंतोसंवाजस्मानागछतं। हेरुद्रारुद्र
मुखोस्तकत्योत्वावाजिनीवसूवाजिंनधनोयुवांहिरण्यवर्तनीहिरण्यरथोजुषाणायज्ञंसेवमानोसंनोआगछतमिति।मा
ध्वीउत्पादितंगतं॥ ।।इत्येकोननविंशोध्यायेतृतीयःखंडः॥ ।।अथचतुर्थखंडेअबोध्यग्निःसमिधेतिसूक्तात्मकंप्र
थमंसूक्तंतत्रप्रथमा॥ ।।अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवः
सिस्रतेनाकमछोते॥ अयमग्निर्जनानामृत्विगादीनांसमिधासमिद्भिरबोधिप्रबुद्धोभूतंधेनुमिवा॥ अग्निहोत्रार्थं २४०
धेनुंप्रतियथाप्रातर्बुध्यतेतद्वदायतीमागछंतीमुषसंप्रति। उषःकालइत्यर्थः॥ अथप्रसकृद्दस्याग्नेर्भानवोरश्म

731/1923

योदीप्ताज्जिकामदंतोवयांशाखाप्राज्जिहानाः॥ प्रारूपयंतोरश्म्याइवयस्मादूहंतः प्राज्जिहानाःस्वाधिष्ठानंत्यजंतोभारनवोनाक
मंतरिक्षमछाभिमुख्येनप्रसस्रतेप्रसरंति। सस्रतेसिस्रत इतिपाठो॥ ।।अथद्वितीया॥ अबोधिहोतायजथायदेवानूर्ध्वोअग्निः
सुमनाःप्रातरस्थात्। समिद्धस्यरुशदर्शिपाजोमहांदेवस्तमसोनिरमोचीति॥ अयंहोताहोमनिष्पादकोग्निर्देवान्यष्ट
व्यानयजथाययष्टुमबोधिबुध्यातेतसोग्निःप्रातःकालेसुमनाःशोभनमनस्कोयजमानेनुग्रहंनुद्धःसनूर्ध्वःअस्थ
दुत्तिष्ठतिसमिद्धस्यास्यरुशद्रोचमानंपाजोबलंद्वालालक्षणमदर्शिदृश्यते॥ अथतथाभूतोमहान्देवस्तमसोंधकारा
न्निरमोचिसर्वंजगंनिरमोचयत्॥ ।।अथतृतीया॥ यदींगणस्यरशनामजीगःशुचिरंक्तेशुचिभिर्गोभिरग्निः॥ आ
द्दक्षिणायुज्यतेवाजयंत्युत्तानामूर्ध्वोअधयज्जुहूभिरिति॥ यद्यदाईमयमग्निःगणस्यसंघात्मकस्यजगतःरशनांरज्जुरि
वद्धापारप्रतिबंधकंतमःअजीगःगिरतिगृह्णातिवा।समिद्धोभवतीत्यर्थः॥ यदाचरुशदिवदीप्तोग्निःशुचिभिर्गोभिर्रश्मि

२५० रश्मिभिरंतेष्यनक्ति। विश्वंजगत आदनंतरमेव दक्षिणप्रवृत्ताया उर्यंता र्हविर्लक्षणमंन द दानुमिश्वंती युञ्नेयुञ्यतोयुक्ताभव
ति। अथवा दक्षिणा प्रवृत्ताउयथा रायुस्यते तांधारामुत्तानांरुक्ष्यतानानुपरियिस्तलांरुष्युउन्नमः सन ग्रु दूभिर धयत पिबति।
अथ इंद्रथेछमितित्वात्मकं द्वितीयंसूक्तं तत्र प्रथमा॥ ॥ इदंश्रेष्ठंज्योतिषांज्योतिरागाच्चित्रः प्रकेतोअजनिष्टविभ्वा। यथाप्र
सूतासवितुः सवायएवारात्र्युषसेयोनिमारैगिति॥ ज्योतिषांग्रहनक्षत्रादीनां द्योतमानानांमध्ये इदमुखअरुणंज्योतिः
श्रेष्ठंप्रशस्यतमंअस्यकांतित्रायइतिचेतउच्यते। नक्षत्रादिकंज्योतिः स्वात्मनेमेव प्रकाशयतिनान्यत्सर्वं इदंतूषसणःप्र
प्रकाशयति। तथापिनविस्पष्टप्रकाशः॥ उषसंतुज्योतिर्युगपदेव सर्वस्यजगतोंधकारानिराकरणेनाविशेषेण प्रकाश
कं। अतः प्रशस्यतममित्यर्थः॥ तादृशंज्योतिरागात् सर्वस्यांदिश्यागमनआगतेच तास्मिंश्चित्रश्चायनीयः प्रकेतः अंधकारा २५०
हतस्यसर्वस्यपदार्थस्य प्रज्ञापकोतदीयोरश्मिर्विभ्वाविभुर्व्यासः संनजनिष्टाप्रादुरभूत्। किंच यथा रात्रीरात्रिः स्वयंसवि

तुः सूर्यसकाशात्प्रसूताउत्पन्नासूर्यास्वस्तंगच्छनरात्रिंजनयतितस्मिन्ननस्तमितेरात्रिः उत्पत्त्यभावात्। एवमेवरात्रिरपिउषसे
सवायउषसउत्पत्तयेतदीयंयोनिस्थानंस्वकीयापरभागलक्षणंआरैक्। आरेचितवतीकल्पितवतीत्यर्थः। यथाप्रसूतारा
त्रिसकाशात्प्रसूता उषाः सवितुःसूर्यस्यसवायप्रसवायजन्मने यथाभवतिएवंरात्रिरपिउषसेउषसोयज्जन्मतदर्थंयोनिं
स्वापरभागलक्षणंस्थानंस्रुतवती। अत्रनेरुक्तं इदंश्रेष्ठंज्योतिषांज्योतिरागमच्चित्रंप्रकेतनंप्रज्ञानमजनिष्टविभूततमं 733/1923
यथाप्रसूतासवितुःप्रथमवायरात्रिरादित्यस्यैवंरात्रिरुषसोयोनिंअरिचत्स्थानंमिति। श्रेष्ठंप्रशस्यतमंवृद्धशब्दादतिशायनीक
ईष्ठन् प्रशस्यस्य श्र इतिश्रादेशः प्रकृत्यैकाजितिप्रकृतिभावाट्टिलोपाभावः। अगात् अन्तेर्लुङि इणोगालुङि इतिगादेशः। गाति
स्थाघ्वितिसिचोलुक्। प्रकेतः। कित ज्ञाने अंतर्भावितण्यर्थात् कर्मणिल घथाथ्याद्विनोत्तरपदांतोदात्तं। अजनिष्टजनीप्रा
दुर्भावेलुङि सिचइडागमः दीर्घानाचिप्रसंभ्यो दृश्य संज्ञायामितिभवात तदुभ्रप्रत्ययः। भूपास्तिलुङि स्यादिनामोकारादेशः।

स्पर्शनिषणादेशस्य न भवत्यवि यो रति प्रतिषेध प्राप्ते छंदस्क भूयथेतियणादेशः॥ व्यत्ययेना घु दात्तत्वं। यद्वाचिपूर्वाद्वचेनेरो
२५१ णादिको इन प्रत्ययः॥ नित्वादाद्युदात्तत्वं प्रसक्तात्स्त नुतेः कर्मणानिषागतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सवार्याच्छंदसि
जवसवो बन्धकस्यावितानिपानर्कालं अचाविनत्वरः॥ रात्री। रात्रेश्चाजसावितिङीप्। यस्येतिचेति ईकारलोपः॥ अरेकृणिच
रविरेचने। लङि बहुलं छंदसीति विकरणस्य लुक्। लघूपधगुणे हल्ङ्याब्भ्यइति तिलोपः॥ धहर्पव्यापत्यावत्ययेनेए
कारस्यत्याकारः॥ ॥अथ द्वितीया॥ रुशद्वत्सा रुशंतीश्वेत्यागाद्वारैगु कृष्णा सदनान्यस्याः॥ समानबंधू अमृते अ
नूची द्यावावर्णंचरत आमिनानेइति॥ श्वेतस्य क्षसोनामधेयं। रुशती साश्वेत्याश्वेतवर्णोषाः॥ रुशद्वत्सा रुचाद्दी
सः सूर्ये वित्सोयस्याः। सानथ क्लाययथामातुः समीपे वत्सः चरति एवमुषसः समीपे सूर्यस्य नित्यमवस्थानादुत्संचं। २५२
अथवा यथा वत्सो मातुस्तन्यं संपिबन् हरति एवमुषसो वश्यायाख्यं रसं पिबन् वत्स इत्युच्यते ता रुशती संती आगात्

आगतवती। आगताया अस्य उपसः कृष्णा कृष्णवर्णा रात्रिः स स्थानि स्थानानि स्वकीयान्यार्थ्या मलक्षणानि आरैक्‌ आरेव
तवती कल्पितवतीत्यर्थः॥ उउ भूरणः। अपि चैते रात्र्युषसौ समानबंधू समानेनएकेन सूर्याख्येन बंधुना सख्या युक्ता य
द्वासूर्येण सह संबंधो यथा उषाः इष्यते सूर्येण सबंधा एवं रात्रिरपि अस्तं यंता सूर्येण संबंधा। अमृते मरणरहिते क्षा
त्मकतया नित्यत्वात्। अनूची अन्ययंत्यौ प्रथमं रात्रिः पश्चादुषा इत्यनेन क्रमेण उगच्छंत्यौ यद्वा सूर्यगत्यनुसारेण गच्छ
त्यौ एवं भूते वर्णं सर्वेषां प्राणिनां रूपं आमिनाने जरयंत्यौ। यद्वा स्वकीयं रूपं हिंसंत्यौ उषसा नैशं तमो नियर्त्यते प्रकाश
त्मकमुषसा स्वं रात्र्या। एवं विध सत्यौ द्यावा द्योतमाने चरतः प्रतिदिवसमायस्तिता यद्वा द्यावा नभसोंतरिक्षमार्गेण
चरतः प्रतिदिवसं गच्छतः॥ उ ञ्चनेर रक्तो। रुशद्वत्सा सूर्यवत्सा रुशाद्रितिवर्णनामरोचनेदुलिति कर्मणः सूर्यमस्या वत्समा
हस्ताह्वचर्या प्रसरणा द्यारस्ती श्वेत्यागात्। श्वेत्याश्वेततेरतिपत् कृष्णा सदनान्यस्याः कृष्णवसी रात्रिः कृष्णं कृष्यते

735/1973

र्मिरुस्माकमर्त्यो मर्त्येन सह सयोनिः समानबंधोः समानबंधने अमर्त्ये अमरणधर्माणावसन्तौ अनुस्यावितरेतरमभिप्रेत्य घावावर्ण
२५२ चरतः तयोरेवं घावाघोनभक्षयिष्याघावा वरतो। नवास दृचरत इतिस्यात आमिताने अन्यान्यस्याधाल्मकुर्वाण इतिश्वेत्यामि
न वर्णे असमाप्यनाह्वचोयस्यितिभावियतल्बलोपः अर्थ आह्मियात्मस्वर्थः यो भवा। अमर्तमर्तं मरणमनयोर्नास्तीति बहु
व्रीहौ नञो जरमरमव्रमतानुकृतरपदाघुदात्तत्वं। अनुर्वानुप्रं विंचन ते क्विगिल्याहिनाकुविनू। अनि हे। तामितिन
लोपः। अंचतेश्वोपसंख्यानमितिडीप्। अवउत्यकारलोपे आचितिदीर्घः अनुदात्तस्य चयत्रोदात्तलोप इति ङीप उदात्तत्वं कपांसु
लुगितिविभक्तेर्लुक् मीनांतः क्याश्विकस्य शान चिमीनातेर्निगम इति ह्रस्वत्वं॥ ॥अथ तृतीया॥ समाना अध्वा स्वस्रोरनंत
स्तमन्यान्या चरतो देवशिष्टे। न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे इति॥ स्वस्रोर्भगिन्योरात्र्युषसोः अध्वा संचरण
साधनभूतो मार्गः समानः एक एव वायुनेवाकाशमार्गेण ग्रुषा निर्गच्छति। तेनैव रात्रिरपि सच मार्गोऽनंतः अवसानरहितः तं मा २५२
र्गं देवशिष्टे देव। नद्योतमानेन सूर्येणानुशिष्टे आशिष्टे तस्या अन्यान्या एकैका चरतः क्रमेण गच्छतः। अपि च सुमेके शो

भने मेहने सर्वेषामुत्पादके सत्यावुभे नक्तोषासौ रात्रिरुषाश्च विरूपे तमः प्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अन्यावस
मनसा समानमनस्के एकमत्यं प्राप्ते सत्यौ सोन मेथते परस्परं न नाहिंस्तः तथा न तस्थतुः क्वचिदपि न तिष्ठतः सर्वदा लोकानुग्रहा
र्थं गच्छत इत्यर्थः। अन्यान्या कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं। समासवच्च बहुलमित्यन्याः शब्दस्य द्विर्भावः तस्य परमा
म्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं। देवशिष्टे शासु अनुशिष्टो शास्तेः कर्मणि निष्ठायां स्याविभाषेतीङ्प्रति
षेधः शास इदंहलोरितिउपधाया इत्वं। शासिवसिघसीनां चेति षत्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं मेथेते न मेथतिः हिंसा
र्थो भौवादिक अनुदात्तेत्। मेकमिहा सच नो भावे घञ् शोभनो मेहो ययोस्ते व्यत्ययेन ककारः। उत्तरपदस्य भिन्नस्वरेणाद्युदात्त
त्वात् आद्युदात्तत्वं छंदसि त्यकतरपदाद्युदात्तत्वं। नक्तोषासा। सुपां सुलुगिति विभक्तेराकारः॥ ॥ अथ आभात्यग्निरितितृचात्मकं
तीयं सूक्तं तत्र प्रथमा॥ ॥आभात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः॥ अर्वांचा नूनं रथ्येह यातं पीपिवांसमश्विना

237
1973

घर्ममच्छ । उषसामनीकं अनीकभूतः अग्निः कं सुखं उपसमिध्यमान इत्यर्थः । तादृशोऽग्नि राला निदीप्यते यद्वा उषसा मुखमाभाति
२५३ दीपयति उषःकाले अग्रयः प्रतिबोध्यते । किंच विप्राणां मेधाविनां स्तोतॄणां देवयाः देवकामाः वाचः स्तोत्राणि उपस्थुः उतिष्ठंति
यस्मादेवं तस्मात् हे रथ्या रथस्वामिना अश्विनौ अर्वाचा अस्मदभिमुखावश्विनौ नूनमद्य अस्मिन् यागदिने इह यागे अयातं किंच प्र
तिपा पिवांसं स्वांगैः परिपूर्णं घर्मं प्रदीप्तं यज्ञ । यद्वा पीपिवांसं आप्यायितं घर्मं प्रवर्ग्यरूपं सोमरसं । अथवा घृताग्नि भा पीपिवां
स घर्मः प्रवर्ग्य अच्छाभिश्वयत् स्यातं । प्रवर्ग्यस्यैतत् स्यविनियोगः बह्वृचानां ॥ ॥ अथ द्वितीया ॥ न संस्कृतं प्रमिमीतो गमिष्ठांति
नूनमश्विनोपस्तुतेह ॥ दिवाभिपित्वेवसा गमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठेति ॥ हे अश्विनौ संस्कृतं घर्मं न प्रमिमीतं न हिंस्तं
किंतु अंतिसयति कथं घर्मं समीपे नूनमिदानीमिह यज्ञे गमिष्ठा गंतृतमौ भवथः अश्विना अश्विनौ उपस्तुतौ भवता हि वामभिपित्वे दिव २५३
सस्याभिपतन प्रातःकाले अवसा रक्षणा निमित्तेनागमन समये अवर्तिं दुर्गतिं वर्जं तदभावो अवर्तिस्तं प्रहितं यथा ते नैवा

गमिष्ठा आगंतृतमौ अगत्य च दाशुषे हविर्दत्तवान् यजमानाय संभविष्ठा सुखस्य भावयितारौ भवतः ॥ ॥ अथ तृतीया ॥ उता
यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ॥ दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततानेति ॥ अह्नो द्वेधा त्रेधा
पंचधा पंचदशधा वेति नानाविभागाः संति । इह पंचधा विभाग आत्तः । उतापि वा यातमागच्छतं । कदा संगवे संगवका
ले संगच्छंते गावो दोहभूमिं यस्मिन् काले स संगवः । तस्य पूर्वकाले गावो वत्सैर्हि मंत्रणानि भक्षयंति भक्षयित्वा पुनर्दोहदि
यसंगमे प्रतिनिवर्तंते तथा प्रातः प्रातःकालेऽपि तथा मध्यंदिने अह्नो मध्यकाले सूर्यस्य उदिता उदिते उदये अस्तमये अत्यंतम
वृद्धसमये । अपराह्ण इत्यर्थः । एतस्मिन् याज्ञकस्य उपलक्षणं न केवलमुक्तेष्वेव कालेषु किंतर्हि दिवा नक्तं सर्वदा शंतमेन सुखतमे
न अवसा रक्षणेन हविषा वा निमित्तेन आयातं किमर्थमागम्यते पूर्वमेवास्मदेवैः स्वीकृतत्वात् । नेत्याह । उ इदानीमपिपी
तिरितदेवानां नावतासनततानोति । अश्विना अश्विनौ विहायातिशेषः ॥ ॥ इत्येकोनविंशोध्याये चतुर्थः खंडः ॥ ७ ७ ७॥

739
1973

२५४ अथपंचमखंडे एता उत्या इति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते। निष्कृ
ण्वाना आयुधानीव धृष्णवः प्रति गावोरुषीर्यंति मातरः॥ इति। उ इत्येतत्पदपूरणं। ताः एताः उषसः प्रभातकालाभिमानिन्यो
देवताः केतुं अंधकारावृतस्य सर्वस्य जगतः प्रज्ञापकं प्रकाशकं आक्रत आकृषत कुर्वंति इत्यर्थः। यस्मादेवं तस्मादुषसः रजसो
तरिक्षलोकस्य पूर्वे अर्धे प्राचीने दिग्भागे भानुं प्रकाशं अंजते व्यक्तं कुर्वंति। धृष्णवो धर्षणशीला योधारः आयुधा
नीव। यथा असिप्रभृतीन्यायुधानि संस्कुर्वंति। एवं निष्कृण्वाणाः स्वभासा जगत्संस्कुर्वाणा गावो गमनस्वभावा अरुषीः आरोचमा
ना मातरः सूर्यप्रकाशस्य निर्मात्र्यः जगज्जनन्यो वा उषसः प्रतियंति प्रतिदिवसं गच्छंति एवं विधा उषसो स्मान् रक्षंत्वित्यर्थः॥
अत्र निरुक्तं। एतास्ता उषसः केतुमकृषत प्रज्ञानमेकस्या एव पूजार्थे बहुवचनं पूर्वे अर्धे अंतरिक्षलोकस्य समंजाते भानुना निः २५४
ष्कृण्वाना आयुधानीव धृष्णवः निरित्येष समित्येतस्य स्थाने एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति प्रतियंति गा

वो गमना अरुषीरारोचनाना मातरो भासो निर्मात्र्य इति। अकृत करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। निष्कृण्वानाः। कृवि हिंसाकर
णयोश्च अस्मात् ताच्छीलिकश्चानश्। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। इदुदुपधस्याचाप्रत्ययस्येति विसर्जनीयस्य सत्वं। कृदुत्तर 741/1923
पदप्रकृतिस्वरत्वं॥ ॥अथ द्वितीया॥ उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत। अक्रन्नुषासो वयुनानि
पूर्वथा रुशंतं भानुमरुषीरशिश्रयुः॥ इति। अरुणा आरोचमाना भानवः उषसो दीप्तयः वृथा अनायासेन स्वयमेवोदप
प्तन् उद्गमन्। तदनंतरमुषसश्च स्वायुजः सुखेन रथे न आयोक्तुं शक्याः। अरुषीः शुभ्रवर्णा गाः पूर्वमुक्तान् रश्मीन्वृ
दृढीः स्ववाहनभूताः स्वस्य दीप्तये वा आयुक्षत स्वरथे आयोजयन्। उक्तं च। अरुण्यो गाव उषसामिति। एवं गोभिर्युक्ते
रथे मारूढा उषसः पूर्वथा पूर्वस्मिन्नतीतेष्वहस्स्विव वयुनानि सर्वेषां प्राणिनां ज्ञानानि अक्रन् अकार्षुः। उषःकाले जाते हि
सार्वप्राणिनां ज्ञानयुक्ता भवंति। तदनंतरं अरुषीः आरोचमानाः उषसः रुशंतं रुशद्दीप्तिवर्णनाम रोचंते ज्वलतिकर्मणो

२७५ इति यास्कः॥ शुभ्रवर्णं भानुं सूर्यं अश्रिश्रयुः॥ असेवंत तेन सा हि काभयंतीत्यर्थः॥ ॥अथ तृतीया॥ अर्चंति नारीरपसो न विष्टिभिः समानेन
योजनेना परावतः॥ इषं वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते॥ इति। नारीर्नेत्र्य उषसः रश्मिभिर्न वेशकैः स्वकीयैस्तेजो
भिः समानेन योजनेन एकेनैवोद्योगेन आपरावतः आ दूरदेशात् आ पश्चिमस्माद्भागात् अर्चंति नभः प्रदेशं पूजयंति। कृत्स्नं जगत्
युगपदेव व्याप्नुवंतीत्यर्थः॥ तत्र दृष्टांतः॥ अपसो न। युद्धकर्मणो यथा पुरुषाः यथा स्वकीयैरायुधैः धादिभिः स्वेन सैन्येन सर्वं देशं व्याप्नुवं
ति तद्वत् किं कुर्वत्यः॥ सुकृते शोभनस्य कर्मणः कर्त्रे सुन्वते सोमाभिषवं कुर्वते। सुदानवे कल्याणीं दक्षिणा क्रत्विग्भ्यः ददते यज
मानाय विश्वेदह सर्वमेवेषमन्नं वहंतीः आवहंत्यः॥ प्रयच्छंत्य इत्यर्थः। नारीः नृ नये ऋदोरप् न नरयो वृद्धिश्चेति शार्ङ्गरवादिषु
पाठात् ङीन्। ङसि वाछंदसीति पूर्वसवर्णदीर्घत्वं अपसः अपः कर्म्य तत् अशिर्भिआदिभ्यो ऽसिः तच्च सूपां सुलुगिति जसः सुः नि २७९
त्ययेन प्रत्ययस्वरस्योदात्तत्वं॥ विष्टिभिः विश प्रवेशने विशंति प्रविशंतीति विष्टयः किरणाः क्तिच् क्तौ च संज्ञायामिति क्तिच्॥

विश्वा सुपां सुलुगित्यमो डादेशः॥ ॥अथ अबोध्यग्निर्ज्म इति तत्त्वात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ अबोध्यग्निर्ज्म उदेति
सूर्यो व्युषाश्चंद्रा मह्यावो अर्चिषा॥ आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक्॥ इति॥ अयमग्निर्विह्
तः सन् ज्मः ज्मायाः पृथिव्याः देवलक्षणायाः संबंधी सन् अबोधि प्रबोधि किंच। सूर्य उदेति। ततो महीं महती उषः अर्चिषा
प्रकृष्टेन तेजसा चंद्रा प्राणिनामाह्लादनी सती व्यावः व्यवृणोत् तमांसि निवारयति स्मा वृणोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। छं
दस्यपि दृश्यत इत्यडागमः॥ यत इयमुषा उदेति यतश्च सूर्यः॥ यतश्चायमग्निः प्रबुद्धो भवति अतः कारणाद् अश्विनौ युष्म
संबंधिनं रथं यातवे देवयजनं गमनाय शंसनाभ्याम् अयुक्षातां युंजाथां तथा सविता सर्वस्य कर्मणोऽनुज्ञाता॥ देवो जगत् जगत्सं
प्राणिजातं पृथक् स्वस्वकर्मानुरोधेन प्रासावीत्॥ प्रसुवतु स्वनुजानातु॥ ॥अथ द्वितीया॥ यद्युंजाथे वृषणमश्विना रथं घृतेन
नो मधुना क्षत्रमुक्षतं। अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहीति। हे अश्विना अश्विनौ यद्यदा वृषणं

743/1923

रश्म्यादिवर्षकं रथं युंजाथे योजयथः। तदानक्षत्रं अस्मदीयं बलं क्षात्रियजातिवाघृतेनो दकेन मधुना मधुरेण उक्षतं। सेचयतं।
२५८ प्रवर्धयतमित्यर्थः। यद्वा घृतेन क्षरणरूपेण मधुनाघृतेनोक्षतं। युष्मद्रथस्तेनाघृतेनास्मदीयं बलं प्रवर्धयतमित्यर्थः। अश्वि
नो रथस्य मधुपूर्णचर्मद्रमधुवाहनो रथ इत्यादिषु प्रसिद्धं। किंच अस्माकं पृतनासु स्वस्मदीयासु पुत्रभृत्यादिमनुष्यरूपासु प्रजा
सु रक्षत्रासु तेऽतिन्वतः यद्वा पृतनासु परकीयासु रक्षितासु परिवृढं मनन्यं मस्माकं जिन्वतं प्रीणयतं यच्च शूरसातौ शूराणां
प्रहारादिदानयुक्ते संग्रामे धना। वदीयानि वहूनि धानि भजेमहि तेन्वे महि॥ ॥अथ तृतीया॥ अर्वाङ् त्रिचक्रो मधुवाहनो रथो
जीराश्वो अश्विनोर्यातु सुष्टुतः। त्रिवंधुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे इति॥ अर्वाङ् अस्मदभिमुखः म
श्विनो रथः यातु अस्मदभिमुखो गच्छतु। कीदृशस्त्रिचक्रः त्रिचक्रत्रययुक्तः। मधुवाहनो मधुवोढ जीराश्वः शीघ्रगम्यश्वोपे २५६
तः सुष्टुतः। अत एवास्माभिस्तूयमानः त्रिवंधुरः निम्नोन्नतकाष्ठत्रयोपेतः सारथ्यस्थानं वंधुरं तत्कर्मनवाधनवा

नविश्वसौभगः सर्वसौभाग्योपेतः ईदृशोश्विनो रथो नोस्माकं द्विपदे पुत्रादिप्रजायै च चतुष्पदे पशवे च शं सुखं आ वक्षत। आवहतु॥ न
हुर्लेट् अडागमः॥ ॥अथ प्रते धारा असश्चतेति चतुर्ऋचं तृतीयं सूक्तं तत्र प्रथमा॥ प्र ते धारा असश्चतो दिवो न यंति वृष्टयः। अच्छा वा
जं सहस्रिणमिति॥ हे सोम ते तव असश्चतः संगरहिता धाराः सहस्रिणमपरिमितसंख्याकं वाजमन्नं सत्राः स्मदर्थं प्रयंति प्रगच्छंति। त
त्र दृष्टांतः। दिवो न वृष्टयः। यथा द्युलोकाद्वर्षधारा निःसंगाः प्रजानामपरिमितमन्नं प्रतिष्यतियंति भवंतीत्यर्थः॥ ॥अथ द्वितीया॥ अभि
प्रियाणि काव्या विश्वा चक्षाणो अर्षति॥ हरिस्तुंजान आयुधेति॥ हरिर्हरितवर्णस्य सोमो विश्वा विश्वानि प्रियाणि देवानां प्रीतिकराणि
काव्या कविकर्माणि चक्षाणः पश्यन् आयुधा स्वकीयान्यायुधानि तुंजानो राक्षसान् प्रति प्रेरयन् अभ्यर्षति यागं प्रतिगच्छति॥ ॥अ
थ तृतीया॥ स मर्मृजान आयुभिरिभो राजेव सुव्रतः॥ श्येनो न वंसु षीदतीति। सुव्रतः सुकर्मा स सोमः आयुभिः मनुष्यैर्ऋत्विग्भिः
मर्मृजानः शोध्यमानः इभो गतभयो राजेवाय धारा द्राश्येनो न यथा श्येनः तथा वंसु वृक्षेषु वसतीवरीषु सीदति॥ ॥अथ च॰

745
1973

सनोविश्वादिवोवसूतोपृथिव्याअधि॥ पुनानइंदवाभरइति॥ सत्राहेइंदोसोम पुनानः पूयमानः संदिवोधिदिविस्थितानिउतोपि
२५७ वपृथिव्याअधिपृथिव्यांस्थितानि। अधीतिसप्तम्यर्थानुवादः। विश्वाविश्वानिवसूनिधनानिनोस्मभ्यमाभराहर॥ ॥इत्येकोन
विंशोध्यायेपंचमःखंडः॥ ५॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ इतिश्रीमन्म
हाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसा
मवेदार्थप्रकाशेउत्तराग्रंथेएकोनविंशोध्यायः॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्याती
र्थमहेश्वरं॥ अथविंशोध्यायआरभ्यते॥ तत्रप्रथमखंडेप्रास्यधाराइतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ प्रास्यधारा
अक्षरन्वृष्णःसुतस्यौजसा॥ देवाँअनुप्रभूषतइति। अस्यसोमस्यधाराअक्षरन्ओजसाबलेनअक्षरन्आसिंचतु। कीदृश २५७
स्यवृष्णोवर्षकस्यसुतस्याभिषुतस्यदेवाननुप्रभूषतःप्रभवितुमिच्छतः॥ ॥अथद्वितीया॥ सप्तिंमृजंतिवेधसोगृणंतःकारवोगिरा।

ज्योतिर्जज्ञानमुक्थ्यं॥ इति। सप्तिंअश्वस्थानीयंसर्पणस्वभावंयासोमंमृजंतिशोधयंति। केः गृणंतःस्तुवंतःकारवःकर्मकर्तारोध्वर्यादयो
गिरास्तुत्यासाधनेन। कीदृशंसप्तिंज्योतिर्दृश्यमानंसोमंजज्ञानंजायमानं। प्रशस्यमित्यर्थः। अथवाज्योतिर्ज्योतिर्जायमानंअयंचेज्यो
तिर्यत्सोमइतिश्रुतेः। उक्थ्यंस्तुत्यं॥ ॥अथतृतीया॥ सुषहासोमतानितेपुनानायप्रभूवसो॥ वर्धासमुद्रमुक्थ्येति॥ हेसोमउक्थ्यः
स्तुत्यप्रभूवसोप्रभूतधनपुनानायपूयमानस्यतेतवतानितेजांसिसुषहाशोभनानिभातुकानियस्मादेवंतस्मात्समुद्रंसमुद्रस
दृशंद्रोणकलशंउत्तरंवर्धयद्रवरसेनपूरयेत्यर्थः॥ अथैषब्रह्मेतिद्वितीयंसूक्तं॥ तत्रप्रथमा॥ ॥एषब्रह्मायऋत्वियइंद्रो
नामश्रुतोगृणेति॥ यःइंद्रइतिनाम्नाश्रुतःदेवेषुप्रख्यातःएषब्रह्माऋत्वियःऋतौवसंतादौकालेभवतःयएषःससर्वतःप
रिवृढःतमहंगृणेस्तौमि॥ ॥अथद्वितीया॥ त्वामिच्छवसस्पतेयंतिगिरोनसंयतइति॥ हेशवसोबलस्यपातःपालकइंद्रयंति
गच्छंतिबलवन्नित्यर्थः॥ तथाशवसोत्वांतारवक्लेनोत्यांतिलेश्रयतोउरसोबाहुभ्यांपंचदशांगिरमिमीततमिंद्रोदेवताभ्यस्त्यनेता

747/1923

रभ्यतंस्मात्ते वीर्यवंतइत्विश्रुतेः॥ त्वामित्था मे वसंयतो न सम्यग्दिहुं कृतइव। सम्यग्यजमाना इत्यर्थः॥ अथवा संयतो न सम्यङ्नियच्छनः॥
२७८ पुरुषस्येव वेदस्य संबंधिनो गिरःस्तुतयः यंतिप्राप्नुवंति॥ ॥अथतृतीया॥ विश्रुतयायथापथ। इत्यृचः प्रतीकांतस्यादिनोव्याख्यानं
छंदसिद्रष्टव्यं॥ ॥आत्वारथंयथोतयइति। प्रतीकमंत्रपघतोनथापिव्याख्याता। हे इंद्र त्वां त्वं वयमावर्तयामसि आवर्तयामः
किमर्थं ऊतये अस्माकं रक्षणाय सुम्नाय सुखाय वाजमिव रथं यथा ऊतये कस्मै यथावर्तयंति तद्वत् कीदृशं त्वां तुविकूर्मिं बहु
कर्माणं। ऋतीषहं संग्रामकानामभिभवितारं। हे इंद्र शविष्ठ अतिशयेन बलवन् हे सत्पते सतां पालक त्वामितिसमन्वयः॥ ॥अथद्वि
तीया॥ तुविशुष्म तुविक्रतो शचीवो विश्वया मते॥ आपप्राथमहित्वना॥ हे तुविशुष्म प्रभूतबल। अतएव तुविक्रतो बहुविचित्र
कर्मयत। अथवा बहुप्रज्ञकर्मणः पृथक्कुभिधानात्। हे शचीवः बहुकर्मोपेत प्रज्ञानीयेंद्र विश्वया व्याप्तया मते महित्वेन नामहत्वे २७८
न आपप्राथ आपूरितवानसि। अविशेषाद्विश्वमित्यर्थः॥ ॥अथतृतीया॥ यस्यते महिना महः परिज्मायंतमीयतुः॥ हस्ता

वज्रं हिरण्ययमिति॥ महो महतो यस्य ते तव यायत्वः प्रकृत परामर्शकः प्रकृतं तं त्वां महद्दर्यं तत्र त्वां तुविकूर्मिं सती परिमित्यां युक्तल
क्षणस्य तव महिम्ना महत्वेन हस्ता न वज्रस्तोभाय तं पृथिव्यां सर्वतो व्याप्नुवंतं हिरण्ययं हिरण्मयं वज्रं हस्तौ बाहू यतुः परिगृह्णी
तः। सर्वस्मात् कंभयनिवारणायेतिभावः॥ ॥आयःपुरमिति तृचात्मकं पंचमं सूक्तं तत्र प्रथमा॥ आयः पुरं नार्मिणीमदीदेदत्यः
कविर्नभन्यो नार्वा॥ सूरो न रुरुक्वांछतात्मेति॥ योग्निः नार्मिणीं नर्मवतीं यज्ञनर्मवतीं यजमानानां संबंधीनि उत्तरवेदिं। यद्वा नरणां
नसिक्षितां यजमानानां यत्तापर्थं भूमिं प्रत्यस्यागमनमतीपाविघतेतापुरते स्थानं। अदीदेत् दीपयति कीदृशो यं। अत्यः अप
क्षितरश्च प्रसृतवर्जितः कविः क्रांतदर्शी॥ तत्र दृष्टांतः अर्वा अरणकुशलो नभन्यो नभः आकाशो भवन भस्त्वान्वा ध्रुरिवकं
वाश्रतात्मा॥ यजमानगृहापेक्षया आहवनीय गार्हपत्याद्यपेक्षया वा अपरिमितरूपत्वं। अथवा मित्रवरुणादिरूपभेदेन अग्ने
र्मित्रादिरूपत्वं त्वमग्ने वरुणो जायसे यस्यश्रुतेति। हे अग्ने त्वं वरुणो जायसे वरुणो भवसि। यद्यस्मात् इंद्रं मित्रं नरणमग्निमाहुरित्यादिश्रुति

249/1923

पुपसिक्तं। अग्निमेव इंद्रात्मकमाहुरिति द्वितीयमंत्रस्यार्थमाहुः। तादृशोयं सरोन सूर्य इव। ररुक्मान् दीप्यमानः। स्वदीप्तो छंदस
स्यलिटः क्वसुः। अतः स्वादृशोग्निरस्ति। उक्तरूपवर्तन इति पूर्वेण संबन्धः।। ।।अथ द्वितीया।। अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि
२५९ शुशुचानो अस्थात्।। होता यजिष्ठो अपां सधस्थे।। अयमग्निर्द्विजन्मा द्वाभ्यामरणीभ्यां जायमानः।। यद्वा मंथनात् प्रथमं जन्म
उत्पत्त्यनंतरं आधानपवमानेष्ट्यादिसंस्काररूपं द्वितीयं जन्म। एवं द्विजन्मत्वं। अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात्।। तादृशो
ग्निस्त्री रोचनानि त्रीणि रोचमानानि क्षित्यादिस्थानानि गार्हपत्यादीनि वा अभि शुशुचानः प्रकाशयन्। न केवलं त्रीण्येव। किंतु वि
श्वा रजांसि सर्वाण्यपि रंजनात्मकानि क्षित्यादिलोकान् शुशुचानो दीपयन्। होता देवानामाह्वाता यजिष्ठो यष्टृतमः सन् अपां
प्रेक्षण्या। उदकानां सधस्थे सहस्थाने यागदेशे अस्थात् तिष्ठति।। ।।अथ तृतीया।। अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि २५९
श्रवस्या।। मर्तो यो अस्मै सुतुको ददाश।। यो द्विजन्मा स एव होता होमनिष्पादकः आह्वाता वा देवानां।। अरणीभ्यामुत्पन्नस्यैव गा

र्हपत्यद्वारा आहवनीयत्वात्। सोयं विश्वा विश्वानि वार्याणि वरणीयानि कर्माणि दधे। उक्थं ददृशं सदु हास्य न इत्याद्युदात्तत्वं।। श्र 751/1973
वस्या श्रवणहरयोषा।। श्रवो नं हविर्लक्षणं यशो वा तदिच्छया।। श्रवस्शब्दात् क्यजंतादिवल्पया इति भावेल्प्रत्ययः। अंतोपय
त्रासेयादधे धारयति। अस्मै उक्तरूपायाग्नये यो मर्तो ददाश ददाति स सुतुकः शोभनपुत्रो भवति।। ।।अथ अग्ने तमद्या
श्वमिति तृचात्मकं पञ्चर्चं सूक्तं तत्र प्रथमा।। अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं।। ऋध्यामा त ओहैरिति।। हे अग्ने अद्या
स्मिन् अहनि वयमश्वमिव यज्ञादयद्रहेरिंद्रादिप्रापकं रस्माकं स्तोमैः स्तोत्रसमूहैस्त्वं प्रसिद्धं त्वां ऋध्याम समर्धयाम। किं दृशं त्वां। अश्वं न यो न वो
दायमश्वमिव। तथा हविर्वहावाहकं क्रतुं न कर्तारमिव। उपकारिणमित्यर्थः। तथा भद्रं भजनीयं। हृदिस्पृशं हृदयंगमं आप्नं। आप्येन प्रि
यमित्यर्थः।। ।।अथ द्वितीया।। अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः।। रथीर्ऋतस्य बृहतो बभूथेति।। अधा हि इदानीमेव हे अग्ने
त्वं क्रतोरस्मदीययागस्य रथीर्नेता बभूथ भवसि छंदसि लुङ्लङ्लिट इति सर्वकाले वर्तमानार्थे लिट्। सिपस्थल्। आर्धधातुकस्ये

न्यादेहीति।अग्नमे प्रासेव भूयात तं अथैतानि पातनानि डभावः। की दृड अस्य यागस्य भद्रस्य भजनीयस्य द्रप्सस्य प्रवर्धस्य साधोरभिमतफला
२६० नां साधकस्य सत्यभूतस्य वृहतो महतः॥ ॥अथ तृतीया॥ एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः॥ अग्ने विश्वेभिः सुमना अनी
कैरिति॥ हे अग्ने ज्योतिः ज्योतिष्मान् स्वर्णः सूर्य इव। तथा विश्वेभिर्विश्वैः समस्तैरनीकैस्तेजोभिः सुमनाः शोभनमनस्कस्त्वं नोऽस्मदी
यैरेभिरेतैरर्कैरर्चनीयैः स्तोत्रैर्नानाविधैर्हविर्लक्षणैरन्नैर्वा। अथ वेन्द्रादिदेवैः सह नोऽस्माकं भव अर्वाङ् अभिमुखो भवेति॥ ॥इति द्वि
तीयेऽध्याये प्रथमः खंडः॥ ॥अथ द्वितीये खंडे अग्ने विवस्वदिति प्रगाथात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अग्ने विवस्वदुषसश्चित्रं
राधो अमर्त्य॥ आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः॥ इति। हे अग्ने त्वं उषसः उषो देवतायाः सकाशात् साधो धन
दाशुषे हविर्दत्तवते यजमानाय आवह आनीय प्रापय। सोऽग्निर्विशेष्यते। अमर्त्य मरणरहित। जातवेदः जातानां वेदितः। त
मेतं शाकपूणिर्व्याख्यातवान्। जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुः जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा ज्ञा २६०

न प्रज्ञानो वाय जातः। पशूनविंदतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणं तस्मात्सर्वानृतून् पशवोऽग्निमभियंतीति इति चेति की
दृशं राधः। विवस्वत् विविधनिवासोपेतं चित्रं नानाविधं विचित्रं। अद्यास्मिन्दिने उषर्बुधः उषःकाले प्रबुध्यमानान् देवान् आवह। विवा
सनं विवः तद्वत्कं च सनिवासोपूर्वादिंतभावितण्यर्थातसंपदादिलक्षणो भावे क्विप्। तदस्यास्तीति मतुप्। मादुपधायाः इति वत्वं
तसोमत्वर्थे। इति भत्वेन पदत्वं। भावादुत्वभावः। दृषादिना दाघस्यात्वलम। जातवेदाः जातानि येनेति जातवेदाः। गतिकारक
योरपि पूर्वपदप्रकृतिस्वरत्वं च। यद्वा वेद इति धननाम। जातं धनं यस्य स जातवेदाः। आमंत्रितनिघातः। वहन्यत्वातस्तिङ इ
ति संहितायां दीर्घत्वं। उषर्बुधः उषसि बुध्यत इत्युषर्बुधः। बुध अवगमने क्विप् चेति क्विप्। रत्वाभावः छांदसः। कृदुत्तरपद
प्रकृतिस्वरत्वं॥ ॥अथ द्वितीया॥ जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणां॥ सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि
श्रवो बृहदिति॥ हे अग्ने त्वं जुष्टस्त्वदिविशेषगुणयुक्तोऽसि जुष्ट्योनित्यं मंत्रं इत्याद्युदात्तत्वं। सेवित इत्यर्थः। असि सिपितास

753/1973

स्योर्लोपोऽतिसलोपः हिन्वेतिनिघातप्रतिषेधः। पृतः देवानीशिविशेषवार्ताः अत एव हव्यवाहनः। हव्यंवहतीतिहव्यवाहनः हव्ये
२६१ नंतः पादमितिल्युट्॥ योरनादेशः। भित्वादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। हविष्मतोदा। अध्वराणांमृतूनां रथी रथकल्प
नीयः। अथवाच मंत्रांतरश्लाघ्णेनैवंव्याख्यानं। रथीरध्वराणामित्याहएषहिदेवरथइतिब्राह्मणांतरं च रथीरध्वराणामित्या
हरयो हवाएषभृतोदेवेभ्योहव्यंवहतीतिता दृशस्त्वमश्विभ्यांदेवाभ्यांउषसा देवतयाच। यज्ञसहितोभूत्वासुवीर्यंशोभ
नवीर्योपेतंवृहत्प्रभृतंअन्नंअस्मेधेहिअस्मासुप्रक्षिप॥ ॥अथविधुंदद्राणमितिचात्मकंद्वितीयंसूक्तंतत्र
प्रथमा। विधुंदद्राणंसमनेबहूनांयुवानंसंतंपलितोजगार॥ देवस्यपश्यकाव्यंमहित्वाद्याममारसह्यःसमानेति॥ अ
नयाकालात्मकंइंद्रास्तूयतेविधुंविधारकंसर्वस्यधुष्ट्टेःकर्तारंविपूर्वाद्दधातेः कारणेऽर्थेतथासमानेअतनमनः प्रा २६१
णतमस्यगतनोपेतसंग्रामेवहूनांशत्रूणांद्रावणंघातकंइंद्रंसामर्थ्योपेतंयुवानंसंतंपुरुषंपलितोजसजगारतिगि

रतींशास्त्रया। एवमुक्तःलक्षणंवक्ष्यमाणलक्षणंचदेवस्यकालात्मकस्येंद्रस्यमहित्वामहत्वेतोपेतंकाव्यंसामर्थ्यंपश्यपश्यत
हेजनाः तथाजरसाप्राप्नोतिसमाम्रियतेसह्यपरेद्युःसमानसम्पतेपुनर्जन्मांतरेप्रादुर्भवतीत्यर्थः। तदेवंचत्वारिनामानिद्वारी
राण्युक्तानिवक्ष्यमंत्रेषु॥ ॥अथद्वितीया॥ शाक्मनाशाकोअरुणःसुपर्णःआयोमहःशूरःसनादनीडः। यच्चिकेतसत्यमितं
नमोघंवसुस्पार्हमुतजेतोतदातेति॥ शाक्मनाशक्तिभयशाक्मशाक्मनाबलेनशाकःशक्तस्वशक्त्यावसर्वंकर्तुंशाकइत्यर्थः। नदाद्र
स्यसहाय्यांतरापेक्षास्तीत्यादेव। अरुणःअरुणवर्णाःसुअरुणःकश्चिनशोभनपर्णीपक्षी॥ आगच्छतीत्यध्याहारः। उपस
र्गश्रुतेःयोग्यक्रियाध्याहारः। योमहोमहानशूरोविक्रांतःसनात्पुराणःअनीडःनीडस्याकर्तानहीद्रोग्निवतकुत्रचिदपियंत्र
निकेतनंकरोति। एवंसुपर्णरूपकेणेंद्रमाह। सपक्षीइंद्रोयच्चिकेतकर्तव्यत्वेनजानातितत्सत्यमित्तसत्यमेवतन्नमोघंव्यर्थंभ
वति। सस्पार्हस्पृहणीयंवसुधनंजेताजयतिशत्रुभ्यःसकाशातदुतअपिचदातास्तोतृभ्यःप्रयच्छतिनलोकाव्ययेन्यादिनाष

755/1973

ही प्रतिषेधः॥ ॥अथ तृतीया॥ ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री॥ ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममु
२६२ दजायंत देवाः॥ इति। इंद्र एभिर्मरुद्भिः सह वृष्ण्यानि पौंस्यानि बलान्याददे आदत्त। येभिर्मरुद्भिः सहितो वृत्रहत्याय प्राण्यु
पकारकवृष्ट्या आवरकत्वाद्वृत्रः पापं तस्य हत्याय। मनुष्याणामुपद्रवशमनायेत्यर्थः। तथा च वज्री वज्रवानिंद्र उक्षद्वर्षति वै
ये च मरुतो देवाः मह्ना महत्ता तंत्रेण क्रियमाणस्य वृष्टिप्रदानलक्षणस्य कर्मणः साहाय्यार्थं ऋते कर्मे वृष्टिप्रदानकर्मप्रति उद
जायंत। उन्मुखा जायंते स्म यमेव ये एभिर्ददे इति समन्वयः॥ ॥अथास्ति सोम इति षळृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ अस्ति
सोमो अयं सुतः पिबंत्यस्य मरुतः॥ उत स्वराजो अश्विना॥ अयं पुरोवर्ती सोमः सुतो मरुदर्थमस्माभिरभिषुतः अस्ति विद्यते त
स्मादस्यान्धादेशे एनं सुतं सोमं स्वराजः स्वयं दीप्यमानाः स्वतेजसा नान्यदीप्येत्यर्थः॥ तादृशा मरुतः पिबंति। उतापि चाश्वि २६२
ना अश्विनौ च सोमं पिबतः॥ ॥अथ द्वितीया॥ पिबंति मित्रो अर्यमा तना पूतस्य वरुणः॥ त्रिषधस्थस्य जावत इति॥ नाकवलं

मरुत एव सोमपातारः किंतु एते ऽपि इत्याह॥ मित्रः सर्वेषां स्वस्वकर्माणि प्रवर्तकत्वात् सखिभूतः। यद्वा यत्तं संबंधिनः प्रमीते
स्त्राता एतत्संज्ञको देवः अर्यमा च नस्याः दुःखादीनां शत्रूणां चाभिनिवारकः॥ एतं नामकाश्चयो देवाः तना तननेन ऊर्णास्तुके 757/1973
नेति तर्न दशापवित्रं रूपां फलुगिति तृतीयायाः आकारादेशः तना चुदात्तः तेन पूतस्य परिशोधितस्य त्रिषधस्थस्य सदृतिश्रस
त्रेतिसधस्थानं सधमादस्थयोः छंदसीति सह शब्दस्य सधादेशः इति द्रोणकलशाधवनीयपूतभृदाख्यकानि त्रीणि स्थानानि
यस्य तत्तथोक्तं तादृशं जावतः स्तुत्यालननवंतमिमं सोमं पिबंति द्वितीयार्थे ऽत्र षष्ठी॥ ॥अथ तृतीया॥ उतो न्वस्य जोषमा इंद्रः सुतः
स्य गोमतः॥ प्रातर्होतेव मत्सति॥ उतापि चेंद्रः सुतस्यास्माभिरभिषुतस्य गोमतो गव्यैर्मिश्रणवतः अस्यान्वादेशः पूर्व
वद्दशापवित्रेपूतस्य सोमस्य जोषं पानरूपां सेवां प्रातः सवने नु क्षिप्रमा मत्सति माद्यति स्तुत्यादिषु आभिमुख्येन स्तौति। यद्वा सो
मासवां कामयते तत्र दृष्टांतः॥ होतेव यथा होता प्रातः सवने देवानामिष्टोति। देवान् स्तोतुं वाभिवांछति तद्वत्॥ ॥अथ

बण्महाँ असीति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ बण्महाँ असि सूर्य बळादित्य महाँ असि ॥ महस्ते सतो महिमा पनिष्टम मह्ना दे
263. व महाँ असीति ॥ हे सूर्य त्वं महान्तेजसाधिकोसि । बट् सत्यं नैतन्मिथ्येत्यर्थः ॥ हे आदित्य अदितेः पुत्र त्वं महान्बलेनाप्यधिकोसि
। बट् सत्यमेवा हे पनिष्टम अतिशयेन स्तोत्रैः स्तुत्य यद्वा अतिशयेन व्यवहारकुशल महो महतः सतो भवतस्ते तव महिमा स्तो
तृभिः स्तूयत इति शेषः पनिष्टम स्तोतृभिरस्माभिस्स्तूयत इति वा ॥ हे देव द्योतनादिगुणयुक्त त्वं मह्ना महत्त्वेन महान् सर्वैः
पूजनीयोसि भवसि ॥ ॥अथ द्वितीया ॥ बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ॥ मह्ना देवानामसुर्यः पुरोहितो विभु
ज्योतिरदाभ्यमिति ॥ हे सूर्य त्वं श्रवसा श्रवणेन महान्सर्वाधिकोसि । यद्वा श्रवसान्नेन महान्दातासि स्तोतृभ्यो दातासीत्य
र्थः ॥ बट् सत्यं हे देव द्योतमान सूर्य त्वं देवानां मध्ये मह्ना महत्त्वेन महानधिकोसि । सत्रा सत्यमेवा असुर्यः असुराणां हंता वा 263
सि किंच । देवानां कामयमानानां स्तोतॄणां वा पुरोहितोसि हितोपदेष्टासि बहुहितकार्यसि वा । अथवा पुरोहितः पुरतोन

हितोसि किंच ॥ तव ज्योतिस्तेजोपि विभु व्याप्तं सर्वतः अदाभ्यं केनाप्यहिंस्यं च ॥ ॥इति विंशोध्याये द्वितीयः खंडः ॥ ॥अथ तृतीयखंडे उ
प नो हरिभिरिति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ उप नो हरिभिः सुतं याहि मदानां पते ॥ उप नो हरिभिः सुतमिति ॥ हे मदानां 759/1923
पातर्माद्यत्यनेनेति मदाः सोमाः मदोनुपसर्ग इति करणे अप् प्रत्ययः सोमानां स्वामिन्निंद्र हरिभिराश्रितेन हरिभिस्त्वां दिष्यु
बहूनामश्वानां श्रुतेरपि च्यातासहस्रसंख्याकै रथैः स नोस्माकं यज्ञे सुतमभिषुतं सोममुपयाहि । तस्य पानार्थं शीघ्रमागच्छ पु
नरपुनरुक्त्यादिरादरार्था ॥ ॥अथ द्वितीया ॥ द्वितीयो वृत्रहंतमो विदुरिंद्रः शतक्रतुः ॥ उप नो हरिभिः सुतमिति ॥ वृत्रहंतमः अतिशयेन
वृत्र हंता । शतक्रतुर्नानाविधकर्मा य इंद्रः द्विधा नाद्विधा विदो वृत्रवधादौ उग्रकर्मा जगद्रक्षणकाले शिवतकर्मा निग्रहप्रकारेणाविदेस
र्वैर्ज्ञायते विदिर्ज्ञाने कर्मणि विहितस्य प्रत्ययस्य लोपस्तु आत्मनेपदेष्विति तल्लोपः । स त्वं हे हरिभिः सह सुतं सोममुपयाहि ॥ ॥अथ
तृतीया ॥ त्वं च वृत्रहन्नेषां पाता सोमानामसि ॥ उप नो हरिभिः सुतमिति ॥ हे वृत्रहन् वृत्रस्य पापस्य वा हंतः इंद्र हि शब्दे हेत्वार्थे

वस्मार्थं च एषामस्मदीयानां सोमानां पालापानकर्तासि भवसि एषामिति इद्रमोत्या रथे अद्रा इन्द्रः। अनु हा च श्वा अत स्त्वमस्वे सह
२६४ सोमं पातुमुपयाहि आगच्छ॥ ॥अथ प्र वो महे इति तच्चात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं
कृणुध्वं॥ विशः पूर्वीः प्र चरा चर्षणिप्राः इति॥ हे मदीया जना वो यूयं महे महिवृधे महत्तां धनानां वर्धयित्रे अत एव महे महते इंद्रा
य प्रभरध्वं सोमात्मकमन्नं प्रचेतसे प्रकृष्टमनसे इंद्राय सुमतिं कल्याणमतिं नीयं स्तोत्रं च प्रकृणुध्वं प्रकुरुत॥ अथ प्रत्यक्षस्तु
तिः। हे इंद्र चर्षणिप्राः चर्षणाख्या मनुष्याः कामैः प्रजानां पूरयिता त्वं पूर्वीर्बह्वीर्विभिः पूरयित्री विशः प्रजाः प्रचर अभिगच्छ॥ ॥अथ
द्वितीया॥ उरुव्यचसे महिने सुवृक्तिमिंद्राय ब्रह्म जनयंत विप्राः॥ तस्य व्रतानि न मिनंति धीराः इति॥ उरुव्यचसे पृथुव्याप्ताय महि
ने महते यस्मा इंद्राय सुवृक्तिं शोभमानां स्तुतिं ब्रह्म स्तोत्रं च विप्राः प्रजा जनयंत जनयंति। तस्येंद्रस्य व्रतानि दक्षिणादीनि क २६४
र्माणि धीराः प्राज्ञा रेचा आपन मिमंति न हिंसंति॥ ॥अथ तृतीया॥ इंद्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै॥

हर्यश्वाय बर्हया समापीमिति॥ सत्रा राजानं सर्वस्य जगतः ईश्वरं अनुत्तमन्युं केनाप्यनुत्तो बाधितो मन्युः क्रोधो यस्य स तो मवे इंद्रं वाणि
स्तुतयास हध्यै। स्तोतृणां शत्रून् अभिभवितुं दधिरे पुरो दधिरे अतो हे स्तोतः त्वमपि हर्यश्वाय इंद्राय हर्यश्वमिंद्रं स्तोतृणां शत्रून् अभि 761/1923
भवितु दधिरे पुरो मित्यर्थः॥ आपीन्त्वं कृत्स्नं वर्हय प्रवर्धय॥ ॥अथ यदिंद्रेति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ यदिंद्र यावतस्त्व
मेतावदहमीशीय॥ स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय॥ इति॥ हे इंद्र यथा त्वं यावतो धनस्येशिषे एतावत्यस्य आ अस्तु
कृतावतो धनस्याहमीशीय ईश्वरो भवेयं। हे रदावसो रदति ददाति वसूनीति रदद्वसुः। ततो हमस्मदीयस्तोतारमिद्दिधिषे धनप्र
दानेन धारयेयमेव किंच पापत्वाय क्षीणतायै नं सिर्षेन दद्यां॥ ॥अथ द्वितीया॥ शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचि
द्विदे॥ नहि त्वदन्यन्मघवंन आप्यं वस्यो अस्ति पिता चनेति॥ कुहचिद्विदे कुत्रचिद्विद्यमानः कुहचिद्विन्नस्मै यत्र कापि विद्यमानाय
त्यर्थः॥ महयते पूजयते जनाय दिवेदिवे प्रतिदिनं रायो धनानि शिक्षेयमिंद्र प्रसादाद्यामेव आकारः पूरणः एवमिंद्रस्य चान्यं स्तु

त्वाऋषिभिर्हंति। हे मघवन्धनवानिंद्र त्वा त्वां तान्पत अस्माकं मा स्पृहयावतेयं नन्येसि वस्यः प्रशस्यापितान्वन पालयिता च त्व दान्या नास्तील
२६५ र्थः॥ ॥ अथ श्रुधी हवमिति त्र्यात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषां॥ कृष्वा
दुवांस्यंतमा सचेमा इति॥ हे इंद्र विपिपानस्य विपालचतां विपिबतो वा मम अद्रेर्ग्राव्णो हवमाह्वानं श्रुधि शृणु अथ बभ्रो वाचं च हृताव
दद्य इति निगमानं तं रं विप्रस्य प्राज्ञस्य वसिष्ठस्य अर्चतः स्तुवतो मनीषा स्तुतिः बोध बुध्यस्व च। इमा इमानि क्रियमाणानि दुवांसि
परिचरणान्यंतमानि अंतिकतमानि बुध्यस्व नानि यासचा सहाय भूतः सन् वा कृणुष कुरुष्व॥ ॥ अथ द्वितीया॥ न ते गिरो अपि मृष्ये तुर
स्य न सुष्टुतिमसुर्यस्य विद्वान्॥ सदा ते नाम स्वयशो विवक्मि इति॥ हे इंद्र तुरस्य शत्रूणां हिंसकस्य ते तव गिरः स्तुतीः असुर्यस्य
द्वितीयार्थे षष्ठी॥ त्वदीयमसुर्यं बलं विद्वान् जानन् अहं ता अपि मृष्ये। मृष् मर्जने कर्मणि मार्जयामि न परित्यजामीत्यर्थः। सु २६५
ष्टुतिं शोभनां स्तुतिं च तामपि मृष्ये मृषे मार्जने कर्मत्वमन्यत्रापि दृश्यते तथा॥ मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा इति।

LIBRARY OF THE BOMBAY BRANCH ... SOCIETY

किंतु स्वयशः असाधारण यशस्तेत तव नाम स्तोत्रं सदेवा विवक्मि ब्रवीमि॥ ॥ अथ तृतीया॥ भूरि हि ते सवना मानुषेषु भूरि मनी
षी हवते त्वामित्॥ मारे अस्मन्मघवंज्योक्कः इति॥ हे मघवन् ते तव सवनानि सोमाभिषवणानि भूरि भूरीणि मानुषेषु मनुष्येषु 763 / 1973
र्तंत इति शेषः मनीषी स्तोता त्वामित् त्वामेव भूरि हवते नितरां स्तौति ह्वयति वा अतो अस्मत् आरे दूरे ज्योक् चिरकालं मा कः
आत्मानं मा कार्षीः क्षिप्रमात्मानं अस्मास्वासन्नं कुर्वित्यर्थः॥ ॥ इति विंशेध्याये तृतीयः खंडः॥ ॥ अथ चतुर्थ खंडे प्रो ष्वस्मा इ
ति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ प्रो ष्वस्मै पुरोरथमिंद्राय शूषमर्चत॥ अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं
बोधि चोदिता नभंतामन्यकेषां ज्याका अधि धन्वसु इति॥ अस्मा इंद्राय षष्ठ्यर्थे चतुर्थी। अस्य इंद्रस्य पुरोरथं रथस्य पुरः पुर
स्तात् पुरो अव्ययमिति गतित्वाद् गतिसमासः। रथस्याग्रतो वर्तमानं शूषं बलं स्तोत्रं प्रो अर्चत हे स्तोतारः सु प्र पूजयत। प्र उ इति
निपातसमुदायः प्रादुरिति उ इति प्रगृह्यसंज्ञा। इंद्रो विशेष्यते। समत्सु समानं माद्यंत्यत्रेति समदः संग्रामः। कृणादिकोश्च

धिकरणे क्विप्। समानस्य छंदसीति सभावः। समत्सु संग्रामेषु संगं संगमनीयं शत्रुबलं अन्यथापि दृश्यत इति गमेर्डः। अभीके
२६६ चित। अभ्यर्भेपि अनंतर्भातेपि केशाकस्य वत्सायामपि लोकस्य तस्थिवत्कृत न पाकयितासि त्वाचरत्र हा वृत्राणामावरकाणां
शत्रूणां हंता एवंविधः स इंद्रः अस्माकं स्तोतॄणां चोदितानां धनानां प्रेरेता सन् बोधि अस्माभिः कृतानि परिचरणानि बुध्यतां।
बुधेश्च्छंदसि लुङि दीपजनबुधेत्यादिना कर्तरि च्लेः चिणादेशः। चिणो लुक् इति लुक्। हुझल्भ्यो हेर्धिः। छांदसत्वादभावः। अपि च अन्यकेषां कुत्सि
ता अन्ये अन्यके अव्ययसर्वनाम्नामिति कुत्सनार्थे प्रागिवात्कः। तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति सर्वनामसंज्ञायां आमः
सुडागमः अन्यकेषां कुत्सितानां मर्त्यानां शत्रूणां धन्वसु धनुःषु ज्याका अधि अधिरोपिता ज्याकाः कुत्सिता ज्याः नभंतां नश्यंतु ज्याशब्दात्कुः
त्सायां प्रागिवात्कः। नभ हिंसायां क्र्यादिकः व्यत्ययेन शप्॥ ॥अथ द्वितीया॥ त्वं सिंधूँरवासृजोधराचो अहन्नहिं। अश २६६
त्रुरिंद्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परिष्वजामहे नभंतामन्यकेषां ज्याका अधि धन्वसु॥ हे इंद्र त्वं सिंधून् स्यंदनशीला

नजलपूरान् अधराचः अधरमधोमुखमंचतो गंतॄन् अवासृजः मेघान्निरगमयः यतस्त्वमहिं अंतरिक्षं गच्छंतं मेघमहन् हतवा
नसि। यद्वा अहिमागमय्य हंतारं सर्वस्य जगत आवरकं वृत्रमसुरमहन् हतवानसि। अतो हे इंद्र त्वं अशत्रुः शत्रुरहितो जज्ञि
षे जातोसि न संति शत्रवो यस्येति बहुव्रीहौ नञसुभ्यामित्युत्तरपदांतोदात्तत्वम्॥ तादृशं त्वां परिष्वजामहे। हविर्भिः स्तुतिभि
श्चालिंगनं कुर्मः। वशीकुर्म इत्यर्थः। ष्वंज परिष्वंगे इत्यस्य ष्वंजां दापि इत्यनुनासिकलोपः। सिद्धमन्यत्॥ ॥अथ तृतीया॥
वि षु विश्वा अरातयोर्यो नशंत नो धियः। अस्तासि शत्रवे वधं यो न इंद्र जिघांसति या ते रातिर्ददिर्वसु नभंतामन्यकेषां ज्या
का अधि धन्वसु॥ विश्वाः सर्वा अरातयः अदातारः आर्यः अर्यापितिगंतारः अस्माकं शत्रुभूताः ये दुष्टाः सः सु विनशंतां विनश्यंतु। हे
इंद्र च इर्थं त्वयः कर्माणि सततयो वा प्रवर्तंते। हे इंद्र यो नोस्मान् जिघांसति हंतुमिच्छति। हंतेः सन् अज्झन गमां सनीति दीर्घः।
अभ्यासाच्चेति कुत्वं तस्मै शत्रवे वधं हननसाधनमायुधं अस्तासि क्षेप्ता भवति। असु क्षेपणे ताच्छीलिकस्तृन्। तेत वयारा

तिधनप्रदानहेतुर्हेरत्नस्य दानेन करणेनोक्तम्॥ मंत्रे घसेपुपवमानाविदर्भवीरा उदात्त इति कित उदात्तत्वं सारातिः वसो धनं ददेः अस्मभ्यं दाता
२६७ भवतु। आदृगमहनजन इति ददतेः किप्रत्ययः मलोकास्यंयोतिवसकशब्देल षष्ठ्यभावःसिद्धमलात्॥ ॥अथ सेयांइंद्रेति त्ऋचात्मकं द्वितीयं सू
क्तंतत्र प्रथमा॥ स्वां इंद्र वन स्तोतास्यात्वावतो मघोनः॥ प्रेदु हरिवः श्रुतस्य॥ हे हरिवो हरिवन् मतुबसो रितिनकारस्य रुत्वं हरिनाम
काश्ववन्निंद्र रेवतो रयिमतः बहुधानावेलस्यतवस्तोतरेवान् स्यात् रयिमान् भवेत्। इच्छब्दो। यथारणा रयिमान् भवेदेवं नतुरा
रिक्तं प्राप्नोति उक्तमेवार्थं किं मुतिकन्यायेन दृढयति॥ त्वावतस्त्वत्सदृशस्य युष्मदस्मदोश्छंदसि सादृश्य उपसंख्यानमिति वतुप्।
माघोनोमघवतो धनाढ्यस्य श्रुतस्य पुरुसंवेश्वर्यायाः स्तोत्रव्यस्य ऐश्वर्येपितस्य अन्यस्यापि स्तोता प्रेदुस्यादित्यनुषज्यते प्रस्यात्
प्रभवेद्दानस्तुतिदीयते॥ किं स्वकत्वं तवस्तोता धनवान् भवेदेवेति॥ ॥अथ द्वितीया॥ उक्थंचनःशस्यमानमगोरयिराचिकेत॥ २६७
नगायत्रंगीयमानमिति॥ धातारितिशेषः॥ गायतेर्गोः॥ अगोरास्तोतुःरयिः अद्रिः शत्रुरिंद्रः शस्यस्यनंहोत्रापच्यमानं उक्थं

चनशस्त्रमपि आचिकेत अभिजानाति। किंचिन्नातेक्षांदृसोलिट्॥ नेतिसंप्रत्यर्थेमिंनसंप्रतिप्रस्तोत्रादिभिःगीयमानंगायत्रंगातव्यं
सामयद्गायत्राख्यमपि आचिकेते त्येवा। अतःकारणाद्वयमपितस्मिं इंद्रस्तुमइत्यर्थः॥ ॥अथ तृतीया॥ मानइंद्रपीयत्नवेमा 267/1943
शर्धतेपरादाः॥ शिक्षाशचीवःशचीभिःइति॥ हे इंद्रत्वं पायत्नवेपीयतिर्वधकर्मावधक्रीलायहिंसाकारिणेशत्रवेनोअस्मान्
मापराददाः मापरित्याक्षीः माच शर्द्धते अभिभावित्रे अस्मान्मात्यराद्राः॥ श्रद्धित्सहन इति धातुः॥ अपितु हे शचीवःशक्तिमन्निंद्र
शचीभिरात्मीयैः कर्मभिः शिक्षास्मान्नुशाधि यद्वाशिक्षतिर्दानकर्मा अभीष्टधनमस्मभ्यं देहि यद्वा शत्रून्जेतुं शिक्षशक्तान्क
र्तुमिच्छ शकेः सनंतस्य सनिमीमेतिइसादेशे अभ्यासलोपे चक्लते लोटि रूपमेतत्॥ ॥अयंइंद्रयाहिहरिभिरिति त्ऋचात्मकं
तृतीयं सूक्तं तत्र प्रथमा॥ एंद्रयाहिहरिभिरुपकण्वस्य सुष्टुतिं॥ दिवो अमुष्यशासतो दिवंयय दिवावसो इति॥ हे इंद्र कण्वस्य
सुष्टुतिं शोभनां स्तुतिं हरिभिरश्वैरुपयाहि आगच्छ दिवो द्युलोकं इतीत्यर्थ षष्ठी। अमुष्यामुष्मान्निंद्रे शासतः शासतिसति

विभक्तिव्यत्ययः तत्र च यमकस्य मारुमं हे हे दिवावसो दीसहति षं इदि वं स्वर्गं यद्युयं गच्छत। वहुवचनं पूजार्थं यद्वा हे दिवावसो दिवो यु
२६८ नामकं अमुष्य मुंलोकं शासतः शासनं कुर्वतो यूयं दिवं स्वर्गं यय गच्छत॥ ॥अथ द्वितीया॥ अत्राविनेमिरेषासुरान्त्र धून्वते स्वकः॥ दिवो
अमुष्य शासतो दिवं यय दिवावसो॥ इति। अत्रास्मिन्यज्ञे एषामभिषयगा ह्रींनेर्मिः सोमः ऋतां विधून्वते विशेषेण कंपयति तत्र
दृष्टांतः। उरांमेषीव्रकोनरकइव यथा वृकः तद्वत्तसिंधमन्यत॥ ॥अथ तृतीया॥ आत्वाग्रावाव दंनिहसोमी घोषेण वक्षतु॥ द
वोऽमुष्य शासतो दिवं यय दिवावसो इति॥ हे इंद्र त्वा त्वाम् अभिदृयते ग्रावा सामाभिषवं पाषाणः सोमी सोमवान्। वदनु राव्द कुर्वन्
घोषेण ध्वनिना सह आवक्षतु त्वां प्रापयतु॥ ॥अथ पवस्व सोम मंदयं निति तृचात्मकं द्वैपदं चतुर्थं सूक्तं तत्र प्रथमा॥ पवस्व सो
मम दयंनिंद्राय मधुमत्तमः॥ इति। हे सोम मधुमत्तमोऽतिशयेन मधुररसवान् त्वं परयन् मादयिता भवन्। यद्वा इंद्राय क्रिया २६९
ग्रहणं कर्तव्यमिति इंद्रस्य संप्रदानसंज्ञा इंद्रं मोदमानः सन् पवस्व इंद्रार्थमागच्छ॥ ॥अथ द्वितीया॥ ते सुतासो विपश्चितः शुक्रा

वायुमसृक्षतेति। विपश्चितो मेधाविनः सुतासोऽभिषुताः शुक्राः शुक्रवर्णाः अभिषवणेन निर्मलत्वाद्दीप्यमाना इत्यर्थः। एते सोमाः वा
युं आव्दमसृक्षत असृजन् अकार्षुः यद्वा वायुमेव सोमपानार्थमसृजन् सोमेषु सुतेषु सत्सु वायुस्तत्पानार्थमागच्छति खलु॥ ॥अथ
तृतीया॥ असृग्रं देववीतये वाजयंतो रथा इवेति॥ एते अभिषुताः सोमाः वाजयंतो यजमानानामन्नमिच्छंतः संतः देववीतये देवानां पा
नाय असृग्रन् विसृज्यंते ऋत्विग्भिः प्रदीयंते तत्र दृष्टांतः रथा इव वाजयंतः शत्रुधनानि वलानि वा स्वामिन इच्छंतो रथा देववीत
ये देवानामागमनाय यथा विसृज्यंते तद्वत॥ ॥इति विंशोऽध्याये चतुर्थः खंडः॥ ४॥ अथ पंचमखंडे अग्निं होतारमिति तृचात्मकं प्रथ
मं सूक्तं तत्र प्रथमा॥ अग्निं होतारं मन्ये दास्वंतं वसुं सूनुं सहसो जातवेदसं॥ य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा घृतस्य वि
भ्राष्टिमनुवष्टि शोचिषाजुह्वानस्य सर्पिषः इति॥ अग्निं सर्वासी देवास नाताम अत्र ण्यं यज्ञे षत्रंनीयमानं वा होतारम स्माछा
गं प्रति देवानामाह्वातारं। यद्वा होमनिष्पादकं होतारं ह्वातारं जुहोतेर्हातिस्यार्णवा भवइतियास्कः॥ अग्निमहं होतारमरणी

769/1973

तेनतिष्ठते॥ अग्निमग्न आवहेतिव आग्नेराधानत्वं प्रसिद्धं। अग्निं होतारं मन्ये। एवं प्रतिविशेषणं मन्यत इति संबंधः। यद्वा याग
२६० निष्पन्ने देवापेक्षितत्वात् एतदेवविधेयविशेषणं उत्तराणि वक्ष्यमाणविशेषणानि स्तुतिरूपाणि दास्वंतं अतिशयेन दानवंतं
च वसुः सर्वेषां निवासहेतुः सहसः सूनुं बलस्य पुत्रं अग्निमंथनकाले बलेन दानवंतं च। वसुः सर्वेषां निवासहेतुं सहसः सूनुं
बलस्य पुत्रं अग्निमंथनकाले बलेन मथ्यमानेत्पद्यत इति पुत्रत्वमुपचर्यते। जातवेदसं जातानां वेदितारं जातप्रज्ञं जात
धर्मं वा जातवेदाः शब्दो यास्केन बहुधा निरुक्तः॥ अग्नेर्जातवेदस्त्वे दृष्टांतः। विप्रं न जातवेदसं जातविद्यं मेधाविनं ब्राह्मण
मिव तं यथा बहु मन्यते तथा त्वमपि। त्वोमा त्वर्थः। उक्तगुणविशिष्टो यो देवान् प्रजयंत्या देवान् प्रत्यक्तया वा कृपा कृपया सा
मर्थ्यलक्षणया देवान् प्रत्यक्तया ततयेति यास्कः॥ तेभ्यो हविर्वहनत्व आयुक्तः सन ऊर्ध्वशोचिषः दीप्ततेजस्कस्य आजुह्वान २६०
स्य आसमंतात् हूयमानस्य सर्पिषः सरणशीलस्य घृतस्य विलापनेन दीप्तस्याज्यस्य विभ्राष्टिं विशेषेण भ्राजमानमनुसयम

पि तदा स्वं शोचिषा ज्वालया वष्टि कामयते स्वीकारात्मीतीति विशेषः॥ ॥अथ द्वितीया॥ यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र
मन्मभिर्विप्रेभिः शुक्र मन्मभिः॥ परिज्मानमिव द्यां होतारं चर्षणीनां। शोचिष्केशं वृषणं यमिमा विशः प्रावंतु जूतये विशः इति॥ हे 771/1973
विप्र मेधाविन् शुक्र दीप्त हे अग्ने यजिष्ठं अतिशयेन यष्टृतमं त्वा त्वां यजमाना वयं हुवेम आह्वयाम। यतो वयं यजमानाः यतश्च
त्वं यजिष्ठः यतो हुवेमेत्यभिप्रायः। कीदृशं त्वां अंगिरसां अंगिरोगोत्रोत्पन्नानां मध्ये ज्येष्ठं अतिशयेन प्रशस्यं यद्वा अंगिरसा
मंगाराणां मध्ये ज्येष्ठं ज्वालायुक्तत्वात् अंगिरा अंगारा इति यास्कः। अंगारा असरस्तेंगिरसो भवंतीति श्रुतेः। केन साधनेनाहूयत इत्यु
च्यते मन्मभिर्मननसाधनैर्विप्रेभिर्विशेषेण प्रीणयितृभिः स्तवाभिर्मंत्रैः यद्वा विप्रेभिः मेधाविभिः ऋत्विग्भिः मन्मभिर्मं
त्रैश्च सहिता वयमिति संबंधः। तेषामाह्वानानंतरं परिज्मानं परितो गच्छंतं द्यामिव सूर्यमिव होतारं देवानामाह्वातारं केषामर्थे च
र्षणीनां मनुष्याणां यजमानानामर्थं यद्वा चर्षणीनां मनुष्याणां पूर्वं पित्र्याद्यागादीप्ता धनेनंदेवतमापन्नानां देवानामाह्वातारं.

यथाशोचिष्केशं केशवद्दर्यंतायतज्वालोपेतं यष्वणं कामानां वर्षितारं एवं रूपं त्वां विशः तामेवानिविशमानाः प्राज्ञाकृतये स्वर्गाद्य
२७० भिमतफलप्राप्तये प्राचंतु प्रकार्षेण प्रीणयंतु ॥ तादृशं त्वां हुवेमेति संबंधः॥ ॥अथ तृतीया॥ साहि पुरूचिदोजसा विरुक्म
ता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः॥ वीडुचिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं। निःषहमाणो यमते नायते धन्वासाहा
नायते इति॥ साहि स एव पूर्वं स्तुत एवाग्निर्विरुक्मता विशेषेण रोचनवता ओजसा ज्वालारूपेण बलेन पुरुचित् अत्यधिकं भ
वदीद्यानः दीप्यमानः द्रुहंतरः द्रोग्धॄणां तारिता निस्तारयिता भवति। अस्मासु द्रोहं कुर्वतां शत्रूणां हिंसको जयतीत्यर्थः।
तत्र दृष्टांतः। द्रोग्धॄणां छेदनाय प्रयुक्तः परशुना परशुरिव हिनस्ति। तथायमपि किं च यस्याग्नेः समृतौ संगतौ संयो
गे वीडुचित् तत्र दृष्टांतः। वनेव उदकमिव उदकं यथाग्निसंयोगे शुष्यति तथेत्यर्थः। अत्यंतदृढं स्थिरमपि हिनस्ति। अस्म २७०
द्रोग्धारं शत्रुं हिनस्तीति किमु वक्तव्यमित्यभिप्रायः। किं चायमग्निः निःषहमाणः शत्रुभिः रोषेणाभिभवमते उपरमते श

त्रुषु मध्ये क्षोऽतितानेव नाशयति तथा कुर्वन्नायते न गच्छति। शत्रोः सकाशान्न पतायते। तत्र दृष्टांतः। धन्वसहा न धनुषा शत्रून्
भिभवतीति धन्वसहा धातुष्कः सहतेरस्कन्दसि छांदसो ल्यलोपः। स यथा शत्रोरभिमुखो विध्यति न पलायते। यद्वा दृढधनुर्वहन 773/1973
क्षमो धामा धन्वसहः। अस्मिन् पक्षे पचाद्यच्। रूपं सकुगित्याकारः। दृढधन्वा सन्नायते न चलति॥ ॥अथाग्नेइतितृचात्म
कं द्वितीयं सूक्तं तत्र प्रथमा॥ अग्ने तव श्रवो वयो महि भ्राजंते अर्चयो विभावसो॥ बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे
इति। हे अग्ने तव वयोऽन्नं श्रवः श्रवणीयं प्रशस्यं हविरात्मकस्य मंत्रसंस्कृतत्वेन प्रशस्तत्वात् दंनेषु मध्ये तवैवानां श्रेष्ठमित्यर्थः।
हे विभावसो विभूति दीप्तिर्विभासि वयस्कथनं यस्य तादृशाग्ने अर्चनीया दीप्तयः महि महत् बहुलं भ्राजंते दीप्यंते भजंदी
प्तोऽनुदात्तश्चोपादिकः। हे बृहद्भानो प्रौढदीप्तिक कवे क्रांतदर्शिन् अग्ने एवं महानुसंभावस्त्वं शवसा बलेनोपेतं उक्थ्यं प्रशस्यं
द्गाऽध्या यज्ञस्तुत्योग्यं वाजमन्नं दाशुषे हवींषि दत्तवते यजमानाय दधासि प्रयच्छसि॥ ॥अथ द्वितीया॥ पावकवर्चाः शुक्र

वर्चाअनूनवर्चाउदियर्षिभानुना॥पुत्रोमातराविचरन्नुपावसिपृणक्षिरोदसीउभे॥इति।पावकवर्चाःशोधकदीप्तिःशुक्रवर्चाःनिर्मल
२७१ तेजस्कःअनूनवर्चाःसंपूर्णतेजस्कःहेअग्नेईदृशस्त्वंभानुनातेजसाउदियर्षिउद्गच्छसिस्वर्गतो।होत्रादिकः।अर्तिपिपर्त्योश्चे
ति।अभ्यासस्यत्वेसतिपुत्रःसन्मातरामातृभूतेअरण्योविचरन्योगावसानेविशेषेणप्राप्नुवन्उपावसि।उपगतान्यजमानान्
रक्षसि।तथाउभेरोदसीद्यावापृथिव्योपृणक्षिसंयोजयसिहविषाद्युलोकंवृष्ट्याइमंलोकंचपूरयसीत्यर्थः।पृचीसंपर्केरौधादिकः
॥ ॥अथतृतीया॥ऊर्जोनपाज्जातवेदःसुशस्तिभिर्मंदस्वधीतिभिर्हितः।त्वेइषःसंदधुर्भूरिवर्पसश्चित्रोतयोवामजाताइति॥ऊ
हेऊर्जोनपातऊर्जोन्नस्यपार्थिवस्य।अरण्योर्वापुत्रजातवेदःजातानांवेदितरग्नेसुशस्तिभिःसुशंसनैःअस्माभिःक्रियमाणैः
मंदस्वमोदस्व॥तथाधीतिभिरस्माभिःक्रियमाणैरग्निहोत्रादिभिःकर्मभिर्हितःस्थापितःतृप्तोभव।अपिचभूरिवर्पसःवर्पइति २७१
वैरूपनाम।बहुविधरूपाश्चित्रोतयःचित्राविचित्राऊतिस्तृप्तिर्येभ्यःअन्नेभ्यस्तेतथोक्ताः।वामजाताःवामंवननीयंजातंजन्मया

सांताःईदृशीरिषोन्नानिहविर्लक्षणानित्वेत्वय्येवसंदधुःसंदधतिसम्यक्जुह्वतियजमानाःयद्वाभूरिवर्पसइत्यादिकंकर्तृविशेषणं
तदानींचित्रोतयइत्यस्यविचित्ररक्षाइतियोज्यं॥ ॥अथचतुर्थी॥इरज्यन्नग्नेप्रथयस्वजंतुभिरस्मेरायोअमर्त्य॥सदर्शतस्यवपुषो 775/1973
विराजसिपृणक्षिदर्शतंक्रतुमिति॥हेअग्नेजंतुभिर्जातैःशत्रुभिःसहइरज्यनईर्ष्यन्स्पर्धांकुर्वन्इरजईर्ष्यायांकण्वादिःयद्वाइ
रज्यतिरैश्वर्यकर्मा।जंतुभिर्जायमानैरात्मीयैस्तोतृभिःईरज्यनईश्वरोभवन्हेअमर्त्यमरणरहिताग्नेअस्मेअस्माकंसुपांसुलुगि
तिपंचम्याःशेआदेशःरायोधनानिप्रथयस्वविस्तारयरैशब्दाच्छसःस्थानेव्यत्ययेनङस।शास्यववाचत्वयेनत्रादिसमितिवि
भक्त्युदात्तत्वंनक्रियतेमन्त्वदर्शतस्यदर्शनीयस्यवपुषस्तेतोनयस्यशरीरस्यविराजसितृतीयार्थेषष्ठीईदृशेनशरीरेणविशे
षेणदीप्यसे।यद्वाराजतिरैश्वर्यकर्मा।वपुरितिरूपनाम।दर्शनीयेनरूपेणविराजसिविशेषेणईशिषे।अतएवदर्शतंद
र्शनीयंक्रतुंकर्मपृणक्षिअस्माभिःसंपर्चयसिफलेनवासंयोजयसि॥ ॥अथपंचमी॥इष्कर्तारमध्वरस्यप्रचेतसंक्षयं

२७२ तं राधसो महः॥ रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिं ॥ इति ॥ उक्तार्थमिन्द्रुर्तारं ब्रोरंद्रसोवर्णलोपः। अध्वरस्य यज्ञस्य
निष्कर्तारं संस्कर्तारं प्रचेतसं प्रकृष्टज्ञानं महो महतो राधसो धनस्य क्षयंतं ईश्वरं ॥ क्षयतिरैश्वर्यकर्मा। वामस्य वननीयस्य धनस्य
रातिं दातारं रातेः कर्तरि क्तिच्। ईदृशं त्वां सुभगां सौभाग्योपेतां महीं महतीमिषमन्नं सानसिं संभक्तव्यं रयिं धनं
च दधासि त्वं तेभ्यो ददासि॥ ॥अथ षष्ठी॥ ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः॥ श्रुत्कर्णं सप्रथस्तमं
त्वा गिरा दैव्यं मानुषा युगा॥ ऋतावानं सत्यवंतं यज्ञवंतं वा छंदसीवनिपौ वितिमतुबर्थे ऽयावातिप्रमहंमहांतं पूज्यं वा विश्वद
र्शतं विश्वैः सर्वैर्दर्शनीयं यद्वा विश्वं दर्शनं यस्य बहुव्रीहौ विश्वसंज्ञायामिति पूर्वपदांतोदात्तत्वं ईदृशमग्निं सुम्नाय सुखार्थं
जना ऋत्विग्यजमानादयः पुरो दधिरे पुरोदधते सर्वकर्मभ्यः पुरस्तात् धारयंति। यद्वा पुरः पुरस्तात् पूर्वस्यां दिशि आह्वनी २७२
यरूपेण धारयंति। पुरोधरर्च्च प्रत्ययः कृतः अपिच। हे अग्ने श्रुत्कर्णं श्रुतः श्रुती सम्यक् श्रवणवत्कर्णं श्रोत्रेंद्रियं यस्य तादृशं

सप्रथस्तमं अतिशयेन प्रख्याततं यद्वा सर्वतो विस्तार्यमाणं दैव्यं देवानां हविषो वहनेन संबंधिनं उक्तगुणं त्वां मानुषा मानुषाणि मनो 777/1973
रपत्यानि युगा युगानि सह गत्वा निपत्नी यजमान रूपाणि गिरा स्तुत्या स्तुवंतीति शेषः॥ ॥इति त्रिंशोध्याये पंचमः खंडः॥ अथ ष
ष्ठखंडे प्रसो अग्ने इति प्रगाथात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ ॥प्रसो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः॥ यस्य त्वं सख्य
माविथ॥ हे अग्ने तवोतिभिः रक्षाभिः स यजमानः प्रतरति प्रवर्धते। कृतयो विशेष्यंते सुवीराभिः शोभनवीराः पुत्रादयो
या सु ताः तथोक्ताः वाजकर्मभिः वाजानामन्नानां बलानां वा कर्मकरणं यासु ताः दृशीभिः हे अग्ने त्वं यस्य यजमानस्य सख्यं साखित्व
मित्रत्वमाविथ प्राप्नोषि स तरतीत्यन्वयः॥ ॥अथ द्वितीया॥ तव द्रप्सो नीलवान्वाश ऋत्विय इंधानः सिष्ण वाददे॥ त्वं महीनामुषसा
मसि प्रियः क्षपो वस्तुषु राजसि॥ इति॥ हे शिक्षो शिप सवितार्थः सोमेनासिचामानाग्ने द्रप्सो द्रवणशीलः नीडवान् श्याक इनीड
वत्स्थानात द्वानवा शकांत श्व्रव्य मानो वा ऋत्वियः ऋतौ वसंतादिकाले विशेषभवतः इंधानः संदीप्यमान एवं भूतस्तव सोम

आहृहेतुभूतं होमायाध्वर्युणा आदीयते। अपि च। त्वं मह्नीनांम हृनीनां उषसां प्रियो मित्रभूतोसि। उषासि हि। अग्नयो होमाय प्रक्षा
२७३ ल्यंते तथा शयः क्षपायां रात्रेः संबंधिषु वः स्तुषु आ उहस्केषुत मासक सत्कालं राजसि प्रकाशसे यद्वा रात्रिसंबंधीनि वसूनि पदा
र्थजातानि त्वं प्रकाशयसि॥ ॥अथ तमोषधीर्दधिरे इति एकर्चं द्वितीयं सूक्तं सा कुगोपा॥ तमोषधीर्दधिरे गर्भमृत्वियं तमापो
अग्निं जनयंत मातरः॥ तमित्समानं वनिनश्च वीरुधोंतर्वतीश्च सुवते च विश्वहेति॥ ऋत्वियमृतौ प्राप्तं गर्भं गर्भभूतं तं प्रकृतम
ग्निं ओषधीरोषध्यो दधिरे धारयंति। तमेवाग्निं मातरो धारकत्वेन मातृस्थानीया आपः अपत्यं जनयंत जनयंति किंच। वनिनो वन
स्पतयश्च संतानं गर्भं धायेन प्रविष्टः अतुल्यत्वं तमित्तमेवाग्निं जनयंति किंच। तमेवाग्निं अंतर्वतीर्गर्भिण्यो वीरुध ओष
धयश्च विश्वहा सर्वदा सुवते जनयंति॥ ॥अथाग्निरिंद्राय इति एकर्चं तृतीयं सूक्तं सा कुगोपा॥ अग्निरिंद्राय पवते दिवि शुक्रो २७३
विराजति॥ महिषीव वि जायते इति॥ अग्निः यज्ञेषु मथ्यमं प्रणीतः अग्निः इंद्राय इंद्रार्थं पवते अस्माभिर्हूतं नचरु रुवतेन पु

रोडाशेन देवानां मधिकं क्षरति अग्निः शुक्रो दीप्तः सन् दिवि स्वर्गे विराजति। विशेषेण प्रकरोयाति यद्वा दिवि अंतरिक्षादि लोकेषु
स्थितेषु मघेषु शुक्रो दीप्तः सन् विराजति। तत्र दृष्टांतः॥ महिषीव यथा महिषी पालनादिना विविधा मिपयो घृतादीनि जनयति त 779/1923
था पि जायते देवानामुपभोगार्थं विविधानान्नानि जनयति॥ ॥अथ यो जागारेति एकर्चं चतुर्थं सूक्तं सा कुगोपा॥ यो जागार त
मृचः कामयंते यो जागार तमु सामानि यंति॥ यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ इति। यो देवो जागरस्सर्वदावि
निद्रो जागरूको गृहे वर्तते तमृचः सर्वशस्त्रात्मिकाः कामयंते यश्च जागरतमु तमेव सामानि स्तोत्ररूपाणि गानि प्राप्नुयंति। यो जा
गरतमयं अभिषुतः सोम आहाव क्तिमा स्वीकुर्वंति। हे अग्ने ताहशस्य तव सख्ये समान ख्यानो हीन करणे न्योकाः नियत स्थानो हं
अस्मि भवामि॥ ॥अथाग्निर्जागारेति पंचमं सूक्तं सा कुगोपा॥ अग्निर्जागार तमृचः कामयंते ग्निर्जागार तमु सामानि यंति।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः इति॥ सा निगदव्याख्याता॥ ॥अथ नमः सखिभ्य इति त्र्यात्मकं चतु

तुर्थं सूक्तं तत्र प्रथमा॥ नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः॥ युंजे वाचं शतपदीमिति॥ पूर्वेद्युः॥ यद्यत्र प्राग्भावात् पूर्वं सी
२७४ दंतीति निषीदंतीति पूर्वसदस्तेभ्यः सखिभ्यः समानख्यानेभ्यः सखिवन्मित्रभूतेभ्यो देवेभ्यो नमः वयं नमस्कारं कुर्मः॥ किंच साकं
निषेभ्यः यस्मिन्यत्र सह निषत्तेभ्यो नमः॥ किंच शतपदीं अस्मभ्यं फलप्रदानाय अपरिमितमार्गां वाचं स्तुतिरूपां मंत्रं युंजे
अहं योजयामि॥ ॥अथ द्वितीया॥ युंजे वाचं शतपदीं गाये सहस्रवर्तनि गायत्रं त्रैष्टुभं जगदिति॥ शतपदीं अपरिमितसंख्याकां
मां वाचं स्तोत्रं युंजे तेभ्यः प्रतीतेभ्यो वक्ष्यमाणेभ्यो देवेभ्यो योजयेयं गायत्रं गायत्राख्यं त्रैष्टुभाख्यं च जगज्जागतं च सामरूपी तां मंत्रं साम
वा सहस्रवर्तनि अपरिमितमार्गं यथा भवति तथा गाये अहं गानं करोमि॥ ॥अथ तृतीया॥ गायत्रं त्रैष्टुभं जगत् विश्वा रूपा
णि संभृता॥ देवा ओकांसि चक्रिरे इति॥ गायत्रं त्रैष्टुभं जागतं सूक्तं समूहं विश्वा विश्वानि रूपाणि उक्तानि संभृतानि नानारूपा २७४
णि कृतानि देवा अग्न्यादयः ओकांसि आश्रितानि स्थानानि चक्रिरे कुर्वंति॥ ॥अथाग्निर्ज्योतिरिति तृचात्मकं पंचमं सूक्तं तत्र

प्रथमा॥ ॥अग्निर्ज्योतिर्ज्योतिरग्निरिंद्रो ज्योतिर्ज्योतिरिंद्रः॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः इति॥ एवास्य स्पष्टा॥ ॥अथ द्वितीया॥ पुनरू
र्जा निवर्तस्व पुनरग्न इषायुषा॥ पुनर्नः पाह्यंहसः इति॥ हे अग्ने ऊर्जा बलेन इषा अन्नेन आयुषा जीवनेन च पुनरस्मान्निवर्तस्व।
अस्मात्त्यागगमनात् किंच त्वं नोऽस्मान् अंहसः पापात् पाहि पालय पुनः शब्दः स्यादिति पादपूरणार्थः॥ ॥अथ तृतीया॥ सह रय्या निवर्तस्वा
ग्ने पिन्वस्व धारया॥ विश्वप्स्न्या विश्वतस्परीति॥ हे अग्ने त्वं रय्या रमणीयेन धनेन सह निवर्तस्व तत अस्मान्प्रापयेत्यर्थः
किंच विश्वतः सर्वतः परि आ उपरि परीति सप्तम्यर्थानुवादकः॥ विश्वप्स्न्या व्याप्तिभक्षणे॥ विश्वस्य उपलोक्या धारया पिन्वस्व अस्मान
सिंच॥ ॥इति विंशोऽध्याये षष्ठः खंडः॥ अथ सप्तमखंडे यदिंद्राहं यथा त्वमिति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ यदिंद्राहं
यथा त्वमीशीय वस्व एक इत्॥ स्तोता मे गोसखा स्यादिति॥ हे इंद्र यथा त्वं एक इत् एक एव केवलं वस्वः धनस्य ईशिषे ईश्व
रो भवसि॥ एवमहमपि यद्यदि ईशीय ऐश्वर्ययुक्तः स्यां तदानीं मे मम स्तोता गोसखा स्यात् गोभिः सहितो भवेत्॥ ईश्वरस्य

नवस्तोतारुतोहेतोर्गोसहितो न भवेत् अपि गोभवेदेवेत्यभिप्रायः॥ ॥अथद्वितीया॥ ग्नाखेयमसोदित्सेयं शचीपते मनीषि
२७५ णे॥ यदहंगोपतिः स्यां इति॥ हेशचीपतेशक्तिमन्निंद्र अस्मे मनीषिणे मनसइशिन्नोस्तोत्रे दित्सेयं दातुमिच्छसेयं तदनंतरंशि
क्षेयं प्रार्थितं धनं दधान्व॥ यद्यदहंगोपतिर्गवामधिपतिर्भवत्प्रसादाद्भुवेयं॥ ॥अथतृतीया॥ धेनुष्ट इंद्र सूनृता
यजमानायसुन्वते॥ गामश्वं पिप्युषीदुहे इति॥ हेइंद्र तेतवसूनृतास्तुतिरूपावाक् धेनुर्दोग्ध्री गौर्भूत्वा कन्वते सोमाभिषवं
कुर्वते॥ यजमानाय गामश्वंचउपलक्षणमेतत् गवाश्वादिकंसर्वमभिलषितं दुहे धोक् किंकुर्वती पिप्युषीन मेवयजमानंप्र
वर्धयित्री॥ ॥आपोहिष्ठेतितृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥ महेरणाय च २७५
क्षसेइति॥ हेयस्मात्कारणात् आपः यायूयंमयोभुवः ममकस्यभावयित्र्यास्थ॥ तादृशायूयंनोस्मानूर्
र्जेअंनायदधातनधत्त॥ अंनप्राप्तियोग्यानस्मान्कुरुत॥ अंनमस्मभ्यंदत्तेत्यर्थः॥ महेमहतेरणायरमणीयायचक्ष

सेदर्शनायसम्यक्ज्ञानायचधत्त॥ अस्मान्सम्यक्ज्ञानंप्रतियोग्यान्कुरुतेत्यर्थः॥ ॥अथद्वितीया॥ योवःशिवतमोरस
स्तस्यभाजयतेहनः॥ उशतीरिवमातरः इति॥ हेआपः योयुष्माकंस्वभूतो योरसः शिवतमः सुखतमः इहास्मिन्लोकेतस्यतं
रसं नोस्मान्भाजयतसेवयत उपयोजयतेत्यर्थः तत्रदृष्टांतः॥ उशतीरिव पुत्रसमृद्धिकामयमानामातरः स्तन्यरसंयथा
भाजयति आर्यं तिष्ठवत्॥ ॥अथतृतीया॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथाचनः॥ इति॥ हेआ
पोयूयंयस्यपापस्यक्षयाय विनाशाय हि जिन्वथ अस्मान्प्रीणयथ तस्मैतादृशायपापक्षयाय॥ अरंक्षिप्रंवोयुष्मानुगमा
मगममाम॥ वयंशिरसिप्रक्षिपामेत्यर्थः॥ यद्वायस्मान्नस्यक्षयायान्निवासार्थं यूयमोषधीर्जिन्वथ॥ तर्प्ययथ तस
स्मैतदन्नमुद्दिश्यवयमलंपर्याप्तंयथाभवतितथावोयुष्मानगमामगच्छामः॥ किंच हेआपः नोस्मान्जनयथ॥ पुत्र
पौत्रादिजननेप्रयोजयतेत्यर्थः॥ ॥अथवात आवातिति तृचात्मकंचतुर्थं सूक्तं तत्र प्रथमा॥ ॥वात आवातुभेषजं

781/1923

शंभु मयोभु नो हृदे ॥ प्रण आयूंषि तारिषदिति ॥ वातो वायुर्नोस्माकं हृदे हृदयाय भेषजं औषधं उदकं वा आवातु आगमयतु । कीदृश
२७६ भूतं शंभु रोगनाशमसुखभावयितृ मयोभु मयः सुखस्य च भावयितृ स्यापि च नोस्माकं आयूंषि अन्नानि वा प्रतारिषत् प्रवर्धयतु
॥ ॥अथ द्वितीया ॥ उत वात पितासि न उत भ्रातोत नः सखा ॥ स नो जीवातवे कृधि इति ॥ उतापि च हे वात त्वं नोस्माकं पितासि उत
पालकोसि पालयितासि वा । उतापि च भ्रातासि उतापि च नोस्माकं सखा समानख्यानो मित्रभूतश्च भवसि । स त्वं नोस्मान् जीवातवे जी
वनहेतवे यागाय कृधि कुरु । करोतेः आदरसो विकरणस्य लुक् । श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः ॥ ॥अथ तृतीया ॥
यददो वात ते गृहे३मृतं निहितं गुहा ॥ तस्य नो धेहि जीवसे इति ॥ हे वात वायो ते तव गृहे स्थाने यददः यदिदं धनं अमृतं अमृतस्य
कर्मणि षष्ठी ॥ अविनाशि गुहा गुहायां अलभ्यत्वाद्दूरे हितं निहितं वर्त्तते । हे विभावसो वायो प्रकाशधन वन्वा वायो तस्य तद् २७६
धृतं कर्मणि षष्ठी । नोस्माकं धेहि देहि प्रयच्छेत्यर्थः ॥ ॥अथ अभि वा जीतिरृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ अभि वाजी विश्व

रूपो जनित्रं हिरण्ययं बिभ्रदत्कं सुपर्णः सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृज्रो जजानेति ॥ सुपर्णः सुपतनः शोभनय
तनो गरुत्मानिव वाजी वेगवान् बलवानन्नवान् वा । विश्वरूपः नानाविधप्रकाशः स हि चित्रभानुः ऋज्रः ऋज्री भज्री भवतीति । भस्मो
पाके कृत्राति भृज्जति पचतीति ऋज्रो अग्निः सः स्वकीयं जनित्रं जननस्थानं अरणिबिलं अत्कं सततगामिनाप्यासंमतं एव हिरण्ययं हि
रण्मयमिव स्थितं अभितः साकल्येन बिभ्रत् पुष्यन् सूर्यस्य भानुं सवितुः प्रकाशं ऋतुथा काले काले रात्रौ च सानो वस्त्रवदाच्छादय
न अग्निं वा आदित्यः सायं प्रविशतीति तस्मादग्निर्दूरान्नक्तं ददृशे इति श्रुतेः ॥ मेधं परि स्वयं यज्ञं लक्ष्मीकृत्य स्वयं जजान उदपद्यत ॥ ॥
अथ द्वितीया ॥ अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यद्बभूव । अंतरिक्षे स्वं महिमानं मिमानः कनिक्रंति वृष्णो अ
श्वस्य रेतः ॥ इति । रेतस्माद्भूतं विश्वरूपं नानारूपं यदस्मात्मकं तेजः अप्सु शिश्रिये आश्रयते स निलीयते सोमः प्राविश इति श्रुतेः
यच्च पृथिव्यामधि भूमौ संबभूव तिष्ठति । अग्निः पृथिवीस्थान इति हि निरुक्तं तथाविधं सोंतरिक्षे आकाशे स्वं माहिमानं करण

ज्ञा लंभमानो व्यापारयन् वृष्णो अश्वस्य रेतः सोमाहुतिं प्रति सोमा रश्मो अश्वस्य रेतः सोमाहुतिं प्रतिं सो मो वै रेतो अश्वस्य रेत इति श्रुतेः
२७७ गाव मा ऽन इव पुनः पुनः कं इते नूत्नं करोति। यद्वा आलयन्निव भवं ज्ञात्यायते॥ ॥अथ तृतीया॥ अयं स हस्रं परि युक्ता वसानः सूर्य
स्य भानुं यज्ञो दाधार॥ सहस्रसाः शतसा भूरिदावा॥ योयावत्मार्थ यथले सहस्रं शतं भूरि अपरिमितं वात स्मेत स्मेता व द्दाता॥
यत्तोयज्ञनीयोयमग्निः युक्तायुक्तानित्यात्मनासंबद्धा॥ तिस हस्रा सहस्राणि स्वकीय किरण ज्ञालानि परिवसानः परित आच्छा
दयन् सूर्यस्य भानुं रात्रौ सूर्यस्यापि प्रकाशं दाधार स्वयमेव धारयति॥ ॥नाके सुपर्णमिति लिंचात्मकं पंच मं सूक्तं तत्र प्रथमा
॥नाके सुपर्णमुप यत्पतंतं हृदा वेनंतो अभ्यचक्षत त्वा॥ हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युमिति॥ हे वेन त्वा
त्वां हृदा हृदयेन मनसा वेनंतः कामयमानाः स्तोतारः नाकें तरिक्षे अभ्यचक्षत आभिपश्यंत तदानीं त्वं उपगच्छसीति शे २७७
षः कुत्यंभूतं सुपर्णं शोभनपतनं पतंतं अंतरिक्षे गच्छंतं हिरण्यपक्षं हिरण्मयाभ्यां मु पेतं वरुणस्य जलाभिमानिनो देवस्य दू

तं चारं यमस्य नियामकस्य वैधुताग्नेर्योनौ स्थाने तरिक्षे शकुनं पक्षिरूपेण वर्तमानं भुरण्युं भर्तारं य द्वा वृष्टि प्रदानादिना सर्वस्य
जगतः पोषकं। भुरण साधारण पोषणयोः कण्वादिः अस्मादौणादिक उ प्रत्ययः॥ ॥अथ द्वितीया॥ ऊर्ध्वो गंधर्वो अधि नाके 783/1973
अस्थात् प्रत्यङ् चित्रा बिभ्रदस्यायुधानि॥ वसानो अत्कं सुरभिं दृशे कं स्वर्ण नाम जनत प्रियाणीति॥ ऊर्ध्व उपरि देशे वर्तमानः
गंधर्वो गवामुदकानां धर्ता गोविगंधृतो व इति गोशब्दोपपादात्। धृञ् आधारण इत्यस्माद्व प्रत्ययः उपपदस्य गंभावश्च ऊ
दृशो वेनः प्रत्यङ् अस्मान् प्रत्यंच नभिमुखः सन् नाके अधि अंतरिक्षे अस्थात् तिष्ठति किं कुर्वन् अस्य आत्मनः स्वभूतानि चित्रा
चित्राणि चानीयान्याश्चर्य भूतानि वा आयुधानि बिभ्रत् धारयन् तद्बिभर्तेः शतरि भृ ज्ञामित्यभ्यास स्येत्वं ताभ्यामुरि
ति नुम प्रतिषेधः। अभ्यस्ताना मादिरित्याद्युदात्तत्वं तथा सुरभिं शोभनं अत्कं मात्मीयं व्याप्तं रूपं वसानः सर्वत्राच्छादयन् कि
मर्थं दृशे दर्शनार्थं दृशे विख्ये चेति केप्रत्ययांतो निपात्यते। कमिति पदपूरकः। तत्र दृष्टांतः। स्वर्णं शोभनरणः आदित्यः स यथा

आत्मीयं रूपं दर्शनाय सर्वत्राच्छादयति तत् इत्थं तदनंतरं नामनामानि मननशीलान्युदकानि प्रियाणि सर्वेषामनुकूलानि जनयन् जन
२७८ यति। उत्पादयतीत्यर्थः॥ ॥अथ तृतीया॥ द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन्॥ भानुः शुक्रे
ण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि॥ विधर्मन् विधर्माणि विधारकेंतरिक्षे स्थितः द्रप्सो द्रवणशीलः यद्वा द्रप्सा विं
दवः तद्वान् अदृश्य आदित्यश्च। गृध्रस्य गृध्नोरसनाभिकांक्षतः सूर्यस्य चक्षसा तेजसा पश्यन् प्रकाशमानो वेनः यद्वा द्रप्स
मुद्रं समुंदनशीलं मेघमभिजिगाति। अभिगच्छति। तदानीं भानुः सूर्यः शुक्रेण शुभ्रेण शोचिषा तेजसा तृतीये रजसि
लोके चकानो दीप्यमानः प्रियाणि सर्वेषामभिमतानि उदकानि चक्रे करोति॥ ॥इति विंशेध्याये सप्तमः खंडः॥ ७॥ वेदार्थस्य २७८
प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त
क श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे विंशोध्यायः॥ २०॥ ७॥

॥ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥अथ एकविंशोध्याय आरभ्यते तत्र च
आशुः शिशान इत्यारभ्य नव सूक्तात्मक एक एव खंडः॥ तत्र प्रथमे सूक्ते प्रथमा॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षो 785/1973
भणश्चर्षणीनां॥ संक्रंदनो निमिष एकवीरः शतं सेना अजयत्साकमिंद्रः इति॥ अत्रेंद्रोप्रतिरथ ऋषिः त्रिष्टुप् छंदः इंद्रो देवता।
साग्निचित्ये कृतो अग्नौ प्रणीयमाने अयमध्यायो ब्रह्मणा जप्यः॥ अयमिंद्र आशुः शीघ्रकारी व्यापको वा। शिशानो निशितः
शत्रूणां भयजनक इत्यर्थः। कइव। वृषभो न भीमः बिभेत्यस्मादिति भीमः। तादृशो वृषभ इव। स यथा तीक्ष्णाभ्यां शृंगाभ्यां
भीमो भयति तद्वत्। अथवा शिशानः तीक्ष्णमतिः॥ स्य स्य येनात्मनेपदं वृषभो न भीमः वृषभो यथा शृंगाभ्यां भयजन
कः। तद्वच्छत्रूणां भयजनकश्च घनाघनः घातकः शत्रूणां हंतेः पचाद्यचि हंतेर्घत्वं चेति द्विर्वचनं। अभ्यासस्य आगागमः
घत्वं च। धातोरभ्यासाद्याः चर्षणीनां चर्षणयो मनुष्याः मनुष्याणां द्रव्याणि क्षोभणः क्षोभयिता। संक्रंदनः सम्यक्क्रंद

२७० यिता प्राणिनां आकर्षणेन प्रहारेण वा। अनिमिषः चक्षुर्निमेषरहितः सर्वदा स्वयत्नमागमनात् बुध्यादिकार्येष्वनलस इत्यर्थः।
एकवीरः वीरयत्यमित्रानिति वीरः। एकश्चासौ वीरश्च अथवा एक एव विक्रांतः। असहाय्येन कार्यक्षम इत्यर्थः। ईदृशो यमिंद्रः सतां
सेनाः साकं सह एको योगेनैव अजयत्। जयति॥ ॥अथ द्वितीया॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना
। तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥ अप्रतिरथस्त्रिष्टुबिंद्रः अस्तु नामेंद्र उक्तविधः। तथाप्यस्माकं किमेवेत।
तत्राह। संक्रंदनेन आनिमिषेण चोक्तलक्षणेन जिष्णुना जयशीलेन युत्कारेण योधनं युत् युद्धकारिणा कर्मण्येण। दुश्च्यवनेन अ
न्यैरविचाल्येन। च्युङ् च्युङ् गतौ। छंदसि गत्यर्थेभ्य इति युच्। धृष्णुना धर्षकेण ईदृशेनेंद्रेण तयुद्धं जयत तत्तत्र शत्रुबलं सह
ध्वं अभिभवत हे युधो योद्धारो हे नरो नराणां नेतारः। विभाषितं विशेषवचने बहुवचनमिति पूर्वस्याविद्यमानवचनत्वान्निषेधा २७०
दुत्तरं निहन्यते। पुनः कीदृशेनेंद्रेणेति इषुहस्तेन वृष्णा वर्षित्रा च॥ ॥अथ तृतीया॥ स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा

स युध इंद्रो गणेन॥ संसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता॥ अप्रतिरथस्त्रिष्टुबिंद्रः॥ पूर्वमंत्रे इंद्रेण
जयतेत्युक्तं। अत्रेंद्रस्य जयसाधनसमर्थत्वं दर्शयति। स इंद्र इषुहस्तेभिः इदैः मरुद्भिः शिभिर्वशी वशयिता स्तोतॄन्। तथा निषं 787
गिभिर्युक्तः। निषंगः खड्गस्तद्वद्भिर्वशी। सा च इंद्रो युधो युध्यमानः सन् जशीलः। यत एवंविधः अतः संसृष्टजित् यइगुपधल 1973
क्षणः कः। अथवा युधो युद्धे हतो गणेन शत्रुसंघेन सह संस्पृष्टा एकीभवनशीलः। यत एवंविधः अतः संसृष्टजिद्वा ये
परस्परैकमतेन युध्याव संसृष्टवद्यंति तेषां जेता। तथा सोमपाः सोमस्य पाता बहुशर्धि शर्धो बलवान् बहुबलं तद्धनमत्वर्थी
य इनिः। यद्वा शृध प्रहसने। बाहुभ्यां शर्धयत्यभिभवतीति बाहुशर्धी सुप्यजातौ णिनिस्ताच्छील्य इति णिनिः। उग्रधन्वा उद्यत
धन्वा। प्रतिहिताभिः शत्रुषु प्रेरिताभिरिषुभिः अस्ता मारयिता। यत्रैषून्मुंचति तत्र प्रस्थानं भवंतीत्यर्थः। ईदृशेनेंद्रेण जय
तेति संबंधः॥ ॥अथ द्वितीयस्य सूक्ते प्रथमा॥ बृहस्पते परि दीया रथेन रक्षोहामित्रां अपबाधमानः। प्रभंजन्सेनाः प्रमृणो

युधाजयंनस्माकमेध्यविताऽरथानां॥ अप्रतिरथस्त्रिष्टुप्बृहस्पतिः। हेबृहस्पते बृहतांपातः पालयितर्देवरथेनपरिदीयपरि
२८० छादीयतिर्गतिकर्मा आगत्यचर रक्षोहा रक्षोहा रक्षसां हंता अमित्रान् शत्रून् अपबाधमानः सर्वतोनाशयन् तथासेनाः श
त्रुसंबंधिनीः प्रभंजन् प्रकर्षेणनाशयन् प्रमृणः प्रकर्षेणहिंसन्। मृण हिंसायां। इगुपधलक्षणः कः केनहिंसन् युधा युद्धे
न साधकाचइतिविभक्तेरादात्वं। जयन्। एवंसर्वत्रजयंप्रतिपद्यमानः ईदृशस्त्वं अस्माकंरथानामविता रक्षिता एधि भव॥ ॥
अथद्वितीयस्तृचेद्वितीया॥ बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजीसहमानउग्रः॥ अभिवीरोअभिसत्वासहोजाजैत्रमि
द्ररथमातिष्ठगोवित्॥ अप्रतिरथस्त्रिष्टुबिंद्रः सर्वस्यबलंविजानातीतिबलविज्ञायः। यद्वाबलंमनायमितिसर्वैर्बलत्वेनविज्ञा २८०
यतइतिबलविज्ञायः सर्वस्यबलभूतइत्यर्थः॥ स्थविरोमहान्प्रवीरः प्रकर्षेणवीरः सहस्वान्पराभिभवसामर्थ्यवान्वाजीव
गवानन्नवान्वासहमानः शत्रूणामभिभविता। उग्रउद्गूर्णबलः अभिवीरः अभिगतावीरावीर्यवंतोनुचरायस्यसतथोक्तः।

अभिसत्वा अभिभविगतसत्वा॥ सहोजाः सहसोबलाज्जातः एवंमहानुभावस्त्वंहेइंद्रजैत्रंजयशीलंरथंआतिष्ठआस्थातुमास्थाय
र्थं आरोढुमर्हसि। त्वंच गोवित् उदकस्यलब्धावेदिता वा॥ ॥अथद्वितीयस्तृचेतृतीया॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतम
ज्मप्रमृणंतमोजसा। इमंसजाताअनुवीरयध्वमिंद्रंसखायोअनुसंरभध्वं॥ अप्रतिरथस्त्रिष्टुबिंद्रः। गोत्रभिदं गाउदका
नित्रायंतइतिगोत्रामेघाः। यद्वा गोभूमिः। तांत्रायंतइतिगोत्राः पर्वताः तेषांभेत्तारं। गोविदंउदकस्यलब्धारं वज्रबाहुंवज्रहस्तंप्र
हरणार्थेभ्यइतिसप्तम्याः परनिपातः। जयंतंजयनशीलम्। अज्मगमनंतेनशीलं। शत्रुबलंनुजसाबलेनजयंतं। यद्वा अज्मआ
जिंजयंतं। अजसाबलेनप्रमृणंतं शत्रूनभिभवंतं। ईदृशंमहानुभावमिममिंद्रंहेसजाताः सहोत्पन्नाः योद्धारोयूयं अनुवी
रयध्वं एनमग्रतः कृत्वा अनुपश्चाद्वीरयध्वंवीरकर्मयुद्धंकुरुध्वं शूरवीरविक्रांतौ वीरशब्दात्करोतितदाचष्टइतिणिच्। हेस
खायः परस्परंसखिभूताः यूयमिमंमिंद्रंसंरभरमाश्रणमनुसंभरध्वम्॥ ॥अथतृतीयस्तृचेप्रथमा॥ अग्निगोत्राणिसह
789/1973

सागाहमानो दयोवीरः शतमन्युरिंद्रः॥दुश्च्यवनः पृतनाषाडयुध्योस्माकं सेना अवतु प्रयुत्सु॥अप्रतिरथस्त्रिष्टुबिंद्रः॥अयमिंद्रो
२८१ गोत्राणि अभ्राणि मेघान् सहसा बलेन अभिगाहमानः प्रविशन् अदयः निर्दयः वीरः विक्रांतः शतमन्युः बहुयज्ञः बहुक्रो
धो वा दुश्च्यवनः अन्यैरचाल्यः स्वयं पृतनाषाट् शत्रुसेनानामभिभविता॥छंदसि सहः इति ण्विः सहेः साडः स इति मूर्धन्यादेशः
अयुध्यः संप्रहर्तुं शत्रुसेनानामभिभविता छंदसि सह इति तु प्रशस्यः॥युधि संप्रहारे॥ छांदसः क्यप्॥ई दृगिंद्रोस्माकं सेना
युत्सु संग्रामेषु प्रानु प्रकर्षेण रक्षतु॥ ॥अथ तृतीयसूक्ते द्वितीया॥इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः॥
देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं॥ अप्रतिरथस्त्रिष्टुबिंद्रः॥असां अस्माकं साहाय्यार्थमागतानां देवसेनानां
अयमिंद्रो नेता नायकोस्तु॥तथा तस्य बृहस्पतिः पुर एतु॥एवं दक्षिणा यज्ञः सोमश्च पुर एतु इति प्रत्येकं संबंधः॥तथा देवसेना २८१
नां अभिभंजतीनां अस्मदमित्राना भिमुखेन मर्दयंतीनां भंजतीनां घ्नां छंदसीति नामः उदात्तत्वं॥जयंतीनामित्यत्र बहुलवच

नांन भवति॥ सैतोसामग्रं मरुतो यंतु गच्छंतु॥ ॥अथ तृतीयसूक्ते तृतीया॥इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उ
ग्रं॥महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥अप्रतिरथस्त्रिष्टुबिंद्रः॥वृष्णो वर्षकस्य इंद्रस्य राज्ञो वरुणस्य आदि
त्यानां मरुतां च उग्रं उद्गूर्णं शर्धो बलं अस्माकं भवत्विति शेषः॥किंच महामनसां उदारमनसां भुवनच्यवानां च्यावयितॄणां देवानां घो 791/1973
षः जयशब्दः उदस्थात् उत्तिष्ठति॥ अनूर्ध्वकर्मत्वादात्मनेपदाभावः॥ ॥अथ चतुर्थसूक्ते प्रथमा॥उद्धर्षय मघवन्नायुधान्यु
त्सत्वनां मामकानां मनांसि॥उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः॥अप्रतिरथस्त्रिष्टुबिंद्रः॥हे मघवन् इंद्र अस्म
दीयान्यायुधानि उद्धर्षय उत्कृष्टं हर्षं प्रहरणेषूद्युक्तानि भवंत्वित्यर्थः॥मामकानां मदीयानां सत्वनां प्राणिनां सैनिकानां मनां
सि चोद्धर्षय॥हे वृत्रहन् इंद्र वाजिनां अश्वानां वाजिनानि वेगा उद्यंतु॥तथा जयतां रथानां घोषा उद्यंतु॥ ॥अथ चतुर्थसूक्ते द्विती
या॥अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु॥अस्माकं वीरा उत्तरे भवंत्वस्माँ उ देवा अवता हवेषु॥अप्रतिर

२८२ ष्टिरुप इंद्रः॥ अस्माकं संबंधिषु ध्वजेषु समृतेषु परसेनासंप्राप्तेषु ध्वजेषु ध्वजवत्सु सैनिकेषु इंद्रो अविता भवतु। तथास्माकं या इषवः संति
ता एव जयंतु न शत्रूणां। तथास्माकं वीरा भटा उत्तरे उपरि भवंतु। हे देवा अस्माकं तु। अस्मानेव अवत रक्षत हवेषु संग्रामेषु॥ ॥अथ
चतुर्थसूक्ते तृतीया। असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना॥ तां गूहत तमसापव्रतेन यथामी एषा अन्यो
अन्यं न जानात्॥ अप्रतिरथ त्रिष्टुप् मरुतः॥ असौ या सेना हे मरुतः परेषां शत्रूणाम् अभ्येति अभिमुख्या एति नः अस्मान् प्रति ओज
सा बलेन स्पर्धमाना॥ तां सेनां गूहत व्याप्नुत॥ तमसा अपव्रतेन व्रतमिति कर्मनाम॥ अपगतेकर्मणा। येन तमसा व्याप्तानां
न भवंति कर्माणि तदपव्रतं तमः॥ तेन एवं तेन तमसा तथा भ गूहत यथा एतेषां योधा अन्यो अन्यं न जानात्॥ परस्परं न जा
नातीत्यर्थः॥ ॥अथ पंचमे सूक्ते प्रथमा॥ अमीषां चित्तं प्रतिलोभयंती गृहाणांगान्यप्वे परेहि। अभि प्रेहि निर्दह हृत्सु २८२
शोकैरंधेनामित्रास्तमसा सचंतां॥ अप्रतिरथ त्रिष्टुब् अप्वा॥ हे अप्वे पापाभिमानिनि देवते अमीषां योद्धृणां चि

त्तं प्रतिलोभयंती विमोहयंती सती अंगानि तेषां मत्स्यवानाङ्गार आदिकान् गृहाण स्वीकुरु। परेहि अस्मत्तः दूरं गच्छ। अभिप्रेहि अ
भिगच्छ। तेषां समीपं। गत्वा च सत्सु हृदयेषु शोकैर्निर्दह निरंतरं भस्मीकुरु। ते अमित्रा अस्मच्छत्रवो अंधेन तमसा सचंतां संगच्छंतां।
॥ ॥अथ पंचमसूक्ते द्वितीया। प्रेता जयता नर इंद्रो वः शर्म यच्छतु॥ उग्रा वः संतु बाहवो नाधृष्या यथासथ॥ अप्रतिरथोनुष्टुबिं
द्रो मरुतो वा॥ हे नरो नेतारः संग्रामस्य तिर्यो दाग्योधारः प्रेत प्रकर्षेण गच्छत॥ गत्वा च जयत तान् प्रति भटान्॥ तिष्ठ परत्वात् तिष्ठ 793/1973
तिष्ठ इति निपाताभावः। यो युष्माकं इंद्रः शर्म सुखं यच्छतु प्रयच्छतु। वो बाहवो युष्माकं भुजाः उद्गूर्णबलाः संतु भवंतु। अनाधृष्याः अन्यै
रनभिभाव्याः॥ अथा यूयम् असथ भविष्यथ तथा उग्राः संतु वो बाहवः॥ ॥अथ पंचमसूक्ते तृतीया॥ अवसृष्टा परापत श
रव्ये ब्रह्मसंशिते॥ गच्छामित्रान् प्रपद्यस्व मामीषां कंचनोच्छिषः॥ अप्रतिरथ ऋषिः॥ पायुर्वा भारद्वाजः॥ अनुष्टुप्छंदः इषु
र्देवता॥ ब्रह्मसंशिते मंत्रेण तीक्ष्णीकृत्य शरथार्हि साधु शरव्ये। त्वं अवसृष्टा क्षिप्ता परापत परागच्छ इतो देशात् गत्वा च

अमित्रान्हिंसकान्प्रपद्यस्व प्राप्नुहि वा। अमीषाममित्राणां मध्ये कंचन कंचिदपि मा उच्छिषः। अवशिष्टं मा कुरु॥ ॥अथ षष्ठे
२८३ सूक्ते प्रथमा॥ ॥कंकाः सुपर्णा अनु यंत्वेनान् गृध्राणामन्नमसावस्तु सेना॥ मैषां मोच्यघहारश्च नेंद्र वयांस्येनाननुसंयंतु
सर्वान्॥ अप्रतिरथ ऋषिः। पायुर्भारद्वाजस्त्रिष्टुप्छंदः इंद्रो देवता। कंका नाम पक्षिणः क्रव्यादाः सुपर्णाः शोभनपतनाः अ
नुयंतु एनान् शत्रून् गृध्राणामन्नं पक्षिणां भक्ष्यभूता असौ असुसेना॥ मा एषां मोचि एते षां मा कश्चिन्मुच्यतु॥ अघहारश्चना
। हे इंद्र योपि नितरां पापीयान् अतिप्रत्यवरः सोपि न मुच्यतां॥ मर्त्याः वयांस्येनान् वयांसि पक्षिरूपाणि क्रव्यादादीन् अनु
संयंतु सर्वान् अनुपश्चाल्लयंतु सर्वान् शत्रून्॥ ॥अथ षष्ठसूक्ते द्वितीया॥ अमित्रसेनां मघवन्नस्मांछत्रुयतीमभि। उभौ
तामिंद्र वृत्रहन्नग्निश्च दहतं प्रति॥ अप्रतिरथ ऋषिरग्निर्वा। अनुष्टुप्छंदः। इंद्राग्नी देवते। अमित्रसेनां शत्रुसेनां हे मघवन् २८३
अस्मान् शत्रुयंतीम् अतिशत्रुभिः परिवारितां। उभौ तां सेनां हे इंद्र वृत्रहन् त्वं चाग्निश्च प्रतिदहतं भस्मीकुरुतमित्यर्थः॥

अथ षष्ठसूक्ते तृतीया॥ यत्र बाणाः संपतंति कुमारा विशिखा इव। तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म य
च्छतु॥ अप्रतिरथ ऋषिः पायुर्भारद्वाजः पंक्तिश्छंदः। ब्रह्मणस्पतिरदितिश्च देवता॥ यत्र संग्रामे कुमारा विशिखा इव मुंड
ता इव बाणाः संपतंति तत्र नोस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु। अदितिश्च सर्वदा शर्म यच्छतु इति कारद 795
रार्था॥ ॥अथ सप्तमसूक्ते प्रथमा॥ वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज। वि मन्युमिंद्र वृत्रहन्नमित्रस्याभिदासतः॥ अ
प्रतिरथ ऋषिः शासो भारद्वाजो वा अनुष्टुप्छंदः। इंद्रो देवता॥ हे इंद्र रक्षो राक्षसजातं विजहि विनाशय। मृधः संग्रामकारि
णः शत्रूंश्च विजहि। वृत्रस्यावरकस्यासुरस्य हनू कपोलप्रांतौ विरुज विशेषेण भग्नौ कुरु। हे वृत्रहन् इंद्र अभिदासतः अ
स्मानुपक्षपयतोमित्रस्य शत्रोर्मन्युं क्रोधमपि विनाशय॥ ॥अथ सप्तमसूक्ते द्वितीया॥ वि न इंद्र मृधो जहि नीचा यच्छ
पृतन्यतः। यो अस्माँ अभिदासत्यधरं गमया तमः॥ अप्रतिरथ ऋषिः। अनुष्टुप्छंदः। इंद्रो देवता॥ हे इंद्र नोस्माकं मृ

२८४ धः संग्रामकारिणः शत्रून्विजहि विनाशय। तथा पृतन्यतः पृतनाः सेनाः। सेना आत्मन इच्छतः युयुत्समानान् पिती वायय उ
नीचीन म वाङ् मुखं यथा गमय। यः शत्रुरस्मानभिदासति अभितः उपक्षपयति। तः अध रं निष्ठत मं अधकारं मरणलक्षणं ग
मय प्रापय॥ ॥ अथ सप्तमे सूक्ते तृतीया॥ इंद्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ। तौ युञ्जीत प्रथमौ योग
आगते याभ्यां जितमसुराणां सह्यो महत्॥ अप्रतिरथ ऋषि॥ इंद्रो देवता विराड्गायत्री छंदः॥ इंद्रस्य बाहू स्थविरौ स्थिररूपौ।
अथवा स्थविरौ स्थूलौ। युवानौ तरुण्यावनग्रसितौ॥ अनाधृष्यौ। नाकेनचिद् धृष्येते॥ सुप्रतीकौ। स्वाकृती हस्तिकराकारौ। अस
ह्यौ। न कश्चित् सोढुं शक्तः। तौ युञ्जीत प्रथमौ योजने आगते। योगे संग्रामे यत्र नियुज्यंते वाहवः याभ्यां जितं असुराणां भूतं सहः
बलं महत्॥ ॥ अथाष्टमे सूक्ते प्रथमा॥ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्तां। उरोर्वरीयो वरुणस्ते कृणो २८४
तु जयंतं त्वामनु मदंतु देवाः॥ अप्रतिरथ ऋषिः पायुर्भारद्वाजः त्रिष्टुप् छंदः॥ सोमो वरुणश्च देवता॥ हे राजन् त्वदीयानि मर्मा

णि यपुस्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि वर्मणा कवचेन छादयामि। सोमो राजा त्वा त्वां अनुमर्म छादनानंतरममृतेन वस्तां
आच्छादयतु। किंच। वरुणोपि वं ते तुभ्यं उरोर्वरीयः उरुतरं तुभ्यं सुखं कृणोतु। जयंतं त्वां त्वां देवाः सर्वेपि अनुमदंतु अनुहृष्यंतु॥
अथाष्टमे सूक्ते द्वितीया॥ ॥ अंधा अमित्रा भवताशीर्षाणो अहय इव। तेषां वो अग्निदग्धानामग्निमूढानामिंद्रो हंतु व 791/1973
रं वरं॥ अप्रतिरथ ऋषिः॥ अनुष्टुप् छंदः॥ इंद्रो देवता। हे अमित्राः शत्रवः यूयमंधा भवत। कीदृशा अंधाः। अशीर्षा
णः अहय इव। यथा सर्पाः शीर्षच्छिन्नाः अकिंचित्करा भवंति। तथा भवत। तेषां वः अग्निदग्धानां अग्निदग्धानां शत्रूणां इंद्रो
हंतु। वरं वरं। यो यो वरिष्ठस्तं तं इंद्रो हंतु नाशयतु॥ ॥ अथाष्टमे सूक्ते तृतीया॥ यो नः स्वो अरणो यश्च निष्ट्यो जिघांस
ति॥ देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं शर्म वर्म ममांतरं॥ अप्रतिरथ ऋषिः पंक्तिश्छंदः॥ देवा देवता॥ स्वः स्वो ज्ञातिः अ
रणः अरममाणः। यश्च निष्ट्यः निस्तिरोभूतः दूरस्थितः नोस्मान् जिघांसति हंतुमिच्छति। तं देवाः सर्वे देवाः धूर्वंतु हिंसं

तु। अस्त्मंत्रो मम अंतरं शत्रूणां निवारकं वर्म विद्यते। शर्म च वर्म सन् स्तनभूतेन मम अंतरमस्तु। ॥अथ नवमसूक्ते प्रथमा॥ मृ
२०५. गो न भीमः कुचरो गिरिष्ठाः परावत आ जगंथा परस्याः। सृकं संशाय पविमिंद्र तिग्मं वि शत्रूंताढि वि मृधो नुदस्व॥ अप्रति
रथ ऋषिः ऐंद्रो वा गयः। त्रिष्टुप् छंदः। इंद्रो देवता। कुचरः कुत्सितचरणः गिरिष्ठाः पर्वतनिवासी। मृगो ना सिंह इव। हे इं
द्र त्वं भीमो भयंकरोसि। स त्वं परस्याः परावतः अतिशयेन दूरात् द्युलोकात् आ जगंथ आगच्छ। गमेश्छांदसो लिटि क्रादि
नियमप्राप्तसोडुपदेशेत्वत इति प्रतिषेधः॥ आगत्य च सृकं संसरणशीलं तिग्मं तीक्ष्णं पविं वज्रं संशाय सम्यक् तीक्ष्णी
कृत्य शत्रून् अस्मदीयान् वैरि। हे इंद्र तेन वज्रेण विताढि विशेषेण ताडन विनाशयेत्यर्थः। तड आघाते। अस्मण्यंतात्
लोटि रूपमेतत्। यथा मृधः संग्रामोद्युक्तान् युयुत्सून् अन्यानपि विदुदस्व विशेषेण प्रेरय तिरस्कुरु। ॥अथ नवमसू २०५
क्ते द्वितीया॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं य

दायुः॥ अप्रतिरथ ऋषिः। राहूगण्यो गोतमो वा॥ त्रिष्टुप् छंदः। विश्वे देवा देवता। हे देवाः दातादिगुणयुक्ताः सर्वे देवाः कर्णेभि
रस्मदीयैः श्रोत्रैः भद्रं भजनीयं कल्याणं वचनं शृणुयाम युष्मत्प्रसादात् श्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिद
पि मा भूत्। हे यजत्राः यागेषु चरुपुरोडाशादिभिः यष्टव्या देवाः अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भिर्भद्रं शोभनं पश्येम द्र
ष्टुं समर्थाः स्याम॥ अस्माकं दृष्टिप्रतिघातोपि मा भूत्॥ स्थिरैर्दृढैरंगैर्हस्तपादादिभिरवयवैः तनूभिः शरीरैश्च युक्ता वयं
तुष्टुवांसः युष्मान् स्तुवंतः। यदायुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा देवहितं देवेन प्रजापतिना स्थापितं तद्व्य
श्नोमहि प्राप्नुयाम॥ कर्णेभिः बहुलं छंदसीति भिस ऐस भावः। अक्षभिः छंदस्यपि दृश्यत इत्यनङ्। सचोदात्तः। यजत्राः अमि
नक्षीत्यादिना यजेरत्रन्प्रत्ययः। तुष्टुवांसः ष्टुञ् स्तुतौ। लिटः क्वसुः। शर्पूर्वाः खय इति तकारः शिष्यते। अशो महि। अश्
व्याप्तौ लिङ्याशिष्यङ्। यादित्तु तत्र परिगणनं अन्यथा व्याप्त्यर्थे तदानीं लिङ् प्रत्ययेन भाव्य। देवाहृतं तत्तृतीया कर्मणीति प्र

र्वपदप्रकृतिस्वरत्वं॥ ॥अथनवमेसूक्तेतृतीया॥ स्वस्तिन इंद्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योअरिष्ट
२८६. ।नेमिः स्वस्तिनोबृहस्पतिर्दधातु॥ अप्रतिरथऋषिः राहूगणोगोतमोवा॥ स्वराट्त्रिष्टुप्छंदः॥ विश्वेदेवादेवता॥ वृद्धश्रवाः वृ
द्धंप्रभूतंश्रवःश्रवणंस्तोत्रंहविर्लक्षणमन्नंवायस्यतादृशइंद्रोनोस्माकंस्वस्तीत्यविनाशनामस्वस्तिअविनाशंदधातु।
विदधातुकरोतु॥ विश्ववेदाः॥ विश्वानिवेत्तीतिविश्ववेदाः। यद्वाविश्वानिसर्वाणिवेदांसिज्ञानानिधनानिवायस्यतादृशः
।पूषापोषकोदेवः नोस्माकंस्वस्तिविदधातु। अरिष्टनेमिः॥ नेमिरित्यायुधनाम॥ अरिष्टोअहिंसितोनेमिर्यस्यायद्वारथस्य
चक्रस्यधारानेमिः। यदीयसंबंधिनोरथनेमिर्नहिंस्यतेसोरिष्टनेमिः॥ एवंभूतस्तार्क्ष्यः। तृक्षस्यपुत्रोगरुत्मान्नोस्माकंस्वस्ति
अविनाशंविदधातु। तथाबृहस्पतिः॥ बृहतांदेवानांपालयितानोस्माकंस्वस्तिअविनाशंविदधातु। वृद्धश्रवाः बहुव्रीहौ २८६
पूर्वपदप्रकृतिस्वरत्वं। विश्ववेदाः॥ विदज्ञानेविद्लृलाभे। असुन्प्रत्ययांतोवेदसशब्दः॥ बहुव्रीहौविश्वंसंज्ञायामितिपू

र्वपदांतोदात्तत्वं। तार्क्ष्यः तृक्षस्यापत्यम्॥ गर्गादिभ्योयञ्। ञित्वादाद्युदात्तत्वं। अरिष्टनेमिः॥ नरिष्टाअरिष्टा॥ अव्ययपूर्वप
दप्रकृतिस्वरत्वं। अरिष्टानेमिर्यस्यसतथोक्तः। बृहस्पतिः॥ तद्बृहतोःकरपत्योरितिसुट्तलोपौ॥ उभेवनस्पत्यादिषुयुगपदितिपूर्वो
त्तरपदयोर्युगपत्प्रकृतिस्वरत्वं॥ ॥७॥ इत्येकविंशेध्यायेप्रथमःखंडः॥ ॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थां 799
श्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥ इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरं 1573
धरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेएकविंशोध्यायःसमाप्तोयम्॥ ॥ ॥

801
1973

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

802
1973

॥ इतिसामभाष्यउत्तरछंदसिसमाप्तं ॥ ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY